।। कोबातीर्थमंडन श्री महावीरस्वामिने नमः ।।

।। अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ।।

।। गणधर भगवंत श्री सुधर्मास्वामिने नमः ।।

।। योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ।।

।। चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ।।

# आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

## पुनितप्रेरणा व आशीर्वाद

## राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

## जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

**श्री महावीर जैन आराधना केन्द्र**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
**Websiet :** www.kobatirth.org
**Email :** Kendra@kobatirth.org

**शहर शाखा**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

# गोभिलीयगृह्यकर्मप्रकाशिका

## नित्याह्निक-मासश्राद्धैकोद्दिष्टश्राद्ध-मण्डपपूजादिप्रयोगसहिता ।

श्रीमद्राजाधिराजश्रौतस्मार्त्तानुष्ठानतत्परोदयप्रता-
पाद्यादत्तदेवशर्मसोमयाजिनो निदेशेन
सुब्रह्मण्यविदुषा विरचिता ।

काश्याम्
मेडिकल् हाल् नामक यन्त्रालये मुद्रिता ।

एतदङ्कनकार्यसम्पादकः ।

भिन्गाराजवराश्रितो विनयवान्धीमान्सदाचारवान्
रामानन्द इतिव्युपाधिविदितानन्ताग्निहोत्र्यात्मजः ।
चक्रे श्रीपुरुषोत्तमः प्रभुमुदे सम्यग्विविच्याङ्कनम्
चेदस्मिन्स्वरवर्णजं यदधिकं न्यूनं च शोध्यं बुधैः ॥

विक्रमाब्दे १९४३ ई० १८८६ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

PRINTED BY E. J. LAZARUS & CO.,
AT THE MEDICAL HALL PRESS, BENARES.

For Private And Personal

# गोभिलीयगृह्यकर्मप्रकाशिकानुक्रमणिका ।


| विषयाः | पृष्ठे | पं० |
|---|---|---|
| मङ्गलाचरणम् | १ | १ |
| सकलकर्मपरिभाषा | १ | ११ |
| दर्शपूर्णमासयोः कालः | ३ | १८ |
| पात्रलक्षणम् | ४ | ८ |
| अन्नप्रमाणानि | ४ | १५ |
| अथेध्मप्रमाणम् | ५ | १६ |
| समिल्लक्षणम् | ५ | १९ |
| अथ पवित्रलक्षणम् | ६ | ५ |
| पिञ्जूल्यालक्षणम् | ६ | ७ |
| अथ त्रिप्रहोमलक्षणम् | ६ | ९ |
| अथ प्रायश्चित्तप्रमाणम् | ६ | १२ |
| अथ यागपूर्वदिने दम्पत्योर्नियमाः | ६ | १५ |
| अथ प्रयोगः | ७ | १५ |
| स्थालीपाके विशेषविचाराः | १५ | ४ |
| ऋत्विक्सङ्ख्यादक्षिणादानादि | १८ | १३ |
| सायम्प्रातर्होमादीनां मुख्यकाले उक्तद्रव्यालाभे तत्प्रतिनिधयः | १८ | २२ |
| सायम्प्रातर्होमयोर्गौणकालः | १९ | ४ |
| अथ गोभिलोक्तप्रायश्चित्तम् | १९ | १२ |
| अथ परिशिष्टोक्तप्रायश्चित्तानि | २० | १ |
| अथ वैश्वानरस्थालीपाकप्रयोगः | २० | १६ |
| नवयज्ञादीनां लोपे | २० | २१ |
| विविचिस्थालीपाकः | २१ | १ |
| स्थालीपाकस्थाने पूर्णाहुतिः | २१ | ६ |
| यजमानस्य प्रवासे पत्न्या कर्तव्यम् | २१ | १३ |
| स्वाहाकारे होमः | २१ | १८ |
| उपघातहोमलक्षणम् | २१ | २१ |
| पुंसवनादिषु व्याहृतित्रयहोमः | २२ | ५ |
| स्थालीपाकपदार्थक्रमः | २२ | १० |
| अथाज्यतन्त्रपदार्थक्रमः | २३ | ८ |
| अथाधानकालनिर्णयः | २३ | १७ |
| ज्येष्ठकनिष्ठयोराधानकालः | २४ | २० |
| प्रमादादिनाऽकृताधानश्चेत्तत्प्रायश्चित्तम् | २५ | ४ |
| प्राजापत्यादिकृच्छ्राचरणम् | २५ | १९ |
| विच्छिन्नाधानेऽसोमहोमद्रव्यदानम् | २६ | १ |
| अथाधानप्रयोगः | २६ | ६ |
| कुण्डनिर्माणम् | २६ | ११ |
| अहतवासोलक्षणम् | २६ | १८ |
| अथारण्योर्लक्षणम् | २६ | २० |
| प्रमन्थोविलीमन्थनरज्जूनां लक्षणम् | २७ | ५ |
| अनुगुप्ताप्लक्षणम् | २७ | १४ |
| मन्थनकालः | २७ | १७ |
| देवयोनिलक्षणम् | २७ | १९ |
| मन्थनप्रकारः | २७ | २३ |
| कुण्डसंस्कारः | २८ | ७ |
| रेखाप्रमाणम् | २८ | १० |
| पूर्णाहुतिः | २९ | १२ |
| आहरणपक्षे | २९ | २२ |
| पितरि मृते एकादशेऽह्नि | ३० | ३ |
| अन्यक्षेमिदाधानकालिकाधाने | ३० | ७ |
| विवाहकालिकाधाने | ३० | ११ |
| अथ विच्छिन्नाधानप्रयोगः | ३० | १५ |
| उपस्थानमन्त्राः | ३१ | १६ |
| अथ सायंप्रातरौपासनहोमः | ३५ | १२ |
| अनुगतप्रायश्चित्तम् | ३८ | ९ |
| प्रादुष्करणकालातिक्रमे | ३८ | १६ |
| पुनराधाने निमित्तान्तरम् | ३८ | १८ |
| समारोपणप्रकारः | ३९ | १ |
| प्रत्यवरोहणम् | ३९ | ९ |
| यज्ञोपवीतकरणम् | ३९ | १५ |
| धारणप्रकारः | ४० | ७ |
| प्राचीनावीतिलक्षणम् | ४० | १५ |
| अथाचमनविधिः | ४० | १७ |
| सायम्प्रातर्वैश्वदेवप्रयोगः | ४१ | १७ |
| बलिहरणम् | ४२ | १२ |
| यजमानस्य प्रवासादौ | ४३ | १५ |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir




| विषयाः | पृष्ठे | पं० |
|---|---|---|
| बालवृद्धातुरादिविषये | ४३ | १९ |
| उपवासदिनेऽपि | ४३ | २० |
| वैश्वदेवाख्यप्रयोगः | ४४ | २ |
| अथ विवाहः | ४४ | १९ |
| कन्यायाः शुभाशुभपरीक्षा | ४५ | २ |
| वाग्दानप्रयोगः | ४५ | २१ |
| कन्यास्नापनम् | ४६ | १३ |
| कन्यादानप्रयोगः | ४७ | ४ |
| विवाहप्रयोगः | ४८ | ६ |
| उत्तरविवाहः | ५६ | १२ |
| औपासनहोमारम्भः | ५९ | १० |
| समशनीयस्थालीपाकः | ६० | १ |
| वध्वा रथारोहणे | ६१ | ७ |
| वरवध्वोर्मार्गगमने मार्गे व्याघ्रादिभये जपः | ६१ | १२ |
| रथचक्रस्य भङ्गे | ६१ | १७ |
| धृतिहोमः | ६२ | १७ |
| अथ चतुर्थीकर्मप्रयोगः | ६३ | ८ |
| विवाहादिषु पूर्णाहुतिनिषेधः | ६४ | १२ |
| विवाहानन्तरमागामिपौर्णमास्यां स्थालीपाकारम्भः | ६४ | १५ |
| अथ गर्भाधानप्रयोगः | ६४ | २० |
| पुंसवनकालातिपत्तौ प्रायश्चित्तम् | ६५ | १८ |
| पुंसवनप्रयोगः | ६६ | ३ |
| शुङ्गाख्यं पुंसवनम् | ६६ | २० |
| सीमन्तोन्नयनप्रयोगः | ६८ | १० |
| प्रथमद्वितीयादिगर्भे सीमन्तोन्नयनविचारः | ७० | १६ |
| अथ सोष्यन्तीहोमः | ७१ | १० |
| जातकर्मप्रयोगः | ७२ | ४ |
| अथ सर्पिःप्राशनप्रयोगः | ७२ | १५ |
| जातकर्मणि नान्दीश्राद्धविचारः | ७३ | ६ |
| अशौचपाते निर्णयः | ७३ | १० |
| चन्द्रदर्शनप्रयोगः | ७५ | ६ |
| अथ नामकरणप्रयोगः | ७६ | १२ |
| नामलक्षणसूत्रम् | ७९ | ३ |
| अथ कुमारस्य श्रेयस्काराग्नीन्द्रादिदेवतायागप्रयोगः | ७९ | १५ |

| विषयाः | पृष्ठे | पं० |
|---|---|---|
| अथ प्रवासादागतस्य पितुः कृत्यम् | ८० | १० |
| अथ चूडाकरणप्रयोगः | ८१ | १ |
| यदि कुमारस्य स्वस्वकाले जातकर्मादीन्यननुष्ठितानि तत्र प्रायश्चित्तम् | ८३ | २० |
| अथोपनयनप्रयोगः | ८४ | १९ |
| उपनेतृत्वाधिकारार्थं प्रायश्चित्तम् | ८५ | ५ |
| कामचारादिप्रायश्चित्तम् | ८५ | ७ |
| ब्राह्मणादेर्वस्त्रादिकम् | ८६ | ९ |
| अभिवादनीयनामकल्पनम् | ८८ | १३ |
| अथोपनीतस्य माध्याह्नसन्ध्योपक्रमः | ९३ | ७ |
| समिदाधानप्रयोगः | ९३ | १५ |
| अथ सावित्रचरुप्रयोगः | ९४ | ७ |
| अथ गोदानव्रतप्रयोगः | ९५ | ३ |
| अथ गोदानाङ्गोपनयनम् | ९५ | १६ |
| अथ व्रातिकव्रतप्रयोगः | ९६ | १४ |
| अथादित्यव्रतप्रयोगः | ९६ | २१ |
| अथौपनिषदव्रतप्रयोगः | ९७ | ९ |
| अथ ज्येष्ठसामिकव्रतप्रयोगः | ९७ | १६ |
| महानाम्निकप्रयोगः | ९८ | ७ |
| ज्येष्ठसाम्नामध्यापनं | १०१ | ३ |
| अथोपाकर्म | १०१ | ११ |
| अथ प्रयोगः | १०१ | २२ |
| वंशीयानामृषीणां तर्पणम् | १११ | ५ |
| उपाकरणं कृत्वाऽनध्यायाः | १२२ | ४ |
| उत्सर्जनप्रयोगः | १२२ | १२ |
| अथानध्याया उच्यन्ते | १२३ | १४ |
| अथ नैमित्तिकप्रायश्चित्तानि | १२४ | ४ |
| कौथुमीयानां द्विपञ्चाशदन्याः | १२५ | ८ |
| ब्रह्मचर्यव्रतान्तस्नानम् | १२६ | १ |
| अथ ब्रह्मचारिव्रतलोपप्रायश्चित्तम् | १२६ | २१ |
| अथ स्नानप्रयोगः | १३२ | १५ |
| अथ स्नातकव्रतानि | १३३ | १३ |
| अथ गोपुष्टिप्रदकाम्यकर्माणि | १३४ | १७ |
| अथ गवां प्रसवसमये पुष्टिप्रदपलेप्यभक्षणप्रयोगः | १३४ | ९ |


For Private And Personal

| विषयाः | पृष्ठे | पं० |
|---|---|---|
| अथ गोपुष्ट्यर्थं विलयनहोमः | १३४ | १९ |
| अथ वत्समिथुनयोर्लक्षणम् | १३५ | ९ |
| अथ गोयज्ञप्रयोगः | १३६ | १६ |
| अथाश्वयज्ञप्रयोगः | १३७ | ९ |
| अथ श्रवणाकर्मप्रयोगः | १३८ | १ |
| सर्पबलिः | १४१ | १९ |
| अथाश्वयुजीकर्म | १४२ | १४ |
| पृषातकभक्षणे विचारः | १४४ | ९ |
| अथ नवयज्ञप्रयोगः | १४५ | १२ |
| अथाग्रहायणीप्रयोगः | १४८ | ९ |
| अथ स्वस्तरारोहणप्रयोगः | १५० | १३ |
| अथाष्टकाप्रयोगः | १५१ | १८ |
| अथ मध्यमाष्टका | १५३ | १४ |
| छागस्याप्यसम्भवेस्थालीपाकः | १५९ | ९ |
| अथान्वष्टक्यप्रयोगः | १६१ | ४ |
| अथ नान्दीमुखश्राद्धप्रयोगः | १६९ | १७ |
| अथ पिण्डपितृयज्ञप्रयोगः | १६९ | २२ |
| अथ शाकाष्टकाप्रयोगः | १७१ | १३ |
| अथ प्रसङ्गाद्वपाहोममन्त्रः | १७१ | १९ |
| अथ ऋणानिवृत्तिप्रयोगः | १७२ | १४ |
| अथ हलाभियोगप्रयोगः | १७२ | २२ |
| अथैन्द्राणीस्थालीपाकप्रयोगः | १७४ | ७ |
| अत ऊर्ध्वं काम्यकर्मसु विधयः | १७४ | १७ |
| स्थण्डिलकरणप्रकारः | १७५ | ४ |
| परिसमूहनम् | १७५ | १० |
| प्रपदवैरूपाक्षजपः | १७५ | २२ |
| अथ काम्यकर्मविशेषाः | १७७ | ७ |
| अथ पशुस्वस्त्ययनकर्म | १७८ | १३ |
| अथ परचित्तप्रसादककरकर्म | १७८ | ३ |
| अथ वृत्तदूर्वेतिपञ्चवर्गप्रयोगः | १७९ | १२ |
| अथ भोगार्थं कर्म | १७९ | ९ |
| अथ बृहत्पत्रस्वस्त्ययनप्रयोगः | १८९ | १४ |
| अथ क्षुद्रपशुस्वस्त्ययनप्रयोगः | १८० | १ |
| अथ स्वस्त्यर्थकर्म | १८० | ८ |
| अथ प्रवासाद्गृहागमनप्रयोगः | १८० | १४ |
| अथानकाममारकर्म | १८० | १९ |
| अथालक्ष्मीनिर्णोदहोमः | १८१ | १५ |
| अथ यशस्कामोपस्थानम् | १८२ | २१ |
| अथ स्वस्त्ययनकरोपस्थानम् | १८३ | २४ |
| अथाचितशतकामप्रयोगः | १८४ | ६ |
| अथ वास्तोष्पतियज्ञः | १८४ | १६ |
| ततःप्रतिदिनं काम्यबलिः | १८८ | ५ |
| अथ स्वस्त्ययनकर्म | १८८ | ११ |
| अथ प्रसादककरकर्मोच्यते | १८९ | १८ |
| अथैकाक्षर्य्यायामृचि चत्वारि कर्माणि | १९० | १० |
| अथ वधकामस्य वधकरकर्म | १९१ | ३ |
| अथ ग्रामकामस्यामोघनामकं कर्म | १९१ | ७ |
| ततोवृत्त्यविच्छित्तिकामस्य वृत्तिप्रदकर्म | १९२ | १८ |
| अथ सम्पदर्थं पर्वहोमप्रयोगः | १९२ | ६ |
| अथ पर्ववस्त्रप्राप्त्यर्थं तन्तुहोमः | १९२ | १६ |
| ततो यशस्कामस्य सहायकामस्य पूर्णहोमः | १९२ | १९ |
| अथ पुरुषाधिपत्यकामस्याधिपत्यप्रदकर्म | १९३ | ९ |
| अथ पशुकामस्य पशुप्रदप्रयोगः | १९४ | ५ |
| अथ गोषु तप्यमानासु तत्तापशान्तये होमः | १९४ | ९ |
| अथ स्वस्त्ययनग्रन्थिकरणप्रयोगः | १९४ | १५ |
| अथाचितकामस्याक्षतसक्त्वाहुतिप्रयोगः | १९४ | २१ |
| ततो गवाश्वमहिषादिपशुकामस्य गोमयहोमः | १९५ | ३ |
| अथ क्षुद्रपशुकामस्याविपुरीषहोमः | १९५ | १० |
| अथ वृत्त्यविच्छित्तिकामस्यकम्बूकहोमः | १९५ | १३ |
| अथ विषनिवृत्तिजपप्रयोगः | १९६ | १ |
| अथ स्नातकस्य स्वस्त्ययनप्रयोगः | १९६ | ८ |
| अथ कृमिचिकित्साजपः | १९७ | १५ |
| अथ पशूनां कृमिनिवर्तनजपः | १९७ | ९ |
| अथ मधुपर्कप्रयोगः | १९७ | १५ |


इत्यनुक्रमणिका समाप्ता ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ श्रीगणेशाय नमः ॥

# गोभिलीयगृह्यकर्मप्रकाशिका ।

॥ ॐ ॥

यतो जातमिदं दृश्यं यस्मिन्नेव प्रतिष्ठितम् ।
यस्मिन्विलीयते सत्ये तं वन्दे परमेश्वरम् ॥ १ ॥
श्रीमान्सर्वजिदाख्यभूपतनुजश्रीकृष्णदत्तात्मजो
ह्यग्निष्टोममखादिदीक्षणयुतश्श्रीवत्सगोत्रोद्भवः ।
सामाम्नायगकौथुमीस्थमनुभिः कर्माणि कुर्वन्मुदा
ज्ञात्वा गोभिलगृह्यसूत्रनिचयैर्विश्वेनवंशोद्भवः ॥ २ ॥
सरय्वा उत्तरे देशे भिनगानगरोत्तमम् ।
राजते तत्र भूपेन्द्रो वेदमार्गेषु तत्परः ॥ ३ ॥
तेनाज्ञप्तो गोभिलीयगृह्यकर्मप्रकाशिकाम् ।
कुरुते बालबोधाय सुधीस्सूत्रानुसारिणीम् ॥ ४ ॥

तत्रादौ सकलकर्मपरिभाषा ॥ कर्माणि यज्ञोपवीतिना कृताचमनेन कर्त्तव्यानि, पैतृकाणि प्राचीनावीतिना, मानुषाणि निवीतिना । कर्त्तव्यानीति तु तत्रतत्र वक्ष्यामः । सर्वेषां कर्मणामनुष्ठानमुत्तरायणे पूर्वपक्षे पुण्यनक्षत्रे पुण्यदिने मध्याह्नात्पूर्वं विशेषकालानुक्तौ । येषां तु कर्मणामनुष्ठानं दक्षिणायनेऽपरपक्षेऽपराह्णे सायं रात्रौ वा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



भवति तानि वक्ष्यामः । यत्र दिङ् नोपदिश्यते, तानि कर्माणि प्राङ्मुख उदङ्मुख ईशानमुखो वा कुर्य्यात् । तिष्ठन्नासीनः प्रह्वो वेति नियमो नोपदिश्यते, तदासीनः कुर्यात् । यत्र कर्मकर्त्तुरङ्गोपदेशो न, तत्र दक्षिणमङ्गं विजानीयात् । बद्धशिखः पवित्रपाणिः कृतप्राणायामो देशकालौ सङ्कीर्त्त्य कर्म कुर्यात् । एकवासा न कुर्यात् । शूद्र-चाण्डाल-पतित-पङ्क्तिच्युत-वेदस्मृतिपथाननुयायिब्राह्मणैर्मन्त्रश्रवणे कर्म न कुर्यात् । पितृमन्त्रपठने, आत्मालम्भे, ऽधमदर्शने, ऽधोवायुविसर्गे, प्रहासे, ऽनृतभाषणे, मार्जारमूषकस्पर्शे, आक्रुष्टे, क्रोधसम्भवे, रौद्राराक्षसासुराभिचारमन्त्रपठने, छेदने, भेदने, निरसने, ऽप उपस्पृशेत् । मन्त्रदेवतानुक्तौ प्रजापतिर्देवता । होमद्रव्यानुक्तावाज्यम् । व्यजनादिनाऽग्निधमनं न कुर्यात् । किन्तु धमन्यादिना । विशिष्य दक्षिणानुक्तौ पूर्णपात्रं दक्षिणा । अन्तर्जानुः सर्वं कर्म कुर्यात् । सर्वकर्मस्वन्ते वामदेव्यं गायेत् । सर्वेषु कर्मसु दक्षिणादानमाभ्युदयिकश्राद्धं, कर्मसमाप्तौ यथाशक्ति ब्राह्मणभोजनञ्च कर्त्तव्यम् । नच सूत्रकारेण दक्षिणादानमाभ्युदयिकश्राद्धञ्च नोक्तमिति वाच्यम्, "सर्वाण्येवान्वाहार्य्यवन्ति" इति सूत्रेणोक्तत्वात् । सूत्रेऽन्वाहार्य्यशब्दो दक्षिणावाचक आभ्युदयिकश्राद्धवाचकश्च । तथा चायमर्थः । सर्वाणि कर्माण्यन्वाहार्य्यवन्ति दक्षिणाभ्युदयिकश्राद्धयुक्तानीति । "तदुक्तं 'गृह्यासङ्ग्रहे' । यच्छ्राद्धं कर्मणामादौ या चान्ते दक्षिणा भवेत् । आमावास्यं द्वितीयं यदन्वाहार्य्यं तदुच्यते" ॥ नचैकेनोभयविधानमयुक्तं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वाक्यभेदप्रसङ्गादिति वाच्यम्, सति प्रमाणे वाक्यभेदस्येष्टत्वात् । अस्ति प्रमाणमत्रैव चतुर्थप्रपाठके "वृद्धिपूर्त्तेषु युग्मा नाशयेत्प्रदक्षिणमुपचारा यवैस्तिलार्थ" इति । अस्यार्थः । वृद्धिर्जातकर्मादिका, पूर्त्तानि शान्तिपौष्टिकदेवतास्थापनादीनि, तेषु कर्मस्वादौ प्रकृतत्वात्पितृर्थं युग्मान् ब्राह्मणान् भोजयेत् आसनाद्युपचाराः प्रादक्षिण्येन कर्त्तव्यास्तिलार्थे यवैरेतत्सर्वमाभ्युदयिकश्राद्धे प्रसिद्धम् ॥ यद्यस्मिन् गृह्यसूत्रे आभ्युदयिक श्राद्धविधानं न स्यात्, युग्मब्राह्मणभोजनविधानं निर्विषयमेव स्यात्, तस्मात्पूर्वेद्युराभ्युदयिकश्राद्धविधानमङ्गीकार्यम् । वस्तुतस्त्वन्वाहार्यशब्देनाभ्युदयिकश्राद्धं विधीयते, नतु दक्षिणा । तस्यास्तत्रतत्र विशिष्योक्तत्वादनुक्तस्थले प्राकृतान्वाहार्य्यदक्षिणाया अतिदेशेन सिद्धत्वात्, तस्मात्कर्मादावाभ्युदयिकश्राद्धविधानमेव । तत्प्रयोगमन्यच्च वक्ष्यामः ॥

अथादौ सूत्रे ऽग्न्याधानप्रयोग उक्तः, तस्य चाज्यसंस्काराद्यङ्गकर्मसापेक्षत्वात्तेषां दर्शपूर्णमासस्थालीपाकप्रकरणे सूत्रकृता साकल्येनोक्तत्वात्तस्यैवाज्यचरुहोमप्रकृतित्वादाधानप्रयोगं विहाय दर्शपूर्णमासस्थालीपाकप्रयोगो विरच्यते ॥ दर्शपौर्णमासयोः कालः पर्वप्रतिपदोः सन्धिस्तत्र यागः । पूर्वदिने सङ्कल्पादिकमन्वाधानं कर्म । यदाऽहोरात्रव्यापिनी पौर्णमास्यमावास्या वा तद्दिनेऽन्वाधानं परेद्युर्यागः । यदा रात्रौ पर्वसन्धिस्तदा सन्धिकाले यागस्यासम्भवात्सन्धिमद्दिने पूर्वाह्णेऽन्वाधानं परेद्युर्यागः । यदा दिवा पर्वप्रतिपदोः सन्धिस्तदा त्वेवं नि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



र्णयः । पर्वपुच्छघटिकाः प्रतिपत्पुच्छघटिकाश्च संयोज्य ताश्च दिवाप्रमाणघटिकापेक्षयाऽधिकाश्चेत्पुच्छपर्वण्यन्वाधानं, पुच्छप्रतिपदि यागः । दिवाप्रमाणघटिकापेक्षया न्यूनाश्चेच्चतुर्दश्यामन्वाधानं, पुच्छपर्वणि यागः । यदा दिवाप्रमाणघटिकासमास्तदा चतुर्दश्यामन्वाधानं, पुच्छपर्वणि यागः । तदेतत्सर्वं प्राचीनग्रन्थे स्पष्टम् । बोधायनकात्यायनाश्वलायनानां यागकालोऽप्रकृतत्वान्नोक्तः । पिण्डपितृयज्ञस्य कालं तत्प्रयोगे वक्ष्यामः ॥ तत्रादौ पात्रलक्षणं प्रासङ्गिकमन्यदप्युच्यते ॥ स्रुवोऽरत्निमात्रो, बाहुमात्रा पालाशी स्रुक् । खादिरः स्रुवो द्व्यङ्गुष्ठपरिमितबिलो घ्राणवत्कृतमर्यादः । इध्मसजातीयनिर्मितेध्मार्द्धप्रमाणाङ्गुष्ठपृथ्वग्रं हविरवदानसमर्थं काष्ठं मेक्षणमुच्यते । मेक्षणसजातीयद्व्यङ्गुलपृथ्वग्रा दर्वी । वैणवश्शूर्पः । यज्ञियवृक्षनिर्मितमवहननसमर्थमुलूखलं मुसलञ्च । वैकङ्कतमयो यज्ञियवृक्षजो वा प्रादेशदीर्घश्चतुरङ्गुलविस्तृतस्त्र्यङ्गुलचतुरङ्गुलोर्द्धो वा त्वग्बिलश्चमसः ॥ "अत्र प्रमाणानि 'कर्मप्रदीपे' ॥ खादिरो वाऽथ पालाशो द्विवितस्तिः स्रुवः स्मृतः । स्रुग्बाहुमात्रा विज्ञेया वृत्तस्तु प्रग्रहस्तयोः ॥ स्रुवाग्रे घ्राणवत्खातं द्व्यङ्गुष्ठपरिमण्डलम् । इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत् ॥ वृत्तं चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षमम् । एषैव दर्वी यस्तत्र विशेषस्तमहं ब्रुवे ॥ दर्वी द्व्यङ्गुलपृथ्वग्रा तुरीयोनं तु मेक्षणम्" ॥ गृह्यासङ्ग्रहेऽपि ॥ "खादिरोऽरत्निदीर्घः स्यात् स्रुवोऽङ्गुष्ठपर्ववृत्तः । पार्णी स्रुचं बाहुमात्रीं पाणितलाकारपुष्कलाम् ॥ त्वग्बिलां त्वग्रे कुर्वीत

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मेक्षणं स्रुक्स्रुवादिवत्" ॥ "आज्यस्थाल्या लक्षणं 'कर्मप्रदीपे'। आज्यस्थाली च कर्त्तव्या तैजसद्रव्यसम्भवा। महीमयी वा कर्त्तव्या सर्वास्वाज्याहुतीषु च ॥ आज्यस्थाल्याः प्रमाणं तु यथाकामं तु कारयेत्। सुदृढामव्रणां भद्रामाज्यस्थालीं प्रचक्षते"॥ चरुस्थाल्या लक्षणं तत्रैव ॥ "तिर्य्यगूर्द्ध्वं समिन्मात्रा दृढा नातिबृहन्मुखी। मृन्मय्यौदुम्बरी वापि चरुस्थाली प्रशस्यते॥ औदुम्बरी ताम्रमयी-त्यर्थः॥ मुसलोलूखले वार्क्षे स्वायते सुदृढे तथा । इच्छाप्रमाणे भवतः शूर्पं वैणवमेव च" ॥ "चमसलक्षणं 'कातीययज्ञपार्श्वाख्यपरिशिष्टे'। चमसानां तु वक्ष्यामि दण्डाः स्युश्चतुरङ्गुलाः। त्र्यङ्गुलस्तु भवेत्कन्धो विस्तारश्चतुरङ्गुलः ॥ विकङ्कतमयाः श्लक्ष्णास्त्वग्बिलाश्चमसाः स्मृताः । अन्येभ्यो वाऽपि वा कार्य्यास्तेषां दण्डेषु लक्षणम्" ॥ अन्यत्रापि। "तच्छाखाश्चमसा दीर्घाः प्रादेशाश्चतुरङ्गुलाः। तथैवोत्सेधतो ज्ञेयाश्चतुरस्रास्त इत्यपि"॥ "दारुमयपात्रनाशे विशेषः 'कर्मप्रदीपे'॥ विनष्टं स्रुक्स्रुवं न्युब्जं प्रत्यक्स्थलमुदर्च्चिषि । प्रत्यगग्रञ्च मुसलं प्रहरेज्जातवेदसि" ॥ अथेध्मप्रमाणं ॥ "प्रादेशद्वयमिध्मस्य प्रमाणं परिकीर्तितम् । एवं विधाभिरेवेह समिद्भिः सर्वकर्मसु ॥ समिधोऽष्टादशेध्मस्य प्रवदन्ति मनीषिणः । दर्शे च पौर्णमासे च क्रियास्वन्यासु विंशतिः" ॥ समिल्लक्षणमपि तत्रैव ॥ "नाङ्गुष्ठादधिका ग्राह्या समित्स्थूलतया क्वचित् । न वियुक्ता त्वचा चैव न सकीटा न पाटिता॥ प्रादेशान्नाधिका नोना न तथा स्याद्विशाखिका। न सपर्णा न निर्वीर्या होमेषु च विजानता ॥ समिदादिषु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



होमेषु मन्त्रदैवतवर्जिता । पुरस्ताच्चोपरिष्टाच्च होन्धनार्था समिद्भवेत्" ॥ तत्रैव कर्मविशेषे इध्मनिषेधः ॥ "अङ्गहोमसमित्तन्त्रसोष्यन्त्याख्येषु कर्मसु । येषां चैतदुपर्य्युक्तं तेषु तत्सदृशेषु च ॥ अक्षभङ्गादिविपदि जलहोमादिकर्मणि । सोमाहुतिषु सर्वासु नैतेष्विध्मो विधीयते" ॥ अथ पवित्रलक्षणं तत्रैव ॥ "अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च । प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥ एतदेव हि पिञ्जल्या लक्षणं समुदाहृतम् । आज्यस्योत्पवनार्थं यत्तदप्येतावदेव तु" ॥ अथ क्षिप्रहोमलक्षणं । "एकसाध्येष्वबर्हिष्षु न स्यात्परिसमूहनम् । नोदगासादनं चैव क्षिप्रहोमा हि ते मताः ॥ न कुर्यात्क्षिप्रहोमेषु द्विजः परिसमूहनम् । वैरूपाक्षं च न जपेत्प्रपदञ्च विवर्जयेत्" ॥ अथ प्रायश्चित्तप्रमाणम् ॥ "यत्र व्याहृतिभिर्होमः प्रायश्चित्तात्मको भवेत् । चतस्रस्तत्र विज्ञेयास्त्रीपाणिग्रहणे यथा ॥ अपिवान्नातमित्येषा प्राजापत्याऽपि वाऽऽहुतिः । होतव्या त्रिर्विकल्पोऽयं प्रायश्चित्तविधिस्स्मृतः" ॥ अथ यागपूर्वदिनेऽमावास्यायां पूर्णमास्याञ्च दम्पत्योर्नियमाः कथ्यन्ते ॥ यजमानस्य प्रवासनिषेधः । स्वयं होमार्थं प्रवासादवश्यं गृहागमनं कर्त्तव्यम् । स्वद्रव्यविक्रयनिषेधः । बहुलौकिकभाषणनिषेधश्च । सत्यस्यैव वदनम् । अपराह्णे पुनः स्नानादिकम् । दर्शे पिण्डपितृयज्ञो वक्ष्यते । तदैव दम्पत्योर्भोजनम् । रात्रिभोजननिषेधः । मधु-मांस-लवण-क्षार-माष-कोद्रवादिनिषिद्धद्रव्यभोजननिषेधश्च । घृत-दधि-क्षीर-फलौदनादिभिस्तृप्तिपर्य्यन्तं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



भोजनम् । विहितपदार्थभोजनस्येश्वरत्वाद्योधुकत्व-सर्वकाम्यत्व-प्रजापश्वादिप्राप्तिः फलम् ॥ 'भोजनत्यागे उक्तविपरीतफलं' इति माननन्तभ्येनर्षिणोक्तम् ॥ दम्पत्योरधश्शयनं जागरणञ्च। तदर्थं पुण्यकथाश्रवणं कथनं वा। स्मरण-कीर्त्तन-केलि-प्रेक्षण-गुह्यभाषण-सङ्कल्पाध्यवसाय-शुक्रोत्सर्ज्जनात्मकाष्टविधमैथुननिषेधः। एतदेव ब्रह्मचर्य्यं गृहस्थस्य। "गृहे पत्न्या स्थालीपाकेऽनुष्ठीयमाने ग्रामान्तरस्थस्य यजमानस्य नोपवास" इति केषाञ्चिन्मतम। एते नियमा आहिताग्निनाऽप्यनुष्ठेयाः। अन्येऽपि नियमविशेषा अध्वर्युशाखाप्रतिपादिता ग्राह्याः। तदुक्तं गोभिलेन। "यश्चाम्नाये विदध्यात्" इति ॥ अस्य भाष्यम् ॥ अध्वर्यु-प्रत्ययत्वादग्निहोत्रस्य तदाम्नायं विहितं स्यादिति समुच्चयार्थमिदमुक्तमिति। अक्षरार्थस्तु यं च पदार्थजातमाम्नायोऽध्वर्य्युशाखा विदध्याद्विधानं कुर्यात्तमपि गृह्णीयादिति विशेषः। चकारः स्वशाखोदितकर्मसमुच्चयार्थः ॥ अथ प्रयोगः ॥ तत्रान्वाधानदिने प्रातः कृतनित्यक्रियः प्रातरौपासनं विधाय, कुशेष्वासीनो दक्षिणहस्तानामिकया ब्रह्मग्रन्थियुक्तं कुशपवित्रं कुशांश्च धारयमाणः पत्न्या सह प्राणानायम्य सङ्कल्पं करोति। देशकालौ सङ्कीर्त्य ममोपात्तसमस्तदुरितक्षयद्वारा परमेश्वरप्रीत्यर्थं पौर्णमासस्थालीपाकं करिष्ये इति पौर्णमास्याम्। दर्शस्थालीपाकं करिष्ये इत्यमावास्यायाम्। तेन परमेश्वरं प्रीणयानि। पत्न्यर्थमप्येवमुक्त्वा दर्भानुत्तरतो निरस्याप उपस्पृशति। ततो ब्रह्मवरणम्। अथाग्नेः स्थण्डिलं गोमयेन समन्तमुपलिम्पति ॥ प्रादेशद्वय-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



माचान् खादिरान् पालाशान् वा सत्वक्कानष्टादशेध्मान्बध्नीयात्। खादिर-पालाशाभावे, आश्वत्थानौदुम्बरान्सर्ववृक्षजान्वा गृह्णीयात्। विभीतक-तिल्वक-बाधक-नीव-निम्ब राजवृक्ष-शाल्मल्यरलु-दधित्थ-कोविदार-श्लेष्मान्तक-वर्जम् ॥ ततः स्कन्धस्थानादुपरिच्छिन्नान् साग्रानरत्निमाचान् बाहुमाचान्वा बर्हिष आनीय परिस्तरणार्थं बध्नीयात्। कुशालाभे विश्वामित्रादीन् सर्वतृणानि वा गृह्णीयात् । शूक-तृण-शर शीर्य-बल्वज-मुतव नल-शुण्ठवर्ज्जम् ॥ पिण्डपितृयज्ञादौ मूलसमीपप्रदेशे छिन्नान्दर्भान् गृह्णीयात्। अथाज्यं स्थालीपाकार्थं व्रीहीन् यवान्वाऽऽज्यस्थालीं मेक्षणं स्रुक्-स्रुवौ निर्वापार्थं कांस्यपात्रं चरुस्थालीमुलूखलं मुसलं शूर्पमनुगुप्ता अपः पूर्णपात्रञ्चोपकल्पयेत् । सङ्कल्पप्रभृत्येतदन्तं कर्मान्वाधानमौपवसथिकमित्याचक्षते॥ एतत्कर्म यागस्य पूर्वदिने कर्त्तव्यम्। ततः परेद्युः प्रतिपदि प्रातर्होमानन्तरं तूष्णीं समिधमाधाय भूमिजपपरिसमूहने कुर्यान्नवा कुर्यात्। यदि सङ्कल्पानन्तरं ब्रह्मवरणं न कृतं तदाऽस्मिन्नेव काले कुर्यात्। अमुक-स्थालीपाकहोमकर्मणि ब्रह्माणं त्वामहं वृणे इति विप्रहस्ते दर्भान्दद्यात्। वृतोऽस्मि कर्मकरिष्यामीति ब्रह्मा प्रतिवदेत्॥ ततो यजमानोऽग्रेणाग्निं गत्वाऽग्नेर्दक्षिणत आग्न्यमारभ्य दक्षिणाग्रामविच्छिन्नामुदकधारां दत्वा, प्रागग्रान्दर्भान् ब्रह्मासनार्थमास्तीर्य्य, यथेतमागत्य, पात्राण्यासादयति ॥ ततो ब्रह्माऽग्नेरुत्तरतः शिखाम्बध्वाऽप उपस्पृश्य यज्ञोपवीत्याऽऽचम्याग्रेणाग्निं गत्वाऽग्नेर्दक्षिणत आस्तीर्णदर्भाणां पुरतः प्रत्यङ्मुखस्तिष्ठन्वामहस्ताङ्गुष्ठानामिकाभ्या-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मास्तीर्णदर्भाणामेकं दर्भं गृहीत्वा मन्त्रेण निरस्यति । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः परावसुर्देवता तृणनिरसने विनियोगः ॥ निरस्तः परावसुः । इत्यनेन मन्त्रेण निर्ऋतिदेशे निरस्याप उपस्पृशेत् ॥ तत आवसोरिति मन्त्रेणोपविशेत् ॥ अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः परावसुर्देवतोपवेशने विनियोगः । आवसोः सदने सीदामीत्युक्त्वाऽऽसने उपविशति । अग्निमभिमुखीकृत्य कर्मसमाप्तिपर्यन्तं प्राञ्जलिर्मौनी प्रयोगं पश्येत् । यदि होमकर्त्ता प्रयोगमन्यथा करोति तं देववाण्या बोधयेत्, एवं कुर्वेवं माकुर्विति । यदि देववाणीं न जानाति देशभाषया वदेत् । देशभाषोच्चारणप्रायश्चित्तार्थमिदं विष्णुर्विचक्रम इति वैष्णव्या ऋचो, विष्णोरराटमसीति यजुषो वा, नमो विष्णव इत्यस्य वा, जपं कुर्यात् ॥ इदं विष्णुरितिकाण्वो मेधातिथि ऋषिर्गायत्रीछन्दो विष्णुर्देवता जपे विनियोगः ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं । समूढमस्य पांसुले ॥ नमो विष्णवे । इति सौचो मन्त्रः ॥ मूत्रपुरिषाद्युत्सर्गे कृते यथाविधि स्नानाचमनादि विधायोक्तप्रायश्चित्तजपं कुर्यात् ॥ ब्राह्मणाभावे ब्रह्मासने छत्रमुदककमण्डलुमुत्तरीयवस्त्रं कुशचटुं वा स्थापयेत् ॥ स्वयमेव मन्त्रेण दर्भनिरसनमपामुपस्पर्शनञ्च कृत्वा मन्त्रेण छत्राद्यन्यतमं संस्थाप्य स्वकीयकर्मान्तरं कुर्यात् । कुशचटुनिर्माणे दर्भसङ्ख्यात्वैच्छिकी ॥ उपविष्टे ब्रह्मणि यजमानोऽग्नेरुत्तरतः प्रागग्रानुदगग्रान्वा दर्भानास्तीर्य्य तेषु पात्राण्यधोमुखान्यासादयति पश्चिममारभ्य प्राक्संस्थम् । शुद्ध-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



जलपूर्णपात्रं बर्हिर्मुष्टिं चरुस्थाली-मुलूखलं मुसलं कांस्यपात्रं सहविश्शूर्पं मेक्षणा-मष्टादशेध्मानाज्य-माज्यस्थालीं स्रुक्स्रुवा-वुष्णोदकं सम्मार्गकुशान्पूर्णपात्रञ्चासादयति । तानि च पात्राणि संवीक्ष्योत्तानानि कृत्वा ऽनुगुप्ताभिरद्भिरभ्युक्षेत् ॥ ततो हविर्निर्वापं कुर्यात् ॥ अथोलूखलमुसले शूर्पञ्च प्रक्षाल्याग्नेः पश्चात्प्राङ्मुख उपविश्य प्रागग्रेषु दर्भेषूलूखलं दृढं संस्थाप्य व्रीहीन् यवान्वा चरुस्थाल्या कांस्यपात्रेण वा अग्नये त्वा जुष्टं निर्वपामीति सकृन्मन्त्रेण द्विस्तूष्णीमुलूखले यथादैवतं निर्वपति । विकृतौ तत्तद्देवतानाम्नश्चतुर्थ्यन्तस्योच्चारणम् ॥ अथोलूखलस्य पश्चात्प्राङ्मुखो दक्षिणोत्तराभ्यां पाणिभ्यां मुसलेन व्रीहीन् चिरवहन्ति । शूर्पेण तुषानपनीय प्रक्षालयेत् । दैवहविषस्त्रिः प्रक्षालनम्, मानुषस्य द्विः, पैतृकस्य सकृत् ॥ अथासादितबर्हिषस्समावप्रच्छिन्नाग्रावनन्तर्गर्भा दर्भौ प्रादेशमात्रे पवित्रे भवतः । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः पवित्रे देवते पवित्रच्छेदने विनियोगः । पवित्रे स्थो वैष्णव्यौ ॥ इति मन्त्रेणौषधिव्रीह्यादिकमन्तर्द्धाय छिनत्ति न नखेन । अप उपस्पृश्य, वामहस्तेन पवित्रमूलं धृत्वा, प्रजापतिर्ऋषिर्यजुः पवित्रे देवतेऽनुमार्ज्जने विनियोगः । विष्णोर्मनसा पूते स्थः ॥ इतिमन्त्रेण दक्षिणहस्तेनाद्भिः प्रक्षालयति । ततश्चरुस्थाल्यामुदगग्रे पवित्रे निधाय तण्डुलान्प्रक्षिप्य पवित्रेऽन्यच्च संस्थाप्योदकं निनीयाग्नावधिश्रित्य सुशृतं करोति । शृते हविषि मेक्षणेन चरुं प्रादक्षिण्येन मिश्रीकृत्य स्रुवेणाज्यमादाय पवित्रे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ऽन्तर्द्धाय चरुमभिघार्य्याग्नेरुत्तरत उद्वास्य दर्भेषु संस्थाप्य, प्रतिष्ठितं चरुं स्रुवेणाज्येन सपवित्रं प्रत्यभिघारयेत्। अग्निमुपसमाधाय पूर्वासादितैः कुशैः समन्तं परिस्तृणाति। पुरस्ताद्दक्षिणत उत्तरतः पश्चात्। सर्वतस्त्रिवृतं पञ्चवृतं वा प्रागग्रैर्बहुदर्भैः परिस्तरेत्। पश्चादास्तृतदर्भाग्रः पूर्वपरिस्तृतदर्भाणां मूलान्याच्छादयेत्। अत्रान्तरदिक्षु परिस्तृतदर्भाणां संयोगः। एष परिस्तरणन्यायस्सर्वेष्वाहुतिमत्सु ननु क्षिप्रहोमेषु। अग्नेरुत्तरतः प्रोक्षणपर्य्युक्षणाद्यर्थं तोयपूर्णं स्रुवं प्रणीतामासादयेत्। नवाऽऽसादयेदित्येके॥ ततः पूर्वासादितानष्टादशेध्मानादाय युगपत्तूष्णीमग्नौ प्रक्षिपेत्॥ अथाज्यसंस्कारः॥ आज्यं गव्यं माहिषमाजं वा, तदभावे तैलं दधि क्षीरं यवागूं वा, पूर्वपूर्वाभावे उत्तरोत्तरं गृह्णीयात्। आज्यवदेव तत्प्रतिनिधीनां संस्कारः। दध्नो नाधिश्रयणं, यवाग्वास्तु विकल्पः। पूर्वकृते पवित्रे गृहीत्वा, आज्यस्थाल्यामुदगग्रे निधाय, तस्यामाज्यमवनीय, हस्तयोरङ्गुष्ठानामिकाभ्यां धृताभ्यामुदगग्राभ्यां पवित्राभ्यामाज्यं त्रिवारमुत्पुनाति प्राक्शः सकृन्मन्त्रेण द्विस्तूष्णीम्। मन्त्रस्य प्रजापतिर्ऋषिर्यजुराज्यं देवताऽऽज्योत्पवने विनियोगः। देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः॥ अविमुञ्चन्पवित्रेऽद्भिरभ्युक्ष्याग्नौ प्रहरेत्। उत्पूतमाज्यमग्नौ संस्थाप्याग्नेरुत्तरत उद्वासयेत्। अदृष्टार्थं पुनरग्नेः पश्चाद्बर्हिषि चरुं तत्पूर्वदेशे आज्यस्थालीं चासादयति। ततः स्रुक्-स्रुवावादायोष्णेन वारिणा प्रक्षाल्य प्राक्संस्थं सम्मार्गकुशैर्मूलादारभ्य तदग्रदेशाभिमुखं सम्मृज्याग्नौ प्रतितप्य जले-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नाभ्युक्ष्य, पुनः प्रतितप्याज्यचर्वोरुत्तरतो निदध्यात्। सम्मार्गस्तु पृथक्पृथक् प्रतपनं तु सदैव। सायम्प्रातर्होमप्रकरणे वक्ष्यमाणप्रकारेण त्रिरुदकाञ्जलिसेचनं त्रिः पर्य्युक्षणञ्च कुर्यात्। अत्र प्रपदविरूपाक्षजपस्य नित्येषु विकल्पः। तूष्णीं समिधमाधायोपघातविधिनोपस्तीर्णाभिघारितविधिना वा होमं कुर्यात्॥ साहसनामानमग्निमावाह्यार्चयेत्॥ अथाज्यभागौ जुहोति॥ त्र्यार्षेयाणां चतुर्गृहीतमाज्यं स्रुवेण स्रुचि गृहीत्वोत्तरार्द्धपूर्वार्द्धे जुहोति। अनयोः प्रजापतिर्ऋषिरग्निः सोमश्च क्रमेण देवताऽऽज्यभागहोमे विनियोगः। अग्नये स्वाहा। अग्नय इदं न मम। पुनश्चतुर्गृहीतमाज्यं स्रुच्यादाय, सोमाय स्वाहा। इति दक्षिणार्द्धपूर्वार्द्धे जुहोति। सोमायेदं न मम। पञ्चार्षेयाणां भृगूणां पञ्चवारमाज्यं स्रुचि गृहीत्वोक्तहोमद्वयं कार्यम्॥ अथ चरुहोमः॥ स्रुच्युपस्तीर्य्य, त्र्यार्षेयाणाञ्चेद्धविषोमध्यादङ्गुष्ठपर्वमात्रं तिरश्चीनं प्रथमं मेक्षणेनावदाय पूर्वार्द्धाच्च द्वितीयमवद्यति। पञ्चार्षेयाणां भृगूणां चेत्पश्चार्द्धाच्च तृतीयमवद्यति। अथावदानान्येकीकृत्य सकृत्स्रुवेणाभिघार्य्य हविष्ववदानप्रदेशान् सकृत्प्रत्यभ्यज्य स्रुङ्मुखेनाज्यमग्नौ प्रच्याव्य, अग्नये स्वाहा। इति मध्ये जुहोति। अग्नय इदं न मम। एवं सकृत्त्रिवारं वा जुहुयात्। पुनः स्रुचि सकृदुपस्तीर्य्य पूर्वाहुत्यपेक्षया किञ्चिदधिकमुत्तरार्द्धपूर्वार्द्धात्सकृदेव चरुमवदाय द्विरभिघारयति त्र्यार्षेयाणामेवं। पञ्चार्षेयाणां तु द्विरुपस्तीर्य्य सकृदवदाय द्विरभिघारयति, नात्र प्रत्यभ्यञ्जनम्। एवं गृहीत्वा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अग्नये स्विष्टकृते स्वाहा इत्युत्तरार्द्धपूर्वार्द्धे जुहोति । अग्नये स्विष्टकृत इदं न मम ॥ अथ व्याहृतिहोमः ॥ व्याहृतीनां विश्वामित्रजमदग्निभरद्वाजा ऋषयो, गायत्र्युष्णिगनुष्टुप्छन्दांसि, अग्निवायुसूर्या देवता, आज्यहोमे विनियोगः। भूः स्वाहा। अग्नय इदं न मम ॥ भुवः स्वाहा। वायव इदं न मम॥ स्वः स्वाहा। सूर्यायेदं न मम॥ इत्याज्येनाहुतित्रयं स्रुवेण कुर्यात् । नवयज्ञे वक्ष्यमाणानां शतायुधाय शतवीर्य्यायेत्यादीनामावापहोमानां स्विष्टकृतः प्रागनुष्ठानम् । स्विष्टकृदभावे प्रधानाहुत्यनन्तरं। प्रधानदेवतानां बहुत्वेऽपि परिसमूहनेध्माधानपर्य्युक्षणाज्यभागानां सकृदेवानुष्ठानम्। प्रधानहविषां बहुत्वे सर्वेभ्यो हविर्भ्यस्सकृत्सकृत्स्विष्टकृतेऽवदायावदानान्येकीकृत्य सकृदेव जुहुयात् । मेक्षणमग्नौ प्रहरेत्प्रक्षाल्य वा स्थापयेत् । दर्शे पौर्णमासे चानाहिताग्नेराहिताग्नेश्चाग्निर्देवता। आहिताग्नेः पौर्णमासेऽग्निरग्नीषोमौ वा । दर्शेऽसोमयाजिन इन्द्राग्नी । सोमयाजिनस्त्विन्द्रो महेन्द्रो वा । अथ तूष्णीमग्नौ समिधमाधायानुपर्य्युक्ष्य त्रिरुदकाञ्जलिसेचनं कुर्य्यात् ॥ तत आस्तृतबर्हिर्मुष्टिमादायाज्ये वा हविषि वाऽग्राणि मध्यानि मूलान्यवदध्यात् अक्तुमिति मन्त्रेण । अस्य प्रजापतिर्ऋषिर्यजुर्वैश्वदेवा देवता बर्हिरभ्यञ्जने विनियोगः । अक्तुꣳ रिहाणा व्यन्तु वयः । एवं त्रिः । अथाक्तं बर्हिरद्भिरभ्युक्ष्य यः पशूनामितिमन्त्रेणाग्नौ क्षिपेत । अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो रुद्रो देवता बर्हिर्होमे विनियोगः। यः पशूनामधिपती रुद्रस्तन्तिचरो वृषा।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पशूनस्माकं माहिंसीरेतदस्तु हुतं तव स्वाहा ॥ पशूनामधिपतये रुद्राय तन्तिचरायेदं न मम । अप उपस्पृशेत् । बर्हिरादानाद्येतदन्तं कर्म यज्ञवास्त्वित्याचक्षते ॥ अथ गृह्यासङ्ग्रहोक्तामाज्यधारामविच्छिन्नां स्रुचा जुहुयात् । प्रजापतिर्यजुर्वसवो देवता होमे विनियोगः । वसुभ्यः स्वाहा । वसुभ्य इदं न मम ॥ ततो हविरुच्छिष्टमुदगुद्वास्य मेक्षणेनोद्धृत्य पात्रान्तरे निधाय ब्रह्मणे दद्यात् । ब्रह्मा तदादाय तूष्णीं प्राश्य द्विराचामेत् ॥ यजमानो ब्रह्मन्पूर्णपात्रं ते ददामीति दक्षिणां दद्यात् । पूर्णपात्रस्य लक्षणं गोभिलोक्तं यथा । "भोजनपर्य्याप्तेनौदनेन तण्डुलेन भोज्यफलैर्वा कांस्यपात्रं चमसं वा पूरयित्वा दद्यादेतत्पूर्णपात्रमित्याचक्षते" ॥ गृह्यासङ्ग्रहे तु । "अष्टमुष्टिर्भवेत्किञ्चित्पुष्कलं तच्चतुर्गुणम् । पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते" ॥ एवं दातुमशक्तौ कर्मप्रदीपः ॥ "यावता बहुभोक्तुश्च तृप्तिः पूर्णेन जायते । नावरार्ध्यं ततः कुर्यात्पूर्णपात्रमितिस्थितिः" ॥ ततोऽग्निं परिक्रम्य, नमस्कृत्य, चमसं निनीय, पूरयित्वा, वामदेव्यसामगानमीश्वरार्पणञ्च कुर्यात् । अस्य वामदेव्यस्य वामदेवऋषिर्गायत्री छन्द इन्द्रो देवता

३ र ४ २ ४र
शान्तिकर्मणि जपे विनियोगः ॥ काऽ५या । नश्चा३इचा३ आभु-
५ १ र २१र २ १ २ र २ १ २^
वात् । ऊ । तीसदावृधः स । खा । औ३हो हाइ । कया२३शचाइ ।
३ र २ १ — १ २ ३ र
ष्ठयौ हो३ । हुम्मा२ । वा२र्त्तो३५५ हाइ ॥ १ ॥ काऽ५स्त्वा ।
४ २ ४ ५ १ २र १ २ १ १ २ र
सत्यो३मा३दानाम । मा । हिष्ठोमात्सादन्ध । सा । औ३हो-
२ १ २^ ३ र २ १ — १ २
हाइ । दृढा२३चिदा । रुजौ हो३ । हुम्मा२ । वाऽ२सो३५५हा-

For Private And Personal

यि ॥ २ ॥ आऽ५भी । षुणा३:सा३खीनाम् । आ । विताजरायितॄ । णाम् । औ२३होहायि । भ्रता२३म्भवा । सियौहो३ । हुम्मा२ । ता२ऽयो३ऽ५ हायि ॥ ३ ॥ इति दर्शपौर्णमासस्थालीपाकप्रयोगः ॥

अथोक्तस्थालीपाकप्रयोगे तत्रतत्र विशेषः कथ्यते ॥ अत्र केचित् इमंस्तोममित्यृचा परिसमूहनं भूमिजपं वैरूपाक्षजपं प्रपदजपं च कुर्वन्ति, तत्तु न गोभिलमतम् । तथाहि—चतुर्थप्रपाठके पञ्चमखण्डिकायां "काम्येष्वत ऊर्द्ध्वं" इतिसूत्रेऽतऊर्द्ध्वंकाम्येषु विषय उच्यन्ते इत्युपक्रम्य भूमिजपस्त्वृचा परिसमूहनं वैरूपाक्षप्रपदमन्त्रजपश्चोक्तः । वेदे मन्त्रपाठक्रमे ऽपि काम्यप्रकरण एव तेषां मन्त्राणां पाठः । अतः सूत्रकारस्य नित्येषु पाकयज्ञेषु, गर्भाधानादिषु च, तेषामनुष्ठानमनभिमतमेव । मन्त्रपाठानुगुण्येन सूत्रप्रणयनात् । मन्त्रे पर्य्युक्षणमन्त्रस्यादौ पाठात्तस्य मन्त्रस्य सायम्प्रातर्होमप्रयोगे ऽग्निपर्य्युक्षणे विनियोगमुक्त्वा स्थालीपाकप्रकरणे पर्य्युक्षणमुक्तं, नतु भूमिजपादिकम् । नच 'काम्येष्वत ऊर्द्ध्वं' इत्युक्त्वा, 'पूर्वेषुचैक' इत्युत्तरसूत्रेण पूर्वेषु नित्यनैमित्तिककर्मसु वक्ष्यमाणभूमिजपादयो भवन्तीत्यर्थकेन स्थालीपाकेऽपि भूमिजपादिकमनुष्ठेयमिति वाच्यम् । एकइतिपदेन शाखान्तरमतप्रतिपादनात्स्वमते काम्यभिन्नेषु कर्म्मस्वननुष्ठेयत्वस्य मुख्यत्वप्रतीतेस्तस्मादस्माभिः काम्यप्रयोगकथनसमये भूमिजपादिप्रयोगो वक्ष्यते ॥ अथ द्वितीयविचारः । "ब्रह्मासनस्थाने उदकधारा ब्रह्मकर्म" इति केचित्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तत्पक्षे गृह्यासङ्ग्रहे । "उदकधारामविच्छिन्नामाग्न्यमारभ्य दक्षिणाम् । दद्याद्ब्रह्मासनस्थाने सर्वकर्मसु नित्यशः" इत्यस्मिन्वचने ब्रह्माऽऽसनस्थाने स्वासनस्थाने उदकधारां दद्यादित्यर्थः ॥ यजमानकर्त्तृकत्वपक्षे, यजमानो ब्रह्मासनस्थाने उदकधारां दद्यादिति योजनीयम् ॥ अथ तृतीयविचारः ॥ नन्वाज्यसंस्कारे पवित्रकरणं सूत्रकृदुक्तं तत्रात्र स्थाल्यां तण्डुलावापात्पूर्वं कथमभिहितमितिचेन्न, "पवित्रान्तर्हितांस्तण्डुलानावपेत्" इति पवित्रविधानप्रतीतेः, अत्र पवित्रकरणप्रयोगानुक्तावपि वक्ष्यमाणप्रयोगस्यात्रापकर्षात्। नचात्र भिन्नपवित्रं विधीयते इति वाच्यम्, पवित्रद्वयविधाने गौरवादुभयार्थं पूर्वोक्तस्याज्यसंस्कारार्थं स्थापनसम्भवात्, तस्माद्गुणभूतपाठक्रममनादृत्यतण्डुलावपात्पूर्वं पवित्रकरणं युक्तम् । चरुरहितेषु केवलाज्यहोमेष्वाज्यसंस्कारार्थमिध्माधानात्परमेव पवित्रकरणमिति विवेकः॥ अथ चतुर्थविचारः॥ आज्यप्रतिनिधित्वेन यवागूपरिग्रहे, यवाग्वा नाधिश्रयणम्, "न तस्य करणम्भवेत्" इति गृह्यासङ्ग्रहोक्तेः । "अनधिश्रयणं दध्नः शेषाणां श्रपणं स्मृतं" इत्यत्र दधिपदं यवाग्वा उपलक्षकम् । 'यवाग्वास्तु विकल्प' इति भट्टभाष्ये ॥ अथ पञ्चमविचारः ॥ अग्निपर्य्युक्षणानन्तरमुपघातविधिमाह सूत्रकारः। सूत्रम् । "पर्य्युक्ष्य स्थालीपाक आज्यमानीय मेक्षणेनोपघातं होतुमेवोपक्रमते" ॥ अस्यार्थः ॥ अग्निं पर्य्युक्ष्य, स्थालीपाके आज्यमानीयावसिच्य, मेक्षणेन चरुमुपहत्यावदाय, होतुमेवोपक्रमते प्रारभते होममेव कुर्य्यादित्यर्थः । एवकारेणाज्यभागयो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



रुपस्तरणाभिघारणप्रत्यभ्यञ्जनानां स्विष्टकृतश्च प्रतिषेधः॥ "उक्तं गृह्यासङ्ग्रहे" ॥ 'पाणिना मेक्षणेनापि स्रुवेणैव च यद्धविः। हूयते चानुपस्तीर्य्य उपघातस्स उच्यते॥ उपघातञ्च जुहुयात्तचैवाज्यं समापयेत्। मेक्षणेन तु होतव्यन्नाज्यभागौ न स्विष्टकृत्'। स्पष्टञ्चेदन्नारायणीये भाष्ये॥ उपस्तीर्णाभिघारितस्य लक्षणमाह गोभिलः। सूत्रम्। "द्व्युपस्तीर्णाभिघारितं जुहुयात्" ॥ अस्यार्थः। उपस्तीर्णाभिघारितं, स्रुच्याज्यमुपस्तीर्य्य यथोक्तं हविरादाय पुनराज्येनाभिघार्य्य यद्धूयते तदुपस्तीर्णाभिघारितसंज्ञकं, तथा वा जुहुयात्। उपघातोपस्तीर्णाभिघारितहोमयोर्विकल्प ऐच्छिक उत व्यवस्थित इत्यत्रैच्छिक इति केचित्। कर्म्मभेदाद्व्यवस्थित इत्यन्ये॥ अथ षष्ठो विचारः॥ "केचित्तु 'स्विष्टकृतः प्राक् व्यस्तसमस्तव्याहृतिभिराज्येन चतस्रो होतव्या' इति वदन्ति" तदसङ्गतम्, तासामप्रधानत्वात्, आवापत्वाभावाच्च। प्रायश्चित्तार्थत्वे, "आगन्तुकानामन्ते संनिवेशः" इति न्यायेन कर्मसमाप्तिविहितसमिदाधानात्परं प्रायश्चित्ताहुतीनां कर्त्तव्यत्वावगमाच्च। कर्मान्तेऽपि तासां विकल्प एवेत्यन्ये॥ अथ सप्तमविचारः॥ यज्ञवास्तुकर्मणि, आस्तृतबर्हिर्मुष्टिमादाय यज्ञवास्तु कुर्वन्ति। परे तु, स्तरणकाले यज्ञवास्त्वर्थं कुशान् शेषयित्वा, पश्चाद्यज्ञवास्तुकाले आस्तृतशेषाद्बर्हिषः कुशमुष्टं गृहीत्वा, यज्ञवास्तु कुर्वन्ति। अत्राद्यपक्षो ज्यायान्। तदुक्तं गोभिलाचार्य्यैः॥ "तत एव बर्हिषः कुशमुष्टिमादायाज्ये वा हविषि वा त्रिरवदध्यादित्यादि



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अस्यार्थः ॥ तत एवास्तृतादेव बर्हिष इति, एवकारात् आस्तरणकालशेषकुशादिकं व्यावर्त्त्यते । आस्तृतदर्भाणां प्रतिपत्तेर्विवक्षितत्वादस्य प्रतिपत्तिकर्मरूपत्वाच्च । "श्रौते" दर्शपूर्णमासप्रकरणे प्रस्तरसमभ्यञ्जन-प्रस्तरप्रहारवत् । ननु, "स्तृतेभ्यो न प्रचिनुयाद्यातयामं स्तृतं स्मृतम् । स्तृतशेषात्ततो गृह्ययज्ञवास्तुक्रिया तथेति" गृह्यासंग्रहवचनात्तत एव बर्हिष इत्यस्यास्तृतशेषादिति व्याख्यातुमुचितत्वेन न प्रतिपत्तिरूपमिदं कर्म्मेति चेन्न, सूत्रे "तत एवेति" नियमवैयर्थ्यापत्तेः । प्रतिपत्तिप्रायवचनविरोधादुदाहृतगृह्यासंग्रहवचनस्यान्यथा-नयनस्यापि सुवचत्वात् कथ ? मन्यथानयनमिति चेदित्थम्, स्तृतेभ्यो न प्रचिनुयात्तेषां यातयामत्वात्, अन्यच्च वर्ज्जित्वावगतेश्च, निषेधोऽयं सार्वत्रिकः । प्रकृते तु, प्रत्तिपत्तिरूपत्वात्स्तृतदर्भाणां शेषमेकदेशं गृहीत्वा, नतु स्तरणशेषम् ॥ अथ सूत्रोक्तमृत्विक्-संख्या दक्षिणादानादिकमुच्यते ॥ पार्वणस्थालीपाक-श्रवणाकर्माऽश्वयुजि-कर्म-नवयज्ञा-ग्रहायणीकर्माष्टकाचतुष्टयेषु पाकयज्ञनामकेष्वेको ब्रह्मैवर्त्विक्, यजमानो होमकर्त्ता । यजमानस्य प्रवासेऽन्योपि होमकर्त्ता । पाकयज्ञेषु पूर्णपात्रमधमदक्षिणा । अपरिमित मापराद्धं गाव उत्तमदक्षिणा । अत्रेतिहासोऽपिप्रमाणम् । "नामतः सुदाःपिजवनपुत्रः पैजवन ऋषिर्नवयज्ञे लक्षं गा दत्तवानिति" । ब्रह्मा श्रोत्रियो वशिष्ठगोत्रजो वेदत्रयप्रयोगज्ञानवान् । वशिष्ठाभावेऽन्यगोत्रजोऽपि, यजमानशाखाध्यायी वा परिग्राह्यः । सायंप्रातर्होम-वैश्वदेव-दर्शपौर्णमासस्थालीपाका-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दीनां मुख्यकाले उक्तद्रव्यालाभेऽननुष्ठानप्रसक्तौ, व्रीहि-शालि-गोधूम-मुद्ग-सर्षपतिल-यवाद्यन्यतमेन, यज्ञवृक्षफलैः पत्रैर्वा, पावनालैः, प्रियङ्गुतण्डुलैर्वाऽनुष्ठानं कर्त्तव्यम्॥ सायंहोमस्य प्रातर्होमपर्यन्तं गौणकालः। प्रातर्होमस्य सायंहोमपर्य्यन्तं गौणकालः। गौणकाले, सर्वप्रायश्चित्तानुष्ठानपूर्वकं तात्कालिकहोमानुष्ठानम्॥ "यत्तु नारायणीये सायंप्रातर्होमद्वयातिपत्तौ पुनराधानम्। तदुक्तम्। 'होमद्वयात्यये दर्शपूर्णमासात्यये तथा। पुनरेवाग्निमादध्यादिति भार्गवशासनमिति' कर्मप्रदीपवचनात् तस्मादेतत्प्रायश्चित्तम्। एवमन्यान्यपि च ग्रन्थान्तरोक्तानि पुनराधाननिमित्तान्युपलब्धव्यानीति" तदसाधु। "अहुतस्य प्रायश्चित्तं भवतीति" गोभिलसूत्रेण तादृशार्थाप्रतीतेः। प्रायश्चित्तसामान्यस्य प्रतीतेः॥ अथ गोभिलोक्तप्रायश्चित्तमुच्यते॥ कालद्वयातिपत्तावुपवासश्च दम्पत्योः। अथवा यावत्कालपर्यन्तं होमो न क्रियते तावद्दिनपर्य्यन्तमुपवासः, पश्चादतीतानां सायमाहुतीनां दिनगणनपूर्वकं पात्रे हस्ते वा यथासंभवं गृहीत्वा ऽग्नये स्वाहेति सकृदेव जुहुयात्। एवं, द्वितीयाहुतिं सकृदेव किञ्चिदधिकेनावशिष्टेन जुहुयात्। एवमतीतप्रातराहुतीनां प्रातः सकृदेव होमः। "तदुक्तं कर्मप्रदीपे। अहूयमानेऽनश्नंश्चेन्नयेत्कालं समाहितः। संपन्ने तु यथा तच्च हूयते तदिहोच्यते॥ अहुताः परिसंख्याय पात्रे कृत्वाऽऽहुतीः सकृत्। मन्त्रेण विधिवद्धुत्वाऽधिकमेवापरा अपि"॥ एवमुपवासाकरणे पुनराधानं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



कर्त्तव्यम् । अथ परिशिष्टोक्तप्रायश्चित्तान्युच्यन्ते । दर्शस्थालीपाके स्वकालेऽननुष्ठिते, प्रायश्चित्तपूर्वकमनुष्ठानं पौर्णमासीपर्य्यन्तम् । पौर्णमासस्थालीपाके स्वकालेऽननुष्ठिते प्रायश्चित्तपूर्वकमनुष्ठानं दर्शपर्य्यन्तम् । तृतीया-पञ्चमी-दशमी-त्रयोदशीष्वथवा, सर्वासु तिथिष्वतीतस्य स्थालीपाकस्यानुष्ठानम् । गौणकालेप्यतीते, वैश्वानरस्थालीपाकः प्रकृतिस्थालीपाकेन समानतन्त्रेण, भिन्नतन्त्रेण वा, कर्त्तव्यः । द्वयोः स्थालीपाकयोर्लोपे, एकस्योक्तप्रायश्चित्तस्थालीपाकः । द्वितीयस्य प्रायश्चित्तपूर्वकं गौणकालेऽनुष्ठानम् । द्वितीयस्थालीपाके गौणकालेप्यननुष्ठिते, तृतीयस्थालीपाके संप्राप्ते, पुनराधानम् ॥ अन्वाधानदिने पत्न्यां रजस्वलायां स्नातायां, पञ्चमेऽहनि स्थालीपाकानुष्ठानम् । श्रौते कर्मणि, चतुर्थदिनेऽपि ॥ "परे तु 'अन्वाधानदिने औपवसथिकान्नभोजनानन्तरं पत्न्यां रजस्वलायान्तामपरुध्य यागः कर्त्तव्य' इति । "केचित्संकल्पप्रभृतिपात्रासादनान्ते कर्मणि कृते, भोजनात्पूर्वं पत्न्यां रजस्वलायामपि तामपरुध्य यागं कुर्वन्ति" ॥ अथ वैश्वानरस्थालीपाकप्रयोगः ॥ दर्शस्थालीपाकस्य पौर्णमासस्थालीपाकस्य वाऽतिपत्तिप्रायश्चित्तार्थं अथवा, मुख्यकालातिपत्तिप्रायश्चित्तार्थं, वैश्वानरस्थालीपाकं करिष्ये, इति संकल्पः । अग्नये वैश्वानराय त्वा जुष्टन्निर्वपामीति निर्वापः । अग्नये वैश्वानराय स्वाहेति चर्वाहुतिः । अन्यत्सर्वं प्रकृतिस्थालीपाकवत् । नवयज्ञ-श्रवणाकर्म्म-आश्वयुजि-वैश्वदेवद्वय-पिण्डपितृयज्ञकर्मणां लोपे, पतितान्नभोजने च, वैश्वानरस्थालीपाकप्रायश्चित्तम् । स्वगृह्याग्नेरन्याग्निसंपर्के विविचिस्थालीपाकः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मदीयगृह्याग्नेरन्याग्निसंसर्गप्रायश्चित्तार्थं विविचिस्थालीपाकं करिष्ये। अग्नये विविचये त्वा जुष्टन्निर्वपामीति चरुनिर्वापः। अग्नये विविचये स्वाहेति चरुहोमः। अन्यत्सर्वं प्रकृतिवत्॥ समानतन्त्रपक्षे, वैकृतन्निरूप्य प्राकृतस्य निर्वापः। प्रायश्चित्त-स्थालीपाककरणेऽशक्तौ, चतुर्गृहीतेनाज्येन स्रुचं पूरयित्वाऽमु-कस्थालीपाकस्य स्थाने पूर्णाहुतिं होष्यामीति संकल्प्याग्नये वैश्वानराय स्वाहेति चतुर्गृहीतमाज्यं जुहुयात्। तत्तत्स्थाली-पाके तत्तद्देवतानाम्नि चतुर्थ्यन्ते स्वाहाकारं संयोज्य, पूर्णाहुतिं जुहुयात्। अथवा, चतुर्गृहीताज्यासंभवे स्रुवेणैकामाज्या-हुतिं तत्तद्देवतायै जुहुयात्। अमुकस्थालीपाकस्य स्थाने स्रुवाहुतिं होष्यामीति संकल्पः॥ अन्यदप्यनुक्तप्रायश्चित्तं सूत्रान्तरोक्तं ग्राह्यं छन्दोगैः॥ प्रासङ्गिकमुक्त्वाऽथ गोभिलो-क्तमुच्यते॥ यजमानस्य यदि प्रवासस्तदा, पत्न्या ऋत्विङ्मुखेन सायंप्रातर्होम-वैश्वदेव-पार्वणस्थालीपाक-श्रवणाकर्म-नवयज्ञा-दीनि नित्यकर्माणि, यथाकालं कर्त्तव्यान्येव। संकल्प ऋत्विग्व-रणञ्च, पत्न्या कार्य्यम्। बर्हिरिध्मादिसाधनयुक्ततन्त्रहोमेषु स्थालीपाकवत्सर्वमङ्गजातं कर्त्तव्यं, प्रधानाहुतयस्तत्र तत्रोक्ता ग्राह्याः। यत्र मन्त्रान्ते स्वाहेति पदन्नास्ति, तत्र स्वाहेति योजनीयम्। सर्वत्र स्वाहाकारे होमः। यत्र मन्त्रादौ स्वाहा-कार आम्नातस्तत्र स्वाहापदोच्चारणे हुत्वा, शेषं मन्त्रं समा-पयेत्। चरुरहितेष्वाज्यहोमेषु चतुर्थीहोमादिषूपघातं जुहुयात्। तत्रायं क्रमः। आज्यं संस्कृत्य स्रुवेणाज्यमादाय प्रधानदेवता-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



भ्यो जुहोति, नाज्यभागौ, न च स्विष्टकृद्धोमः। आज्यहोमेषु प्रधानदेवतानामनुक्तौ, प्रधानकर्मणः प्रधानहोमोक्तौ, तस्य च पुरस्तादुपरिष्टाच्च व्यस्ताभिर्व्याहृतिभिस्तिस्र आज्याहुतीर्जुहुयात् । अन्यत्सर्वं पार्वणस्थालीपाकवत् ॥ यत्र सूत्रकृद्वक्ष्यति "अग्निरुपसमाहितो भवतीति" तत्र पुंसवन-शुङ्गाकर्म-सीमन्तोन्नयन-चूड़ाकर्मादिषु तेषां कर्मणां पुरस्तादुपरिष्टाच्च महाव्याहृतिहोमत्रयं कर्त्तव्यम् ॥ अस्मिन्स्थालीपाके सर्वस्याप्यङ्गस्य गोभिलेनोपदिष्टत्वात्पार्वणस्थालीपाकस्सर्वेषां वक्ष्यमाणानां चरुहोमानामाज्यहोमानाञ्च प्रकृतिभूतोऽतः पार्वणस्थालीपाकस्य सुबोधाय पदार्थक्रमो लिख्यते ॥ प्रथमं संकल्पः। विधिवदग्निस्थापनम् । प्रज्वलनम् । इध्माबर्हिषोश्च यज्ञीयपात्राणामुपकल्पनम् । ब्रह्मवरणम् । ब्रह्माऽऽसनदर्भास्तरणम् । ब्रह्मोपवेशनम् । उपविष्टे ब्रह्मण्युत्तरतः पात्रासादनम् । पात्राणां वीक्षणम् । प्रोक्षणम् । परिसमूहनम् । पश्चिमत उलूखलाद्यासादनम् । हविर्निर्वापः । अवहननम् । तुषविमोचनम् । तण्डुलप्रक्षालनम् । पवित्रकरणम् । तण्डुलावापः । हविश्श्रपणम् । शृतेऽभिघारणम् । उदगुद्वासनम् । प्रतिष्ठिताभिघारणम् । अग्निप्रज्वलनम् । परिस्तरणम् । बर्हिषि स्थालीपाकासादनम् । इध्माधानम् । चर्वभावेऽचैव पवित्रकरणम् । पवित्रानुमार्ज्जनम् । आज्यस्थाल्यां पवित्रासादनम् । तत्राज्यावनयनम् । आज्योत्पवनम् । अग्नेरुपर्य्याज्यस्थाल्यधिश्रयणम् ॥ उत्तरत आज्योद्वासनम् । स्रुक्सम्मार्गः । बर्हिष्याज्या-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सादनम् । त्रिरुदकाञ्जलिसेचनम् । पर्य्युक्षणम् । आज्यभागहोमः । प्रधानचरुहोमः । स्विष्टकृद्धोमः । व्याहृतिचयहोमः । तूष्णीं समिदाधानम् । अनुपर्य्युक्षणम् । उदकाञ्जलिसेचनम् । यज्ञवास्तुकरणम् । वस्त्राहुतिः । हविरुच्छिष्टोद्वासनम् । ब्रह्मणे हविश्शेषदानम् । हविश्शेषभोजनम् । पूर्णपात्रदानम् । गोनिष्क्रयद्रव्यदानम् । चमसनिनयनम् । चमसपूरणम् । वामदेव्यसामगानम् ॥ इति चरुतन्त्रपदार्थक्रमः ॥ अथाज्यतन्त्रपदार्थक्रम उच्यते । हविर्निर्वापादिहविरुद्वासनान्तं कर्म विहायाग्निस्थापनप्रभृत्याज्यासादनान्तपदार्थक्रमः पूर्ववत् । ततस्त्रिरुदकाञ्जलिसेचनम् । अनुपर्य्युक्षणम् । व्याहृतिचयहोमः । प्रधानाज्याहुतयः । प्रधानाज्याहुत्यनुपदेशे, प्रधानकर्मानुष्ठानम् । आज्येन व्याहृतिचयहोमः । तूष्णीं समिदाधानम् । कर्मवैगुण्ये, पुनर्व्याहृतिचतुष्टयहोमः । पर्य्युक्षणादिवामदेव्यगानान्तं पदार्थक्रमः पूर्ववत् । इत्याज्यतन्त्रपदार्थक्रमः ॥ इति गोभिलगृह्यसूत्रे प्रथमप्रपाठकः ॥

अथाधानमुच्यते ॥ आधानं द्विविधम् ॥ अपूर्वाधानं, विच्छिन्नधानं चेति । तत्रद्वयस्य कालमाह सूत्रकारः । सूत्रम् । "ब्रह्मचारी वेदमधीत्यान्त्यां समिधमभ्याधास्यन् । जायाया वा पाणिं जिघृक्षन्" ॥ अत्रेदं तात्पर्य्यम् । विवाहात्पूर्वं ब्रह्मचारी अन्त्यसमिदाधानं करिष्यन् यदाऽग्निं प्रणयति, स एकःकालः । अथवा, विवाहहोमार्थं यदाऽग्निं प्रणयति, सचापरः कालः । अत्राद्यपक्षस्वीकारे, आद्यमेवाग्निं यावज्जीवं धारयेत् । तत्रैव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



विवाहाहुती: कुर्य्यात् ॥ द्वितीयपक्षस्वीकारे, द्वितीयमेव याव-ज्जीवं धारयेत् ॥ तदुक्तं सूत्रकृता । सूत्रम् । "यदेवान्त्यां समि-धमभ्यादधाति, जायाया वा पाणिं जिघृक्षन् जुहोति, तमभि-संयच्छेत्" ॥ धारयेदित्यर्थ: ॥ "अत्र केचित् । 'अत्र समिदाधा-नाग्निं वा विवाहाग्निं वा, पूर्णाहुत्या संस्कृत्य धारयेदिति' वदन्ति" तन्न सम्यक्, अध्याहारे प्रमाणाभावात्, उत्तरसूत्रद्वय-विरोधाच्च । तथाहि सूत्रम् । "स एवास्य गृह्योऽग्निर्भवति" । अस्यार्थ: । अस्यान्त्यसमिदाधानाग्निर्विवाहाग्निर्वा, गृह्योऽग्नि:, गृह्याग्निसंज्ञको भवति, एवकारेण पूर्णाहुत्यादिर्व्यावर्त्यते । सूत्रम् । "तेन चैवास्य प्रातराहुतिर्हुता भवतीति" । अस्यार्थ:, तेनैवाद्यपक्षेऽन्त्यसमिदाधानेनैव, द्वितीयपक्षे, लाजादिहोमेनैव वा, अस्याग्नेर्गृह्याग्ने: प्रातराहुति:, प्रातरौपासनाहुतिर्हुता भवति । अत ऊर्ध्वं सायमाहुत्युपक्रमं वक्ष्यति, तस्माद्गृह्याग्नित्व-सिद्धये पूर्णाहुतिसंस्कारकरणे विरोध: स्पष्ट एव । कल्पतरुकारा-दयोप्येवमाहु: । अत्र पक्षद्वये आधानाङ्गं नान्दीश्राद्धं न पृथक्, समावर्त्तनविवाहाङ्गमेव नान्दीश्राद्धम् । पुनस्तृतीयाधानकाल-माह । सूत्रम् । "प्रेते वा गृहपतौ परमेष्टिकरणम्" ॥ अस्यार्थ: । केनापि निमित्तेनोक्तकालद्वयेऽप्यकृताधानस्य, पितरि मृते, ए-कादशेऽन्हि परमेष्टिकरणमग्न्याधानं कुर्वीत । पितरि मृते य-दग्न्याधानं, तज्ज्येष्ठस्य । कनिष्ठस्य तु, विभागानन्तरम् । उभय-साधारण्येनापरमाधानकालमाह । सूत्रम् । "तथा तिथिनक्षत्र-पर्वसमवाये" । सूत्रम् । "दर्शे वा पौर्णमासे वाऽग्निसमाधानं कु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वीत" । अनयोस्तात्पर्य्यम् । शुभनक्षत्रयुक्तशुभतिथौ, शुभनक्षत्रयुक्तपर्वणि वा, शुभनक्षत्रयोगाभावेऽपि, दर्शे पौर्णमास्यां वाग्निमादध्यात् । आधानप्रयोगो गोभिलानुक्तत्वात्कर्मप्रदीपोक्तो ग्राह्यः । पूर्वोक्तकालचतुष्टये प्रमादादिनाऽकृताधानश्चेदाधानदिने, तत्पूर्वदिने वा, श्रोत्रियांश्चतुरस्त्रीन्ब्राह्मणानात्मनिष्ठमेकं वा, परिषदे नमः इत्यभ्यर्च्य प्रदक्षिणीकृत्य, तेभ्यो दक्षिणां दत्वा, स्वकर्म निवेदयेत् । यथा । मम गृह्याग्न्याधानस्य सूचोक्तमुख्यकालातिक्रमान्मुख्यकालप्रभृत्येतावन्तं कालममुकसंख्याकसंवत्सर-निरग्निकत्वसंजातसमस्तपापनिवर्त्तकं देशकालवयोवस्थाशक्त्यनुसारेण कृच्छ्रादिप्रत्याम्नायभूतं प्रायश्चित्तं मदुद्देशेन यथाशास्त्रं विचार्य, मामुपदिश्य, कर्मण्यं पूतं कुर्वन्तु भवन्त इति पृच्छेत् । ततस्ते ब्राह्मणा यजमानाद्वर्षसङ्ख्यां श्रुत्वैकैकस्य संवत्सरस्यापद्येकैकं प्राजापत्यकृच्छ्रमनापदि, संवत्सरात्पूर्वमुपपातकसामान्यप्रायश्चित्तम्, संवत्सराद्रूर्द्धं, मनूक्तन्त्वैमासिकम्, आलस्यादिना चेत्संवत्सराद्रूर्ध्वं मासोपवासः, एवं रीत्या पर्य्यालोच्य, संवत्सरगणनया प्राजापत्यकृच्छ्राणि, तदशक्तौ, कृच्छ्रप्रत्याम्नायगोदानादिकं वा वदेयुः । उपवासदिनसंख्यया कस्याञ्चित्तिथौ संकल्प्यैककालं नित्यं हविष्याशनं कुर्य्यात् । गोनिष्क्रयद्रव्यदानपक्षे, देशकालौ संकीर्त्य, मम मुख्यकाले गृह्याग्न्याधानातिपत्त्या मुख्यकालप्रभृत्येतावन्तं कालमेतावद्वर्षनिरग्निकत्वसंजातपापनिवृत्तये, परिषन्निर्णीताऽमुकसंख्याकप्राजापत्यकृच्छ्रप्रत्याम्नायभूतं गोनिष्क्रयद्रव्यं ब्राह्मणेभ्यः संप्रददे । इदं प्रायश्चित्तमपूर्वाधाने । विच्छिन्ना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



धाने तु, अतीतदिनपरिगणनयाऽतीतसायंप्रातर्होम-वैश्वदेव-बलिहरण-पिण्डपितृयज्ञ-दर्शपूर्णमासस्थालीपाक-नवयज्ञ-श्रवणाकर्माश्वयुजिकर्म्माग्रहायणीकर्म्माष्टकानामकरणजनितदोषनिवृत्तये, तत्तद्धोमद्रव्यं व्रीह्याज्यादिकमेतावत्परिमितं ब्राह्मणेभ्यः संप्रददे, इति संकल्पपूर्वकं दद्यात् । एवं कृतप्रायश्चित्त आधानाधिकारी भवेत् । अथाधानप्रयोगः । अन्त्यसमिदाधानकाले, विवाहकाले च, प्रमादादिनाऽकृताधानः पूर्वोक्तशुभदिवसे पर्वणि वा, गृह्याग्निं समाधास्यन् तत्पूर्वदिवसे पत्न्या सह कृतप्रायश्चित्तो गृह्याग्निंसमाधास्ये इति संकल्प्य, प्राचीनप्रवणमुदीचीनप्रवणं समं वा भूप्रदेशमुपलिप्यारत्निमात्रं समं चतुरस्रं द्वादशाङ्गुलोच्छ्रितं चतुरङ्गुलविस्तृतमेखलात्रययुक्तं कुण्डं कृत्वा केशान्वापयित्वा, स्नात्वा, नान्दीश्राद्धं विधाय, ब्रह्माणं वृत्वा, ब्राह्मण-राजन्य-वैश्याम्बरीषाणामन्यतमगृहादग्निमानीय शरावे कांस्यपात्रे वा निधाय, कुण्डाग्रतः परिसमूहनादिकं कृत्वा, तमग्निं स्थापयेत् । तस्मिन्नग्नौ पक्का, मधुमांसादिवर्ज्जितं घृतक्षीरादियुक्तमन्नं पत्न्या सह भुक्त्वा, नवीने क्षौमे वाससी, अहते वाससी वा, परीधायाग्नेः पश्चाद्यजमानस्तद्दक्षिणतः पत्नीचोपविशेत् । अहतवासोलक्षणमाह "शातातपः । ईषद्धौतं नवं श्वेतं सदशं यन्न धारितं । अहतं तद्विजानीयात्सर्वकर्मसु पावनम्" ॥ अथारण्योर्लक्षणम् । शमीगर्भोऽशमीगर्भो वा योऽश्वत्थस्तस्य या प्राच्युदीच्यूर्ध्वगा वा शाखा तस्या एकस्या एवारणिद्वयं कुर्यात् । दक्षिणभागादधरा । उत्तरभागादुत्तरा ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir




ऊर्द्धगाथा: स्थूलत्वेऽधोभागादधरा, उत्तरेणोत्तरा । पूर्वस्याः पश्चिमभागादधरा, पूर्वेणोत्तरा । चतुरङ्गुलोच्छ्रिता, चतुर्विंशत्यङ्गुलदीर्घा, षडङ्गुलविस्तारा, मूलाग्रभागविभिन्नचिन्हयुक्ताधरारणिः कार्या । एवं विधैवोत्तरा । उत्तरारण्येकदेशनिर्म्मितमष्टाङ्गुलमितं मन्थनकाष्ठं, तदेव प्रमन्थ इति चोच्यते । चात्रं द्वादशाङ्गुलं मन्थनदण्ड इति यावत् । ओविली च द्वादशाङ्गुला । ओविलीनाम, मन्थनदण्डस्योपरिभागे यो लोहशङ्कुस्तदुपरि स्थापनकाष्ठम् । शणमिश्रगोवालनिर्म्मितं त्रिवृतं व्यामप्रमाणं नेत्रं, मन्थनरज्जुरिति यावत् । पात्राणां लक्षणमुक्तं स्थालीपाके । ततो ब्रह्मा, सूर्यास्तमयसमीपे यजमानायोत्तरामरणिं प्रयच्छेदधरारणिं पत्न्यै । ततो निशायामग्निधारणं, दम्पत्योर्जागरणमग्न्यगारे शयनं वा । ततोऽतीतायां रात्रावग्निमुपशमय्योषःकाले नद्यादौ स्नात्वा, वस्त्रादिभिराच्छाद्य शुद्धा अपः प्रोक्षणाद्यर्थमाहरेत्ता अनुगुप्ता भवन्ति । अथ ताभिरद्भिरग्न्यगारं कुण्डं चोपलिप्याग्नेः पश्चिमतः पूर्णाहुत्यनन्तरं क्रियमाणसायंप्रातर्होमसमाप्तिपर्य्यन्तं वाग्यतावुपविशेयाताम् । तत्रैवोदितेऽनुदिते वा मन्थनम् । ततो ब्रह्माऽधरारणिमादायाग्नेः पश्चादुगग्रां निधाय, तत्र देवयोनिं कल्पयेत् । "गृह्यासंग्रहे" । 'मूलादष्टाङ्गुलं त्यक्त्वा अग्राच्च द्वादशाङ्गुलम् । देवयोनिः स विज्ञेयस्तत्र मन्थ्यो हुताशनः' ॥ देवयोनावेव मन्थननियमः प्रथमाधाने, न पुनराधाने । मन्थनरज्ज्वालम्भः पत्न्याः । पत्नीवहुत्वे जन्मतो विवाहतः क्रमेण सर्वासामालम्भः । मन्थनप्रकारः "कर्मप्रदीपे । 'यजमानः प्राङ्-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मुख उपविश्य, मन्थनदण्डमूले उत्तरारणिनिर्मितशङ्कुं दृढं कृत्वा देवयोनौ निधाय, मन्थनदण्डस्योपरि ओविलीं निधाय, मन्थनदण्डस्य तौचकीलोपर्य्युदगग्रा-मोविलीं निधाय निष्कंपं स्तम्भयित्वा, पत्नीमन्थनदण्डं रज्ज्वा त्रिरावेष्ट्य, प्राच्यां यथाग्नेर्निस्सरणं भवति तथा मन्थेत् । जातेऽग्नौ, ब्रह्मन् वरं ते ददामि । "वरस्त्वतुर्वर्षा गौरिति" गृह्या-संग्रहः । जातमग्निं कांस्यपात्रे शरावे वा निधाय, कुण्डसंस्कारं कुर्यात् । यथा । त्रिभिर्दर्भैःप्राग्वामुदग्वं वा त्रिः परिसमूह्य, त्रिर्गोमयजलेन प्रागपवर्गमुपलिप्य, सव्यहस्तं भूमौ निधाय, पुष्प-फल-कुशान्यतमेन कुण्डस्य दक्षिणतो मध्यात्प्रागायतां द्वादशाङ्गुलां पार्थिवीं पीतवर्णां रेखां ध्यात्वोल्लिखेत् ।



Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अथ, तत्पश्चिमसंलग्नामुदगायतामेकविंशत्यङ्गुलामाग्नेयीं लोहितवर्णां रेखामुल्लिखेत् । प्रागायतरेखाया उत्तरतः, प्रागायते प्रादेशमात्रे उदगायतरेखासंलग्ने सप्तसप्ताङ्गुलान्तरिते उत्तरोत्तरे क्रमेण प्रजापतीन्द्रदेवताके कृष्णनीलवर्णे द्वे रेखे उल्लिखेत् । पुनः, सप्ताङ्गुलान्तरितामाग्नेयीसंलग्नां प्रागायतां द्वादशाङ्गुलमितां सोमदेवताकां शुक्लवर्णां रेखामुल्लिखेत्। उल्लेखनाद्यग्निस्थापनान्तं सव्यहस्तस्य भूमौ निधानम्। ततो रेखाभ्यो मृदमुद्धृत्य, कुण्डस्यैशानेऽरत्निमात्रे देशे प्रक्षिप्यावाचीनहस्तस्थेन जलेन कुण्डं प्रोक्षयेत् । एवं पञ्चभूसंस्काराः सर्वत्राग्निप्रतिष्ठापने । ततो जातमग्निम्, भूर्भुवः स्वरिति प्रतिष्ठापयति । ततस्तूष्णीं समिधमादधाति । तत आज्यतन्त्रेण व्याहृतिहोमान्ते पूर्णाहुतिं जुहुयात् ॥ अथ, भवनामानमग्निं पूजयेत्। स्रुवेण स्रुचि त्रिराज्यं गृहीत्वा, चतुर्थस्रुवेणोपायेन स्रुचं पूरयित्वा, प्रजापतिं मनसा ध्यायन्स्रुचा जुहोति । प्रजापतय इदन्न मम । अथवा, प्रजापतये स्वाहेति मनसोक्ता जुहोति । ततो व्याहृतिहोमाद्युपरिष्टात्तन्त्रं समापयेत् । यज्ञवास्त्वन्ते, ब्रह्मन् गां ते ददामि । वासोयुगलन्ते ददामि । स्वधृतं पत्नीधृतञ्च वासोयुगलन्नत्वन्यत् । त्रयस्त्रिंशत्ततोऽधिकं वा ब्राह्मणान् भोजयेत् । ततस्तन्त्रेण सायंप्रातर्होमं कुर्य्यात्। प्रथमं सायं होमः । ततः प्रातर्होमः ॥ ततो नान्दीश्राद्धपूर्वकं वैश्वदेवं बलिहरणञ्च । अत ऊर्द्ध्वं सायमाहुत्युपक्रमः । तत्प्रयोगमनुपदमेव वक्ष्यामि॥ आहरणपक्षे, अरणिप्रदानमन्यनानि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वर्ज्जयित्वा, अन्यत्सर्वं पूर्ववत्कुर्य्यात् ॥ ब्राह्मणराजन्यवैश्यबहुयाज्यम्बरीषाणामन्यतमगृहात्प्रातरग्निमाहृत्य स्थापयेदिति विशेषः। पितरि मृते, एकादशेऽन्हि नान्दीश्राद्धं विनोक्तविधिना भोजनं विहाय प्रातस्सद्य एवाधानं कुर्यात् ॥ तस्मिन्नेव दिने सायमाहुत्युपक्रमः । द्वादशेऽन्हि सपिण्डीकरणम् । "तदुक्तं 'कात्यायनेन'। एतद्गृहपतौ प्रेते कुर्यादेकादशेऽहनि। प्रागेवैकादशश्राद्धं रुद्धो जागरणादिकम्" ॥ अन्त्यसमिदाधानकालिकाधाने विशेषः । यत्रान्त्यसमिदाधानं स एव गृह्योऽग्निः। नान्दीश्राद्धं कृत्वाऽस्याग्नेर्गृह्याग्नित्वसिद्धयेऽन्त्यसमिदाधानं करिष्य इति विशेषः । तत्कृत्वा समावर्त्तनं चानुष्ठाय सायमाहुत्युपक्रमं कुर्यात् । विवाहकालिकाधाने विशेषः । यस्मिन्नग्नौ विवाहः स एव गृह्योऽग्निः । नात्र कश्चन पूर्णाहुतिसंस्कारस्तथापि किञ्चित्सङ्कल्पे विशेषः। भार्य्यात्वसिद्धये अस्याग्नेर्गृह्याग्नित्वसिद्धये च, विवाहहोमं करिष्ये । एवं विवाहहोमं कृत्वा सायमाहुत्युपक्रमः ॥ अथ विच्छिन्नाधानप्रयोगः ॥ "अग्न्यगारं तथा श्राद्धं चौमाणाश्चैव धारणम्। अवृत्तौ नैव युञ्जीत श्वोभूते मन्थनं तथेति" परिशिष्टोक्तेः । अग्न्यगारकरणनान्द्यहतवस्त्रधारणारणिप्रदानजागरणाग्निधारणाग्निप्रशमनानि वर्ज्जयेत् । अतिक्रान्तदिनपरिगणनया होमद्रव्यं दत्वा, विच्छिन्नसन्धानार्थं गृह्याग्निमाधास्ये, अथवा, पुनराधानं करिष्ये इति सङ्कल्प्य सद्यः पूर्वारणिं मथित्वा, पूर्वायतने स्थापयतीति मथिताग्न्याधाने। आहृताग्न्याधाने तु, पूर्वोक्तगृहाद-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ग्निमाहृत्य पूर्वायतने स्थापयेत् । तत्राज्यतन्त्रेण व्याहृतिचयहोमान्ते, कस्तेजामिरित्यध्यायेनाग्निमुपस्थायाग्निमीड अग्न आयाह्यग्निभिः ३ अग्न आयाहि वीतयेतिस्त्रोऽग्निर्ज्योतिः पुनरूर्ज्जा अग्निं दूतं अग्नेमृड इत्येतैर्मन्त्रैरष्टाज्याहुतीर्हुत्वा, पूर्णाहुत्यादिकं सर्वं पूर्ववत्समापयेत् ॥ अथोपस्थानमन्त्रप्रकाशस्तस्य ऋष्यादयः । कस्तेजामिरिति गोतमो गायत्र्यग्निः ईडेभ्यो विश्वामित्रो गायत्र्यग्निः । उत्तेबृहन्तो इत्यस्य विरूपो गायत्र्यग्निः । पाहि नो अग्न इत्यस्य भर्गो गायत्र्यग्निः । इनो राजन्निति चितस्त्रिष्टुबग्निरुद्रसूर्याः । कयान इत्युशना गायत्र्यग्निः । अग्न आयाहीत्यस्य भर्गो बृहत्यग्निः । अच्छान: सुदीतिर्बृहत्यग्निः । अदाभ्यो विश्वामित्रो गायत्र्यग्निः । भद्रो न इति सोम उष्णिगग्निः । अग्ने वाजस्येति गोतम उष्णिगग्निः । विशोविशो व इति गोपवनः प्रथमाया अनुष्टुप् गायत्र्युत्तरयोरग्निः । समिद्धमिति भारद्वाजो जगत्यग्निः । उप त्वाऽग्निररिति गाच्यग्निः अग्न्युपस्थाने विनियोगः । कस्ते जामिर्जनानामग्ने कोदाश्वध्वरः । कोहकस्मिन्नसि श्रितः । त्वं जामिर्जनानामग्ने मित्रो असि प्रियः । सखा सखिभ्यईड्यः । यजानो मित्रावरुणा यजादेवाꣳऋतं बृहत् । आग्नर्यक्षिस्वंदम ॥ १ ॥ ईडेन्यो नमस्यस्तिरस्तमाꣳसि दर्शतः । समग्निरिध्यते वृषा । वृषो अग्निः समिध्यतेश्वोन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



देववाहनः । तꣳहविष्मंत ईडते । वृषणन्त्वा वयं वृषन् वृषणः
समिधीमहि । अग्ने दीद्यतं बृहत् ॥ २ ॥ उत्ते बृहन्तो अर्चयः
समिधानस्य दीदिवः । अग्ने शुक्रास ईरते ॥ उप त्वा
जुह्वोऽ३मम घृताची र्यंतु हर्यत ॥ अग्ने हव्या जुषस्व
नः ॥ मंद्रꣳहोतारमृत्विजं चित्रभानुं विभावसुम् । अग्निमीडे
स उश्रवत् ॥ ३ ॥ पाहि नो अग्नएकया पाह्यू३त द्विती-
यया । पाहि गीर्भिस्तिसृभिरूर्जांपते पाहि चतसृभिर्वसो ।
पाहि विश्वस्माद्रक्षसो अराव्णः प्रस्म वाजेषु नोव । त्वामिद्धि
नेदिष्ठं देवतातय आपिं न क्षामहे वृधे ॥ ४ ॥ इनोराजन्नरतिः
समिद्धो रौद्रो दक्षाय सुषुमाꣳअदर्शि । चिकिद्विभाति भासा
बृहतासिक्नीमेतिरुशतीमपाजन् । कृष्णां यदेनीमभिवर्पसाभू-
ज्जनयन्योषां बृहतः पितुर्जाम् ऊर्द्ध्वं भानुꣳसूर्य्यस्य स्तभायं
दिवो वसुभिररतिर्विभाति । भद्रो भद्रया सचमान आगा-
त्स्वसारं जारो अभ्येति पश्चात् । सुप्रकेतैर्द्युभिरग्निर्वितिष्ठ-
न्नुशद्भिर्वर्णैरभिराममस्थात् ॥ ५ ॥ कयाते अग्ने अंगिर ऊर्ज्जोन-
पादुपस्तुतिं वराय देव मन्यवे । दाशेम कस्य मनसा यज्ञस्य
सहसोयहो कदुवोच इदं नमः । अधात्वꣳहि नस्करो विश्वा
अस्मभ्यꣳसुक्षितीः । वाजद्रविणसो गिरः ॥ ६ ॥ अग्न आया-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अग्निनभिहोतारं त्वा वृणीमहे । आ त्वामनक्तु प्रयता हवि-
ष्मती यजिष्ठं बर्हिरासदे । अच्छा हि त्वा सहसः सूनो अंगिरः
स्रुचश्चरन्त्यध्वरे । ऊर्जोनपातं घृतकेशमीमहेऽग्निं यज्ञेषु
पूर्व्यं ॥ ७ ॥ अच्छा नः शीरशोचिषं गिरो यन्तु दर्शतं । अच्छा
यज्ञासो नमसा पुरूवसुं पुरुप्रशस्तमूतये । अग्निꣳसूनुꣳसहसो
जातवेदसं दानाय वार्याणां । द्विताघोभूदमृतो मर्त्त्येष्वाहोता-
मन्द्रतमो विशि ॥ ८ ॥ अदाभ्यः पुर एता विशामग्निर्मानुषीणां
तूर्णी रथः सदानवः । अभि प्रयाꣳसि वाहसा दाश्वाꣳअश्नोति-
मर्त्यः । क्षयं पावक शोचिषः । साह्वान्विश्वा अभियुजः
क्रतुर्द्देवानाममृक्तः । अग्निस्तुविश्रवस्तमः । भद्रो नो अग्नि-
राहुतो भद्रारातिः सुभग भद्रो अध्वरः । भद्रा उत प्रश-
स्तयः । भद्रं मनः कृणुष्व वृत्रतूर्य्ये येनासमत्सु सासहिः ।
अव स्थिरा तनुहि भूरि शर्द्धतां वने मा ते अभिष्टये ॥ १० ॥
अग्ने वाजस्य गोमत ईशानः सहसो यहो । अस्मे देहि
जातवेदो महि श्रवः । स इधानो वसुष्कविरग्निरीडेन्यो गिरा ।
रेवदस्मभ्यं पुर्वणीक दीदिहि । क्षपो राजन्नुतत्मनाग्ने वस्तो-
रुतोषसः । स तिग्मजंभ रक्षसो दह प्रति । विशोविशो वो
अतिथिं वाजयंतः पुरुप्रियं । अग्निं वो दुर्यं वचः स्तुषे शूषस्य



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मन्मभिः । यं जनासो हविष्मंतो मित्रं न सर्पिरासुतिं । प्रशꣳ-
संति प्रशस्तिभिः । पन्याꣳसंजातवेदसं यो देवतात्युद्यता ।
हव्यान्यैरयद्दिवि ॥ १२ ॥ समिद्धमग्निꣳसमिधा गिरा गृणे शुचिं
पावकं पुरो अध्वरे ध्रुवं । विप्रꣳहोतारं पुरुवारमद्रुहं कविꣳ
सुम्नैरीमहे जातवेदसं । त्वां दूतमग्ने अमृतं युगे युगे हव्य-
वाहं दधिरे पायुमीड्यम् । देवासश्च मर्त्तासश्च जागृविं विभुं
विश्पतिं नमसा निषेदिरे । विभूषन्नग्न उभयाꣳअनुव्रता दूतो
देवानाꣳरजसी समीयसे । यत्ते धीतिꣳसुमतिमावृणीमहे धस्मा-
न्स्त्रिवरूथः शिवो भव ॥ १३ ॥ उप त्वा जामयो गिरो देदिश-
तीर्हविष्कृतः । वायोरनीके अस्थिरन् । यस्य त्रिधात्ववृतं
बर्हिस्तस्थावसंदिनं । आपश्चिन्निदधा पदं । पदं देवस्य मीढुषो-
नाधृष्टाभिरूतिभिः । भद्रा सूर्य इवोपदृक् ॥ १४ ॥ इत्यर्द्धः प्रपा-
ठकः ॥ ततोऽष्टावाज्याहुतयस्तत्र मन्त्राः । अग्निमीड इति मधु-
च्छन्दा अग्न आयाह्यग्निभिरिति भर्गः । अग्न आयाहि वीतय
इत्यस्य भारद्वाजः । अग्निर्ज्योतिस्त्रयाणां प्रजापतिः । अग्निंदूत-
इत्यस्य मेधातिथिः । अग्ने मृड इत्यस्य वामदेवः सप्तानां
गायत्री । अग्न आयाह्यग्निर्हन्ती सर्वेषामग्निर्देवताऽऽज्यहोमे
विनियोगः ॥ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजं । होता-
रꣳरत्नधातमम् ॥ १ ॥ अग्न आयाह्यग्निभिर्होतारं त्वा वृणी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



महे । आ त्वामनुक्त प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥ २ ॥ अग्न आयाहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ॥ ३ ॥ अग्निर्ज्योतिर्ज्योतिरग्निरिन्द्रो ज्योतिर्ज्योतिरिन्द्रः । सूर्यो ज्योतिर्ज्योतिः सूर्यः ॥ ४ ॥ पुनरूर्जा निवर्त्तस्व पुनरग्न इषायुषा । पुनर्नः पाह्यंहसः ॥ ५ ॥ सह रय्या निवर्त्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि ॥ ६ ॥ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं । अस्य यज्ञस्य सुक्रतुं ॥ ७ ॥ अग्ने मृड महाऽअस्यय आ देवयुं जनं । इयेथ बर्हिरासदं ॥ ८ ॥ अग्नय इदं न ममेतित्यागः । एभिर्मन्त्रैराज्याहुत्यष्टकं हुत्वा ततः पूर्णाहुत्यादिकं पूर्ववत्सायं प्रातर्होमौ तन्त्रेणाधानांगभूतौ तदैव ॥ इत्याधानप्रयोगः ॥

अथ सायमारभ्यैवौपासनहोमः । तदुक्तं गोभिलेन । सूत्रम् । "सायमाहुत्युपक्रम एवात ऊर्द्धं गृह्येऽग्नौ होमो विधीयते" । अत ऊर्द्धमाधानदूर्द्धं । स्पष्टमन्यत् । तस्य प्रयोगः । सायं येन हविषा हूयते तेनैव हविषा प्रातर्होमो निर्वर्त्तनीयः ॥ अथ यजमानश्शुचिः प्रक्षालितपाणिपाद आचान्तः पत्न्या सह सूर्य्यास्तमायात्पूर्वमधिवृत्तसूर्य्ये सूयादयात्पूर्वमाविस्सूर्य्ये सायमौपासनहोमं होष्यामीति सायम्, प्रातरौपासनहोमं होष्यामीति प्रातस्सङ्कल्प्य, होमसमाप्तिपर्यन्तमाचमनपर्य्युक्षणाद्यग्निपरिचर्य्योपयुक्ता अपः परिकल्पयेत् । समिद्द्वयं होमद्रव्यं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



जलपूर्णं चमसं चाग्नेः पश्चादासादयेत् । अथवा, सायमेवापः परिगृह्य ताभिरेव प्रातरग्निपरिचर्य्या कर्त्तव्या । अथवा, मद्दतो-जलभाण्डादेवाग्निपरिचर्य्यार्थं ग्राह्यम् । ततस्सूर्य्यास्तमयात्पूर्व-मग्निप्रज्वलनङ्कृत्वाऽस्तमिते सायमाहुतिम्, उदयात्पूर्वं प्रज्व-लनङ्कृत्वा सूर्योदयात्पूर्वं सूर्योदये जाते वा प्रातराहुतिञ्जुहु-यात् । व्यवस्थितोऽयं विकल्पो यथारम्भङ्गोभिलसूत्रिणाम् । तत-स्तूष्णीमग्नौ समिधं प्रक्षिप्याग्निं प्रज्वाल्य तत्र तत्र विक्षिप्ता-ग्निकणान्तूष्णीं कुशैरेकीकुर्य्यात् । तदेव परिसमूहनम् । दक्षि-णजानु भूमौ संस्थाप्य चमसोदकमादायाग्नेर्दक्षिणतो निर्ऋति-मारभ्याग्निदिक्पर्य्यन्तं सन्ततामुदकधारामञ्जलिना कुर्यादद-तेऽनुमन्यस्वेति मन्त्रेण । एवमग्नेः पश्चान्निर्ऋतिमारभ्य वायुदिक्-पर्य्यन्तमञ्जलिना सिञ्चेदनुमतेऽनुमन्यस्वेति मन्त्रेण । अग्नेरुत्त-रतो वायुदिशमारभ्यैशानपर्य्यन्तमञ्जलिनोदकधारां कुर्यात्स-रस्वत्यनुमन्यस्वेति मन्त्रेण । एषां मंत्राणां प्रजापतिर्ऋषिरेक-पदागायत्रीछन्दोऽदित्यनुमतिसरस्वत्यो देवता उदकाञ्जलि-सेचने विनियोगः । ततोऽञ्जलिनोदकमादाय देवसवितरित्य-नेन मन्त्रेण सकृत्त्रिर्वाऽग्निं प्रदक्षिणं परिषिञ्चति । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुस्सविता देवताऽनुपर्य्युक्षणे विनियोगः । देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिम्भगाय दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः स्वदतु । पर्य्युक्षणे विशेषः । पर्य्युक्षणारम्भकोटिमभ्यन्तरतोऽवसानकोटिञ्च बहिः कुर्वन् होमीयद्रव्यं पर्य्युक्षणधाराया अभ्यन्तरतः कुर्वन्परिषि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



च्चेत्। एवं सर्वत्र स्थालीपाकादिषूदकाञ्जलित्रयं पर्य्युक्षणञ्च कार्य्यम्। भवनामानमग्निं ध्यायेत्। "तदुक्तं 'गृह्यासङ्ग्रहे'। आवसथ्ये भवो ज्ञेयो वैश्वदेवे तु पावकः"। आवसथ्यस्यैव गृह्याग्निरौपासनाग्निरिति च नामान्तरमिति व्याख्यातारः॥ अथ तूष्णीं समिधमाधाय, त्रिःप्रक्षालितान् प्रगतोदकान् पात्र-स्थान्तण्डुलान्यवान् व्रीहीन्वा गृहीत्वाऽग्नये स्वाहेति दक्षिणहस्तेन मध्येऽग्नौ जुहोति। अग्नय इदं न मम। पुनरवशिष्टं हविरादाय प्रजापतये स्वाहेति मनसोत्कोत्तरार्द्धपूर्वार्द्धे जुहोति। प्रजापतय इदं न ममेति सायम्। प्रातःकाले। सूर्याय स्वाहा। सूर्यायेदं न मम। प्रजापतये स्वाहा। प्रजापतय इदं न ममेति विशेषः। अथवा, दध्ना पयसा यवाग्वाऽन्नेन वा जुहुयात्। यवाग्वा अन्नस्य पयसश्च गृह्याग्नावेव श्रपणम्। द्रवद्रव्ये स्रुवपूरितेन जुहुयात्। तदभावे, कांस्यपात्रेण चरुस्थाल्या वा। कठिनद्रव्यं तु, दक्षिणपाणिना जुहुयात्। व्रीह्यादिप्रमाणं द्वादशपर्वपूरणमात्रम्॥ अथ तूष्णीं समिधमाधाय, देवसवितरिति पूर्ववत्पर्य्युक्षणमुदकाञ्जलिसेचनञ्च कुर्यात्। तत्र मन्त्रविशेषः। अदितेऽन्वमꣳस्थाः। अनुमतेऽन्वमꣳस्थाः। सरस्वत्यन्वमꣳस्थाः। अन्यत्पूर्ववत्॥ अथ प्रदक्षिणमग्निं परिक्रम्याग्निपरिचर्यार्थं यस्मिंश्चमसे पात्रे वा जलं स्थापितं, तदगाराद्दक्षिरवनीयान्येनोदकेन चमसं प्रक्षाल्य पूरयित्वा स्वस्थाने निधाय, नमस्कारान्विधाय वामदेव्यं गीत्वाऽऽचम्य ब्रह्मार्पणं कुर्य्यात्। एवं सायंप्रातर्होमो यावज्जीवं कर्त्तव्यः। प्रवासे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पत्न्या ऋत्विगादिभिर्वा कार्यं इत्यधास्तान्निरूपितम् । इत्यौपासनप्रयोगः ॥ अथोक्तप्रयोगक्रमः सुबोधाय लिख्यते ॥ तत्रादौ संकल्पः । प्रादुष्करणम् । परिचर्य्याऽर्थोदकाहरणम् । तण्डुलादिहोमद्रव्यक्षालनं । अग्नौ बहुकाष्ठप्रक्षेपणम् । परिसमूहनम् । उदकाञ्जलिसेचनम् । पर्य्युक्षणम् । एकसमित्प्रक्षेपणम् । प्रधानहोमः । पुनरेकसमित्प्रक्षेपणम् । अनुपर्य्युक्षणम् । उदकाञ्जलिसेचनम् । प्रदक्षिणादि । शेषजलनिनयनं । चमसपूरणम् । चमसस्थापनम् । वामदेव्यगानम् । ब्रह्मार्पणम् । इति प्रयोगक्रमः ॥ गृह्योऽग्निर्नित्यो धार्यश्च । अनुगतश्चेत्सद्यो मन्थ्य आहार्य्यो वा यथाऽऽरम्भम् । तत्र कात्यायनोक्तसर्वप्रायश्चित्तहोमः । तत्प्रयोगः । विधिवदग्निं प्रतिष्ठाप्य तूष्णीं परिसमूह्याज्यं संस्कृत्य स्रुवं संमृज्य पर्य्युक्ष्य तूष्णीं समिधमाधायाज्येन, भूः स्वाहा । अग्नय इदं न मम । भुवः स्वाहा । वायव इदं न मम । स्वः स्वाहा । सूर्यायेदं न मम । भूर्भुवः स्वः स्वाहा । प्रजापतय इदं न ममेतिहुत्वा समिदाधानादिशेषं समापयेत् । इदमेव प्रायश्चित्तं प्रादुष्करणकालातिक्रमेऽपि कर्त्तव्यम् । अस्तमये सूर्योदये वाऽग्न्यनुगमने पुनराधानम् । पुनराधाने "निमित्तान्तरमप्युक्तं 'कर्मप्रदीपे' । अरण्योः क्षयनाशाग्निदाहेष्वग्निं समाहितः । पालयेदुपशान्तेऽस्मिन् पुनराधानमिष्यते ॥ ज्येष्ठाचेद्बहुभार्य्यस्य अतिचारेण गच्छति । पुनराधानमत्रैक इच्छन्ति न तु गौतमः ॥ अरण्योरल्पमप्यङ्गं यावत्तिष्ठति पूर्वयोः । न तावत् पुनराधानमन्यार-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



यये।र्विधीयते" इति ॥ अथ समारोपणप्रकारः ॥ अयन्ते योनिरित्यस्य विश्वामित्रोऽग्निरनुष्टुबग्निसमारोपे विनियोगः । अयन्ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आरोहाथानो वर्द्धया रयिम् । इति मन्त्रेण होमोत्तरमरणिं प्रताप्याग्निसमारोहं तच भावयेत् । समित्समारोपे । एषा ते अग्ने समिदिति मन्त्रेण समिधं प्रताप्याग्निसमारोहं तच भावयेत् । अस्य प्रजापतिरनुष्टुबग्निसमित्समारोपे विनियोगः । एषा ते अग्ने समित्तया वर्द्धस्व चाचप्यायस्व वर्द्धिषीमहि च वयमाचप्यासिषीमहि ॥ अथ प्रत्यवरोहणम् ॥ मन्त्रस्य प्रजापतिर्ऋषिर्यजुरग्निर्देवता प्रत्यवरोहणे विनियोगः । उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते सꣳसृजेथामयञ्च । अस्मिन् सधस्थे अध्युतरस्मिन्विश्वेदेवा यजमानश्च सीदत । अनेनारणिं निर्मथ्यायतने यथाविधि स्थापयेत् । समित्समारोपे, अनेनैव समिधमभिमन्त्र्याहृताग्नावादध्यात् ॥

अथ द्वितीयखण्डिकार्थ उच्यते॥ "यज्ञोपवीतं कुरुते" । सूत्रन्नवतन्त्वात्मकं त्रिवृतं ब्रह्मग्रन्थियुक्तं सर्वदाधार्य्यम् । तच विशेषः । शुचौ देशे प्राङ्मुख उदङ्मुखो वा स्वाध्यायदिवसे पूर्वाह्णे सूत्रं निर्माय, संहतदक्षिणहस्ताङ्गुलिचतुष्टयमध्यपर्वदेशे षण्णवतिसंख्ययाऽऽवेष्ट्य पुनस्त्रिगुणीकृत्यापोहिष्ठेत्यादिभिरब्लिङ्गैर्मन्त्रैः प्रक्षाल्य, त्रिगुणीकृतं तत्सूत्रं वामकरतले संस्थाप्य, दक्षिणकरतलेनोर्ध्वं नयेदेतदूर्ध्ववृत्तं भवति । पुनस्तत्त्रिगुणीकृत्य दक्षिणकरतलेनाधोनयेदित्यधोवृत्तं भवति । ततः प्रवरानुसारेण

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ग्रन्थित्रययुतं पञ्चग्रन्थियुतं वा कुर्यात् । सूत्रोत्पादनादिकाले "ध्यातव्यदेवता आह, 'गृह्यासंग्रहकारः' । ब्रह्मणोत्पादितं सूत्रं विष्णुना त्रिगुणीकृतम् । रुद्रेण च कृतो ग्रन्थिस्सावित्र्या चाभिमन्त्रितम्" ॥ अयम्भावः । सूत्रोत्पादनादिकर्मसु तत्तद्देवता प्रतिपादकमन्त्रान् जपेद्वा येद्वा तत्तद्देवताः । ताश्च, ओंकारोऽग्निर्नागस्सोमः पितरः प्रजापतिर्वसव इति । धारणात्पूर्वं गायत्र्या दशकृत्वोऽभिमन्त्रयेत् । धारणप्रकारः । दक्षिणं बाहुमूर्द्धमुत्तानं कृत्वा तत्र यज्ञोपवीतग्रन्थिप्रदेशं संस्थाप्याधः प्रदेशे वामहस्तमवाञ्चन्निधाय, वक्ष्यमाणमन्त्रेण शिरोद्वारा वामांसे प्रतिष्ठापयति । दक्षिणकक्षमन्ववलम्बनं भवति । न नाभेरूर्ध्वं नाधः । यज्ञोपवीतधारणमन्त्र उपनयने वक्ष्यते । चोरादिभिरपहृते विनष्टे वा, जलादौ शीघ्रमेव वस्त्रकुशरज्जुं वा यज्ञोपवीतवद्धृत्वा, शीघ्रमेव कार्पासतन्तुं यथोक्तलक्षणयज्ञोपवीतं विधिवद्धारयेत् । सदैव यज्ञोपवीतिना भवितव्यम् । प्राचीनावीती पितृकार्य्ये । तस्य लक्षणम् । सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेंऽसे प्रतिष्ठापयति, सव्यं कक्षमन्ववलम्बमेवं प्राचीनावीती भवति ॥ अथाचमनविधिः ॥ तत्रादौ पादौ हस्तौ प्रक्षाल्य, त्रिवारमुदकं ब्रह्मतीर्थेन पीत्वा, द्विरोष्ठौ परिमृज्य पादौ शिरश्चाभ्युक्ष्याक्षिनिचद्वयं नासापुटद्वयं कर्णद्वयं च स्पृशेत् । कर्मप्रदीपे विशेषः । संहताभिस्त्र्यङ्गुलीभिर्मुखमङ्गुष्ठतर्ज्जनीभ्यां नासापुटद्वयमङ्गुष्ठानामिकाभ्यां चक्षुषी, पुनस्ताभ्यां श्रोत्रे, कनिष्ठाङ्गुष्ठाभ्यां नाभिं, पाणितलेन हृदयं, सर्वाभिरङ्गुलीभिः शिरोऽङ्गुल्यग्रैर्बाहू

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



संस्पृशेत्। सर्वत्र दक्षिणं स्पृष्ट्वा वामं स्पृशेत्। अत्र "केचित्स्मृत्यन्तरसूत्रान्तरप्रतिपादिताङ्गान्तरस्पर्शनं कुर्वन्ति" तदयुक्तं। तेषु परस्परविरुद्धन्यूनाधिकाङ्गस्पर्शनस्य दर्शनात्सर्वत्र सर्वोपसंहारस्याशक्यत्वात्स्वसूत्रोक्ताङ्गस्पर्शनमेव न्याय्यम्। गच्छन्तिष्ठन्दिशो विलोकयन्नप्रणतो, नाङ्गुलीभिरुद्धृत्य, नातीर्थेन, न शब्दङ्कुर्वन्नापूतमदृष्टञ्च, नैकवस्त्रो, न जानुभ्यां बहिर्हस्तौ कृत्वा, न प्राचीनावीती, न निवीती, नोष्णजलेन फेनजलेन वा, नोपानद्दो धृत्वा, न वस्त्रेण शिरो वेष्टयित्वा, न गले बद्धवस्त्रो, न पादौ प्रसार्य्य चाचामेत्। आचमनानन्तरमशुचिस्थाने पुनराचमनं कुर्यात्। ब्राह्मणो हृदयं गताः, क्षत्रियः कण्ठगता, वैश्यस्तालुगता, अप आचमेत्। यथोक्तविधिनाऽऽचमनेऽकृत उच्छिष्टो भवति। विधिवदाचमने शुद्धो भवति। सुप्त्वा भुक्त्वा, क्षुत्वा, स्नात्वा, पीत्वा, वस्त्रं धृत्वा, पण्यविथीकाङ्गत्वा, श्मशानङ्गत्वा, पुनराचामेत्। अन्यान्यपि निमित्तानि सूत्रान्तराद्ग्राह्याणि। इति द्वितीया खण्डिका। तृतीयखण्डिकायां सायम्प्रातर्होमप्रयोगः सच पूर्वमुक्तः॥

अथ चतुर्थखंडिकयोक्तवैश्वदेवप्रयोग उच्यते॥ पत्न्याऽथवाऽन्यया पाके कृते, गृहपत्निः सायम्प्रातर्वैश्वदेवं कुर्यात्। ततो गृहाधिपो देशकालौ संकीर्त्त्य ममोपात्तसमस्तदुरितक्षयद्वारा परमेश्वरप्रीत्यर्थं पञ्चसूनाघनिर्हरणद्वाराऽऽत्मसंस्कारार्थं च प्रातर्वैश्वदेवं करिष्य इति प्रातः। सायं वैश्वदेवं करिष्य इति सायम्। पचनाग्निं स्थण्डिले विधिवत्प्रतिष्ठापयेत्।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



गृह्याग्निस्थेन्न पञ्च भूसंस्काराः । सर्वपाके निर्वृत्ते शुचिभूतां पत्नीमन्यां वा भूतमिति ब्रूहीत्युक्त्वा तां भूतमिति वाचयित्वा, तदन्नमग्निसमीपमानीय गृहपतिरोमित्युच्चैः प्रतिजपित्वा तस्मै नमस्तन्माक्ष्या इत्युपांशु प्रतिजपति । ततोऽग्निं प्रज्वाल्य तूष्णीं परिसमूह्य समिधमाधायोदकाञ्जलिसेचनं पर्युक्षणञ्च पूर्ववत्कृत्वाऽग्नेः पश्चादासादितमन्नं प्रोक्ष्य हविष्यैर्व्यञ्जनैरुपसिच्य तूष्णीं समिधमाधाय हस्तेन जुहुयात् । प्रजापतये स्वाहेति मनसोच्चार्य मध्ये जुहोति । प्रजापतय इदं न मम । अग्नये स्विष्टकृते स्वाहेत्युत्तरार्द्धपूर्वार्द्धे जुहोति । अग्नये स्विष्टकृत इदं न मम । ततः समिदाधानादि । अथ हुतशेषेणान्नेन बलीन् हरति । तत्तत्स्थाने बलिहरणस्यासम्भवेऽग्नेः पश्चादेकस्मिन्देशे सूत्रकृतानुमतं बलिहरणं कुर्यात् । "तदुक्तं 'कर्मप्रदीपे' । अथ तद्विन्यासो हृद्विपिण्डानिवोत्तरोत्तराञ्चतुरो बलीन्निदध्यादि"त्यादिना । तत्र चमसस्थं जलमादाय प्राक्संस्थां जलधाराम्भूमौ कृत्वा, बलिचतुष्टयपर्याप्तमन्नं हस्ते गृहीत्वा, पृथिव्यै नमः । वायवे नमः । विश्वेभ्यो देवेभ्यो नमः । प्रजापतये नम इति चतुरो बलीन् प्राक्संस्थान्निधाय तेषामुपरि पूर्ववज्जलं प्रक्षिपेत् । तेषामुत्तरतोऽद्भ्यो नमः । ओषधिवनस्पतिभ्यो नमः । आकाशाय नमः । कामाय नम इति प्राक्संस्थान् चतुरो बलीन्निदध्यात् । तेषामुत्तरतो मन्यवे नमः । इन्द्राय नमः । वासुकये नमः । ब्रह्मणे नम इति चतुरो बलीन्निदध्यात् । सर्वेषामुत्तरतो रक्षोजनेभ्यो नमः । अप

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



उपस्पृश्य, बलिशेषमुदकेनाप्लाव्य प्राचीनावीती पितृतीर्थेन सर्वेषां दक्षिणतः पितृभ्यस्स्वधेति बलिन्निदध्यात् । सर्वेषाम्बलीनां पृथक् पृथक् पुरस्तादपान्निनयनमुपरिष्टाच्च सेचनम् । अप उपस्पृश्य कृताञ्जलिपुटोऽग्निं प्रार्थयेत् । आरोग्यमायुरैश्वर्यं धीर्धृतिश्शं बलं यशः । ओजो वर्चः पशून् वीर्यं ब्रह्म ब्राह्मण्यमेव च ॥ सौभाग्यं कर्मसिद्धिं च कुलज्यैष्ठं सुकर्तृताम् । सर्वमेतत्सर्वसाक्षिन्द्रविणोद रिरीहि नः । ततो नित्यबलिहरणानन्तरं काम्यबलिहरणं कुर्य्यात् । सर्वेषामुत्तरतो यवेभ्यो नमः । इति यवाग्रयणोत्तरं यावद्व्रीह्याग्रयणम् । व्रीह्याग्रयणोत्तरं व्रीहिभ्यो नम इत्यायवाग्रयणं । तथैव त्यागः । अनेन दीर्घायुर्भवति । स्वकर्तृकोऽयम्बलिः । प्रवासादावेतस्य लोपः । दत्तेऽन्ने कणमण्डमिश्रितजलेन रुद्रेभ्यो नम इति बलिं दद्यात् । स रौद्रो भवति । अयं बलिस्तु रात्रौ देयः । वामदेव्यगानम् । एतावान्वैश्वदेवबलिहरणप्रयोगः कौथुमीयानाम्नातोऽधिकस्सूत्रान्तरोक्तो ग्राह्यः । यजमानप्रवासे रोगादिना पीडिते च, ब्राह्मणद्वारा होमा बलयश्च कर्त्तव्याः । वैश्वदेवं विना दम्पत्योर्भोजनमयुक्तं भवति । यदि स्त्रीबालारोगिणी गर्भिणी वा स्यात्तस्या वैश्वदेवात्पूर्वं भोजनं न दोषावहम् । एवम्बालवृद्धातुराणामपि पूर्वं भोजनम् । एवं सायंप्रातर्वैश्वदेवं यावज्जीवं कर्त्तव्यम् । उपवासदिनेऽपि पुरुषसंस्कारकत्वात् । अन्नसंस्कारस्त्वावान्तरफलम् । एककालं वैश्वदेवलोपेऽहोरात्रमुपवासः । कालद्वयात्यये वैश्वानरश्चरुः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



विवाहोपासनारम्भानन्तरं वैश्वदेवारम्भः। कालान्तरे चेत्प्रायश्चित्तपूर्वकं वैश्वदेवारम्भः। तस्य प्रयोगः। ब्राह्मणाननुज्ञाप्य गणेशं संपूज्य नान्दीश्राद्धं कृत्वा, देशकालौ संकीर्त्त्य वैश्वदेवमारप्स्ये तच्च यावज्जीवं सायंप्रातः करिष्य इति सङ्कल्प्य वैश्वदेवं कुर्यात्। स्त्रीह सायं बलीन्हरेत्प्रातः पुमान्। सर्वार्थं पक्कस्य पित्रर्थं ब्राह्मणभोजनार्थं वा पक्कस्यान्नमादाय वैश्वदेवं कृत्वा ब्राह्मणान् भोजयेत्। स्वयञ्च भुञ्जीयात्। श्राद्धे चाग्नौकरणान्ते विकिरान्ते पिण्डदानान्ते वा वैश्वदेवः। अग्निष्टोमादियज्ञे यजमानस्य वैश्वदेवनिवृत्तिः। एकस्मिन्काले व्रीहियवादीनां धान्यानां पाके, एकस्माद्गृहीत्वा सकृदेव होमबलिहरणं कुर्यात्। वैश्वदेवानन्तरं बहुब्राह्मणानां भोजनार्थं पुनः पाके सति, न वैश्वदेवानुष्ठानम्। एकपाकोपजीविनां भ्रातृपुत्रादीनां भोजनार्थं बहुषु महानसेषु पाकेषु, गृहपति पाकादेव वैश्वदेवं कुर्य्यात्। इति वैश्वदेवप्रयोगः॥ इति चतुर्थीखण्डिका॥ अथ पञ्चमषष्ठसप्तमाष्टमनवमखण्डिकाभिर्दर्शपौर्णमासस्थालीपाकप्रयोग उक्तस्सचास्माभिः पूर्वमेव वर्णितः। इति प्रथमप्रपाठकस्समाप्तः।

## अथ द्वितीयप्रपाठकः।

तत्रादौ विवाहप्रयोग उच्यते॥ सामवेदीयमन्त्रब्राह्मणे पर्य्युक्षणमन्त्रपाठानन्तरं विवाहमन्त्राणां पाठात्। "पुण्ये नक्षत्रे दारान्कुर्वीत"। पुण्यनक्षत्राणि ज्योतिश्शास्त्रोक्तानि। सूत्रकृन्मते, उत्तरायणे शुक्लपक्षे पुण्येऽहनि मध्याह्नात् प्राग्विवाहः।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



शास्त्रान्तरोक्ततिथिवारलग्नादिकं यथासम्भवमविरोधाद्ग्राह्यम् । तत्रादौ सामुद्रिकशास्त्रविद्भिरुद्वाह्य कन्याया भाविशुभाशुभं परीक्षितव्यम् । कन्यालक्षणविदामलाभेऽग्निष्टोमवेदिलाङ्गलपद्धत्यगाधजलाशयगोष्ठचतुष्पथद्यूतस्थानश्मशानोषरस्थानेभ्यः पृथक् पृथङ्मृदमादायैकैकमृदैकैकं पिण्डं कृत्वा सर्वाभ्यो मृद्भ्यः किञ्चिन्मृदमादाय नवमं पिण्डं कुर्यात् । नवपिण्डाः समानाः कर्त्तव्याः । नवसु पिण्डेषु तत्तत्स्थानपरिज्ञानाय चिन्हं कार्य्यम् । ततो वरोऽन्यो वा स्वहस्ते नव पिण्डान्संस्थाप्य कन्यां स्वसमीपे स्थापयेत् । तत ऋतमेव प्रथमं ऋतन्नात्येति कश्चन ऋत इयं पृथिवी श्रिता सर्वमिदमसौ भूयादिति । इतिशब्दान्तमन्त्रमुक्त्वा, हे लक्ष्मि, नवानामेषां पिण्डानामेकं गृहाणेति कन्यां प्रति वदेत् । अस्मिन्मन्त्रेऽसाविनिपदस्थाने कन्यानामप्रयोग ऊह्यः । ततः कन्यैकं पिण्डं गृह्णाति । वेदिमृदा वा, लाङ्गलपद्धतिमृदा वा, अगाधजलाशयमृदा वा, गोष्ठमृदा वा, निर्मितं पिण्डं कन्यया गृहीतं चेत्तस्याः कन्याया उद्वाहश्शुभकरः । अवशिष्टस्थानचतुष्टयमृन्निर्मितानां चतुर्णां पिण्डानामन्यतमपिण्डग्रहणे कन्या नोद्वाह्या । "सर्वस्थानमृन्निर्मितस्य नवमपिण्डस्य ग्रहणे कन्योद्वाह्येति" केचिन्मन्यन्ते । अत्र "केचित्कन्याप्रदाननिश्चयं श्रुत्वा स्वातन्त्र्यमित्युक्ते वाचा कन्यादानमावश्यकमिति" वदन्त्यतस्तत्प्रयोग उच्यते । विद्याकुलशीलव्रतसम्पन्नाय कन्या देयेत्याश्वलायनोक्तेः । सर्वत्र दातुरेव प्रतिगृहीतृप्रार्थनस्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मुख्यत्वाच्च, कन्यापिता तत्पत्नीयो वा, वरगृहङ्गत्वा वैवाहिके शुभदिवसे गणेशं सम्पूज्य वरं तत्पित्रादींश्च सम्पूज्य तैः प्रतिपूजितो देशकालौ संकीर्त्त्य करिष्यमाणोद्वाहाङ्गं वाग्दानं करिष्य इति सङ्कल्पः । ताम्बूलफलान्यादायामुकवेदान्तर्गताऽमुकशाखाध्यायिनेऽमुकगोत्रायाऽमुकशर्म्मणो नप्त्रेऽमुकशर्म्मणः पौत्रायाऽमुकशर्म्मणः पुत्रायाऽमुकशर्म्मणे वराय मदीयां कन्यां वाचा सम्प्रदद इति दद्यात् । असम्भवे पूर्ववत्कन्यापिता वाग्दानं स्वगृहे कृत्वा फलादिकं दृष्टपूर्वाय वराय प्रेषयेत् । अथ कन्यापित्रोद्वाहस्य पूर्वदिने विवाहाङ्गमाभ्युदयिकश्राद्धं कर्त्तव्यमन्नरूपेण हिरण्यरूपेण वा । तत्प्रयोगस्त्वस्माभिरन्यत्र वक्ष्यते । वरपिताऽपि विवाहाङ्गमाभ्युदयिकश्राद्धं कुर्य्यात् ॥ अथ विवाहदिने प्रातः कन्यामाताऽन्या वा माषान्यवान्वा जलेन पेषयित्वा तेन कल्केन सर्वाङ्गोद्वर्त्तनपूर्वकं कन्यां स्नापयेत् । तथा स्नापितां कन्यां ज्ञातिः पिता वा, कामवेदतेनामेत्यादिमन्त्रैर्बहूदकेन शिरसि त्रिवारमभिषिञ्चेत् । उत्तराभ्यां मन्त्राभ्यां यथा गुह्यमाज्ञावितम्भवेत् । प्रथममन्त्रेऽमुमित्यस्य स्थाने वरस्य द्वितीयान्तन्नाम वदेत् । कामवेदते इत्यादिमन्त्राणामादिमन्त्रस्य प्रजापतिर्ऋषिः प्रस्तारपङ्क्तिश्छन्दः कामो देवता द्वितीयमन्त्रस्य ज्योतिर्जगती छन्द उपस्थरूपः कामो देवता तृतीयमन्त्रस्य ज्योतिस्त्रिष्टुप्छन्द उपस्थरूपः कामो देवता कन्याऽभिषेचने विनियोगः । काम वेद ते नाम मदोनामासि समानयामुꣳसुरा ते अभवत् । परमत्र जन्माग्ने तपसो निर्म्मितोऽसि स्वाहा ॥ १ ॥ इमन्त उपस्थं मधुना सꣳसृजामि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रजापतेर्मुखमेतद्द्वितीयं। तेन पुंसोऽभिभवासि सर्वानवशान्वशिन्यसि राज्ञी स्वाहा ॥ २ ॥ अग्निं क्रव्यादमकृण्वन् गुहाना स्त्रीणामुपस्थमृषयः पुराणाः । तेनाज्यमकृण्वंस्त्रैशृङ्गं त्वाष्ट्रं तद्दधातु स्वाहा ॥ ३ ॥ अथ कन्यापिता वेदिकायां पत्न्या कन्यया च सह प्राङ्मुखो ब्राह्मणाननुज्ञाप्यासीनः कुशपवित्रपाणिः प्राणानायम्य देशकालौ संकीर्त्य दशानां पूर्वेषां दशानामपरेषामात्मनश्च नित्यनिरतिशयानन्दशाश्वतब्रह्मलोकावाप्त्यर्थं कन्यादानाख्यमहादानं करिष्य इति सङ्कल्प्य प्रत्यङ्मुखं वरं वक्ष्यमाणमधुपर्केणासनपुष्पादिभिर्वा सम्पूज्य, कन्यां वामकरे धृत्वा दक्षिणहस्तेन दक्षिणाताम्बूलादिकं गृहीत्वा गोत्रादिकमुक्त्वा वरहस्ते दद्यात्। प्रत्यङ्मुखस्तिष्ठन्वरो-दक्षिणमुत्तानं साङ्गुलिं कन्यायाः पाणिं देवस्यत्वेति प्रतिगृह्णीयात् । "प्राङ्मुखो दद्यादुदङ्मुखो गृह्णीयादिति" केचित् । गोत्रोच्चारणं यथा । अमुकगोत्रोद्भवायामुकशर्म्मणो नप्त्रेऽमुकशर्म्मणः पौत्रायामुकशर्म्मणः पुत्राय महाविष्णुस्वरूपिणेऽमुकशर्म्मणे वरायामुकगोत्रोद्भवाममुकशर्म्मणो नप्त्रीममुकशर्म्मणः पौत्रीममुकशर्म्मणः पुत्रीममुकनाम्नीमिमां कन्यां सवस्त्रां सालङ्कारां श्रौतस्मार्त्तकर्मसहायिनीं प्रजापतिदेवतां सम्प्रददे । न ममेत्युक्त्वा, कन्यां कनकसम्पन्नां सर्वाभरणभूषिताम् । दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया । इतिसहिरण्योदकं कन्यादक्षिणहस्तञ्च दद्यात् । वरः प्रतिगृह्णीयात्। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वरुणस्त्वा नयतु देवि दक्षिणे प्रजापतये कन्यां तयामृतत्वमशीय वधो दात्रे भूयान्मयो मह्यं प्रतिगृहीत्रे क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिगृहीता कामः समुद्रमाविशत्कामेन त्वा प्रतिगृह्णामि कामैतत्ते। इति प्रतिग्रहमन्त्रः । अस्मिन्काले गोसुवर्णादिकं यथासंभवं वराय दद्यात् । ततो वेदिकायाः पश्चात्प्राङ्मुखो वरो वध्वा सह ब्राह्मणाननुज्ञाप्योपविश्य प्राणानायम्य देशकालौ संकीर्त्त्य प्रजाधर्मसम्पत्त्यर्थं स्त्रियमुद्वोक्ष्ये, इतिसङ्कल्प्य स्थण्डिलं परिसमूह्योपलिप्य विधिवदुल्लिख्याधानोक्तगृह्याहृतमग्निं, मथितान्गिं वा, विधिवत्स्थापयेत् । अथाज्यतन्त्रम् । उपविष्टे ब्रह्मण्यग्नेरुत्तरतः पात्राण्यासादयति। पात्रासादनकाले, वरपत्नीयो ध्रुवानामपां कलशं पूरयित्वा सोदककुम्भः धृतोष्णीषोऽग्रेणाग्निं प्रादक्षिण्येन गत्वाऽग्नेर्ब्रह्मणश्च दक्षिणत उदङ्मुखो वाग्यतोभिषेकपर्य्यन्तं तिष्ठेत्। "ध्रुवानां लक्षणं 'गृह्यासंग्रहे' । महानदीषु या आपः कौप्यान्याश्च ह्रदेषु च । गन्धवर्णरसैर्युक्ता ध्रुवास्ता इति निश्चयः" ॥ अन्योऽपिवरपत्नीय एवं प्रतोदहस्तस्तिष्ठेत् । अग्नेरुत्तरतो दर्भानास्तीर्य्य स्रुवमाज्यस्थालीमाज्यं बर्हिर्मुष्टित्रयं विंशतीध्मान्यविचदर्भावनुगुप्ता अपश्चासादयति । अग्नेः पश्चाद्दर्भानास्तीर्य्य शमीपत्रमिश्रांश्चतुरञ्जलिमात्रान्नवीनशूर्पस्थिताल्लाजान्दृषत्पुत्रश्चासादयेत् । ततश्चरुनिर्वापं विहायाज्यसंस्कारपर्य्यन्तं स्थालीपाकतन्त्रवत् कुर्य्यात् ॥ अथ यस्याः पाणिं गृहीष्यन् भवति सशिरस्का साऽऽप्लुता भवति । ततो वरोऽहतं वस्त्रमादाय वधूं परिधापयति । याऽकृन्तन्निति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मन्त्रस्य प्रजापतिर्ऋषिर्जगतीछन्दो वस्त्रकारा देवताऽधोवस्त्रपरिधापने विनियोगः । याऽकृन्तन्नवयन् या अतन्वत याश्च देव्यो अन्तानभितो ततन्थ । तास्त्वा देव्यो जरसा संव्ययंत्वायुष्मतीदं परिधत्स्व वासः । पुनरन्येनाहतेन वस्त्रेण यज्ञोपवीतवत्परिधत्तेति वधूं परिधापयेत् । परिधत्त वाससेति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः परिधापयितारो देवता उत्तरीयवस्त्रपरिधापने विनियोगः । परिधत्त धत्त वाससैनां शतायुषीं कृणुत दीर्घमायुः । शतञ्च जीव शरदः सुवर्चा वसूनिचार्य्यं विभजासि जीवन् । ततोऽग्न्यगाराद्बहिर्वस्त्रधारणं कृतवतीं वधूमग्न्यभिमुखीमानयन् वरस्सोमो ददद्गन्धर्वायेति जपेत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दस्सोमादयो देवता जपे विनियोगः । सोमो ददद्गन्धर्वाय गन्धर्वो ददद्ग्नये। रयिञ्च पुत्रांश्चादादग्निर्मह्यमथो इमाम् । ततोऽग्निं प्रदक्षिणीकृत्याग्नेः पश्चात्संवेष्टितकटासनसमीपमानयति । यदा दक्षिणेन पदा वधूः कटस्य पूर्वान्तं प्रवर्त्तयति तदा तां वरो वाचयति प्र मे पतियान इति । प्र मे पतियान इति मन्त्रस्य प्रजापतिर्ऋषिर्द्विपाज्जगतीछन्दः पतिर्देवता पदप्रवर्त्तने विनियोगः । प्र मे पतियानः पन्थाः कल्पतां शिवा अरिष्टा पतिलोकं गमेयम् । वध्वाः पठनसामर्थ्याभावे वरस्स्वयं पठेत् । वरपठने तु प्र मे इत्यस्य स्थाने प्रास्या इति पाठः । अग्नेः पश्चाद्दक्षिपोन्ते कटे प्राङ्मुख उपविश्य स्वदक्षिणकटप्रान्ते वधूं प्राङ्मुखीमुपवेशयेत् । स्रुवं सम्मृज्य तूष्णीं समिधमाधाय पूर्ववदादिते-



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ऽनुमन्यस्वेत्यादिभिस्त्रिभिर्मन्त्रैरुदकाञ्जलीन्दत्वा देव सवितः प्रसुवेति पूर्ववच्चिः पर्य्युक्ष्य योजकनामानमग्निमाहूय स्रुवेणाज्यं जुहुयात् । भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । भूर्भुवस्स्वस्स्वाहेति हुत्वाऽग्निरेत्विति षड्भिर्मन्त्रैः स्रुवेण षडाज्याहुतीर्जुहोति । होमकाले वधूर्दक्षिणेन हस्तेन वरस्य दक्षिणांसमन्वारभते । अग्निरेत्वित्यादीनां षण्णाम्मन्त्राणां प्रजापतिर्ऋषिराद्ययोरतिजगतीछन्दोऽग्निर्देवता तृतीयस्य प्राकरीछन्दो विश्वेदेवा देवता चतुर्थस्यातिजगतीछन्दोऽग्निर्देवता पञ्चमस्य बृहतीछन्दो यमादयो देवता षष्ठस्यात्युष्णिक्छन्दो वैवस्वतो देवतोद्वाहाज्यहोमे विनियोगः । अग्निरेतु प्रथमो देवताभ्यस्सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् । तदयꣳराजा वरुणोऽनुमन्यतां यथेयꣳस्त्री पौत्रमघन्नरोदात्स्वाहा । अग्नय इदं न मम । इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै जरदष्टिं कृणोतु । अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यतामियꣳस्वाहा । अग्नय इदं न मम । द्यौस्ते पृष्ठꣳरक्षतु वायुरूरू अश्विनौ च स्तनन्धयस्ते पुत्रान् सविताऽभिरक्षत्वावाससः परिधानाद्बृहस्पतिर्विश्वेदेवा अभिरक्षन्तु पश्चात् स्वाहा । विश्वेभ्यो देवेभ्य इदं न मम । मा ते गृहेषु निशि घोष उत्थादन्यत्र त्वद्रुदत्यः संविशन्तु । मा त्वꣳरुदत्युर आवधिष्ठा जीवपत्नी पतिलोके विराजपश्यन्ती प्रजाꣳसुमनस्यमानाꣳस्वाहा । अग्नय इदं न मम । अप्रजस्यं पौत्रमर्त्यं पाप्मानमुत वा अघम् । शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रति मुञ्चामि पाशꣳस्वाहा । वैवस्वतायेदं न मम । परैतु मृत्युरमृतं म आगाद्वैवस्वतो नो अभयं कृणोतु । परं मृत्यो अनु परेहि पन्थां यस्ते नो अन्य इतरो देवयानात् चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳरीरिषो मोत वीरान् स्वाहा । वैवस्वतायेदं न मम । ततो व्यस्ताभिः समस्ताभि-र्व्याहृतिभिराज्येन चतस्र आहुतीर्हुत्वा संहतहस्तौ वधूवरौ सहैवोत्तिष्ठतः । ततः पतिः पत्न्याः पृष्ठतो गत्वा पत्न्या दक्षिणत उदङ्मुखो वध्वञ्जलिं गृहीत्वाऽवतिष्ठते । तदा पूर्वदिशि स्थिता वधूमाताऽथवा, वध्वा भ्राता वाऽग्नेः पश्चादा-सादितलाजशूर्प्पं सव्यहस्तेन गृहीत्वा, वध्वा दक्षिणपादाग्रं दक्षिणहस्तेन पूर्वमासादितेऽश्मनि स्थापयति । अश्माक्रमण-काले वर इममश्मानमारोहेति मन्त्रं जपेत् । इममश्मानमिति मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्-छन्दोऽश्मादेवता अश्माक्रमणे विनियोगः । इममश्मानमारोहाश्मेव त्वꣳस्थिरा भव । द्विषन्त-मपबाधस्व मा च त्वं द्विषतामधः । ततो माता भ्राता वा, स्रुवेणाज्यमादाय वराञ्जलौ स्थापिते वध्वञ्जलौ सकृदुपस्तीर्य्य, शूर्प्पमन्यस्मै दत्वाऽञ्जलिना लाजान् सकृदवदाय तस्मिन्नञ्जलौ निक्षिप्य पुनः स्रुवेणाज्यमादायाञ्जलिस्थाल्लाजान् द्विरभि-घारयेद्यदि चतुरवत्ती चेत् । पञ्चावत्ती चेद्द्विरुपस्तीर्य्य लाजान् सकृदवदायाञ्जलावोप्य द्विरभिघारयेत् । ततो वधूर्वराञ्जलि-मविमुञ्चती लाजान् जुहोति । होमसमये वरो मन्त्रं पठे-दियन्नार्य्युपब्रूत इति । स्वाहाकारे लाजहोमः । अस्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मन्त्रस्य प्रजापतिर्ऋषिर्जगतीछन्दे ऽग्निर्देवता लाजहोमे विनियोगः । इयं नार्य्युपब्रूतेऽग्नौ लाजानावपन्ती । दीर्घायुरस्तु मे पतिश्शतं वर्षाणि जीवत्वेधन्तां ज्ञातयो मम स्वाहा । अग्नय इदं न मम । एवं प्रथमल्लाजहोमं कृत्वा, वध्वञ्जलिमविमुञ्चन् पृष्ठतो वध्वा उत्तरतो गत्वा, ब्रह्मादीन्वाह्यतः कृत्वाऽग्निं यज्ञाङ्गपात्राणि च प्रदक्षिणीकुर्वन् वरो वधूमग्निं परिणयति । मन्त्रवान् ब्राह्मणः परिणयेत् । ततोऽग्नेः पश्चात्पत्नी प्राङ्मुख्यवतिष्ठते, प्राङ्मुखो वरोऽग्निपरिणयनकाले कन्यलापितृभ्य इति मन्त्रं जपेत् । अस्य मन्त्रस्य प्राजापतिर्ऋषिरनुष्टुप्छन्दः कन्या देवता कन्याया अग्निपरिणयने विनियोगः । कन्यलापितृभ्यः पतिलोकं पतीयमपदीक्षामयष्ट । कन्या उत त्वया वयं धारा उदन्या इवातिगाहेमहि द्विषः । ततः पत्न्या दक्षिणतो गत्वोदङ्मुखो वध्वञ्जलिमादायावतिष्ठते पतिः प्राङ्मुखी पत्नी । पूर्ववद्वध्वा माता भ्राता वा वध्वा दक्षिणेन पदाग्रेण दृषदमाक्रामयति, पूर्ववद्वरो जपति । ततो माता भ्राता वाऽञ्जलौ पूर्ववदुपस्तीर्य लाजान् प्रक्षिप्याभिघारयति । ततो वधूर्वरपठितमन्त्रान्ते लाजान् जुहुयात् । अर्यमणं नु देवमित्यस्य प्रजापतिर्ऋषिर्बृहतीछन्दोऽर्य्यमा देवता द्वितीयलाजहोमे विनियोगः । अर्यमणं नु देवं कन्या अग्निमयक्षत । स इमां देवो अर्यमा प्रेतो मुञ्चातु मामुत स्वाहा । अर्य्यमण इदं न मम । ततः पूर्ववदुत्तरतो गत्वा पूर्ववत्कन्यामग्निं परिणयति । कन्यला पितृभ्य इति मन्त्रं जपेत् । अग्निं परि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



णीयाग्नेः पश्चाद्गत्वा उत्तरतोऽवस्थानम्। ततोऽनुपृष्ठगमनाद्यञ्जलिग्रहणान्तं वरः कुर्यात्। लाजग्रहणाश्माक्रमणलाजाद्येपहोमादिकं पूर्ववत्। वरस्तृतीयलाजहोममन्त्रं पठेत्। पूषणन्विति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः पूषा देवता तृतीयलाजहोमे विनियोगः। पूषणं नु देवं कन्या अग्निमयक्षत। स इमां देवः पूषा प्रेतो मुञ्चातु मामुतः स्वाहा। पूषण इदं न मम। ततः पूर्ववन्मन्त्रजपपूर्वकं कन्यामग्निं परिणीयाग्नेः पश्चात्प्राङ्मुखोऽवतिष्ठते वरः स्वदक्षिणतः प्राङ्मुखीं वधूं स्थापयति। ततो वधूमाञ्चा दत्तं लाजशूर्प्पमादाय लाजशेषं शूर्प्पेण तूष्णीं जुहोति। वरस्य न मन्त्रपाठः। किन्तु प्रजापतेर्मनसा ध्यानम्। ततो गृहीताञ्जलिकां वराभिमुखीमैशानीं दिशं दक्षिणपादाङ्गुष्ठमुत्क्राम्य गमयत्यन्यः कश्चित्। सप्तभिर्मन्त्रैर्वधूदक्षिणपादं पुरतः संस्थाप्य सव्यं पादं तस्य पश्चात्संस्थाप्य सप्तपदानि गच्छेत्। वर एकमिष इत्यादीन्सप्तमन्त्रान् सप्तपदाक्रमणे जपति। तदा पतिः पत्नीं ब्रूयात् मा सव्येन दक्षिणमतिक्रामेति। एकमिष इत्यादीनां मन्त्राणां प्रजापतिर्ऋषिर्विराट्छन्दो विष्णुर्देवता पादाक्रमणे विनियोगः। एकमिषे विष्णुस्त्वा नयतु। द्वे ऊर्ज्जे विष्णुस्त्वा नयतु। त्रीणि व्रताय विष्णुस्त्वा नयतु। चत्वारि मायो भवाय विष्णुस्त्वा नयतु। पञ्च पशुभ्यो विष्णुस्त्वा नयतु। षड्रायस्पोषाय विष्णुस्त्वा नयतु। सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वा नयतु। ततस्त्वैव सखा सप्तपदीति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



जपेत् । सखा सप्तपदीति मन्त्रस्य प्रजापतिर्ऋषिर्महानक्ीप ङ्क्तिश्छन्द आशास्यमाना देवताऽऽशासने विनियोगः । सखा सप्तपदी भव सख्यन्ते गमेयं सख्यन्ते मायोषाः सख्यन्ते मायोष्ठ्याः । ततो विवाहप्रेक्षकान्सभ्यान्वरः प्रतिमन्त्रयेत सुमङ्गलीरियमिति । अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्द आशास्यमाना देवता प्रेक्षकप्रतिमन्त्रणे विनियोगः । सुमङ्गलीरियं वधूरिमांःसमेत पश्यत । सौभाग्यमस्यै दत्वा याथास्तं विपरेत न । ततोऽग्नेर्दक्षिणतो गृहीतोदककुम्भो यो विप्रः स्थितस्सोऽग्निं प्रदक्षिणीकृत्य सप्तमे पदे वरस्य शिरः कलशोदकेनाभिषिञ्चेत् । पुनर्वधूशिरस्यभिषिञ्चेत् । अभिषेककाले समञ्जन्त्विति मन्त्रं वरः पठेत् । समापो हृदयानि नाविति मन्त्रलिङ्गात् । "अभिषेककर्त्ता मन्त्रं पठेत् मूर्द्धदेशेऽवसिञ्चति तथेतरां समञ्जन्त्वित्यनयर्चेति गोभिलोक्तेरित्यन्ये" । वधूशिरस्यभिषेकेऽपि तथा मन्त्रपाठः । समञ्जन्त्विति मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो विश्वेदेवाद्या देवता मूर्द्धाभिषेचने विनियोगः । समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ । सं मातरिश्वा सं धाता समुदेष्ट्री दधातु नौ । प्रतोदहस्तो ब्राह्मणस्तत्त्वाहत्यहं वा रक्षार्थं वरमनुगच्छेत । ततो वरोऽभिषिक्तायास्सप्तमपदस्थाया वध्वा दक्षिणहस्तमणिबन्धप्रदेशं सव्यहस्तेन गृहीत्वा, दक्षिणपाणिना वधूदक्षिणपाणिं साङ्गुष्ठमुत्तानङ्गृहीत्वा गृभ्णामि त इत्यादीन्षट् पाणिग्रहणीयान्मन्त्राञ्जपति । षण्णाम्मन्त्राणां प्रजापतिर्ऋषिस्त्रिष्टुप्त्रिष्टु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



जगत्यनुष्टुबनुष्टुप्त्रिष्टुप्छन्दांसि भगादयो देवता: पाणिग्रहणे जपे विनियोग: । गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथा स: । भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवा: ॥ १ ॥ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्य: सुमनास्सुवर्च्चा: । वीरसूर्ज्जीवसूर्देवकामा स्योना शन्नो भव द्विपदे चतुष्पदे ॥ २ ॥ आ न: प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा । अदुर्मंगली: पतिलोकमाविश शन्नो भव द्विपदे शञ्चतुष्पदे ॥ ३ ॥ इमां त्वमिन्द्र मीढ्वस्सुपुत्राꣳसुभगां कृधि । दशास्यां पुत्रानाधेहि पतिमेकादशं कुरु ॥ ४ ॥ सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव । ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥ ५ ॥ मम व्रते ते हृदयं दधातु मम चित्तमनुचित्तन्ते अस्तु । मम वाचमेकमना जुषस्व बृहस्पतिस्त्वा नियुनक्तु मह्यम् ॥ ६ ॥ ततो वरो व्याहृतिचतुष्टयं हुत्वा तूष्णीं समिधमाधाय, पर्य्युक्षणाद्युपरिष्टात्तन्त्रं समापयेत् । ततो ब्रह्मणे पूर्णपात्रदक्षिणां दद्यात् । तत्रादौ कन्याप्लवने भवदेवभट्टाचार्य: । "क्लीतकैर्यवैर्माषैर्वा प्लुतामित्येतत्सूत्रे क्लीतकपदेन मसूरपरिग्रहान्मसूरयवमाषचूर्णयुक्तोदकेनाप्लवनमिति" । अन्येतु "क्लीतकै: क्लिन्नकैश्चूर्णीकृत्योदकेन द्रवीकृतैरित्येतत् । कैर्यवैर्माषैर्वेति व्याचख्यु:" । वधूं वस्त्रेण परिधाप्य बर्हिषोन्तं कटान्तं स्थापयेदित्यत्र रघुनन्दनभट्टाचार्य्य: । "अन्तपदं समीपबोधकम्, तथा च कटबर्हिषोरन्तं समीपमन्तरालदेशं वधूं प्रापयेदिति"-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



"अन्ये तु 'सूत्रोपात्तमन्तमिति कर्मद्वयं विहायानुषङ्गेन वध्वाः कर्मकल्पनायोगादेकस्यान्तशब्दस्य वैयर्थ्याच्च,तस्माद्बर्हिषोन्तं कटान्तमिति बर्हिषामग्नेः पश्चादास्तीर्णकुशानामन्तभागस्थं कटान्तभागं प्रापयेत्' । तथाचास्तृतबर्हिषां किञ्चिद्दूपरिकटान्तभागोऽस्तीति गम्यते । युक्तञ्चैतत् । अग्नेः पश्चाद्बर्हिरास्तीर्य्य तन्मूले कटमास्तृणुयादित्याहुः" । पूर्वा माता लाजानादाय भ्राता वा वधूमाक्रामयेदश्मानं दक्षिणेन प्रपदेनेत्यत्र "केचित् 'पूर्वामाते'त्येकं पदम् । अस्यार्थः । पूर्वदिशि स्थिता या वध्वा एव मातेति" तदपेशलं, सम्भवति समानाधिकरणे वैयधिकरण्येनान्वयायोगात् । तर्हि कथं ? वर्ण्यत इतिचेदित्थम् । बह्वीनां मातॄणां या प्रथमा सा पूर्वेति ॥ इति विवाहप्रयोगः ॥ तत उत्तरविवाहार्थं वधूं वरं भाण्डे स्थापितमथवा समिदादौ समारोपितं विवाहाग्निञ्च शकटादिवाहने संस्थाप्य वरपक्षीया विवाहगृहस्यैशान्यां दिशि नित्यनैमित्तिककर्मतपस्स्वाध्यायुक्तं ब्राह्मणगृहं, तदभावे यथासम्भवं यत्र क्वापि दिशि स्थितं ब्राह्मणगृहं नयेयुः । तत्र वर उल्लेखनादिपूर्वकमग्निं प्रतिष्ठाप्याज्यतन्त्रेण व्याहृतित्रयहोमान्तं कुर्यात् । वधूवरयोर्विवाहाग्निमन्वारभ्य गमनम् । ब्राह्मणगृहाभावे विवाहवेद्यामेव । अस्मिन्पक्षे न परिसमूहनादिपूर्वकमग्निस्थापनमग्नेः प्रतिष्ठितत्वान्नाच पृथगाज्यतन्त्रम् । "गणेष्वेकं परिसमूहनमिति"-सूत्रात् । किन्तु प्रधानमेव कुर्यात् । ततोऽग्नेः पश्चाल्लोहितन्तदभावेऽन्यवर्णं वा वृषभचर्म्म पूर्वशिरस्कमुत्तरलोमास्तीर्य्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तच वधूं कृतमौनामुपवेशयति । आनक्षत्रदर्शनान्मूत्रपुरीषोत्सर्गादेरन्यत्र नोत्तिष्ठेत् । दिवा वध्वा भोजननिवृत्तिर्वरस्य च । "तेन चैवास्य प्रातराहुतिर्हुता भवतीति" सूत्रेण विवाहाग्नौ विवाहहोमैरेव प्रातर्होमस्य निवृत्तित्वात्सायमौपासनारम्भस्यावश्यकत्वेन तदर्थं वरस्य भोजननिवृत्तिर्युक्तैव । ततो नक्षत्रोदयं श्रुत्वा षडाज्याहुतीर्जुहोति लेखेत्यादिभिः षड्भिर्मन्त्रैः । प्रत्याहुतिं हुतशेषाज्यबिन्दून्वधूशिरसि पातयेत् । लेखेत्यादीनां षण्णाम्मन्त्राणां प्रजापतिऋषिरनुष्टुप्छन्दोऽभिधीयमाना देवता पाणिग्रहणस्याज्यहोमे विनियोगः । लेखासंधिषु पक्ष्मस्वावर्त्तेषु च यानि ते । तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहं स्वाहा ॥ १ ॥ केशेषु यच्च पापकमीक्षिते रुदिते च यत् । तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहं स्वाहा ॥ २ ॥ शीले यच्च पापकं भाषिते हसिते च यत् । तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहं स्वाहा ॥ ३ ॥ आरोकेषु च दन्तेषु हस्तयोः पादयोश्च यत् । तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहं स्वाहा ॥ ४ ॥ ऊर्वोरुपस्थे जंघयोः सन्धानेषु च यानि ते । तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहं स्वाहा ॥ ५ ॥ यानि कानि च घोराणि सर्वाङ्गेषु तवाभवन् । पूर्णाहुतिभिराज्यस्य सर्वाणि तान्यशीशमं स्वाहा ॥ ६ ॥ सर्वत्राग्नय इदं न मम । कन्याया इदं न ममेति केचित् । रात्रिविवाहपक्षे । आनक्षत्रोदयं वध्वा उपवेशनासम्भवात् । पूर्वविवाहे उत्तरतन्त्रांगव्याहृतिहोमं कृत्वा, चर्मोपवेशनं कृत्वा, सद्य एव

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नत्रचोदयमन्यमुखाच्छ्रुत्वा, षडाज्याहुतीर्जुहोति । ततो वधूं ध्रुवं प्रदर्शयति । हे लक्ष्मि, ध्रुवं पश्येत्येवमुक्ते वधूर्ध्रुवं पश्यति । ततस्तां ध्रुवं पश्यन्तीं वरो ध्रुवमसीति मन्त्रं वाचयेत् ॥ ध्रुवमसि ध्रुवाहं पतिकुले भूयासममुष्यासौ । सोऽयमन्त्रः । अमुष्येत्यत्र षष्ठ्यन्तम्भर्तृनाम गृह्णीयात् । असावित्यत्र प्रथमान्तं वधूनाम गृह्णीयात् । ततो हे लक्ष्मि, अरुन्धतीं पश्येति वरेणोक्ते वधूररुन्धतीं पश्यति । पश्यन्तीं तां वरो वाचयेत् । अरुन्धत्यसि रुद्धाहमस्मिविष्णुशर्म्मणा लक्ष्मीरिति । अत्र तृतीयान्तं भर्त्तृनाम गृह्णीयात् । ततो वरो वधूमनुमन्त्रयते ध्रुवा द्यौरित्येतयर्चा । तत्र दक्षिणहस्तानामिकाग्रेण वधूं संस्पृशन्नवलोकयन्मन्त्रं पठेत् । अस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽभिधीयमाना देवताऽनुमन्त्रणे विनियोगः । ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदञ्जगत् । ध्रुवासः पर्वता इमे ध्रुवा स्त्री पतिकुले इयम् । ततो वधूर्भर्त्तारं नमस्करोति भर्त्तृगोत्रेण । श्रीवत्सगोत्रा लक्ष्मीरहम्भोः अभिवादयामि । आयुष्मती भव लक्ष्मीति प्रत्युक्तिः । ततो वध्वा सह वरोऽग्नेः पश्चादुपविश्य व्याहृतिचतुष्टयं पुनर्व्याहृतित्रयञ्च हुत्वा, तूष्णीं समिदाधानप्रभृतिपूर्णपात्रदक्षिणादानान्तं तन्त्रं समापयेत् । "तेन चैवास्य प्रातराहुतिर्हुता भवति । सायमाहुत्युपक्रम एवात ऊर्द्ध्वं गृह्येऽग्नौ होमो विधीयत" इति सूत्रैर्विवाहहोमैरेव प्रातराहुतिनिवृत्तेस्सायं होमारम्भस्य चोक्तत्वात् । विवाहदिने रात्रौ लेखाहोमानन्तरं सायमौपासनारम्भः कर्त्तव्य एव कौथुमीयानाम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



"तदुक्तं 'गृह्यपरिभाषाकृद्भिः' । यदाऽह्नि विवाहहोमस्तदा सायङ्काले होमारम्भः । यदा रात्रौ विवाहहोमस्तदा परेद्युस्सायङ्काले होमारम्भ" इति । शौनकोऽपि । "यस्मिन् ह्नि विवाहस्स्यात्सायमारभ्य तस्य तु । परिचर्य्या विवाहाग्नेर्विदधीत स्वयं द्विजः ॥ १ ॥ यदि रात्रौ विवाहाग्निरुत्पन्नस्स्यात्तथा सति । उत्पन्नस्योत्तरस्याह्नः सायं परिचरेदमुम्" ॥ २ ॥ केचिच्चतुर्थीकर्म्मानन्तरं सायमौपासनारम्भं मन्यन्ते । "तदुक्तं 'कर्मप्रदीपे' । वैवाहिकेऽग्नौ कुर्वीत सायं प्रातस्त्वतन्द्रितः । चतुर्थीकर्म्म कृत्वा तु ह्येतच्छाट्यायनेर्मतम्" ॥ १ ॥ सायंप्रातर्होमार्थं विद्वदनुज्ञा । आवयोः सायंप्रातर्होमारम्भं कर्त्तुं योग्यतासिद्धिरस्त्विति भवन्तो ब्रुवन्तु । तैरनुज्ञातः पत्न्या सह प्राणानायम्य सङ्कल्पं करोति । गृह्याग्नावौपासनहोममारप्स्ये । तेन यावज्जीवन्तण्डुलैर्व्रीहिभिर्यवैर्वा सायंप्रातर्होष्यामि । पत्न्यर्थं पुनरेवं वदेत् । पुनर्द्देशकालौ सङ्कीर्त्त्य सायमौपासनहोमं होष्यामिति सङ्कल्प्यौपासनहोमं कुर्य्यात् । तत्प्रयोगस्तूक्तः ॥ अथ दम्पती त्रिरात्रमक्षारलवणाशिनौ मैथुनरहितौ भूमौ सह शयीयाताम् । "अचार्य्यमित्याहुः । आगतेष्वित्येके" । अनयोस्तात्पर्य्यम् । अस्मिन्नवसरे वा, विवाहार्थमागमनसमये वा, वराय मधुपर्क्कं दद्यात् । यदा दिवा विवाहस्तदा रात्रावेव समशनीयस्थालीपाकं कृत्वा भोजनं कुर्य्यात् । यदि रात्रौ दम्पत्योर्भोजनासम्भवो रात्रिविवाहवशात्तदा विवाहोत्तरदिने प्रातर्होमानन्तरं समशनीयस्थालीपाकं कुर्य्यात् । तस्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रयोगः । यदि गृह्याग्निस्स्थण्डिले तिष्ठति तदा नोल्लेखनादिकम् । यदा भाण्डे समारोपितस्तदा स्थण्डिले उल्लेखनादिपूर्वकं भाण्डस्थोऽग्निः प्रतिष्ठापनीयः । परमेश्वरप्रीत्यर्थमनया पत्न्या सह समश्नानीयस्थालीपाकं करिष्ये । तेन परमेश्वरं प्रीणयानि । पार्वणस्थालीपाकवत्पर्य्युक्षणान्तं कुर्य्यात् । चरुनिर्वापकाले अग्नये त्वा जुष्टन्निर्वपामि । प्रजापतये त्वा जुष्टन्निर्वपामि । विश्वेभ्यो देवेभ्यस्त्वा जुष्टन्निर्वपामि । अनुमतये त्वा जुष्टन्निर्वपामि । अथोपघातहोमो नाज्यभागौ न स्विष्टकृत् । चरावाज्यमानीय मेक्षणेन स्रुक्चरुमवदाय जुहुयात् । अग्नये स्वाहा । अग्नय इदं न मम । प्रजापतये स्वाहा । प्रजापतय इदं न मम । विश्वेभ्यो देवेभ्यस्स्वाहा । विश्वेभ्यो देवेभ्य इदं न मम । अनुमतये स्वाहा । अनुमतय इदं न मम । ततो महाव्याहृतिभिराज्याहुतित्रयं स्रुवेण कृत्वा समिदाधानादियज्ञवास्त्वन्तङ्कर्म कुर्य्यात् । होमशेषं चरुं मेक्षणेन पात्रान्तरे गृहीत्वा दक्षिणहस्तेनाभिमृश्यान्नपाशेनेति मन्त्रत्रयं पठेत् । मन्त्रत्रयस्य प्रजापतिर्ऋषिराद्ययोरनुष्टुबन्त्यस्य द्विपाद्गायत्र्यन्नं देवताऽन्नाभिमर्शने विनियोगः । अन्नपाशेन मणिना प्राणसूत्रेण पृश्निना । बध्नामि सत्यग्रन्थिना मनश्च हृदयञ्च ते । यदेतद्धृदयन्तव तदस्तु हृदयं मम । यदिद२ हृदयं मम तदस्तु हृदयन्तव । अन्नं प्राणस्य पड्विंशस्तेन बध्नामि त्वाऽसौ । अत्रासावित्येतस्य स्थाने सम्बोधनान्तं भार्यानाम गृह्णीयात् । ततोऽभिमन्त्रितस्याऽन्नस्यैकदेशं स्वयं भुक्त्वोच्छिष्टं पत्न्यै प्रयच्छेत् । अन्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दन्नं स्वयं पत्नी च तृप्तिपर्यन्तं भुक्त्वा हस्तौ पादौ च प्रक्षाल्याचम्य गोदक्षिणां ब्रह्मणे दत्वा वामदेव्यगानं कुर्यात्॥ इति समश्नीयस्थालीपाकप्रयोगः॥ विवाहोत्तरदिने समश्नीयपक्षे, विवाहदिने रात्रावुपवासासमर्थे अन्नप्राशनेति परिजपितहविष्यमन्नं प्रथमं भुञ्जीत । यथेष्टं भुक्त्वा शेषमन्नं पत्न्यै प्रयच्छेत् । अस्मिन्पक्षे द्वितीयदिने होमशेषभक्षणं भवत्येव । विवाहानन्तरं वधूभर्तृगृहगमनार्थं रथादिवाहनं यदाऽऽरोहति, तदा वरस्सुकिंशुकमित्यृचं पठेत् । अस्याः प्रजापतिर्ऋषिस्त्रिष्टुप्-छन्दः कन्या देवता रथारोहणे विनियोगः । सुकिंशुकंशल्मलिं विश्वरूपंसुवर्णवर्णंसुकृतंसुचक्रम् । आरोह सूर्य्ये अमृतस्य नाभिंस्योनं पत्ये वहतुं कृणुष्व । ततो वरो वध्वा सह मार्गगमनसमये मार्गस्थचतुष्पथनदीसिंहव्याघ्रचोरादिभययुक्तस्थानानि, महावृक्षान्, श्मशानञ्च दृष्ट्वा माविदन्नित्येतन्मन्त्रं जपेत् । माविदन्निति मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्-छन्द आशास्यमाना देवता चतुष्पथाद्यनुमन्त्रणे विनियोगः । माविदन् परिपन्थिनो य आसीदन्ति दम्पती । सुगेभिर्दुर्गमतीतामपद्रान्त्वरातयः । ततो मार्गे रथचक्रस्य भङ्गे, योक्त्रादिबन्धस्याश्वादेर्वा विमोक्षे, यानस्य विपर्य्यासे वा, चोरव्याघ्रादिनिमित्तवशात्संप्राप्तास्वापत्सु वैापासनाग्निं समिद्भिः प्रज्वाल्याज्यसंस्कारं कृत्वा पर्य्युक्ष्य व्याहृतिचतुष्टयं हुत्वा पुनस्तूष्णीं समिदाधानं कृत्वा पर्य्युक्षणमुदकाञ्जलिसेचनञ्च कृत्वा हुतशेषाज्येनान्यरथचक्रादिद्रव्यमानीयाभ्यञ्जेत् यऋतेचिदिति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मन्त्रेण । य ऋतेति मन्त्रस्य मेधातिथिऋषिर्बृहतीछन्द इन्द्रो
२ ३ १ २ ३ १ २ ३ २
देवताऽभ्यञ्जने विनियोगः । य ऋते चिदभिश्रिषः पुरा
३ १ २ ३ १ २ १ २ ३ २ ३ १ २ ३ २ ३ १ २ ३
जत्रुभ्य आतृदः । सन्धाता सन्धिं मघवा पुरूवसुर्निष्कर्त्ता
१ २ ३ १ २
विह्रुतं पुनः । अभ्यक्तं संयोजयेत् । ततो वामदेव्यगानम् ।
अयं प्रायश्चित्तहोमो रथादिवाहनादवरुह्य भूमावेव कर्त्तव्यः ।
ततो वध्वा सह वरो यानमारुह्य गच्छेत् । ततो गृहसमीपे आगतं यानं ज्ञात्वा वरो वामदेव्यङ्गायेत् । ततोऽन्याः पतिपुत्रशीलसम्पन्ना ब्राह्मण्यो यानाद्वधूमवतार्य्य गृहे वृषभ-चर्म्मण्युपवेशयेयुः । उपवेशनसमये वर इह गावः प्रजायध्वमिति मन्त्रं पठेत् । मन्त्रान्ते उपवेशनम् । इह गाव इति मन्त्रस्य प्रजापतिऋषिरनुष्टुप्छन्द आशास्यमाना देवतोपवेशने विनि-योगः । इह गावः प्रजायध्वमिहाश्वा इह पूरुषाः । इहो सहस्रदक्षिणोपि पूषा निषीदतु ॥ १ ॥ ततस्ता एव ब्राह्मण्य उपविष्टाया वध्वा उत्सङ्गे चूडाकर्मरहितं कुमारं स्थापयेयुः । ततः कुमाराञ्जलौ कमलबीजान्यन्यानि फलानि वा क्षिपेयुः । ततः कुमारमुत्थाप्य संनिधावुपवेशयेत् । ततो वरो वध्वा सह धृतिहोमं करिष्ये । इति सङ्कल्प्य विवाहाग्निं प्रतिष्ठाप्याज्य-तन्त्रेण व्याहृतित्रयहोमान्तं कृत्वा, इहधृतिरित्यादिभिरष्टा-वाज्याहुतीर्जुहोति । धृतिनाम्नोऽग्नेराह्वानम् । एषां मन्त्राणां प्रजापतिऋषिर्बृहतीछन्दः कन्या देवता होमे विनियोगः । इह धृतिस्स्वाहा । इह स्वधृतिस्स्वाहा । इह रन्तिस्स्वाहा । इह रमस्व स्वाहा । मयि धृतिस्स्वाहा । मयि स्वधृतिस्स्वाहा ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मयि रमस्वाहा । मयि रमस्व स्वाहा । सर्वच कन्याया इदं न मम । पुनर्व्याहृतित्रयं हुत्वा पुनर्व्याहृतित्रयञ्च हुत्वा तूष्णीं समिदाधानादियज्ञवास्त्वन्तं कर्म कृत्वा ब्रह्मणे दक्षिणां दत्वा गुर्वादीनभिवाद्य वामदेव्यगानं कुर्य्यात् । "केचित्तु तूष्णीं समिधमाधाय गुरुमातृपित्रादीनभिवाद्यानुपर्य्युक्षणादि-तन्त्रशेषं परिसमाप्य वामदेव्यगानमिति मन्यन्ते" ॥ इति धृतिहोमप्रयोगः ॥

अथ चतुर्थीकर्मप्रयोग उच्यते । अत्र शिखिनामाग्निमाह्वयेत् । विवाहादिवसाच्चतुर्थी या तिथिस्सा चतुर्थी, चतुर्थदिनमिति यावत् । तस्मिन्दिने प्रातः प्राणानायम्य देशकालौ संकीर्त्यास्याः पत्न्या अलक्ष्म्यादिदोषापनुत्यर्थं प्रायश्चित्ताज्याहुतीर्होष्यामीति संकल्प्य, गृह्याग्नावाज्यतन्त्रेण व्याहृतित्रयहोमान्तेऽग्ने प्रायश्चित्तेत्यादिभिर्विंशतिमन्त्रैराज्याहुतीर्हुत्वाऽग्नेरुत्तरतः संस्थापिते जलपात्रे प्रत्याहुतिशेषं घृतबिन्दुमवनयेत्। एवेषां मन्त्राणां प्रजापतिऋषिर्यजुरग्निर्वायुश्चन्द्रमास्सूर्यस्तत्समष्टिश्च देवता प्रायश्चित्ताज्यहोमे विनियोगः ॥ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्याः पापी लक्ष्मीस्तामस्या अपजहि स्वाहा । अग्नय इदं न मम । एवं वायो प्रायश्चित्ते, सर्वाऽप्यवशिष्टमन्त्रः पूर्ववत् । वायव इदं न मम । चन्द्र प्रायश्चित्ते० अपजहि स्वाहा । चन्द्रायेदं न मम । सूर्य प्रायश्चित्ते० । अपजहि स्वाहा । सूर्यायेदं न मम । अग्नि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वायुचन्द्रसूर्य्याः प्रायश्चित्तयो यूयं देवानां प्रायश्चित्तयस्स्थ ब्राह्मणो वो नाथकाम उपधावामि यास्याः पापी लक्ष्मीस्त-नूस्तामस्या अपहत स्वाहा । अग्निवायुचन्द्रसूर्य्येभ्य इदं न मम । इति प्रथमपञ्चकम् । द्वितीये पञ्चके पूर्वोक्तेषु पञ्चसु मन्त्रेषु, पापी लक्ष्मीरिति पदद्वयस्थाने पतिघ्नीति पदं पठित्वा, पञ्च होमाः कर्त्तव्याः । एवं तृतीयपञ्चके । अपुत्र्या इति पठित्वा पञ्च होमाः । एवं चतुर्थपञ्चके अपसव्येति पदं पठित्वा पञ्च होमाः । ततो व्याहृतिहोमाद्युपरिष्टात्तन्त्रं पूर्णपात्र-दक्षिणादानान्तं परिसमाप्य, प्रदक्षिणनमस्कारं कृत्वा वामदेव्यं गायेत् । ततस्सम्पाताज्ययुक्तजलेन वधूं सर्वाङ्गमभ्यज्योद्वर्त्तयित्वा स्नापयन्त्यन्याः ॥ इति चतुर्थीकर्मप्रयोगः ॥ विवाहे सर्वेषु होमेषु पूर्णाहुतिनिषेधः क्वचिद्दृश्यते । "विवाहे व्रतबन्धे च शालायां चौलकर्मणि । गर्भाधानादि संस्कारे पूर्णहोमन्न कारयेत्"। विवाहानन्तरमागामिपौर्णमास्यां दर्शपौर्णमासस्था-लीपाकारम्भः । पौर्णमास्यां प्रातरौपासनं कृत्वा ब्राह्मणाननुज्ञा-प्याभ्युदयिकश्राद्धं कुर्यात् । दर्शपौर्णमासस्थालीपाकावारप्स्ये, यावज्जीवं करिष्ये । नाचान्वारम्भणीयस्थालीपाकः सूत्रकृता-ऽनुक्तत्वात् । पश्चात्पौर्णमासस्थालीपाकं कुर्यात् । वैश्वदेवं पुण्ये नक्षत्रे तावदारभ्याहरहः सायम्प्रातः कुर्य्यात् ॥

अथ गर्भाधानप्रयोगः ॥ यदा भार्या ऋतुमतीस्यात्स्नातायां षोडशदिनादर्वाक् पुण्ये नक्षत्रे गर्भाधानं कुर्य्यात् । नाचोदग-यनपूर्वपक्षापेक्षा, ऋतोरनियतकालत्वात् । कालविलम्बे प्राय-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



श्चित्तश्रवणाच्च । गर्भाधानदिने प्रातर्गर्भाधानकर्माङ्गाभ्युदयिक-श्राद्धं वक्ष्यमाणविधिना कुर्य्यात्। ब्राह्मणाननुज्ञाप्य गणेशञ्च सम्पूज्य, देशकालौ संकीर्त्त्य प्रतिगर्भसंस्कारायास्यामुत्पत्स्यमानापत्यबीजगर्भसमुद्भवपापनिवृत्त्यर्थमिमां धर्म्मपत्नीं गर्भाधानकर्म्मणा संस्करिष्यामीति सङ्कल्प्य, मारुतनामगृह्याग्निं विधिवत्संस्थाप्याज्यतन्त्रेण व्याहृतिहोमान्तं कृत्वा, मनसा मन्त्रेणोपस्थाभिमर्शनं विभाव्योपरिष्टात्तन्त्रं समापयेत्। नात्र पूर्णाहुतिः। पुना रात्रौ द्वितीययामे दक्षिणेन पाणिनोपस्थमभिमृशेत्। विष्णुर्योनिं कल्पयतु, गर्भं धेहि सिनीवालीतिऋग्भ्याम्। द्वयोर्मन्त्रयोः प्रजापतिर्ऋषिरनुष्टुप्छन्दो विष्ण्वादयो देवता उपस्थाभिमर्शने विनियोगः। विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु। आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते ॥ १ ॥ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति। गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ २ ततो यथाशास्त्रं यथारुचि तथा ग्राम्यधर्म्मः कार्य्यः ॥ इति गर्भधानप्रयोगः ॥

अथ पुंसवनप्रयोगः ॥ तृतीयस्य गर्भमासस्य प्रथमतृतीयभागे यत्पुण्यमहस्तत्र प्रातरेव पुंसवनं कुर्य्यात्। यद्युक्तकालातिपत्तिः स्यात्तर्हि सर्वप्रायश्चित्ताहुतिं कृत्वा तत् कुर्य्यात्। इदं च प्रायश्चित्तमुपनयनादधः। "तदुक्तं 'कर्म्मप्रदीपे'। देवतानां विपर्य्यासे जुहोतिषु कथं? भवेत्। सर्वप्रायश्चित्तं हुत्वा क्रमेण जुहुयात्पुनः ॥ १ ॥ संस्कारा अतिपत्येरन्नुक्तकाले कथञ्चन। हुत्वैतदेव कर्त्तव्या ये तूपनयनादधः" ॥ २ ॥ उपनयनस्योक्त-



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



कालातिपत्तौ व्रात्यस्तोमादिकं स्मृत्युक्तं प्रायश्चित्तं द्रष्टव्यम्। उदगग्रेषु दर्भेषूपविश्य घटोदकेन सशिरस्काऽऽप्लुता भवति। ततो यजमानः पत्न्या सह प्रातर्होमं विधाय पुंसवनकर्माङ्गाभ्युदयिकश्राद्धं पूर्वदिने न कृतं चेत्पुंसवनदिने कुर्य्यात्। ततः प्रातरेव ब्राह्मणाननुज्ञाप्य, प्राङ्मुख उपविश्योदगग्रेषु दर्भेषु स्वदक्षिणभागे प्राङ्मुखीं पत्नीमुपवेशयति। एवमेवोपवेशनं पत्न्यास्सर्वेच कर्मसु। विशेषवचनादन्यत्रापि। ततो देशकालौ-संकीर्त्त्यास्यां भार्य्यायां जनिष्यमाणगर्भाणां बैजिकगार्भिकदोषापनुत्तये इमां मम पत्नीं पुंसवनकर्मणा संस्करिष्यामीति संकल्प्य स्वपुरतः संस्कृते स्थण्डिले गृह्याग्निं संस्थाप्याज्यतन्त्रेण पत्न्या सह व्याहृतिचयहोमान्तं कुर्य्यात्। अत्र चन्द्रमसमग्निमावाहयेत्। ततोऽग्नेः पश्चादुपविष्टायाः पत्न्याः पृष्ठतः पतिः प्राङ्मुखस्तिष्ठन्दक्षिणहस्तेन पत्नीदक्षिणमंसं तूष्णीमन्वभिमृश्य पुमांसौ मित्रावरुणावित्येतयर्चा वस्त्रादिभिराच्छादितं पत्न्या नाभिदेशमभिमृशेत्। अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो मित्रावरुणादयो देवता नाभिस्पर्शने-विनियोगः। पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ। पुमानग्निश्च वायुश्च पुमान् गर्भस्तवोदरे॥ १॥ ततो व्याहृतिचयहोमादिवामदेव्यगानान्तं कुर्य्यात्। पुनस्तस्मिन्नेव दिने शुङ्गाख्यमपरं पुंसवनकर्म कुर्य्यात्। दिनान्तरे चेन्नान्दीमुखश्राद्धं पुनः कुर्य्यात्। एकस्मिन्दिने चेत्पुंसवनद्वयाङ्गं सकृन्नान्दीश्राद्धमुभयोरादौ कुर्य्यात्। अथ पतिरेकविंशति-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



संख्याकान्माषान् यवान्वा परिगृह्य, न्यग्रोधसमीपं गत्वा, यद्यसि सौमी सोमायत्वेत्यादिमन्त्रान्ते वटस्वामिने यवान्माषान्वा दत्वा, तदभावे वटमूले वा संस्थाप्य, वटस्येशान दिग्गतशाखाग्रस्थितमुभयतः फलं कीटाद्यदूषितमम्लानं शुङ्गाख्यम्मुकुलितपल्लवमोषधयस्सुमनस इत्युत्थाप्य यज्ञियतृणैर्वेष्टयित्वा गृहमानीयाकाशस्थाने स्थापयेत् । सप्तानां प्रजापतिर्ऋषिर्यजुश्शुङ्गा देवता शुङ्गापरिक्रयणे विनियोगः । ओषधयस्सुमनस इत्यस्य प्रजापतिर्ऋषिर्यजुरोषधयो देवताश्शुङ्गोत्थापने विनियोगः । यद्यसि सौमी सोमाय त्वा राज्ञे परिक्रीणामि ॥ १ ॥ यद्यसि वारुणी वरुणाय त्वा राज्ञे परिक्रीणामि ॥ २ ॥ यद्यसि वसुभ्यो वसुभ्यस्त्वा परिक्रीणामि ॥ ३ ॥ यद्यसि रुद्रेभ्यो रुद्रेभ्यस्त्वा परिक्रीणामि ॥ ४ ॥ यद्यस्यादित्येभ्य आदित्येभ्यस्त्वा परिक्रीणामि ॥ ५ ॥ यद्यसि मरुद्भ्यो मरुद्भ्यस्त्वा परिक्रीणामि ॥ ६ ॥ यद्यसि विश्वेभ्यो देवेभ्यो विश्वेभ्यो देवेभ्यस्त्वा परिक्रीणामि ॥ ७ ॥ ओषधयस्सुमनसो भूत्वाऽस्यां वीर्यꣳसमाधत्तेयं कर्म करिष्यतीति । इतिशब्दान्तो मन्त्रः । ततः सशिरस्कस्नातया पत्न्या सह ब्राह्मणाननुज्ञाप्य पुंसवनवत्संकल्पं कुर्य्यात् । तत औपासनाग्निं संस्थाप्याज्यतन्त्रेण ब्रह्मासनास्तरणादिव्याहृतिचयहोमान्तं कुर्य्यात् । अथ शोभननामानमग्निमाह्वयेत् । ततो ब्रह्मचार्य्यनधीतवेदो ब्राह्मणः, पतिव्रता कुमारी वा, ऽग्नेरुत्तरत आसादितदृषदं प्रक्षाल्य, तत्र पूर्वमाहृतां शुङ्गां संस्थाप्य दृषत्पुत्रं हस्ते

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



गृहीत्वा तेनोद्धृत्य पेषणं कुर्य्यात् । ततोऽग्नेः पश्चादुदगग्रेषु दर्भेषु प्राक्शिरस्कामुत्तानां पत्नीमुपवेशयति । ततः पत्न्याः पश्चात्पतिस्स्थित्वा शुङ्गां दक्षिणहस्ताङ्गुष्ठानामिकाभ्यामभिसंगृह्य, पत्न्या दक्षिणनासिकारन्ध्रे शुङ्गारसमवनयेत्पुमानग्नि रित्येतयर्चा । अस्याः प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्न्यादयो देवता श्शुङ्गारसावनयने विनियोगः । पुमानग्निः पुमानिन्द्रः पुमान्देवो बृहस्पतिः । पुमाꣳसं पुत्रं विन्दस्व तं पुमाननुजायताम् । ततस्तामुत्थाप्य व्याहृतिचयं हुत्वोपरिष्टात्तन्त्रं समापयेत् । इत्यपरपुंसवनप्रयोगः ॥

अथ सीमन्तोन्नयनप्रयोगः । अत्र सूत्रम् । "प्रथमगर्भे चतुर्थे मासि षष्ठेऽष्टमे वा" । सूत्रोक्तान्यतममासे पूर्वपक्षे पुण्ये नक्षत्रे तत्करिष्यन् पूर्वदिने तद्दिने वा, तदङ्गमाभ्युदयिकश्राद्धं कुर्य्यात् । प्रातरुदगग्रेषु दर्भेषूपविश्य चतुर्भिः कलशैराप्लुता भवति । पत्न्या सह प्रातरौपासनं कृत्वा ब्राह्मणाननुज्ञाप्य पवित्रपाणिः प्राणानायम्य संकल्पं करोति । तद्यथा । अस्यां भार्यायां जनिष्यमाणगर्भाणां बैजिकगार्भिकदोषापनुत्तये इमां मम पत्नीं सीमन्तोन्नयनकर्मणा संस्करिष्यामि । तत औपासनाग्नावाज्यतन्त्रेण व्याहृतिहोमान्तं कुर्य्यात् । पात्रप्रयोगे विशेषः । अग्नेरुत्तरतः प्रकृतिवत्स्रुवाज्यस्थाल्यादिकमासाद्य चतुरादियुग्मफलयुतौदुम्बरनीलस्तबकं नूतनतन्तुग्रंथितं, तिस्रो दर्भपिञ्जूली,सूत्रकर्त्तनलोहशलाकां, त्रिश्वेतां शलली, तिलमिश्रिततण्डुलांश्चासादयेत् । कर्मकालेऽग्नेः पश्चादुदगग्रेषु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दर्भेषु भर्तुर्दक्षिणतः प्राङ्मुख्युपविशति । द्विः प्रक्षालितांस्ति-लमिश्रिततण्डुलान्निर्वापरक्षितानग्नौ श्रपयित्वाऽग्नेरुत्तरत आसादयेत् । अत्र मङ्गलाभिधोऽग्निः । ततो व्याहृतिहोमान्ते-ऽग्नेः पश्चात्पतिस्तिष्ठन् पूर्वमासादितमौदुम्बरशलाटुग्रन्थमय-मूर्ज्जावतो वृक्ष इतिमन्त्रेण पत्न्याः कण्ठ आबध्नाति । अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्द उदुम्बरो देवतौदुम्बरशला-टुग्रन्थिबन्धने विनियोगः । अयमूर्ज्जावतो वृक्ष ऊर्ज्जीव फलिनी भव । पर्णं वनस्पते नु त्वाऽनु त्वा सूयताꣳरयिः ॥ १ ॥ ततस्तस्मिन्नेव स्थाने पतिर्दर्भपिञ्जलीस्समादाय भूरिति मन्त्रेण प्रथमं सीमन्तमूर्ध्वं नयति । ताभिरेव पिञ्जलीभिर्भुवरिति द्वितीयं, स्वरिति तृतीयम् । व्याहृतीनामृषिच्छन्दोदेवताः प्रसिद्धाः । पुनश्शरं वीरतराख्यतृणविशेषं वाऽऽदाय सीमन्तमूर्ध्व-मुन्नयति येनादितेरितिमन्त्रेण । अस्य मन्त्रस्य प्रजापतिर्ऋ-षिरनुष्टुप्छन्दः प्रजापतिर्देवता सीमन्तोन्नयने विनियोगः । येनादितेस्सीमानं नयति प्रजापतिर्महते सौभगाय । तेनाह-मस्यै सीमानं नयामि प्रजामस्यै जरदष्टिं कृणोमि ॥ १ ॥ तत स्सूचकर्त्तनलोहमयशलाकया राकामहमितिमन्त्रेण सीमन्त-मुन्नयति । अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो राका देवता सीमन्तोन्नयने विनियोगः । राकामहꣳसुहवाꣳसुष्टुती हुवे शृणोतु नस्सुभगा बोधतु त्मना । सीव्यत्वपस्सूच्या च्छिद्यमानया ददातु वीरꣳशतदायु मुख्यम् ॥ १ ॥ ततस्त्रिस्थान-श्वेतया शलल्या सीमन्तमुन्नयति यास्ते राक इतिमन्त्रेण ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो राका देवता सीमन्तोन्नयने विनियोगः । यास्ते राके सुमतयस्सुपेशसो याभिर्ददासि दाशुषे वसूनि । ताभिर्नो अद्य सुमना उपागहि सहस्रपोषꣳसुभगे रराणा ॥ १ ॥ एकैकेन द्रव्येण सीमन्तमुन्नीय तन्निरस्याप उपस्पृश्यान्येन सीमन्तमुन्नयेत् । अथ कृशरस्थालीपाकमादाय तन्नावेक्षणयोग्यं घृतमवसिच्य तं पत्नीं प्रदर्शयेत् । पतिस्स्थालीपाकघृतं पश्यन्तीं पत्नीं किं? पश्यसीति पृष्ट्वा प्रजां पशून् सौभाग्यं मह्यं दीर्घायुष्ट्वं पत्युरिति पत्नीं वाचयेत् । नात्र छन्दो यजुष्ट्वात् । विनियोगः प्रसिद्धः । येन मन्त्रेण यत्कर्म क्रियते तस्य तत्र विनियोगो न्याय्यः । ततोऽवेक्षितचरोर्भोजनं मेक्षणेन पात्रान्तरे उद्धृत्य पत्नी कुर्य्यात् । भोजनसमये वीरसूस्त्वं जीवसूस्त्वं पत्नी त्वं भवेति मङ्गलगिरोऽन्या ब्राह्मण्यो वदेयुः । ततो व्याहृतिचयहोमादितन्त्रशेषं समापयेत् । "केचित्तु तन्त्रपरिसमाप्त्यनन्तरं पत्न्या कृशरचरुभक्षणं कार्य्यं, कर्ममध्ये भोजनाप्रसक्तेर्हुतशेषाभावाच्चेति वदन्ति" । एतच्च सीमन्तोन्नयनं प्रथमगर्भे, उत? द्वितीयगर्भादावपि । "अत्र वदन्ति 'प्रतिगर्भमावर्त्तनीयमेतत्' । अन्यथा गौतमादिभिः प्रतिपुरुषं परिगणितगर्भाधानाद्यष्टाचत्वारिंशत्संस्कारविरोधापत्तेः" । परे तु, 'न तत्प्रतिगर्भमावर्त्तनीयं' "सीमन्तकरणं प्रथमे गर्भे" इति गोभिलाचार्य्यैस्सूचितत्वात् । नच द्वितीयापत्यादेस्संस्कारन्यूनतेति शङ्कनीयम् । गर्भपात्रसंस्कारेण तत्र जातानामपत्यानामपि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



संस्कृतत्वात् । "यत्तु सीमन्तकरणं प्रथमे गर्भे" इति सूचकृदुक्त्या गर्भाधानपुंसवनयोः प्रतिगर्भमावृत्तिरिति तन्न । तयोरपि पात्रसंस्कारकत्वात् । अत एव गर्भाधाने दक्षिणेन पाणिनोपस्थमभिमृशेदित्युक्तः पात्रसंस्कारस्सङ्गच्छते "भट्टनारायणादयोऽपि 'सकृत्संस्कृते स्त्रीद्रव्ये यो यो गर्भ उत्पद्यते स संस्कृतो भवति तस्मात्सकृदेव स्याद्गर्भाधानसंस्कारो नतु प्रतिगर्भमिति' । एवं पुंसवनसीमन्तोन्नयनयोरपि द्रष्टव्यमित्याहुः" । तत्र प्रमाणवचनानि तत्रैव द्रष्टव्यानि ग्रन्थविस्तरभयान्नोच्यन्तेऽस्माभिः ॥ इति सीमन्तकरणप्रयोगः ॥

अथ सोष्यन्तीहोमः ॥ यदि पत्न्यासन्नप्रसवोदरपीडायुक्ता भवेत्तज्ज्ञात्वा शीघ्रं सुखप्रसवार्थं पत्या होमः कार्य्यः । योनिद्वारे स्थिते गर्भे सति, पत्न्याः शीघ्रं सुखप्रसवार्थमाज्याहुतीर्होष्यामीति संकल्प्य, पूर्ववदौपासनाग्निं संस्थाप्य तूष्णीं परिसमूह्य परिस्तीर्य्याज्यं संस्कृत्य पर्युक्ष्य, या तिरश्चीत्येताभ्यामाज्याहुतीः कुर्य्यात् । मन्त्रद्वयस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दस्संराधिनी धाता च देवता सुखप्रसवहोमे विनियोगः। या तिरश्ची निपद्यते अहं विधरणी इति । तां त्वा घृतस्य धारया यजे स꣡ꣳराधनीमहं स꣡ꣳराधिन्यै देव्यै देष्ट्र्यै स्वाहा । संराधिन्यै देव्या इदं न मम । विपश्चित्पुच्छमभरत्तद्धाता पुनराहरत् । परेहि त्वं विपश्चित्पुमानयञ्जनिष्यतेऽसौनाम स्वाहा । धात्र इदं न मम । असौनामेत्यत्र जनिष्यमाणपुत्रस्य यत्किञ्चिद्गुह्यं नाम परिकल्प्योच्चारयेत् । पुमानयं जनिष्यते

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



रामनामा स्वाहा । तत औपासनवदुपरिष्टात्तन्त्रं समापयेत् । नाच स्थालीपाकवद्ब्रह्मोपवेशनसमिदाधानादिकम् ॥ इति सुखप्रसवप्रयोगः ॥

अथ जातकर्मप्रयोगः ॥ जातं कुमारं श्रुत्वा नालच्छेदनं स्तन्यदानं चान्नप्राशनसमाप्तेः प्राङ्मा कुर्वित्युक्त्वा तूष्णीं दक्षिणोत्सङ्गे प्राङ्मुखं कुमारं संस्थाप्य, देशकालौ संकीर्त्त्यास्य कुमारस्य गर्भजलपानसंजातदोषापनुत्तये, बैजिकगार्भिकपापनिबर्हणाय च जातमिमं कुमारं जातकर्मणा संस्करिष्यामीति संकल्प्य, व्रीहियवौ शुङ्गावज्जलेन पेषयित्वा, दक्षिणाङ्गुष्ठानामिकाभ्यामभिसङ्गृह्य, कुमारस्य जिह्वायामियमाज्ञेतिमन्त्रेण निमार्ष्टि । कुमारी चेदमन्त्रकमेतत्कर्म । अस्य प्रजापतिर्यजुरन्नं देवता मार्जने विनियोगः । इयमाज्ञेदमन्नमिदमायुरिदममृतम् । अत्र शिशोर्जिह्वायां प्रगल्भनामाग्निर्विभाव्यः । इति जातकर्मप्रयोगः ॥

अथान्नप्राशनप्रयोगः ॥ अन्नप्राशनकर्मणा संस्करिष्यामीति सङ्कल्पः । ततो दक्षिणाङ्गुष्ठानामिकाभ्यां सुवर्णेनाज्यमादाय कुमारस्य जिह्वायां मेधां ते मित्रावरुणावित्येतया सदसस्पतिमित्येतया च पृथक् पृथक् जुहोति ॥ शिशुजिह्वायां शुचिनामाऽग्निः । आद्यायाः प्रजापतिर्ऋषिरनुष्टुप्छन्दो मित्रावरुणादयो देवता, द्वितीयस्या मेधातिथिर्ऋषिर्गायत्रीछन्दस्सदसस्पतिर्देवता, सर्पिःप्राशने विनियोगः । मेधां ते मित्रावरुणौ मेधामग्निर्दधातु ते । मेधां ते अश्विनौ देवावा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



धत्तां पुष्करस्रजौ स्वाहा ॥ १ ॥ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यं । सनिम्मेधामयासिषं स्वाहा ॥ २ ॥ ततो नालच्छेदनं स्तन्यदानं च कुर्विति ब्रूयात् । अत ऊर्द्धं पिता सचैलं स्नायात् । "भट्टभाष्ये पितुरपि पुत्रे जाते स्नानमिति" यत्तद्‌स्मात्कर्मण ऊर्द्धमेव द्रष्टव्यम् । अत ऊर्द्धं सूतिस्पर्शं वर्ज्जयेदादशरात्रात् । यत्तु जातकर्मणि नान्दीश्राद्धाभिधानं तन्न सम्यक् । "नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते । न सोष्यन्तीजातकर्मप्रोषितागतकर्मसु" । इति 'कर्मप्रदीपे' निषेधदर्शनात् । युक्तञ्चैतत् । अतिविलम्बेन नालच्छेदे शिशोः शरीरबाधापत्तेः । अत्र कुमारजिह्वायां "व्रीहियवमार्ज्जनमेकं कर्म्म, घृतप्राशनं द्वितीयं कर्म्म, तदुभयं जातकर्मेति" केचिन्मन्यन्ते । "परे तु, व्रीहियवमार्ज्जनं जातकर्म्म, घृतप्राशनमन्नप्राशनाख्यं कर्म्मान्तरमित्याहुः" । कः ? पुनरत्र ज्यायान्, द्वितीयः । इति कुतः ? सर्पिः प्राशयेदित्युक्तेः । सर्पिश्चान्नं भविष्यतीत्यन्नप्राशने तैत्तिरीयमांसस्याप्यन्यत्रान्नत्वदर्शनात् । नचेदं जातकर्म्मान्तर्गतं तथैव मेधाजननं सर्पिरित्युक्तेऽपि व्रीहियवमार्ज्जनवत् पूर्वसूत्रस्थनिमार्ष्टिक्रिययैव घृतश्च्योतनसिद्धेः । एतेन 'व्रीहियवमार्ज्जनं, सर्प्पिःप्राशनं च, जातकर्मेति' मत्वा, गौतमोक्तचत्वारिंशत्संस्कारसंख्यापूरणायान्नसंस्काराय च गोभिलानुक्तमन्नप्राशनमध्वर्युशाखोक्तं ग्राह्यमिति वदन्तः परास्ताः । परशाखोक्तविस्तृतान्नप्राशनानुष्ठानस्य वैफल्यस्मरणाच्च । तथाहि "कर्मप्रदीपे" । 'अक्रिया त्रिविधा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रोक्ता विद्वद्भिः कर्मकारिणाम् । अक्रिया च परोक्ता च तृतीया चायथा क्रिया ॥ १ ॥ स्वशाखाश्रयमुत्सृज्य परशाखाश्रयं च यः । कर्त्तुमिच्छति दुर्मेधा मोघं तत्तस्य चेष्टितम्' ॥ २ ॥ तत्राक्रिया स्वसूत्रानुष्ठानरूपा आद्या, परशाखोक्तकर्मानुष्ठानरूपा द्वितीया, यथावदननुष्ठानरूपा तृतीया । "यत्तु स्वसूत्रोक्तमल्पेतिकर्त्तव्यता युक्तं तत्र सविस्तरं पारशाखिकमनुष्ठेयमिति" तत्तुच्छम् । 'गृह्यपरिशिष्टे' निषेधस्मृतेः । तथाहि "प्रयोगशास्त्रं गृह्यादि न समुच्चीयते परैः । प्रयोगशास्त्रताहानेरनारम्भविधानतः ॥ १ ॥ बह्वल्पं वा स्वगृह्योक्तं यस्य यावत् प्रकीर्त्तितम् । तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत्" ॥ २ ॥ अत्रान्तिमचरणमन्यत्रान्यथा स्मर्य्यते । 'तेन सन्तनुयात्कर्म न कुर्यात्पारशाखिकम्' । गृह्यासङ्ग्रहकारोऽपीममर्थं स्पष्टीचकार । 'यस्स्वशाखोक्तमुत्सृज्य परशाखोक्तमाचरेत् । अप्रमाणमृषिं कृत्वा सोऽन्धे तमसि मज्जति' ॥ १ ॥ "अत्र केचिद्व्रीहियवमार्ज्जनं सर्पिःप्राशनं चैकं कर्म्म, अन्नप्राशनं ह्येतद्व्रीहियवग्रहणात्सूत्रान्तरे दर्शनात् । जाते यत्कर्म्म तज्जातकर्म्मास्यैव नामान्तरम् । वचनादेकेन कर्मणा संस्कारद्वयनिष्पत्तिरपि नानुचिता । गौतमोक्तचत्वारिंशत्संख्यापूर्त्तिश्चन्द्रदर्शनेनान्येन वा भविष्यति तस्मादध्वर्य्युशाखोक्तमन्नप्राशनं न कुर्यादित्याहुः" । अस्मिन्पक्षे जातकर्मण्यन्नप्राशने च पृथक् पृथगग्निनामकरणप्रतिपादकगृह्यासंग्रहवचनविरोधस्स्पष्ट एव । षष्ठे मास्यन्नप्राशनस्य विधिरन्येषाम् । ननु, 'सर्पिःप्राशनानन्तरं श्रूयमाणं नालच्छेद-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नादिकं प्राशनस्य जातकर्म्माङ्गत्वं बोधयति । सूत्रान्तरे नालच्छेदनादर्व्वाग्जातकर्म्मान्ते विधानादिति चेन्न । गोभिल-मतेऽन्नप्राशनात्परमेव नालच्छेदनविधानाङ्गीकाराद्गोभिली-यानां जननकाल एव जातकर्म्मान्नप्राशनञ्च कर्त्तव्यमित्याहुः ॥ इत्यन्नप्राशनप्रयोगः ॥

अथ चन्द्रदर्शनप्रयोगः ॥ कुमारस्य जन्मकालमारभ्य तृतीयो यश्शुक्लपक्षस्तस्य तृतीयायां शिशोश्चन्द्रं प्रदर्श्य पिता कृताञ्जलिपुटश्चन्द्रमुपतिष्ठते । प्रातः कुमारं सशिरस्कं स्नाप-यित्वा, पत्न्या सह ब्राह्मणाननुज्ञाप्य, गणेशं संपूज्य, कुमारस्य करिष्यमाणज्योत्स्नादर्शनकर्माङ्गं नान्दीमुखश्राद्धं प्रातः कुर्य्या-त् । ततोऽस्तमिते सूर्य्ये लौहित्यापगमे पिता चन्द्राभिमुखो देशकालौ संकीर्त्त्य शिशोरायुरारोग्यवृद्ध्यर्थं शिशोश्चन्द्रदर्श-नाख्यं कर्म करिष्ये। इति संकल्पं कुर्य्यात् । तदा माता अह-तेन वाससा मुखवर्जं कुमारमाच्छाद्य, भर्त्तुर्दक्षिणतो गत्वोत्ता-नमुखमुदक्छिरसं कुमारं पित्रे प्रदाय, पत्युः पृष्ठदेशेनोत्तरतो गत्वा पत्युरुत्तरस्यां दिशि माताऽवतिष्ठते । ततः पिता जपति यत्ते सुसीमेति । तिसृणामृचां प्रजापतिर्ऋषिरनुष्टुप्छन्दश्चन्द्रो देवता शिशोश्चन्द्रदर्शने विनियोगः । यत्ते सुसीमे हृदयꣳहि-तमन्तः प्रजापतौ । वेदाहं मन्ये तद्ब्रह्म माहं पौत्रमघं निगाम् ॥ १ ॥ यत्पृथिव्या अनामृतं दिवि चन्द्रमसि श्रितम् । वेदामृतस्याहं नाम माहं पौत्रमघꣳरिषम् ॥ २ ॥ इन्द्राग्नी शर्म्म यच्छतं प्रजायै मे प्रजापती । यथाऽयं न प्रमीयेत

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पुत्रो जनिच्या अधि ॥ ३ ॥ यथादत्तं कुमारं मात्रे प्रदायोपविश्य वामदेव्यं गायेत् । अत ऊर्द्धं द्वादशसु शुक्लपक्षेषु तृतीयास्वस्तमिते लौहित्यनिवृत्तौ पितोदकेनाञ्जलिमापूर्य्य चन्द्राभिमुखो यददश्चन्द्रमसीतिमन्त्रेण चन्द्रं प्रत्युत्सृज्य तूष्णीमुदकाञ्जलिद्वयमुत्सृजेत् । यददश्चन्द्रमसीति मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दश्चन्द्रो देवतोदकाञ्जल्युत्सर्ज्जने विनियोगः । यददश्चन्द्रमसि कृष्णं पृथिव्या हृदयꣳश्रितम् । तदहं विद्वाꣳस्तत्पश्यन् माहं पौत्रमघꣳरुदम् ॥ १ ॥ ततो वामदेव्यं गायेत् । 'एतत्प्रतिपदि द्वितीयायां वेति' केचित् । मातरं शिशुं च विहाय देशान्तरस्थोऽपि पिता चन्द्रमसे उदकाञ्जलित्रयं दद्यात् ॥ इति शिशोश्चन्द्रदर्शनप्रयोगः ॥

अथ नामकरणप्रयोगो निरूप्यते । जन्मदिवसादेकादशेऽन्हि पिता नाम कुर्यात् । दैवान्मानुषाद्वोक्तदिने तदकरणे एकोत्तरशततमदिवसे । तत्राप्यकरणे द्वितीयसंवत्सरे, प्रथमदिने वा कुर्य्यात् । "न स्वेऽग्नावन्यहोमस्स्यान्मुक्त्वैकां समिदाहुतिम् । स्वगर्भसत्क्रियार्थांश्च यावन्नासौ प्रजायते ॥ १ ॥ अग्निस्तु नामधेयादिहोमे सर्वत्र लौकिकः । न हि पित्रा समानीतः पुत्रस्य भवति क्वचित्" । इति कर्मप्रदीपवचनान्नामकरणे लौकिकाग्निर्ग्राह्यः । गर्भाधानपुंसवनसीमन्तोन्नयनकर्मणां परम्परया गर्भसंस्कारकत्वेऽपि साक्षात्पत्नीसंस्कारार्थत्वात्तेषु गृह्याग्निरेव युक्तः । येषां मते गर्भसंस्कारार्थत्वं तन्मते गृह्याग्नेरप्राप्तौ तद्वचनविरोधस्स्पष्ट एव । अस्य मम कुमारस्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



करिष्यमाणनामकरणकर्म्माङ्गन्नान्दीमुखश्राद्धं करिष्ये । इति संकल्प्य तत्कुर्य्यात् ॥ अथ प्रातर्ब्राह्मणाननुज्ञाप्य स्वदक्षिण-भागे उपविष्टया पत्न्या सशिरस्काप्लावितेन कुमारेण च सह पवित्रपाणिः प्राणानायम्य देशकालौ संकीर्त्यास्य मम कुमारस्य बैजिकगार्भिकदोषनिवृत्तये, व्यवहारसिद्धये च, नामधेयकरणं करिष्ये। इति सङ्कल्प्य स्वपुरतो गोमयेनोपलिप्ते स्थण्डिले विधिवत्पार्थिवनामानं लौकिकाग्निं संस्थापयेत्। आज्यतन्त्रेण ब्रह्मोपवेशनाद्याज्यसंस्कारान्तं कुर्यात् । ततो माता मुखवर्जमहतेन वाससा कुमारमाच्छाद्य दक्षिणत उदञ्चमुदक्छिरसं पित्रे प्रदाय पत्युः पृष्ठत उत्तरतो गत्वोदगग्रेषु दर्भेषु प्राङ्मुखी पत्न्युपविशति । ततः पतिस्स्रुवसंमार्गादिव्याहृतित्रयान्तं हुत्वा मनसा प्रजापतये स्वाहेति जुहोति। ततः कुमारजन्मतिथये, जन्मतिथिदेवतायै, कुमारजन्मनक्षत्राय, जन्मनक्षत्रदेवतायै चैकैकाज्याहुतिं जुहोति । चतुर्थ्यन्ततिथिनक्षत्रदेवतानामान्ते स्वाहेति पदं संयोज्य होमाः कर्त्तव्याः । सुखावबोधनार्थः प्रयोगः प्रदर्श्यते॥ प्रतिपदे स्वाहा। द्वितीयायै स्वाहा। तृतीयायै स्वाहा । चतुर्थ्यै० । पञ्चम्यै० । षष्ठ्यै० । सप्तम्यै० । अष्टम्यै० । नवम्यै० । दशम्यै० । एकादश्यै० । द्वादश्यै० । त्रयोदश्यै० । चतुर्दश्यै० । पौर्णमास्यै० । अमावास्यायै० ॥ इति तिथिहोमः ॥ प्रतिपदादिदेवताहोमप्रयोग उच्यते॥ ब्रह्मणे स्वाहा। त्वष्ट्रे० । विष्णवे० । यमाय० । सोमाय० । कुमाराय० । मुनिभ्यः० । वसुभ्यः० । पिशाचेभ्यः० । धर्माय० । रुद्राय० । रवये० ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मन्मथाय० । यक्षेभ्यः० । पितृभ्यः० । विश्वेभ्यो देवेभ्यः० । इति तिथिदेवताः ॥ अश्विनीभ्यः स्वाहा । भरणीभ्यः० । कृत्तिकाभ्यः० । रोहिणीभ्यः० । मृगशिरसे० । आर्द्रायै० । पुनर्वसवे० । पुष्याय० । आश्लेषाभ्यः० । मघाभ्यः० । पूर्वाभ्यां फल्गुनीभ्याम्० । उत्तराभ्यां फल्गुनीभ्याम्० । हस्ताय० । चित्रायै० । स्वात्यै० । विशाखाभ्यः० । अनूराधाभ्यः० । ज्येष्ठायै० । मूलाय० । पूर्वाभ्योऽषाढाभ्यः० । उत्तराभ्योऽषाढाभ्यः० । श्रवणाय० । धनिष्ठाभ्यः० । शतभिषग्भ्यः० । पूर्वाभ्यां प्रोष्ठपदाभ्याम्० । उत्तराभ्यां प्रोष्ठपदाभ्यां० । रेवत्यै० । इति नक्षत्रहोमः ॥ अश्विभ्याम्० । यमाय० । अग्नये० । प्रजापतये० । सोमाय० । रुद्राय० । अदितये० । बृहस्पतये० । सर्पेभ्यः० । पितृभ्यः० । भगाय० । अर्यम्णे० । सवित्रे० । त्वष्ट्रे० । वायवे० । इन्द्राग्निभ्याम्० । मित्राय० । इन्द्राय० । निर्ऋतये० । अद्भ्यः० । विश्वेभ्यो देवेभ्यः० । विष्णवे० । वसुभ्यः० । वरुणाय० । अजायैकपदे० । अहिर्बुध्न्याय० । पूष्णे० । इति नक्षत्रदेवताहोमप्रयोगः ॥ हुत्वैवं कुमारस्य मुखं, नेत्रद्वयं, नासिके, कर्णौ च, संस्पृश्य कोऽसि कतमोऽसीतिमन्त्रं जपति । मन्त्रद्वयेऽसावित्यस्य स्थाने सम्बोधनान्तं कुमारस्य परिकल्पितं नामोच्चारयेत् । अनयोः प्रजापतिर्ऋषिर्यजुरादित्यो देवता नामकरणे विनियोगः । कोऽसि कतमोऽस्येषोऽस्यमृतोऽसि आहस्पत्यं मां संप्रविशासौ ॥ १ ॥ स त्वाऽन्हे परिददात्वहस्त्वारात्र्यै परिददातु रात्रिस्त्वाऽहोरात्राभ्यां परिददात्वहोरा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



चौ त्वाऽर्द्धमासेभ्यः परिदत्तामर्द्धमासास्त्वा मासेभ्यः परिददतु मासास्त्वर्त्तुभ्यः परिददत्वृतवस्त्वा संवत्सराय परिददतु संवत्सरस्त्वायुषे जरायै परिददात्वसौ ॥ अथ नामलक्षण-सूत्रम् ॥ "घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्ठानान्तं कृतं नाम दध्यादेतदतद्धितम् । अयुग्दान्तं स्त्रीणाम्" । अत्रेदं तात्पर्य्यम् । पुंसां युग्माक्षरं नाम । तत्राद्यक्षरं घोषवत् । वर्गाणां तृतीयचतुर्थपञ्चमहकारान्यतममिति यावत् । मध्याक्षरं यरल-वान्यतमं विसर्गोत्तरदीर्घान्त्यं कृदन्तं नाम कुर्यात् । न तद्धि-तान्तम् । यथा । गोह्ला, हिरण्यदा, इति । स्त्रीणां त्वयुग्मा क्षरं दाशब्दान्तं नाम कुर्यात् । 'सूत्रान्तरे' तु देवतानाम, ऋषिनाम, पितृनाम, वा कुर्यात् । प्रथमं मात्रे कुमारस्य नमोक्त्वा सुहृद्भ्यः पश्चात् । उपरिष्टात्तन्त्रं समापयेत् । ब्रह्मणे गौर्दक्षिणा । वामदेव्यं गीत्वा ब्राह्मणभोजनादिकं यथाशक्ति कार्य्यम् ॥ इति नामकरणप्रयोगः ॥

अथ कुमारस्य श्रेयस्कराग्नीन्द्रादिदेवतायागप्रयोगः ॥ "तस्य काले मासि मासि जन्मतिथिस्संवत्सरपर्यन्तम् । सांवत्सरिकेषु पर्वसु वा" ॥ अस्यार्थः । कार्त्तिकीफाल्गुन्या-षाढीष्विति । तत उक्ततिथौ प्रातः कृतनित्यक्रियः पत्न्या कुमारेण च सह जन्मतिथियागानुष्ठानार्थं ब्राह्मणाननुज्ञाप्य गणेशं सम्पूज्य, तदङ्गं नान्दीमुखश्राद्धं विधायामुकशर्म्मणो ऽस्यकुमारस्य श्रेयोऽभिवृद्ध्यर्थं जन्मतिथियागं करिष्य इति सङ्कल्प्य शुद्धे स्थण्डिले उल्लेखनादिपूर्वकं पावकनामानं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



लौकिकाग्निं प्रतिष्ठाप्याज्यतन्त्रेण व्याहृतिचयहोमान्तं कृत्वा, वक्ष्यमाणदेवताभ्य एकैकामाज्याहुतिं जुहुयात् । अग्नीन्द्राभ्यां स्वाहा । अग्नीन्द्राभ्यामिदं न मम । द्यावापृथिवीभ्यां स्वाहा । द्यावापृथिवीभ्यामिदं न मम । विश्वेभ्यो देवेभ्यस्स्वाहा । विश्वेभ्यो देवेभ्य इदं न मम । ततो जन्मतिथिदेवतायै, जन्मतिथये, जन्मनक्षत्रदेवतायै, जन्मनक्षत्राय, चैकैकाज्याहुतिं कृत्वा व्याहृतिचयहोमादितन्त्रशेषं प्रकृतिवत्समापयेत् । पूर्णपात्रं दक्षिणा । वामदेव्यगानम् । ब्राह्मणभोजनम् ॥ इति जन्मतिथियागः ॥

अथ प्रवासं कृत्वाऽऽगतः पिता ज्येष्ठपुत्रस्य मूर्द्धानं हस्ताभ्यां परिगृह्याङ्गादङ्गादित्यृक्त्रयं जपेत्, मदीयः पितेति यदा कुमारो जानीयात्तदा । अथोपनीतस्य हिंकारेणाभिजिघ्रामीति मन्त्रस्थपदप्रयोगकाले मूर्द्धानमभिजिघ्रति । असावित्यस्य स्थाने सम्बोधनान्तं पुत्रनाम वदेत् । आसामृचां प्रजापतिर्ऋषिरनुष्टुप्छन्दः प्रजापतिर्देवता मूर्द्धस्पर्शाघ्राणजपे विनियोगः । अङ्गादङ्गात्सम्भवसि हृदयादधि जायसे । प्राणं ते प्राणेन संदधामि जीवं मे यावदायुषम् ॥ १ ॥ अङ्गादङ्गात्सम्भवसि हृदयादधि जायसे । वेदो वै पुत्रनामाऽसि स जीव शरदश्शतम् ॥ २ ॥ अश्मा भव परशुर्भव हिरण्यमस्तृतम्भव । आत्माऽसि पुत्र मा मृथास्सजीव शरदः शतम् ॥ ३ ॥ पशूनां त्वा हिंकारेणाभिजिघ्राम्यसौ ॥ ४ ॥ एवमन्येषामपि पुत्राणां ज्येष्ठक्रमेण पूर्ववत्कार्य्यम् । यथोपलम्भं वा । कन्यानां त्वमन्त्रकम् ॥ इति प्रवासादागतस्य कर्त्तव्यप्रयोगः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अथ चूडाकरणप्रयोगः ॥ जननकालात्तृतीये वर्षे, उत्तरायणे, शुक्लपक्षे, पुण्ये नक्षत्रे, तत्करिष्यन्तदङ्गमाभ्युदयिकश्राद्धं कुर्यात् । अथ मध्यान्हात्पूर्वं सुस्नातेन कुमारेण स्नातया पत्न्या सह कृतनित्यक्रियः पिता चूडाकरणार्थं ब्राह्मणाननुज्ञाप्य, कुशेषु प्राङ्मुख उपविश्य, प्राणानायम्य, देशकालौ सङ्कीर्त्त्य, ममास्य कुमारस्य बैजिकगार्भिकदोषापनुत्तये इमं कुमारं चूडाकरणकर्मणा संस्कारिष्यामीति सङ्कल्प्य, गृहस्य पुरस्ताद्गोमयेनोपलिप्ते स्थण्डिले विधिवत्सभ्याभिधं लौकिकाग्निं संस्थाप्याज्यतन्त्रेणाज्यसंस्कारान्तं कुर्यात् । पात्रप्रयोगकाले विशेषः । अग्नेर्दक्षिणत उदगग्रेषु दर्भेषु समं त्रिधाबद्धा एकविंशतिदर्भपिञ्जलीरुष्णोदकपूरितं कांस्यपात्रं, ताम्रमयं क्षुरं, दर्पणं वा, प्राक्संस्थमासादयेत् । क्षुरहस्तं नापितं दक्षिणतस्संस्थापयेत् । अग्नेरुत्तरतस्तिलमिश्रिततण्डुलान् वृषभगोमयं चासादयेत् । व्रीहियवैस्तिलैर्माषैः पृथक् पात्राणि पूरयित्वाऽग्नेः पुरस्तादासादयेत् । निर्वापं विना कृसरचरुमग्नौ श्रपयित्वाऽऽसादयेत् । आज्यसंस्कारान्ते माताऽहतेन वाससा कुमारमाच्छाद्याग्नेः पश्चादुगग्रेषु दर्भेषु प्राङ्मुख्युपविशति । पश्चान्महाव्याहृतिभिर्व्यस्ताभिस्समस्ताभिश्च चतस्र आज्याहुतीर्हुत्वा गृहीतकुमाराया मातुः पश्चात्प्राङ्मुखः पिताऽवतिष्ठते । ततः पिता सूर्यं मनसा ध्यायन् नापितं पश्यन्नायमगात्सवितेतिमन्त्रं जपेत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुस्सविता देवता जपे विनियोगः । आयम-



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



गात्सविना क्षुरेण ॥ अथोष्णोदककंसं पश्यन्वायुं मनसा ध्यायन्नुष्णेन वायविति जपेत् । अस्य प्रजापतिर्ऋषिर्यजुर्वायुर्देवता जपे विनियोगः । उष्णेन वाय उदकेनैधि ॥ अथ पिता दक्षिणहस्तेनोष्णोदकमादाय प्राङ्मुखः कुमारशिरसि दक्षिणकेशानार्द्रीकरोत्याप उन्दन्तु जीवस इतिमन्त्रेण । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुरापो देवता क्लेदने विनियोगः । आप उन्दन्तु जीवसे ॥ विष्णोर्दꣳष्ट्रोसीति ताम्रमयं क्षुरमादर्शं वा प्रेक्षते । अस्य प्रजापतिर्ऋषिर्यजुर्विष्णुर्दꣳष्ट्रा देवता प्रेक्षणे विनियोगः । विष्णोर्दꣳष्ट्रोऽसि ॥ अथ सप्तदर्भपिञ्जलीस्समादाय शिरोऽभिमुखाग्रा दक्षिणचूडायां स्थापयत्योषधे त्रायस्वैनमिति । अस्य प्रजापतिर्ऋषिर्यजुरोषधिर्देवता सप्तपिञ्जलीस्थापने विनियोगः । ओषधे त्रायस्वैनं ॥ ततो वामहस्तेन दर्भपिञ्जलीर्दक्षिणकेशांश्च गृहीत्वा, दक्षिणहस्तेन क्षुरं दर्पणं वा गृहीत्वा, तत्र क्षुरमादर्शं वा स्थापयति स्वधिते मैनꣳहिꣳसीरितिमन्त्रेण । अस्य प्रजापतिर्ऋषिर्यजुस्स्वधितिर्देवता क्षुरस्यादर्शस्य वा स्थापने विनियोगः । स्वधिते मैनꣳहिꣳसीः ॥ ततः केशानां छेदनमकुर्वन् क्षुरमादर्शं वा प्राञ्चं प्रेरयति येन पूषेति सकृत् द्विस्तूष्णीम् । अस्य प्रजापतिर्ऋषिर्यजुः पूषा देवता प्रोहणे विनियोगः । येन पूषा बृहस्पतेर्वायोरिन्द्रस्य चावपत् । तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय दीर्घायुष्ट्वाय वर्चसे ॥ अथ नापितहस्ताद्गृहीतेनायसेन दर्भपिञ्जल्यग्राणि केशांश्च सह छित्वाऽग्नेरुत्तरत आसादिते

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



आनडुहगोमये स्थापयति । अथ दर्भपिञ्जलीर्निरस्याप उपस्पृशति । एवमेव पश्चाद्भागे उत्तरभागे च केशार्द्रीकरणप्रभृति छिन्नकेशदर्भपिञ्जलीस्थापनान्तं कर्म कर्त्तव्यम् ॥ अथ पिता हस्तद्वयेन कुमारस्य मूर्द्धानं परिगृह्य त्र्यायुषं जमदग्नेरितिमन्त्रं जपेत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः प्रजापतिर्देवता जपे विनियोगः । त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषमगस्त्यस्य त्र्यायुषं यद्देवानां त्र्यायुषं तत्ते अस्तु त्र्यायुषम् ॥ अथाग्नेरुत्तरतो बहिर्गत्वा कुमारस्य वपनं गोत्रकुलानुगुण्येन शिखास्थापनञ्च कारयेत् । कौशुमराणायनयोस्समावर्त्तनात्पूर्वं सशिखमेव वपनं कार्य्यम् । तथा वक्ष्यमाणसमावर्त्तनप्रयोगे सूत्रकृदुक्त्या ज्ञापयिष्यमाणत्वात् । ततः पिता व्याहृतिचतुष्टयं हुत्वा तन्त्रशेषं समापयेत् । गौर्दक्षिणा। गोमये सर्वान् केशान् संस्थाप्यारण्यं गत्वा निखनन्ति । व्रीहियवादिक्षेत्रे वा क्षिपेयुर्भृत्याः । स्त्रीणामप्यमन्त्रकं सावित्रजपप्रभृति गोमयनिधानान्तं कर्म्म, होमो, नान्दीमुखश्राद्धञ्च मन्त्रेण । एवं जातकर्मादौ प्रधानकर्मामन्त्रकमन्यत्सर्वं समन्त्रकम् । ब्राह्मणभोजनादिकं यथाशक्ति कार्य्यं । कृसरं व्रीह्यादिपात्राणि नापिताय दद्यात् ॥ इति चूडाकरणप्रयोगः ॥

यदि कुमारस्य स्वस्वकाले जातकर्मादीन्यननुष्ठितानि तर्ह्युपनयनात्पूर्वं चूडाकर्मणा सह प्रायश्चित्तपूर्वकमनुष्ठेयानि। यथा जातकर्मादिचूडाकर्मान्तं कर्मगणप्रारम्भाङ्गं नान्दीश्राद्धं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सकृदेव कृत्वा देशकालौ सङ्कीर्त्त्यास्य कुमारस्य गर्भाम्बुपान-सञ्जातसकलदोषबीजगर्भसमुद्भवपापनिबर्हणाय जातकर्मान्न-प्राशनचन्द्रदर्शननामकरणजन्मतिथियागचूडाकरणकर्मभिरिमं कुमारं संस्करिष्यामीति सङ्कल्प्य चूडाकर्मणि विहितमग्निं विधिवत्प्रतिष्ठाप्याज्यतन्त्रेण व्याहृतिचयहोमान्तं कुर्य्यात् । ततो जातकर्मणो मुख्यकालातिपत्तिप्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामीति सङ्कल्प्याज्येन व्याहृतिचतुष्टयं हुत्वोक्तविधिना जातकर्म कुर्य्यात् । एवमन्नप्राशनकर्मणो मुख्यकालातिपत्ती-त्याद्युक्ता व्याहृतिचतुष्टयं हुत्वाऽन्नप्राशनमुक्तविधिना कुर्यात् । तथैव चन्द्रदर्शनमुख्यकालातिपन्नप्रायश्चित्तं पूर्ववद्धुत्वोक्तवि-धिना चन्द्रमुपस्थाय षट्चिंशदुदकाञ्जलीन् दद्यात् । ततो नामकरणमुख्यकालातिपत्तिप्रायश्चित्तं हुत्वा नामकरणाङ्ग-भूतहोमान्विधायोक्तविधिना नामधेयकरणं कुर्यात् । तथैव जन्मतिथियागमुख्यकालातिपन्नप्रायश्चित्तं पूर्ववद्धुत्वोक्तविधिना जन्मतिथिदेवताहोमान् कृत्वा ततो चूडाकर्माङ्गं व्याहृतिचतु-ष्टयं हुत्वोक्तविधिना चूडाकरणं विधायोपरिष्टात्तन्त्रं समा-पयेत् । उपनयनेन सह चेत् प्रायश्चित्तपूर्वकं चूडाकर्म कृत्वोपनयनाङ्गव्याहृतिचतुष्टयहोमादिकं सर्वं कुर्यात् ॥

अथोपनयनप्रयोगः ॥ गर्भप्रभृत्यष्टमे वर्षे ब्राह्मणस्योपन-यनम्, गर्भैकादशे क्षत्रियस्य, गर्भाद्वादशे वैश्यस्य । आषोडशाद्ब्राह्मणस्य, आद्वाविंशात्क्षत्रियस्य, आचतुर्विंशाद्वैश्यस्य । "अचाक्षय्यादायामिति" केचित्, "अभिविधावित्यन्ये" । उक्त-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



कालातिक्रमणे पतितसावित्रीका भवन्ति । नैनानुपनयेयुः । न याजयेयुः । नाध्यापयेयुः । नैभिर्विवहेयुः । "स्मृत्याद्युक्तप्रायश्चित्तानुष्ठाने उक्तनिषेध" इति व्याचख्युः । उदगयने, शुक्लपक्षे, पुण्यनक्षत्रे, पूर्वाह्णे, उपनयनं करिष्यन् तदङ्गं वृद्धिश्राद्धं तद्दिने पूर्वदिने वा कुर्यात् । वृद्धिश्राद्धात्पूर्वं उपनेतृत्वाधिकारसिद्धये कृच्छ्रत्रयं चरित्वा द्वादशसहस्रगायत्रीं जपेत् । कुमारेणापि कामचारकामवादकामभक्षणादिदोषापनोदार्थं कृच्छ्रत्रयं मुख्यविधिना तत्प्रत्याम्नायगोदानादिविधिना वा कारयेत् । तथा ममोपनेतृत्वाधिकारसिद्धये कृच्छ्रत्रयं द्वादशसहस्रगायत्रीजपञ्च करिष्ये । स्वयं जपकरणाशक्तौ ब्राह्मणद्वारा वा कारयेत । कुमारेणापि कामचारकामवादकामभक्षणादिदोषापनोदार्थं कृच्छ्रत्रयं प्रत्याम्नायगोनिष्क्रयादिद्वारा करिष्ये इति सङ्कल्प्य गोनिष्क्रयद्रव्यं ब्राह्मणेभ्यो दातुमहमुत्सृजे इति दद्यात् । यस्मिन्नहनि माणवकमुपनेष्यन् तस्मिन्नहनि तं भोजयति, वापयति, स्नापयत्यलङ्करोति । अत्रापि सशिखं वपनं । "तदुक्तं 'कर्मप्रदीपे' । सशिखं वपनं कार्य्यमास्नानाद्ब्रह्मचारिण" इति । केचित् "प्रथमं वपनं, ततः स्नानं, ततो भोजनमिति" । ततः पत्न्या, सुस्नातेन माणवकेन, च सह पवित्रपाणिः पिता ब्राह्मणानुज्ञापूर्वकं प्राङ्मुख उपविश्य प्राणानायम्य देशकालौ सङ्कीर्त्त्य द्विजत्वसिद्धये इमं माणवकमुपनेष्यामीति सङ्कल्प्य गृहस्य पुरस्तात्स्थण्डिले विधिवत्समुद्भवनामानं लौकिकाग्निं प्रतिष्ठाप्य माणवकं स्वदक्षिणभागे उपवेश्य,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



कटिसूत्रं बध्वा, वस्त्रं परिधाप्याचमनं कारयित्वा, यज्ञोपवीतं मन्त्रेण धारयेत्। धारणसंकल्पस्तु श्रौतस्मार्त्तसकलनित्यनैमित्तिककर्मानुष्ठानयोग्यतासिद्धये ब्रह्मतेजोऽभिवृद्ध्यर्थं यज्ञोपवीतधारणं करिष्ये। यज्ञोपवीतमितिमन्त्रस्य प्रजापतिर्ऋषिर्यजुर्यज्ञोपवीतं देवता यज्ञोपवीतधारणे विनियोगः। यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेनोपनह्यामि। अयञ्च मन्त्रः शाखान्तरे पठितो भट्टनारायणोपाध्यायैः परिगृहीतः। अग्नेरुत्तरतो यज्ञोपवीतिना माणवकेन द्विराचमनं कारयित्वा स्वदक्षिणभागे प्राङ्मुखमुपवेशयेत्। ब्राह्मणादेर्वस्त्रादिकमाह 'गोभिलः'। "ब्राह्मणस्य क्षौमं, क्षत्रियस्य कार्प्पासं, वैश्यस्योर्णावस्त्रं, शाणं वा"। ब्राह्मणस्येति विकल्पः। "कृष्णमृगाजिनं ब्राह्मणस्य, क्षत्रियस्य रुरुमृगाजिनम्, वैश्यस्याजाजिनम्"। "ब्राह्मणस्य मौञ्जीमेखला, क्षत्रियस्य काशमयी, वैश्यस्य शाणी"। "पालाशो ब्राह्मणस्य दण्डः, क्षत्रियस्य बैल्वो, वैश्यस्याश्वत्थो दण्डः"। तल्लक्षणं तु "कर्मप्रदीपे"। 'केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः। ललाटसम्मितो राज्ञस्स्यात्तु नासान्तिको विशः॥ १॥ ऋजवस्ते तु सर्वे स्युरव्रणास्सौम्यदर्शनाः। अनुद्वेगकरा नृणां सत्वचो नाग्निदूषिताः'॥ २॥ तत्तद्वर्णस्योक्तवस्त्राजिनमेखलादण्डालाभे सर्वेषां वर्णानां सर्वे वस्त्राजिनमेखलादण्डा यथासम्भवं ग्राह्याः। तत आज्यतन्त्रेणाज्यसंस्कारान्तं कुर्य्यात्। पात्रासादने विशेषः। प्रकृतिवत्पात्राण्यासाद्य तत्तद्वर्णविहितवस्त्राजिनमेखलादण्डभिक्षापात्राणि प्राक्संस्थान्यग्नेरुत्तरत आसादयेत्।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ततस्समिधमाधायोदकाञ्जलिचयं दत्वा पर्युक्ष्य व्यस्ताभिस्सम-स्ताभिर्व्याहृतिभिश्चतस्त्र आज्याहुतीर्हुत्वा माणवकेनान्वारब्धोऽग्ने व्रतपत इत्यादिभिर्माणवकानुपठितैर्व्रतनामव्रतपरिमाणोच्युक्तैः पञ्चभिः पञ्चाज्याहुतीर्जुहोति । अग्ने व्रतपत इत्यादिमन्त्राणां प्रजापतिर्ऋषिर्निगद अग्निवायुसूर्य्यचन्द्रेन्द्र-देवता उपनयनाज्यहोमे विनियोगः । अग्ने व्रतपते व्रतं सावित्रमष्टवर्षमष्टमासमष्टदिनं वा चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यासमिदमहमनृतात्सत्यमुपैमि स्वाहा ॥ १ ॥ एवमग्रिमेषु मन्त्रेषु व्रतनाम व्रतपरिमाणपदमूह्यम् । अग्नये व्रतपतय इदं न मम । वायो व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यासमिदमहमनृतात्सत्यमुपैमि स्वाहा ॥ २ ॥ वायवे व्रतपतय इदं न मम । सूर्य व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यासमिदमहमनृतात्सत्यमुपैमि स्वाहा ॥ ३ ॥ सूर्य्याय व्रतपतय इदं न मम । चन्द्र व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यासमिदमहमनृतात्सत्यमुपैमि स्वाहा ॥ ४ ॥ चन्द्राय व्रतपतय इदं न मम । व्रतानां व्रतपते व्रतं चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यासमिदमहमनृतात्सत्यमुपैमि स्वाहा ॥ ५ ॥ इन्द्राय व्रतपतय इदं न मम । एवं हुत्वाऽग्नेः पश्चादुदगग्रेषु दर्भेष्वाचार्यः प्राङ्मुखोऽवतिष्ठते । ततोऽग्न्याचार्य्ययोर्मध्ये प्रसारिताञ्जलिर्माणवक आचार्य्याभिमुख उदगग्रेषु दर्भेष्ववतिष्ठते, माणवकस्य दक्षिणदिश्युदङ्मुखोऽवस्थितोऽधीतवेदो ब्राह्मणो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



माणवकस्याञ्जलिमाचार्य्याञ्जलिं चोदकेनापूरयति । आचार्य्याञ्जलेरुपरि माणवकाञ्जलिर्भवति । ततो माणवकं पश्यन्नाचार्य्य आगन्त्रेतिमन्त्रद्वयं जपति । आगन्त्रेतिमन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता, अग्निष्ट इति प्रजापतिः पङ्क्तिरग्न्यादयो देवता, माणवकप्रेक्षणे विनियोगः । आगन्त्रा समगन्महि प्रसुमर्त्यं युयोत न । अरिष्टास्सञ्चरेमहि स्वस्ति चरतादयम् ॥ १ ॥ अग्निष्टे हस्तमग्रहीत्सविता हस्तमग्रहीदर्य्यमा हस्तमग्रहीन्मित्रस्त्वमसि कर्मणाऽग्निराचार्य्यस्तव ॥ २ ॥ ततो ब्रह्मचर्य्यमागामिति वाचयति । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुराचार्य्यो देवता माणवकवाचने विनियोगः । ब्रह्मचर्य्यमागामुप मा नयस्व ॥ को नामाऽसीति माणवकस्य नामधेयं पृच्छत्याचार्य्यः । ततो देवताश्रयं वा, नक्षत्राश्रयं वा, गोत्राश्रयं वा, ऽभिवादनीयं नाम परिकल्प्या मुकशर्म्माऽस्मीति माणवकं वाचयेत् । शिवो विष्णुरित्यादिदेवतानाम । आश्वयुजः, आपभरणः, कृत्तिकः, रौहिण, इत्यादि जातार्थतद्धितान्तं नक्षत्रनाम परिकल्पयेत् । 'सूक्तवाके' प्रसिद्धमेतत् । तत्र कपर्द्दिस्वाम्यपि विशेषमाह । "रोरेवमृज्येचिषु वृद्धिरादौ ष्टात् फाच्च वान्त्यश्रवणाश्वयुक्तु । शेषेषु नाम्नोः कपरस्स्वरोऽन्त्यस्स्वाधोरदीर्घस्सविसर्ग इष्टः" ॥ १ ॥ गोत्रनाम- वात्सः, और्वः, गार्ग्यः, इत्याद्यूह्यम् । तत आचार्य्य उदकाञ्जलिं त्यक्त्वा दक्षिणहस्तेन माणवकस्य दक्षिणहस्तं साङ्गुष्ठं परिगृह्णाति देवस्य ते सवितुरितिमन्त्रेण । अत्र

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



माणवकस्याप्यञ्जल्युत्सर्गः । मन्त्रेऽसावित्यस्य स्थाने माणवकस्य सम्बोधनान्तं नामोच्चारयेत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुस्सविता देवता हस्तग्रहणे विनियोगः । देवस्य ते सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णाम्यसौ ॥ अथाचार्य्यस्तस्मिन्नेव देशे प्रत्यङ्मुखमवस्थितं माणवकं प्रादक्षिण्येन प्राङ्मुखं करोति । सूर्य्यस्यावृतमन्वावर्त्तस्वासाविति । अत्राप्यसावित्यस्य स्थाने पूर्ववन्नामग्रहणम् । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुस्सूर्य्यो देवता माणवकस्यावर्त्तने विनियोगः । सूर्यस्यावृतमन्वावर्त्तस्वासौ ॥ अथाचार्य्यस्स्वदक्षिणहस्तेन माणवकस्य दक्षिणांसं तूष्णीं स्पृष्ट्वा वस्त्रादिनाऽनाच्छादितां माणवकस्य नाभिं प्रणानां ग्रन्थिरितिमन्त्रेणाभिमृशति ॥ अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुरन्तको देवता नाभिस्पर्शने विनियोगः । प्राणानां ग्रन्थिरसि माविस्रंसोऽन्तक इदं ते परिददाम्यमुम् ॥ अमुमित्यस्य स्थाने द्वितीयान्तं माणवकस्य नामोच्चार्य्यम् । ततो नाभिदेशादुपरि जठरदेशे हस्तमवस्थाप्याहुर इतिमन्त्रं जपति । अस्य प्रजाप्रजापतिर्ऋषिर्यजुर्वायुर्देवता जठराभिमर्शने विनियोगः । अहुर इदं ते परिददाम्यमुम् ॥ १ ॥ अमुमित्यत्र द्वितीयान्तं नाम । अथ हृदयदेशमभिमृश्य कृशन इतिमन्त्रं पठेत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुरग्निर्देवता हृदयस्पर्शने विनियोगः । कृशन इदं ते परिददाम्यमुम् ॥ २ ॥ अत्रापि द्वितीयान्तं नाम । अथाचार्य्यो दक्षिणहस्तेन माणवकस्य दक्षिणांसं प्रजापतये-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



त्वेत्यभिमृशति । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः प्रजापतिर्देवता दक्षिणस्कन्धस्पर्शने विनियोगः । प्रजापतये त्वा परिददाम्यसौ ॥ अत्रासावित्यस्य स्थाने सम्बोधनान्तं नाम । अथाचार्य्यो वामहस्तेन माणवकस्य वामांसमभिमृशति मन्त्रेण । मन्त्रस्य प्रजापतिर्ऋषिर्यजुस्सविता देवता वामांसस्पर्शने विनियोगः । देवाय त्वा सवित्रे परिददाम्यसौ ॥ अत्रापि सम्बोधनान्तं नाम । अथ गृहीतांसद्वयं माणवकमाचार्य्यस्समादिशति ब्रह्मचार्य्यसीतिमन्त्रेण । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुरग्निर्देवताऽऽदेशने विनियोगः । ब्रह्मचार्य्यस्यसौ ॥ अत्रापि सम्बोधनान्तं नाम ग्रहणम् । बाढमोमिति वा ब्रूयान्माणवकः प्रत्यादेशम् । आचार्य्येणान्येप्यादेशा बोधयितव्याः । तद्यथा । समिधमाधेहि । माणवको बाढमिति प्रतिवदेत् । अपोऽशान । बाढम् । कर्म कुरु । बाढम् । मा दिवा स्वाप्सीः । बाढम् । अग्नेरुत्तरतो गत्वाऽऽचार्य्यः प्राङ्मुख उपविशत्युदगग्रेषु दर्भेषु । अथाग्नेरुत्तरत उदगग्रेषु दर्भेष्वाचार्य्याभिमुखो दक्षिणजानु भूमौ निधाय माणवकः प्रत्यङ्मुख उपविशति । अथाचार्य्यो माणवकमियं दुरुक्तात् ऋतस्य गोप्त्रीतिमन्त्रद्वयं वाचयन् कटिप्रदेशे प्रादक्षिण्येन मुञ्जमेखलां त्रिवारमावेष्ट्य प्रवरसंख्यया ग्रन्थिं करोति । मन्त्रद्वयस्य प्रजापतिर्ऋषिरुष्णिक्छन्दोऽग्निर्मेखला वा देवता मेखलापरिधापने विनियोगः ॥ इयं दुरुक्तात्परिबाधमाना वर्णं पवित्रं पुनती म आगात् । प्राणापानाभ्यां बलमाहरंती स्वसा देवी सुभगा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मेखलेयम् ॥ १ ॥ ऋतस्य गोप्त्री तपसः परस्वी घ्नती रक्षस्सहमाना अरातीः । सा मा समन्तमभिपर्य्येहि भद्रे धर्त्तारस्ते मेखले मारिषाम ॥ २ ॥ अथाचार्य्यसमीपं गत्वा माणवको नमस्काराञ्जलिम्बध्वाऽऽचार्यं पृच्छति । अधीहि भोः सावित्रीं मे भवाननुब्रवीतु । एवं पृष्टवते माणवकाय सावित्रीं त्रिवारमनुब्रवीति । प्रथमं पादंपादं कृत्वा तत ऋचोऽर्द्धमर्द्धं कृत्वा ततस्सर्वामृचमनुब्रूयात् । पृथक्पृथक् महाव्याहृतीश्चोङ्कारान्ता वदेत् । तद्यथा । सावित्र्या विश्वामित्रर्षिर्गायत्री छन्दस्सविता देवतोपदेशे विनियोगः । तत्सवितुर्वरेण्यं । भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । अयं पच्छः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । अयमर्द्धर्चशः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् । अयमृक्शः पाठः । व्याहृतीनाम त्रिभृगुकुत्सा, विश्वामित्रजमदग्निभरद्वाजा वा, ऋषयो गायत्र्युष्णिगनुष्टुप्छन्दांस्यग्निवायुसूर्या देवता उपदेशे विनियोगः ॥ प्रणवस्य ब्रह्मा ऋषिः परमात्मा देवता दैवीगायत्री छन्द उपदेशे विनियोगः । भूः ओं । भुवः ओं । स्वः ओं । ततो माणवकाय पलाशाद्यन्यतमं दण्डं यथावर्णं प्रयच्छन् सुश्रव इति वाचयति । अस्य प्रजापतिर्ऋषिः पङ्क्तिश्छन्दो दण्डो देवता दण्डग्रहणे विनियोगः । सुश्रवः सुश्रवसं मा कुरु यथा त्वꣳसुश्रवस्सुश्रवा देवेष्वेवमहꣳसुश्रवः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सुश्रवा ब्राह्मणेषु भूयासम् ॥ १ ॥ ततः पूर्वासादिताजिनधारणम् । "तस्य मन्त्रकाण्डे मन्त्रपाठाभावत्तैत्तिरीयशाखागतमन्त्रो ग्राह्य" इति भट्टनारायणोपाध्यायप्रभृतयः । "तूष्णीमजिनधारणं स्वशाखायां मन्त्रपाठाभावादिति" केचिद्विद्वांसः । अजिनधारणमन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो ऽजिनं देवताऽजिनधारणे विनियोगः । मित्रस्य चक्षुर्धरुणं बलीयस्तेजो यशस्वी स्थविरं समिद्धं । अनाहनस्यं वसनं जरिष्णु परीदं वाज्यजिनं दधेऽहम् । इत्येतं मन्त्रं माणवकं वाचयन् धारयति ॥ अथ ब्रह्मचारिणं द्वादश प्रैषानुक्त्वा तदर्थञ्च बोधयेत् । तद्यथा । आचार्य्याधीनो भव । अन्यत्राधर्म्माचरणात् । माणवको बाढमिति वदेत् ॥ १ ॥ क्रोधानृते वर्जय । बाढम् ॥ २ ॥ मैथुनं वर्ज्जय । बाढम् ॥ ३ ॥ उपरिशय्यां वर्ज्जय । बाढम् ॥ ४ ॥ कौशीलवगन्धाञ्जनानि वर्ज्जय । बाढम् ॥ ५ ॥ स्नानं वर्ज्जय । बाढम् ॥ ६ ॥ अवलेखनदन्तप्रक्षालनपादप्रक्षालनानि वर्ज्जय । बाढम् ॥ ७ ॥ क्षुरकृत्यं वर्ज्जय । बाढम् ॥ ८ ॥ मधुमांसे वर्ज्जय । बाढम् ॥ ९ ॥ गोयुक्तवाहनारोहणं वर्ज्जय । बाढम् ॥ १० ॥ अन्तर्ग्राम उपानहोर्धारणं वर्ज्जय । बाढम् ॥ ११ ॥ स्वयमिन्द्रियमोचनं न कर्त्तव्यम् । बाढम् ॥ १२ ॥ अथ साधारणधर्म्मोपदेशः । मेखलाधारणभैक्ष्यचर्य्यदण्डधारणसमिदाधानोदकोपस्पर्शनप्रातरभिवादाः कर्त्तव्याः । बाढम् । ततो माणवकस्तूष्णीमादित्यमुपस्थायाग्निं प्रदक्षिणीकृत्य प्रथमं मातरं ततो भगिन्यादीस्सन्निहि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ताञ्च भिक्षेत । तद्यथा । भवति भिक्षां देहीति ब्राह्मणस्य । भिक्षां भवति देहीति क्षत्रियस्य । भिक्षां देहि भवतीति वैश्यस्य ॥ अग्नेः पश्चात्प्राङ्मुखस्तिष्ठन्नुपविश्य वा भैक्ष्यमाचरेत् ॥ अथ ब्रह्मचारीदं भैक्ष्यं भो भगवन् गृहाणेत्याचार्य्याय निवेद्याचार्यदत्तं स्वयं प्रतिगृह्णीयात् । तत आचार्य्यो व्याहृतिचतुष्टयहोमादितन्त्रं समापयेत् । ततोऽहश्शेषं ब्रह्मचारी वाग्यतस्तिष्ठेत् । अथोपनीतस्य "माध्यान्हिकसन्ध्योपक्रममाह 'जैमिनिः' । यावद्ब्रह्मोपदेशस्तु तावत्सन्ध्यादिकं न च । ततो मध्यान्हसन्ध्यादि सर्वं कर्म समाचरेत्" । आदिसर्वशब्दाभ्यां ब्रह्मयज्ञादिकमुच्यते । तत्र विशेषमाह स एव । "अनुपाकृतवेदस्य ब्रह्मयज्ञः कथं ? भवेत् । वेदस्थाने तु गायत्री गद्यतेऽन्यत्समं भवेत्" । येषां सायं सन्ध्योपक्रमस्तेषां परेऽन्हि ब्रह्मयज्ञारम्भः ॥ इत्युपनयनप्रयोगः ॥

अथ सायंसन्ध्योपासनं कृत्वाऽग्नये समिधमाहार्षमिति समिदाधानं कुर्यात् । तस्य प्रयोगः । आचम्य प्राणानायम्य सायं समिधमाधास्ये इति सङ्कल्प्योपलिप्ते स्थण्डिले उल्लिख्याभ्युक्ष्य, प्रतिष्ठाप्याग्निं, तूष्णीं समिधमाधाय, परिसमूह्य, त्रिरुदकाञ्जलिं दत्वा, देव सवितरिति पर्य्युक्ष्य, तूष्णीं प्रादेशमितां समिधमाधायाग्नये समिधमाहार्षमिति समिधमादध्यात् । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुरग्निर्देवता समिदाधाने विनियोगः । अग्नये समिधमाहार्षं बृहते जातवेदसे यथा त्वमग्ने समिधा समिध्यस्येवमहमायुषा मेधया

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वर्च्चसा प्रजया पशुभिर्ब्रह्मवर्च्चसेन धनेनान्नाद्येन समेधिषीय स्वाहा । अग्नय इदं न मम । पूर्ववत्तूष्णीं समिधमाधायानुपर्य्युक्षणमुदकाञ्जलित्रयसेचनमुपस्थानादि चमसनिनयनं वामदेव्यगानञ्च कुर्य्यात् । एवमत ऊर्द्ध्वमहरहस्सायंप्रातस्समिदाधानमासमावर्त्तनात्कर्त्तव्यम् । त्रिरात्रं क्षारलवणवर्ज्जितं भुञ्जीत । इति समिदाधानप्रयोगः ॥

अथ सावित्रचरुप्रयोगः । स च सावित्रव्रतान्ते कार्य्यः । तदङ्गमाभ्युदयिकश्राद्धं कृत्वा विधिवदग्निं प्रतिष्ठाप्य प्रकृतिस्थालीपाकवदाज्यभागान्तं कुर्य्यात् । चरुनिर्वापकाले सवित्रे त्वा जुष्टं निर्वपामीति विशेषः । सवित्रे स्वाहा । सवित्र इदं न मम । इति चरुं जुहोति । ततोऽग्ने व्रतपते व्रतमचारिषमित्यादिभिः पञ्चाज्याहुतयः । ऋष्यादय उपनयने उक्ताः । अग्ने व्रतपते व्रतं सावित्रमष्टवर्षमष्टमासमष्टदिनं वा अचारिषं तत्ते प्रब्रवीमि तदशकं तेनारात्समिदमहमनृतात् सत्यमुपागां स्वाहा ॥ अग्रिममन्त्रेष्वप्येवमूहः । वायो व्रतपते व्रतमचारिषं तत्ते प्रब्रवीमि । सूर्य व्रतपते व्रतमचारिषम् । चन्द्र व्रतपते व्रतमचारिषम् । व्रतानां व्रतपते व्रतमचारिषमिति । चतुर्षु मन्त्रेष्ववशिष्टः प्रथममन्त्रवदोढव्यः । तन्त्रशेषं समापयेत् । ब्रह्मणे गौर्द्दक्षिणा । आचार्य्यायेति केचित् । "उपनयनकर्मणश्चतुर्थेऽहनि सावित्रचरुं कुर्य्यादिति" भवदेवभट्टः । "त्रिरात्रव्रतान्ते सावित्रचरुः कर्त्तव्य" इति भट्टनारायणोऽपीममर्थमनुजानाति । "उपनयनदिने माणवकाय भैक्षदानानन्तरं सावित्रचरुरिति" रघुनन्दनः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ऊर्ह्वे गृह्यासङ्ग्रहः । "सावित्रमष्टभिर्व्वर्षैः कार्यं मासैर्द्दिनैश्च वा" ॥ इति सावित्रचरुप्रयोगः ॥

अथ गोदानव्रतप्रयोग उच्यते ॥ "जन्मकालात्षोडशे वर्षे गोदानाख्यव्रतं ब्राह्मणस्य" । तच्चेदन्तात्पर्य्यम् । 'गर्भाष्टमे ब्राह्मणस्योपनयनम्, गर्भषोडशे वर्षे गोदान'मित्युक्त्या मध्ये व्रतानुष्ठानं प्रतीयते । एवं क्षत्रियस्य द्वाविंशे गोदानाख्यव्रतं, वैश्यस्य चतुर्विंशे गोदानाख्यव्रतं, मध्ये व्रतानुष्ठानम् । ब्राह्मणाननुज्ञाप्य गणेशं सम्पूज्य गोदानव्रताङ्गं नान्दीमुखश्राद्धं करिष्ये इति सङ्कल्प्य तत्कृत्वा, गोदानव्रताङ्गकेशान्तकर्म्म करिष्ये इति सङ्कल्प्य चूडाकर्म्मवदग्निप्रतिष्ठापनादिकेशवपनान्तं कर्म्म ब्रह्मचारी कुर्यात् । तत्वाचार्येण । नात्र व्रीह्यादीनामासादनम् । सर्वेषामङ्गलोम्नां च वपनम् । गोमिथुनं दक्षिणा ब्राह्मणस्य, अश्वमिथुनं क्षत्रियस्य, अविमिथुनं वैश्यस्य । यथोक्तदक्षिणालाभे सर्वेषामपि गौर्द्दक्षिणाऽऽचार्याय देया । अथ केशप्रतिग्राहाय नापितायाजो देयः ॥ इति केशान्तकरणप्रयोगः ॥

अथ गोदानव्रताङ्गोपनयनं कर्त्तव्यम् । तस्य प्रयोग उपनयनवत् । अत्र विशेषः । होमश्चोहेन । अग्ने व्रतपते व्रतं गोदानं सांवत्सरिकं चरिष्यामीत्यादि । अहतवस्त्रपरिधारणमलङ्करणं च वर्ज्जयेत् । न सावित्र्युपदेशः । पूर्व्वधृतयज्ञोपवीतमेखलादण्डाजिनानां त्यागः । पुनर्द्धारणं च । अथादेशा द्वादश आचार्येण कर्त्तव्याः । अथ दण्डं प्रयच्छन्नाचार्य्य उपनयनोक्तानादेशान्वदेत् । गोदानव्रतान्ते आग्नेयैन्द्रपव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मानपर्वणां श्रावणम् । तदन्ते ऐन्द्रश्चरुस्सावित्रचरुवत्कर्त्तव्यः । निर्वापकाले इन्द्राय त्वा जुष्टं निर्वपामि । आज्यभागान्ते ऋचं साम यजामहे—इत्येतयर्चा, सदसस्पतिमद्भुतमितिमन्त्रेण वोभाभ्यां वा चरुहोमं कुर्यात् । ऋचं साम यजामहे याभ्यां कर्माणि कृण्वते । विते सदसि राजतो यज्ञं देवेषु वक्षतः स्वाहा । सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यं । सनिं मेधामयासिषं स्वाहा । इन्द्रायेदं न मम । अग्ने व्रतपत इति पञ्चाज्याहुतयः । ऊहस्तु सावित्रचरौ लिखितः । यथा गोदानिकं सांवत्सरिकमेतावत्कालिकं वा तत्ते प्रब्रवीमीति । ततस्स्विष्टकृद्व्याहृतिहोमादि । ब्रह्मणे पूर्णपात्रं दक्षिणा । आचार्यायाजं मेषं गाश्च पर्वदक्षिणां दद्यात् । आग्नेये पर्वणि आवितेऽजदक्षिणा । ऐन्द्रपर्वणि आविते मेषदक्षिणा । पवमाने पर्वणि आविते गौर्दक्षिणा ॥ इति गोदानव्रतप्रयोगः ॥

अथ व्रातिकव्रतप्रयोगः ॥ व्रातिकव्रताङ्गं पुनर्नान्दीमुखश्राद्धं, व्रातिकव्रताङ्गं पुनरुपनयनम् । व्रातिकमेतावत्कालिकमित्यूहं कृत्वा पञ्चाज्यहोमा इति विशेषः । गोदानव्रतान्ते आवितानामुपाकर्मारभ्याध्ययनम् । व्रतान्त आरण्यकगेयगानस्वाध्यायपञ्चकस्याज्यदोहादिसामत्रयवर्ज्जितस्य श्रावणं, तदन्ते ऐन्द्रश्चरुः । आज्यहोमे व्रातिकं सांवत्सरिकमित्यूहयुक्ताः पठितव्याः । आचार्यदक्षिणा ॥ इति व्रातिकव्रतप्रयोगः ॥

अथादित्यव्रतप्रयोगः ॥ तदङ्गं नान्दीमुखश्राद्धम् । आदित्यव्रताङ्गं पुनरुपनयनम् । आदित्यमेतावत्कालिक-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मित्याद्यूहयुक्तमन्त्रैः पञ्चाज्यहोमाः। आदित्यव्रतिन एकवस्त्रधारणम्। छत्रगृहाभ्यामन्यच्च क्रचादिना सूर्य्यस्य व्यवधाननिषेधः। जानुदघ्नजलाधिके अवतरणनिषेधः। गुर्वाज्ञया न दोषः। व्रातिकव्रतान्ते अतारण्यकाध्ययनम्। व्रतान्ते महानाम्निभिन्नानां शुक्रियाणां श्रावणम्। व्रतान्ते ऐन्द्रश्चरुः। ऐन्द्रं चरुं हुत्वा व्रतमात्यमेतावत्कालिकमित्याद्यूहवद्भिः पञ्चाज्यहोमाः। आचार्याय गोदानम्। ब्रह्मणे पूर्णपात्रमन्यत्सर्वं पूर्ववत्॥ इत्यादित्यव्रतप्रयोगः॥

अथौपनिषद्व्रतप्रयोगः। तदङ्गं नान्दीश्राद्धं तदङ्गमुपनयनं च पूर्ववत्। व्रतमौपनिषदमेतावत्कालिकमित्यूहवद्भिः पञ्चाज्यहोमाः। आदित्यव्रतान्ते श्रुतानां शुक्रियाणामध्ययनम्। व्रतान्ते उपनिषदां ब्राह्मणानां रहस्यस्य च श्रावणम्। तदन्ते ऐन्द्रश्चरुः। चरुहोमान्ते व्रतमौपनिषदमेतावत्कालिकमित्याद्यूहमुक्त्वा पञ्चाज्यहोमाः। आचार्याय गोदानं ब्रह्मणे पूर्णपात्रमन्यत्सर्वं पूर्ववत्॥ इत्यौपनिषद्व्रतप्रयोगः॥

अथ ज्येष्ठसामिकव्रतप्रयोगः॥ ज्येष्ठसामिकव्रताङ्गं नान्दीमुखश्राद्धं तदर्थमुपनयनम्। अग्ने व्रतपते व्रतं ज्येष्ठसामिकमेतावत्कालिकं चरिष्यामीत्यूहं कृत्वा पञ्चाज्यहोमाः। पूर्वव्रतान्ते श्रुतोपनिषद्ब्राह्मणरहस्याध्ययनम्। व्रतान्ते आज्यदोहानां साम्नां श्रावणम्। व्रतान्ते ऐन्द्रश्चरुः। चरुहोमान्ते अग्ने व्रतपते व्रतं ज्येष्ठसामिकमेतावत्कालिकमचारिषमित्यादिविशेषमुक्त्वा पञ्चाज्यहोमाः। आचार्य्याय गोदानं ब्रह्मणे पूर्णपात्रम्॥ इति ज्येष्ठसामिकव्रतप्रयोगः॥



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



गोदानिकव्रातिकादित्यव्रतौपनिषदज्येष्ठसामिकव्रतानां पृथक्पृथगेकैकसंवत्सरेऽनुष्ठानम् । देशकालशक्तिवयोवस्थाविशेषैर्यथासम्भवमनुष्ठानं वा कुर्यात् । आदित्यव्रतानुष्ठानात्परमध्ययनक्रमान्महानाम्निकव्रतानुष्ठानं कर्त्तव्यम् । तत औपनिषदज्येष्ठसामिकव्रतयोरनुष्ठानम् । एवं स्थितेऽपि कालादीनां साम्यान्महानाम्निकभिन्नानां गोदानिकादिव्रतानां प्रयोगमुक्त्वा महानाम्निकप्रयोगः पृथगुपदिष्टकालक्रियावैलक्षण्यादधुनोच्यते । सूत्रकारस्य लाघवात्क्रमत्यागः । तस्य द्वादशसंवत्सरा, नव षट् त्रयो वा संवत्सरा, अनुष्ठानकालः । एते चत्वारः पक्षाः पुरुषशक्तिवयोवस्थादिविशेषापेक्षयोक्ताः । "संवत्सरमात्रं वा महानाम्निकव्रतमि"त्येक आचार्य्या मन्यन्ते । तस्य पित्रादिभिस्त्रिभिर्यथोक्तव्रतचर्य्यापूर्वकं महानाम्नीनामध्ययनं कृतं स्यात्तदा पुत्रस्य सांवत्सरिकमहानाम्निकव्रतेऽधिकारः । अन्येषां तु द्वादशवार्षिकादौ । अयमर्थो "रौरुकिब्राह्मणे"ऽपि स्पष्टः ॥ अथ महानाम्निकव्रताङ्गं नान्दीमुखश्राद्धं करिष्ये । तदर्थमुपनयनम् । अग्ने व्रतपते महानाम्निकं द्वादशवार्षिकं वा, नववार्षिकं षड्वार्षिकं वा, त्रैवार्षिकं वा, सांवत्सरिकं चरिष्यामीत्यूहयुक्तैः पञ्चभिर्मन्त्रैः पञ्चाज्याहुतीः कुर्यादन्यत्पूर्ववत् । महानाम्निकव्रतिनः पूर्वोक्तव्रतनियमातिरिक्तनियमा उच्यन्ते । त्रिकालं स्नानम् । सायम्प्रातः समिदाधानात्पूर्वं भोजननिषेधः । कृष्णवस्त्रधारणम् । कृष्णवस्तुभक्षणम् । आचार्य्याधीनता । स्मृत्यन्तरोपदिष्टस्य पथिदानस्य निषेधः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तपस्विना दिवा सदा स्थितिर्नोपवेशनम् । भिक्षाटने परिक्रमणम् । सन्ध्योपासनार्थमुपवेशनम् । रात्रावुपवेशनम्, न शयनम् । बहिर्गतस्य पर्ज्जन्ये वर्षति मनुष्यैराच्छादितगृहादिप्रवेशनिषेधः । वर्षप्रारम्भेऽपि गृहादिप्रवेशननिषेधः । यदा पर्ज्जन्यो वर्षति तदा वृष्ट्यपगमपर्य्यन्तमापश्शक्वर्य्य इतिमन्त्रं पुनःपुनः पठेत् । यदायदा विद्युद्विद्योतते तदातदैवं रूपाः खलु शक्वर्यो भवन्तीतिमन्त्रं पठेत् । यदायदा मेघो गर्ज्जति तदातदा मह्या महान् घोष इतिमन्त्रं पठेत् । न नदीमतिक्रामेत् । यद्यतिक्रामेत्स्नात्वाऽतिक्रामेत् । अतिक्रम्य वा स्नानं कुर्यात् । नौकारोहणं न कुर्यात् । नावारोहणाभावे केनापि निमित्तेन प्राणसंशये स्नात्वा नौकारोहणं कुर्यात् । पारं तीर्त्वा वा स्नायात् । उदकसम्बन्धिनियमानां त्रिषवणस्नानादीनामवश्यानुष्ठानम् । महानाम्नीनामुदकाधीनत्वादुदकदातृत्वाद्वा । इत्थं व्रतमनुष्ठितवतः परमेश्वरात्सर्वकामावाप्तिरिच्छानुसारेण महती वृष्टिर्वा फलम् । केषाञ्चिद्धर्म्माणामननुष्ठानमनुजानाति परमकृपालुराचार्य्यः । कृष्णवस्त्रधारणम् । दिवोर्द्धस्थितिः । निशायामुपवेशनम् । शयनाभावश्च । पथिप्रदानं । कृष्णपदार्थभक्षणम् । एतेषां शक्त्यभावे सति नानुष्ठानम् । त्रेधाविभक्तव्रतकालस्य प्रथमभागान्ते एकस्यास्तोत्रियायाश्श्रावणम् । मध्यमभागान्ते द्वितीयस्तोत्रियायाश्श्रावणभ् । तृतीयभागान्ते तृतीयस्याः स्तोत्रियायाश्श्रावणम् । सर्वव्रतान्ते वा सर्वासां महानाम्नीनां स्तोत्रियाणां युगपदेव श्रावणम् । तासामध्ययनप्रयोग उच्यते ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अरण्ये गत्वोदकपूरितकांस्यपात्रे सर्वौषधीः प्रक्षिपेत् । व्रीहि-शालि-मुद्ग-गोधूम-तिल-यव-सर्षपाः सर्वौषधयः । तज्जले हस्तद्वयं ब्रह्मचारिणस्स्थापयित्वा प्रादक्षिण्येनाहतवस्त्रेण नेत्रपिधानं कुर्यात् । एवं निमग्नहस्ताय पिहितनेत्राय त्रिरात्रमुपोषिताय व्रतान्ते महानाम्नीश्श्रावयेत् । अथवा नेत्रपिधानान्ते श्रावयेत् । तत्र त्रिरात्रोपवासः । पिहितनेत्रो जले निमग्नहस्तो वाग्यतो ऽरण्ये निवसन् त्रिरात्रं न भुञ्जीत । अशक्तावहोरात्रं वा । अध्यापनान्ते उपवासः । उपवासान्ते वाऽध्यापनम् । अथवा दिवाऽरण्ये तिष्ठेद्रात्रौ ग्रामे । त्रिरात्रव्रतान्ते आचार्यो वनं गत्वा पूर्वोक्तलक्षणं स्थण्डिलं विधाय पञ्च भूसंस्कारान्कृत्वाऽग्निं प्रतिष्ठाप्याज्यतन्त्रेण व्याहृतिभिर्हुत्वाऽग्न्यादीन्प्रदर्शयेन्मन्त्रेण ब्रह्मचारिणम् । प्रतिद्रव्यं मन्त्रावृत्तिः । अग्निराज्यमादित्यो ब्राह्मणोऽनड्वानन्नं जलं दधि । एतेऽग्न्यादयः । एतान्पृथक्पृथक् प्रदर्शयेत् । तत्र मन्त्रः । स्वरभिव्यख्यं ज्योतिरभिव्यख्यम् । अत्र वाग्विसर्गादिः । त्रिवारमग्न्यादीनामवेक्षणम् । ततस्तन्त्रसमाप्तिर्वामदेव्यगानम् । गुरोरभिवादनम् । गुरो, अनड्वाहं कांस्यपात्रं वासो गां च ते ददामि । पृथक्पृथक् स्तोत्रियाध्यापनपक्षे प्रथमस्तोत्रियाया वृषभः कांस्यपात्रञ्च दक्षिणा । द्वितीयाया वस्त्रम् । तृतीयाया गौः । अशक्तौ यथाशक्ति दक्षिणादानम् । व्रतान्ते ऐन्द्रश्चरुः । अग्ने व्रतपते व्रतं महानाम्निकमेतावत्कालिकमचारिषमित्यादिविशेषयुक्तैर्मन्त्रैः पञ्चाज्याहुतयः । ततोऽरण्याद्गृहमागत्य सर्वैरन्तेवासिभिः सहाचार्यं भोज-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



येत् । अन्येषामपि भिन्नशाखिनां भिन्नगुरूणां ब्रह्मचारिणां चान्नदानमावश्यकम् ॥ इति महानाम्निकव्रतप्रयोगः ॥

ज्येष्ठ साम्नामध्यापनम्महानाम्न्यध्यापनवदरण्ये । तदुक्तम् । ज्येष्ठसामव्रतिनो यावज्जीवमनुष्ठेयानि व्रतान्युच्यन्ते । न शूद्रामुद्वहेत् । न पक्षिमांसमश्नीयात् । धान्यमध्येएकं धान्यं वर्ज्जयेत् । गन्तव्यदेशानामेकं देशं वर्ज्जयेत् । कार्प्पासक्षौमशाणाविकानां मध्ये एकं वर्ज्जयेत् । उद्धृतोदकेन शौचं कुर्य्यात् । मृन्मयपात्रे भोजनं न कुर्य्यात् । मृन्मयेन न पिबेत् । "एतत्सर्वं नियमजातं ज्येष्ठसामिकव्रतोपनयनप्रभृतीत्येके" । "ज्येष्ठसामाध्यापनप्रभृतीत्यपरं" । औपनिकव्रतप्रयोगो गोभिलानुक्तत्वादुपेक्षितः ॥

अथोपाकर्म । पूर्वं गोदानादिव्रतान्तेषु श्रुतानां वेदभागानामुपाकर्मपूर्वकाध्ययननियमायोपाकर्मविधिमधुनोपदिशति । भाद्रपदशुक्ले हस्तनक्षत्रे आचार्य्यशिष्यैस्सह स्नात्वा कृतनित्यक्रियो, मृत्तिकास्नानोपयुक्तकुशगोमयादिकमृषिपूजोपयुक्तकुशगन्धपुष्पादिपूजासामग्रीञ्च समादाय, ग्रामात्प्राङ्मुख उदङ्मुखो वा निष्क्रम्य, नाभिदघ्ना यत्रक्वचन स्थिता अपः प्राप्याध्यायोपाकर्माङ्गस्नानमहं करिष्ये इति सङ्कल्प्य, मृत्तिकास्नानविधिना स्नात्वा, स्नानाङ्गतर्प्पणं विधाय, छन्दांस्यृषीनाचार्य्यांश्च तर्पयेत् । अत्र सूत्रे चशब्दाद्ब्रह्मादीनां तर्पणम्, ऋषीणां पूजनमभिषेकश्चाभिधीयते ॥ अथ प्रयोगः ॥ कुशपवित्रपाणिराचम्यप्राणानायम्य देशकालौ सङ्कीर्त्त्याधीतानां वेदानां यातयामत्वदोषनिवृत्तिपूर्वकाप्यायनार्थं, अध्येष्यमाणानां वेदानां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वीर्यवत्त्वसिद्ध्यर्थमध्यायोपाकर्माङ्गं ऋषिपूजनतर्पणादिकमहं करिष्ये इति सङ्कल्प्य, तीरे प्राक्प्रवणे उदक्प्रवणे वा यन्नहृच्चनिर्मिते पीठे प्रागग्रानुदगग्रान्वा कुशानास्तीर्य्य तेषु पञ्चाशत्कुशनिर्मितान्द्वादशचटून्संस्थापयेत् । ततः कलशोदकं प्रणवव्याहृतिभिर्गायत्र्या चाभिमन्त्र्य तेनोदकेन पीठपूजाद्रव्याण्यात्मानञ्च प्रोक्षयेत् । "अत्र केचिद्गौतमादिसामभिर्गौतमादीनामावाहनं कुर्वन्ति" तन्निर्मूलम् । गौतमादिसाम्नां गौतमाद्यृषिदृष्टत्वेऽपि गौतमादिप्रतिपादकत्वाभावाद्देवतान्तरप्रकाशकत्वात्तवग्रहादिमन्त्रवद्विनियोजकस्मृत्यभावाच्च । तस्मात्प्रणवव्याहृतिभिः पूजनमभिधीयते । ओं भूर्भुवस्स्वः गौतममावाहयामि ॥ १ ॥ एवं वक्ष्यमाणानामृषीणामावाहनं पृथक्पृथक् कुर्यात् । तद्यथा । ओं भूर्भुवस्स्वः भरद्वाजम् ॥ २ ॥ ओं भूर्भुवस्स्वः विश्वामित्रम् ॥ ३ ॥ ओं भूर्भुवस्स्वः जमदग्निम् ॥ ४ ॥ ओं भूर्भुवस्स्वः वशिष्ठम् ॥ ५ ॥ ओं भूर्भुवस्स्वः कश्यपम् ॥ ६ ॥ ओं भूर्भुवस्स्वः अत्रिम् ॥ ७ ॥ ओं भूर्भुवस्स्वः गौतमादिसप्तऋषयस्सुप्रतिष्ठा वरदा भवन्तु । इति कुशचटुषु क्रमेणावाहनं कृत्वा समष्ट्योपचारान् कुर्य्यात् । ओं भूर्भुवस्स्वर्गौतमादिभ्य आसनं समर्प्पयामि । एवमुत्तरेषूपचारेषु । पाद्यमर्घ्यमाचमनीयं मधुपर्कं पञ्चामृतस्नानं शुद्धोदकस्नानं वस्त्रं यज्ञोपवीतं चन्दनमक्षतान्पुष्पाणि धूपं दीपं नैवेद्यमन्यानप्युपचारान् यथासम्भवं कुर्यात् । ततो नाभिदघ्नोदकेनोपविष्टा देवतीर्थेन तत्तीर्थाग्रकुशैर्ऋषीनुच्चैरभिषिञ्चन्तस्तर्पयेयुः । आदौ समुदायेन तर्पणं । यथा । ओंकारो

For Private And Personal

महाव्याहृतयो गायत्री ब्रह्मा देवा वेदा ऋषयश्छ-
न्दांस्याचार्य्यास्तृप्यन्ताम् । इति त्रिः । ततः पृथक् ।
ओंकारस्तृप्यतु । भूर्भुवस्स्वः महाव्याहृतयस्तृप्यन्तु। तत्सवितु-
रितिमन्त्रान्ते गायत्री तृप्यतु । सोमं राजानमिति । सोमꣳ
राजानं वरुणमग्निमन्वारभामहे । आदित्यं विष्णुꣳ सूर्य्यं ब्र-
ह्माणञ्च बृहस्पतिम् । ब्रह्मा तृप्यतु । अग्न आयाहि दशत्यु-
पास्मा इत्यध्यायेन ऋगन्तैरद्भिश्चैवा सन्तर्प्ययेत्। अग्न आयाहि
वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि ॥ १ ॥
त्वमग्ने यज्ञानाꣳ होता विश्वेषाꣳ हितः । देवेभिर्म्मानुषे
जने ॥ २ ॥ अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य
यज्ञस्य सुक्रतुम् ॥ ३ ॥ अग्निर्वृत्राणि जंघनद्द्रविणस्युर्विपन्यया।
समिद्धः शुक्र आहुतः ॥ ४ ॥ प्रेष्ठं वो अतिथिꣳ स्तुषे मित्र-
मिव प्रियम् । अग्ने रथं न वेद्यम् ॥ ५ ॥ त्वं नो अग्ने
महोभिः पाहि विश्वस्या अरातेः । उत द्विषो मर्त्त्यस्य ॥ ६ ॥
एह्यूषु ब्रवाणि तेऽग्न इत्थेतरा गिरः । एभिर्वर्द्धास
इन्दुभिः ॥ ७ ॥ आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् ।
अग्ने त्वां कामये गिरा ॥ ८ ॥ त्वामग्ने पुष्करादध्यथर्वा
निरमन्थत । मूर्द्ध्नो विश्वस्य वाघतः ॥ ९ ॥ अग्ने विवस्वदा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



भरास्मभ्यमूतये महे । देवो ह्यसि नो दृशे ॥ १० ॥ वेदास्तृ-
प्यन्तु । एवमुपास्मै गायतेत्युत्तराध्यायेन देवास्तृप्यन्तु ।
उपास्मै गायता नरः पवमानायेन्दवे । अभि देवाꣳइयक्षते ।
अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः । देवं देवाय देवयु ।
स नः पवस्व शं गवे शं जनाय शमर्वते । शꣳराजन्नोषधीभ्यः ॥ १ ॥
दविद्युतत्या रुचा परिष्टोभन्त्या कृपा । सोमाः शुक्रा गवाशिरः ।
हिन्वानो हेतृभिर्हित आवाजं वाज्यक्रमीत् । सीदन्तो
वनुषो यथा । ऋधक्सोम स्वस्तये संजग्मानो दिवा कवे ।
पवस्व सूर्यो दृशे ॥ २ ॥ पवमानस्य ते कवे वाजिन्त्सर्गा
असृक्षत । अर्वन्तो न श्रवस्यवः । अच्छाकोशं मधुश्चुतमसृग्रं
वारे अव्यये । अवावशन्त धीतयः । अच्छासमुद्रमिन्दवोऽस्तं गावो
न धेनवः । अग्मन्नृतस्य योनिमा ॥ ३ ॥ अग्न आयाहि
वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि । तं त्वा
समिद्भिरङ्गिरो घृतेन वर्द्धयामसि । बृहच्छोचा यविष्ठ्य । स नः
पृथुश्रवाय्यमच्छादेव विवाससि । बृहदग्ने सुवीर्यं ॥ ४ ॥ आ
नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतं । मध्वा रजाꣳसि सुक्रतू ।
उरुशꣳसा नमोवृधा मन्हा दक्षस्य राजथः । द्राघिष्ठाभिः
शुचिव्रता । गृणाना जमदग्निना योनावृतस्य सीदतं ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



स्तानꣳसोममृताहधा ॥ ५ ॥ आयाहि सुषुमा हि त इन्द्र सोमं
पिबा इमं । एदं बर्हिः सदो मम । आ त्वा ब्रह्मयुजा हरी
वह तामिंद्र केशिना । उप ब्रह्माणि नः शृणु । ब्रह्माणस्त्वा
युजा वयꣳसोमपामिंद्र सोमिनः । सुतावन्तो हवामहे ॥ ६ ॥
इन्द्राग्नी आगतꣳसुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं
धियेषिता । इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः ।
अयापातमिमꣳसुतं । इन्द्रमग्निं कविच्छदा यज्ञस्य जूत्या
वृणे । ता सोमस्येह तृंपताम् ॥ ७ ॥ उच्चा ते जातमंधसो
दिविसद्भूम्याददे । उग्रꣳशर्म महिश्रवः । स न इन्द्राय
यज्यवे वरुणाय मरुद्भ्यः । वरिवोवित्परिस्रव । एना विश्वा-
न्यर्य आ द्युम्नानि मानुषाणां । सिषासंतो वनामहे ॥ ८ ॥
पुनानः सोमधारयापो वसानो अर्षति । आ रत्नधा
योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः । दुहान ऊधर्दिव्यं
मधु प्रियं प्रत्नꣳ सधस्थमासदत् । आपृच्छ्यं धरुणं वाज्यर्षसि
नृभिर्धौतो विचक्षणः ॥ ९ ॥ प्र तु द्रव परिकोशं निषीद नृभिः
पुनानो अभिवाजमर्ष । अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छाबर्हि
रशनाभिर्नयन्ति । स्वायुधः पवते देव इन्दुरशस्तिहा वृजना
रक्षमाणः । पिता देवानां जनिता सुदक्षो विष्टंभो दिवो धरुणः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पृथिव्याः । ऋषिर्विप्रः पुर एता जनानामृभुर्धीर उशना काव्येन । सचिद्विवेद निहितं यदासामपीच्य३ंगुह्यं नाम गोनाम ॥ १० ॥ अभि त्वा शूरनोनुमो दुग्धा इव धेनवः । ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ ११ ॥ न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते । अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ ११ ॥ कया नश्चित्र आभुवदूती सदावृधः सखा । कया शचिष्ठया वृता । कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृढाचिदारुजे वसु । अभीषुणः सखीनामविता जरितृणाम् । शतं भवास्यूतये ॥ १२ ॥ तं वोदस्ममृतीषहं वसोर्मन्दानमन्धसः । अभिवत्सन्न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे । द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसं । क्षुमन्तं वाजं शतिनं सहस्रिणं मक्षू गोमन्तमीमहे ॥ १३ ॥ तरोभिर्वो विदद्वसुमिन्द्रं सबाध ऊतये । बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणं । न यं दुध्रा वरन्ते न स्थिरा मुरो मदेषु शिप्रमन्धसः । य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यं ॥ १४ ॥ स्वादिष्ठया मदिष्ठया पवस्व सोमधारया । इन्द्राय पातवे सुतः । रक्षोहा विश्वचर्षणिरभियोनिमयोहते ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



द्रोणे सधस्थमासदत् । वरिवो धातमो भुवो मꣳहिष्ठो वृत्रहं-
तमः । पर्षिराधो मघोनाम् ॥ १५ ॥ पवस्व मधुमत्तम इन्द्राय
सोमक्रतुवित्तमो मदः । महि द्युक्षतमो मदः । यस्य ते पीत्वा
वृषभो वृषायतेऽस्य पीत्वा स्वर्विदः । स सुप्रकेतो अभ्यक्रमीदि-
षोऽच्छावाजं नैतशः ॥ १६ ॥ इन्द्रमच्छसुता इमे वृषणं जन्तु
हरयः । श्रुष्टे जातास इन्दवः स्वर्विदः । अयं भराय
सानसिरिन्द्राय पवते सुतः । सोमो जैत्रस्य चेतति यथा
विदे । अस्येदिन्द्रो मदेष्वा ग्राभं गृभ्णाति सानसिं । वज्रञ्च
वृषणं भरत्समप्सुजित् ॥ १७ ॥ पुरोजिती वो अंधसः
सुताय मादयित्नवे । अप श्वानꣳ श्नथिष्ट न सखायो दीर्घजीह्व्यं
यो धारया पावकया परिप्रस्यन्दते सुतः । इन्दुरश्वो न कृत्व्यः ।
तं दुरोषमभीनरः सोमं विश्वाच्या धिया । यज्ञाय सन्त्व-
द्रयः ॥ १८ ॥ अभि प्रियाणि पवते च नो हितो नामानि
यह्वो अधि येषु वर्द्धते । आ सूर्यस्य वृहतो वृहन्नधि रथं
विष्वंचमरुहद्विचक्षणः । ऋतस्य जिह्वा पवते मधु प्रियं वक्ता
पतिर्धियो अस्या अदाभ्यः । दधाति पुत्रः पित्रोरपीच्या३२ नाम
तृतीयमधिरोचनं दिवः । अव द्युतानः कलशाꣳ अचिक्रद-
न्नृभिर्येमाणः कोश आ हिरण्यये । अभी ऋतस्य दोहना

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अनूषताधिचित्रपृष्ठ उषसो विराजसि ॥ १९ ॥ यज्ञायज्ञा वो
अग्नये गिरागिरा च दक्षसे । प्रप्रवयममृतं जातवेदसं प्रियं
मित्रं न शꣳसिषं । ऊर्ज्जो न पातꣳ सहिना यमस्मयुर्दाशेम
हव्यदातये । भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनूनाम् ॥ २० ॥
एह्यूषु ब्रवाणि तेग्न इत्थेतरा गिरः । एभिर्वर्द्धास इन्दुभिः ।
यत्र क्व च ते मनो दक्षंदधस उत्तरं । तत्र योनिं कृणवसे । न
हि ते पूर्त्तमक्षिपद्भुवन्नेमानां पते । अथा दुवो वनवसे ॥ २१ ॥
वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तो वस्यवः । वज्रिञ्चित्रꣳ
हवामहे ॥ उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत् ।
त्वामिध्यवितारं ववृमहे सखाय इन्द्र सानसिं ॥ २२ ॥
अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे । उदेवग्मन्त
उदभिः । वार्ण त्वा यव्याभिर्वर्द्धन्ति शूर ब्रह्माणि ॥ वावृध्वाꣳसं
चिदद्रिवो दिवेदिवे युंजन्ति हरि इषीरस्य गाथयोरौरथ
उरुयुगे वचोयुजा । इन्द्रवाहा स्वर्विदा ॥ २३ ॥ इत्यर्द्ध
प्रपाठकः ॥ देवास्तृप्यन्तु । ततो भूरादिसप्तव्याहृतिभिः
सन्तर्प्यन्ते ऋषयः । ओं भूस्तृप्यतु । ओं भुवस्तृप्यतु । ओं
स्वस्तृ० । ओं महस्तृ० । ओं जनस्तृ० । ओं तपस्तृ० ।
ओं सत्यं तृ० । ओं ऋषयस्तृप्यन्तु । तत अग्न आयाहीत्या-
दितत्तच्छन्दस्काभिर्ऋग्भिश्छन्दांसि तर्पयेयुः । अग्न आयाहि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अगन्ते गायत्री । ओं अग्न आयाहि वीतये गृणानो
हव्यदातये । निहोता सत्सि बर्हिषि । गायत्री तृप्यतु । एवं
पुरुत्वान्ते उष्णिक् । एवं प्रथमया तर्पणम् । ततो गायत्र्युष्णिक्
इत्येवं । पुरु त्वा दाशिवाङ्वोचेरिरग्ने तव स्विदा । तोदस्येव
शरण आमहस्य । उष्णिक् तृप्यतु । अग्न ओजिष्ठमाभर
द्युम्नमस्मभ्यमध्रिगो । प्रनो राये पनीयसे रत्सि वाजाय पन्थाम् ।
अनुष्टुप् तृप्यतु । यज्ञायज्ञा वो अग्नये गिरागिरा च
दक्षसे । प्रप्रवयममृतं जातवेदसं प्रियं मित्रं न शꣳसिषं ।
बृहती तृप्यतु । स्वादोरित्था विषूवतो मधोः पिबन्ति गौर्यः ।
या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभथा वस्वीरनु स्वराज्यं ।
पङ्क्तिस्तृप्यतु । आजुहोता हविषामर्जयध्वं निहोतारं गृहप-
तिं दधिध्वं । इडस्पदे नमसा रात हव्यꣳ सपर्जता यजतं
पस्त्यानाम् । त्रिष्टुप् तृप्यतु । चित्र इच्छिशोस्तरुणस्य वक्षथो
नयो मातरावन्वेति धातवे । अनूधा यदजीजनदधाचिदाववक्षत्सद्यो
महि दूत्यꣳ३चरन् । जगती तृप्यतु । छन्दांसि तृप्यन्तु । प्र-
वो महे मतयो यंतु विष्णवे मरुत्वते गिरिजा एवया मरुत् ।
प्रशर्द्धाय प्रयज्यवे सुखादये तवसे भन्ददिष्टये धुनिव्रताय शवसे ।
अतिजगती तृप्यतु । प्रोष्वस्मै पुरो रथमिन्द्राय शूषमर्चत ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अभोके चिदु लोककृत्संगे समत्सुवृत्रहा । अस्माकं बोधि चोदिता नभंतामन्यकेषां ज्याका अधि धन्वसु । शक्करी तृप्यतु । तवत्यं नर्यं नृतोप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतं । यो देवस्य शवसा प्रारिणा असुरिणं नपः । भुवो विश्वमभ्यदेवमोजसा विदेदूर्जं शतक्रतुर्विदेदिषं । अतिशक्करी तृप्यतु । त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृंपत्सोममपिबद्विष्णुना सुतं यथा वशं । स ईं ममाद महि कर्मकर्त्तवे महामुरुं सैनं सश्चद्देवो देवां सत्य इन्दुः सत्यमिन्द्रं । अष्टिस्तृप्यतु । अस्तु श्रौषट् पुरो अग्निं धिया दध आनुत्यच्छर्द्धो दिव्यं वृणीमह इन्द्रवायू वृणीमहे । यद्धक्राणा विवस्वते नाभा संदाय नव्यसे । अधप्रनूनमुपयंति धीतयो देवां अच्छा न धीतयः । अत्यष्टिस्तृप्यतु । ओं घर्मः प्रवृक्तस्तन्वा समान्दधे दधे । ओं धृतिस्तृप्यतु । सर्पत प्रसर्पत सुवर्गमेम ते वयम् ॥ ओं अतिधृतिस्तृप्यतु । संयमन्नव्याय मन्वियमन्नसमायमन् । ओं कृतिस्तृप्यतु । चराचराय वृहत इदं वाममिदं वृहत् । ओं प्रकृतिस्तृप्यतु । द्यौरक्राम्भूमिरतनन्त्समुद्रं समचुकुपत् । ओं आकृतिस्तृप्यतु । ज्योतिष्पत स्वः प्पतान्तरिक्षं पृथिवीं पंच प्रदिशः । ओं विकृतिस्तृप्यतु ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मनोजयिद्धृदयमजयिदिन्द्रोजयिद्द्वमजैषम् । ओं संस्कृति-
स्तृप्यतु । प्रागदन्यदनुवर्त्तते रजोपागन्यत्तमो पेषतिभ्यसा ।
ओं अभिकृतिस्तृप्यतु । ओं अधिप । तायि । मित्रप । तायि ।
चत्रप । तायि । स्वःप्पतायि । धनपता२यि । ना२मा: । ओं उत्क-
तिस्तृ० । इति विच्छन्दांसि । ततो वंशीयानामृषीणां प्रतिना-
मभिः प्रथमं तर्पणं । तद्यथा । ओं नमो ब्रह्मणे नमो ब्राह्मणेभ्यो
नम आचार्य्येभ्यो नम ऋषिभ्यो नमो देवेभ्यो नमो वेदेभ्यो
नमो वायवे च मृत्यवे च विष्णवे च नमो वैश्रवणाय
चोपजयाय च । इत्यन्तं कृताञ्जलिः पठित्वा तर्प्पयेत् ।
शर्वदत्तस्तृप्यतु ॥ १ ॥ रुद्रभूतिस्तृ० ॥ २ ॥ चातस्तृ० ॥ ३ ॥
निगरस्तृ० ॥ ४ ॥ गिरिशर्म्मा तृ० ॥ ५ ॥ ब्रह्मवृद्धिस्तृ० ॥ ६ ॥
मित्रवर्च्चास्तृ० ॥ ७ ॥ सुप्रतीतस्तृ० ॥ ८ ॥ बृहस्पतिगुप्त-
स्तृ० ॥ ९ ॥ भवचातस्तृ० ॥ १० ॥ कुस्तुकस्तृ० ॥ ११ ॥
श्रवणदत्तस्तृ० ॥ १२ ॥ सुशारदस्तृ० ॥ १३ ॥ रुर्ज्जयन्त-
स्तृ० ॥ १४ ॥ भानुमा२स्तृ० ॥ १५ ॥ आनन्दजस्तृ० ॥ १६ ॥
शाम्बस्तृ० ॥ १७ ॥ काम्बोजस्तृ० ॥ १८ ॥ मद्रगारस्तृ० ॥ १९ ॥
सातिस्तृ० ॥ २० ॥ सुश्रकस्तृ० ॥ २१ ॥ प्रातरनूह्वस्तृ० ॥ २२ ॥
केतुस्तृ० ॥ २३ ॥ मित्रविन्दस्तृ ॥ २४ ॥ सुनीथस्तृ० ॥ २५ ॥
सुतेमनास्तृ० ॥ २६ ॥ अंशुस्तृ० ॥ २७ ॥ अमावस्यस्तृ० ॥ २८ ॥
राधस्तृ० ॥ २९ ॥ गातास्तृ० ॥ ३० ॥ संवर्गजित्स्तृ० ॥ ३१ ॥
शाकदासस्तृ० ॥ ३२ ॥ विचक्षणस्तृ० ॥ ३३ ॥ गर्द्दभीमुखस्तृ० ॥ ३४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



उदरशाण्डिल्यस्तृ० ॥३५॥ अतिधन्वा तृ० ॥३६॥ मशकस्तृ० ॥ ३७॥ स्थिरकस्तृ० ॥ ३८ ॥ वसिष्ठस्तृ० ॥ ३९॥ वासिष्ठस्तृ० ॥ ४०॥ सुमन्तस्तृ०॥ ४१ ॥ शूषस्तृ० ॥ ४२॥ रालस्तृ० ॥ ४३ ॥ हतिस्तृ० ॥ ४४ ॥ इन्द्रोतस्तृ० ॥ ४५ ॥ वृषशुष्णस्तृ० ॥ ४६ ॥ निकोथकस्तृ० ॥ ४७ ॥ प्रतिथिस्तृ० ॥ ४८॥ देवतरास्तृ० ॥ ४९ ॥ शवास्तृ० ॥ ५० ॥ अग्निभूस्तृ० ॥ ५१ ॥ इन्द्रभूस्तृ० ॥ ५२ ॥ मित्रभूस्तृ० ॥ ५३ ॥ विभण्डकस्तृ० ॥ ५४॥ ऋष्यशृङ्गस्तृ० ॥ ५५॥ कश्यपस्तृ० ॥ ५६ ॥ अग्निस्तृ० ॥ ५७ ॥ इन्द्रस्तृ० ॥ ५८ ॥ वायुस्तृ० ॥ ५९ ॥ मृत्युस्तृ० ॥ ६० ॥ प्रजापतिस्तृ० ॥ ६१ ॥ ब्रह्मा तृ० ॥ ६२ ॥ ततोऽग्न्यादीनां तर्पणम् । अग्निस्तृप्यतु । प्रजापतिस्तृप्यतु । विश्वेदेवास्तृप्यन्तु । ओंकारस्तृप्यतु । वषट्कारस्तृप्यतु । महाव्याहृतयस्तृप्यन्तु । गायत्री तृप्यतु । ब्रह्मा तृप्यतु । विष्णुस्तृप्यतु । वेदास्तृप्यन्तु । देवास्तृप्यन्तु । ऋषयस्तृप्यन्तु । मुनयस्तृप्यन्तु । आचार्यास्तृप्यन्तु । पुराणानि तृप्यन्तु । छन्दांसि तृप्यन्तु । यज्ञास्तृप्यन्तु । अध्ययनं तृप्यतु । द्यावापृथिव्यौ तृप्येताम् । अन्तरिक्षं तृप्यतु । अहोरात्राणि तृप्यन्तु । मासास्तृप्यन्तु । ऋतवस्तृप्यन्तु । संवत्सरस्तृप्यतु । वरुणस्तृप्यतु । समुद्रास्तृप्यन्तु । नद्यस्तृप्यन्तु । गिरयस्तृप्यन्तु । क्षेत्राणि तृप्यन्तु । वनानि तृप्यन्तु । ओषधयस्तृप्यन्तु । वनस्पतयस्तृप्यन्तु । पशवस्तृप्यन्तु । नागास्तृप्यन्तु । उरगास्तृप्यन्तु । सुपर्णास्तृप्यन्तु । वयांसि तृप्यन्तु । गावस्तृप्यन्तु । वसवस्तृप्यन्तु । रुद्रास्तृप्यन्तु । आदित्यास्तृप्यन्तु । मरुतस्तृप्यन्तु ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सिद्धास्तृप्यन्तु। साध्यास्तृप्यन्तु। गन्धर्वास्तृप्यन्तु। पिशाचास्तृप्यन्तु। यक्षास्तृप्यन्तु। रक्षांसि तृप्यन्तु। भूतानि तृप्यन्तु। नक्षत्राणि तृप्यन्तु। अश्विनौ तृप्येताम्। अप्सरसस्तृप्यन्तु। चतुर्विधभूतग्रामस्तृप्यतु। मरीचिस्तृप्यतु। अत्रिस्तृ०। अङ्गिरास्तृ०। पुलस्तिस्तृ०। पुलहस्तृ०। क्रतुस्तृ०। प्रचेतास्तृ०। वसिष्ठस्तृ०। भृगुस्तृ०। नारदस्तृ०। सप्तर्षयस्तृप्यन्तु। अरुन्धती तृ०। गोभिलाचार्यस्तृ०। एवमादयः स्वस्ति कुर्वन्तु तर्पिताः स्वस्ति कुर्वन्तु तर्पिताः॥ अथापसव्येन तिलैर्द्विगुणदर्भैः पितृतीर्थेन त्रिस्तर्पयेत्। ओंकारो महाव्याहृतयो गायत्री ब्रह्मा वेदा देवा ऋषयः पितरश्छन्दास्याचार्य्यास्तृप्यन्तु। एवं त्रिः। राणायनिस्तृप्यतु। शात्यमुग्रस्तृ०। व्यासस्तृ०। भागुरिस्तृ०। औगुंशिडस्तृ०। गौल्गुल्विस्तृ०। भानुमानौपमन्यवस्तृ०। कराटिस्तृ०। मशकोगार्ग्यस्तृ०। वार्षगण्यस्तृ०। कौथुमिस्तृ०। शालिहोत्रिस्तृ०। जैमिनिस्तृ०। त्रयोदशैते मे सामगाचार्याः स्वस्ति कुर्वन्तु तर्पिताः०॥ शठिस्तृ०। भाल्लविस्तृ०। काल्लविस्तृ०। ताण्ड्यस्तृ०। वृषाणकस्तृ०। रुरुकिस्तृ०। शमबाहुस्तृ०। अगस्त्यस्तृ०। बष्कशिरास्तृ०। हूहूस्तृ०। दशैते मे प्रवचनकर्त्तारः स्वस्ति कु०॥ कव्यवालस्तृ०। नलस्तृ०। सोमस्तृ०। यमस्तृ०। अर्यमा तृ०। अग्निष्वात्तास्तृप्यन्तु। सोमपास्तृप्यन्तु। बर्हिषदस्तृप्यन्तु। यमस्तृ०। धर्मराजस्तृ०। मृत्युस्तृ०। अन्तकस्तृ०। वैवस्वतस्तृ०। कालस्तृ०। सर्वभूतक्षयस्तृ०। औदुम्बरस्तृ०।



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दभस्तृ० । नीलस्तृ० । परमेष्ठी तृ० । वृकोदरस्तृ० । चित्रस्तृ० । चित्रगुप्तस्तृ० । तत उत्तरवंशीयानाम् । अयंमभूतिस्तृ० । भद्रशर्मा तृ० । पुष्ययशसस्तृ० । सङ्करस्तृ० । अयंमगोभिलस्तृ० । पूषमित्रगोभिलस्तृ० । अश्वमित्रगोभिलस्तृ० । वरुणमित्रगोभिलस्तृ० । मूलमित्रगोभिलस्तृप्यतु । वत्समित्रगोभिलस्तृ० । गौल्गुल्वीपुत्रगोभिलस्तृ० । वृहद्वसुगोभिलस्तृ० । ततो राधादिद्वितीयखण्डोक्तांस्तर्पयेत् । राधस्तृप्यतु । गातास्तृ० । संवर्गजिनस्तृ० । शाकदासविचक्षणस्तृ० । गर्दभीमुखस्तृ० । उदरशाण्डिल्यस्तृ० । अतिधन्वा तृ० । मशकस्तृ० । स्थिरकस्तृ० । वसिष्ठस्तृ० । वासिष्ठस्तृ० । सुमन्तस्तृ० । शूषस्तृ० । रालस्तृ० । दृतिस्तृ० । इन्द्रोतास्तृ० । वृषशुष्णास्तृ० । निकोथकस्तृ० । प्रतिथिस्तृ० । देवतरास्तृ० । शवसायनस्तृ० । अग्निभूइन्द्रभूमित्रभुवस्तृप्यन्तु । विभण्डकस्तृ० । ऋष्यशृङ्गस्तृ० । कश्यपस्तृ० । अग्निस्तृ० । इन्द्रस्तृ० । वायुस्तृ० । मृत्युस्तृ० । प्रजापतिस्तृ० । ब्रह्मा तृप्यतु । ततः समाचारान्निवीतिना सनकादीन् सन्तर्प्याचम्य, ऋषीन्सम्पूज्य, ऋषिश्राद्धं कृत्वा, ऋषिमाल्यामादाय, स्ववसाम्ना तद्ब्राह्मणेन च संस्नाप्य, निमज्याचम्य, अरिष्टवर्गसामानि पठित्वा, ऋषीनादाय, गृहमागच्छेयुः ॥ इति ऋषितर्पणप्रयोगः ॥

अथोपाकर्मप्रयोगः । तत्र येषां ब्रह्मचारिणां पूर्ववृत्तान्तश्रुतस्य वेदस्य प्रथमारम्भस्तेषामत्र वृद्धिश्राद्धम् । आनीतानृषीन् शुभपीठाद्यासने कुशोपरि संस्थाप्यासनादिभिरुपचारैः स-

For Private And Personal

म्पृज्याचम्य शालाग्नेः पश्चादुपविश्याग्नौ समिधं हुत्वा ब्रह्माण-मुपवेश्याज्यतन्त्रेणासादनम् । तत्र विशेषः । रक्ता धाना दधि चासाद्य सम्प्रोक्ष्य देशकालौ सङ्कीर्त्त्य छन्दोयातयामत्वनिवृत्तये नित्यविधिरूपमुपाकर्माङ्गहोममहं करिष्ये इति सङ्कल्प्याग्निं परिस्तीर्य्य, इध्ममभ्याधायाज्यं संस्कृत्य, पर्युक्ष्य, स्रुवं सम्मृज्य, व्याहृतिचयं हुत्वा, पङ्क्त्याकारेणोपविष्टांश्छिष्यान्पाठयेद्गायत्रीं संहितावत् । तत्सवितुर्व्वरेण्यम् । इति प्रथमम् । ततः । भर्गो देवस्य धीमहि । ततः । धियो यो नः प्रचोदयात् । ततोऽर्द्धर्चशः पुनः समस्ताम् । ततः सावित्रं साम । सोमं२ राजानमिति बृहस्पतिर्ऋषिरनुष्टुप्छन्दो विश्वेदेवा देवता पङ्क्त्याकारेण शिष्यान् पाठने विनियोगः । सोमं२ राजानं वरुणाम् । अग्निमन्वारभामहे३ । होवा३हाइ । आदित्यं विष्णुं२सूर्यम् । होवा३हाइ । ब्रह्माणा२३३म्वा३ । होवा३हाइ । बृहा३उवा३ । पा२३४तीम् । ततो वेदस्यादितः पर्वनामानि पाठयेत् । ओं अग्नायि । ओं तद्वोहोवा । ओं उच्चा । ततश्छन्दोहोमः । अग्न आयाहिवीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि स्वाहा । गायत्र्या इदं न ममेति त्यागः । एवं सर्वत्र । पुरुत्वा दाशिवां२वोचेरिरग्ने तव स्विदा । तोदस्येव शरण आम-हस्य स्वाहा । उष्णिह इदं० । अग्न ओजिष्टमाभरद्युम्नमस्मभ्य-मध्रिगो । प्रनो रायेपनीयसेरत्सि वाजाय पन्याम् स्वाहा ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अनुष्टुभ इदं०। यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे। प्र
प्रवयममृतं जातवेदसं प्रियं मित्रं न शꣳसिषं स्वाहा। बृहत्या
इदं०। स्वादोरित्था विषूवतो मधोः पिबन्ति गौर्य्यः। या-
इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभथा वस्वीरनु स्वराज्यं
स्वाहा। पङ्क्त्या इदं०। आजुहोता हविषामर्जयध्वं निहोतारं
गृहपतिं दधिध्वं। इडस्पदे नमसा रातहव्यꣳ सपर्यता यजतं
पस्त्यानाम् स्वाहा। त्रिष्टुभ इदं०। त्रिच इक्षिशोस्तरुणस्य
वक्षथो न यो मातरावन्वेति धातवे। अनूधा यदजीजनदधा-
चिदाववक्षत्सद्यो महि दूत्याऽ३चरन् स्वाहा। जगत्या इदं०।
प्र वो महे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवया मरुत्।
प्रशर्द्धाय प्रयज्यवे सुखादये तवसे भन्ददिष्टये धुनिव्रताय शवसे
स्वाहा। अतिजगत्या इदं०। प्रोष्वस्मै पुरो रथमिन्द्राय
शूषमर्चत। अभीके चिदुलोककृत्सङ्गे समत्सु वृत्रहा।
अस्माकं बोधि चोदिता नभन्तामन्यकेषां ज्याका अधि
धन्वसु स्वाहा। शक्कर्य्या इदं०। तवन्त्यं नर्य्यं नृतोप इन्द्र
प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतं। यो देवस्य शवसा प्रारिणा
असुरिणं नपः। भुवो विश्वमभ्यदेवमोजसा विदेदूर्जꣳशतक्र-
तुर्विदेदिषं स्वाहा। अतिशक्कर्य्या इदं०। त्रिकद्रुकेषु महिषो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



यवाग्निरं तुविशुष्मस्त्वंपत्सोममपिबद्विष्णुना सुतं यथावशं ।
स ईं ममाद महि कर्म कर्त्तवे महामुरु२ सैन२ संश्चद्देवो
देवा२ सत्य इन्दुः सत्यमिन्द्रं स्वाहा । अष्ट्या इदं० । अस्तु
श्रौषट् पुरो अग्निं धिया दध आनुपत्क्षेत्रा दिव्यं वृणीमह
इन्द्रवायू वृणीमहे । यद्धक्राणा विवस्वते नाभासंदाय नव्यसे ।
अधप्रनूनमुपयन्ति धीतयो देवा२ अच्छा न धीतयः स्वाहा ।
अत्यष्ट्या इदं० । घर्मः प्रवृक्तस्तन्वा समान्दधे हृधे स्वाहा ।
धृत्या इदं० । सर्पत प्रसर्पत सुवर्गमेम ते वयं स्वाहा । अतिधृत्या
इदं० । संयमन्नव्यायमन्वियमन्न समायमन् स्वाहा । कृत्या
इदं० । चराचराय वृहत इदं वाममिदं वृहत्स्वाहा । प्रकृत्या
इदं० । द्यौरक्रान्भूमिरततनत्समुद्र२ समचूकुपत्स्वाहा । आकृत्या
इदं० । ज्योतिष्यत स्वः प्यतान्तरिक्षं पृथिवीं पंच प्रदिशः स्वाहा ।
विकृत्या इदं । मनो जयिद्धृदयमजयिदिन्द्रो जयिदहमजैषम्
स्वाहा । सङ्कृत्या इदं० । प्रागन्यदनुवर्त्तते रजो पागन्यतमो
पेषति भूयसा स्वाहा । अभिकृत्या इदं० । अधिप । तायि ।
मिहप । तायि । हृचप । तायि । स्वःप्प तायि । धनपता२यि ।
ना२मा: स्वाहा । उत्कृत्या इदं० । ततो गानपर्वादिहोमः । यथा ।
ॐ अग्नायि स्वाहा । आग्नेयायेदं० । तद्वौहोवा स्वाहा ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



इन्द्रायेदं० । ओं उच्चा स्वाहा । पवमानायेदं० । ओं यद्यावइ स्वाहा । अर्कायेदं० । ओं हाउ३ । आयुः३ । सात्यं३ । इन्द्रन्नरो स्वाहा । इन्द्रायेदं० । ओं हुवेवाचाम् स्वाहा । वाचोव्रतायेदं० । ओं ए२ । विदामघवन्विदाः स्वाहा । शक्वर्या इदं० । ओं उच्चाता३इयिजातमन्धसाः स्वाहा । दशराचायेदं० । ओं इषापा३वस्वधारया स्वाहा । संवत्सरायेदं० । ओं प्रत्यस्मैपिपी स्वाहा । एकाहायेदं० । ओं पन्यं पन्यमित्सोतारः । पन्यं पन्यो वा स्वाहा । अहीनायेदं० । ओं विशः । विशो३ । वो अतिथाइम् स्वाहा । सत्रायेदं० । ओं प्रक्ष२ सधस्थमाहो २ । सदात्स्वाहा । प्रायश्चित्तायेदं० । ओं आभि त्वा शूरनोनुमाः स्वाहा । क्षुद्रायेदं० । ओं आभि-त्वा शूरनोनुमो वा स्वाहा । दशराचायेदं० । पूनानस्सोम-धारयोवा स्वाहा । संवत्सरायेदं० । ओं उहुवा ओहा । औहोवा । पुरोजितायि स्वाहा । एकाहायेदं० । च्योहम । प्रसुन्वाना२ स्वाहा । अहीनायेदं० । ओं मा भेम मा-श्रमिष्मोवावा स्वाहा । सत्रायेदं० । ओं उहुवा ओहा-औहो वा तम्बोदस्माम् स्वाहा । प्रायश्चित्तायेदं० । औहो-यियज्ञायज्ञावो अग्नया३ए स्वाहा । क्षुद्रायेदं० । अग्नआया-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ह्यीत्यृचं पठित्वा, अग्न आयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि स्वाहा । छन्दस्या इदं० । ओं इन्द्र ज्येष्ठं न आभर ओजिष्ठं पुपुरिश्रवः । यद्दिधृक्षेम वज्रहस्त रोदसी ओभेसुशिप्रपप्राः स्वाहा । आरण्या इदं० । विदा मघवन् विदा गातुमनुशꣳसिषो दिशः शिक्षा शचीनां पते पूर्वीणां पुरुवसो स्वाहा । महानाम्नीभ्य इदं० । ओं उपास्मै गायतानरः पवमानायेन्दवे । अभि देवाꣳ इयक्षते स्वाहा । उत्तराया इदं० । महन्मे वोचो भर्गो मे वोचो यशो मे वोचः स्तोमं मे वोचो भुक्तिं मे वोचः सर्वं मे वोचस्तन्मावतु तन्मा विशतु तेन भुक्षिषीय स्वाहा । ताण्ड्यब्राह्मणायेदं० । ब्रह्म च वा इदमग्रे सुब्रह्म चास्तां स्वाहा । षड्विंशायेदं० । ब्रह्म ह वा इदमग्र आसीत् स्वाहा । सामविधानायेदं० । अथ खल्वयमार्षप्रदेशो भवति स्वाहा । आर्षेयायेदं० । अग्निरिन्द्रः प्रजापतिः सोमो वरुणस्त्वष्टाङ्गिरसः पूषा सरस्वतीन्द्राग्नी स्वाहा । देवताध्यायायेदं० । अथातः संहितोपनिषदो व्याख्यास्यामः स्वाहा । संहितोपनिषद् इदं । ओं नमो ब्रह्मणे नमो ब्राह्मणेभ्यो नम आचार्येभ्यो नम ऋषिभ्यो नमो देवेभ्यो नमो वेदेभ्यो नमो वायवे च मृत्यवे च विष्णवे च नमो वैश्रवणाय चोपजयाय च स्वाहा । वंशब्राह्मणायेदं० । देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्वः केतपूः केतं नः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पुनातु वाचस्पतिर्वाचं नः स्वदतु । उपनिषद इदं० । अथातः स्वरशास्त्राणां सर्वेषां वेद निश्चयम् । उच्चनीचविशेषांश्च स्वरान्यत्वं प्रवर्त्तते स्वाहा । शिक्षाया इदं० । क्लृप्तो ज्योतिष्टोमोऽतिराचोक्थ्यषो उशीकः स्वाहा । कल्पसूत्रायेदं० । कल्पसूत्रं यदा नाधीतं भवति तदा दशानां सूत्राणां मध्ये यदधीतं भवति तन्नाम्ना होमः कर्त्तव्यः । अथ वाचो वृत्तिं व्याख्यास्यामः स्वाहा । वैय्याकरणायेदं० । समाम्नायः समाम्नातः सव्याख्यातव्यस्तमिमं समाम्नायं निघण्टव इत्याचक्षते स्वाहा । निरुक्तायेदं० । अथातश्छन्दसां विषयं व्याख्यास्यामः स्वाहा । छन्दोभ्य इदं । पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम् । दिनर्त्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः । इदं ज्योतिषामयनविकल्पाः । इदं सूत्रमध्यगतं भवति तस्मात्प्रसिद्धं अनिषिद्धं ज्योतिष उक्ता कस्मादिदं ग्राह्यमेव तेषामयनं विकल्पायय स्वाहा । ज्योतिष इदं० । ततो व्याहृतिचतुष्टयं हुत्वा पुनस्त्रयं हुत्वा समिदाधानपर्य्युक्षणयज्ञवास्तुवस्वाहुत्यन्तं कृत्वा दक्षिणे पाणौ रक्षाबन्धनम् । हिरण्यभूषितां यवपोटलिकां विचित्रतन्तुबद्धां,

२र १ २ र र र र र १ २र र २^३ १ १ १ १
ए रक्षत नो रक्षितारो गोपायत गोपायितारा२३४५ः ॥ इतिमन्त्रेण । येन बद्धो बली राजा दानवेन्द्रो महाबलः । तेन त्वामनुबध्नामि रक्षे माचल माचलेति ॥

१ २ १
तुवं यवाय्यि।

२ १र २ १ र २ २ १र २ १ २ २
ष्ठ दाशूऽ२३षाः। नृंऽप्याहि श्रृ। णुहीगा२३यिराः। रक्षातो३का३म्

१ २ १ ५ ५
ऊताऽ२३हा३४ऽ३यि । त्माऽ२३४नो६हायि। इत्यनेन रक्षा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



बन्धनम् । ततः सर्वे धानावन्तमितिमन्त्रेण । अस्य मन्त्रस्य पुष्पऋषिर्गायत्रीछन्द इन्द्रो देवता धानाभक्षणे विनियोगः । धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्रातर्जुषस्व नः असंस्वादन्निगीर्य्य, अनाचान्ता एव दधिक्राव्ण इति । अस्यार्चिऋषिरनुष्टुप्छन्द इन्द्रो देवता दधिप्राशने विनियोगः । दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखाकरत्प्र न आयूंषि तारिषत् । ततः समाचान्ताः शिष्याः पङ्क्त्याकारेणोपविशेयुः । एतस्मिन्नेव काले आचार्योऽपि प्रतिसरबन्धनादि कुर्य्यात् । तत आचार्यो ऽग्न आयाहीत्याद्यृक्त्रयं तान्येव त्रीणि सामानि स्वपठनादनु शिष्यान्पाठयेत् । अग्न आयाहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ॥ १ ॥ त्वमग्ने यज्ञानां होता विश्वेषां हितः । देवेभिर्मानुषे जने ॥ २ ॥ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं । अस्य यज्ञस्य सुक्रतुम् । ओं ओग्नायि । आयाही३वोयितोया२यि । तोया२यि । गृणानोह । व्यदातोया२यि । तोया२यि । नायिहोतासाऽ२३ । त्साऽ२यिबा२३४औहोवा । ही२३४षी ॥ १ ॥ अग्नआयाहिवी । तयायि । गृणानोहव्यदाताऽ२३यायि । निहोतासत्सिबर्हा२३यिषी । बर्हाऽ२यिषा२३४औहोवा । बर्ही३षीऽ२३४५ ॥ २ ॥ अग्न आयाहि । वा५यितयायि । गृणा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



१ २ २ २ २^ ३ ५ १ २ १
नोहव्यदा१ता३ये । निहोता२३४सा । त्सा ऽ२३यिबा३ । हाऽ-
५ ५
२३४यिषो६हाइ । एवं पठित्वा ब्राह्मणभोजनपूर्णपात्रादिसङ्कल्पं कृत्वा वामदेव्यं गायेत् ॥ इत्युपाकर्मप्रयोगः ॥

एवमुपाकरणं कृत्वा तद्दिनमारभ्याध्ययनं न कार्य्यं, किन्तु हस्तनक्षत्रयुक्तदिनं काङ्क्षन्ते, न पठन्तीत्यर्थः । आरण्यकादीनामुपाकरणं येषां दक्षिणायने प्रतिषिध्यते, उदगयने च विधीयते, तेषामुदगयन उपाकृत्य पक्षिणीं रात्रिं काङ्क्षन्ते न पठन्तीत्यर्थः । "उक्तयोरुपाकरणयोस्त्रिरात्रमनध्यायं मन्यन्ते" केचिदाचार्याः । अथवा, श्रावण्यां पौर्णमास्यामुपाकृत्य न पठन्ति यावद्भाद्रपदो हस्तः । पौष्यामुदगयने पुष्यनक्षत्रयुक्ततिथावुत्सर्जनम् । आरण्यकादिग्रन्थाध्ययनायोदगयन उपाकरणपक्षे, भाद्रपदे तैष्यां तिथावुत्सर्जनम् । उत्सर्जनप्रयोग उपाकर्मप्रयोगवत् ज्ञेयः । स यथा । ततस्तद्दिनमारभ्य भाद्रपदमासीयहस्तादधस्तनपुष्यनक्षत्रं यावद्गृहीतानामृषीणां प्रत्यहं पुष्यनक्षत्रयुतेऽहनि प्रातरेव सशिष्याः प्राङ्मुखा उदङ्मुखा वा ग्रामाद्बहिर्नद्यादौ गत्वा प्रत्यहं पूजनं करिष्ये इति सङ्कल्प्य, यथाविधि स्थापितानृषीन्पूजयेत् । ततो देशकालौ सङ्कीर्त्त्य छन्दसामाप्यायनार्थं, यातयामत्वदोषनिवृत्तये, वेदोत्सर्गकर्मणि ऋषीणां पूजनं तर्पणञ्च करिष्ये इति सङ्कल्प्यावाहनं विना पूर्ववदृषीन् सम्पूज्य तथैव तर्पयित्वा पुनः सम्पूज्य ऋषीन् ब्रवसाम्ना
२ २ २ २ २^ ३ ५
श्रावयेत् । हा । बो३हा । बो३हा३ । हा । ओ२३४वा ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



२ २^३ ५ २^३ ५ २^३ ५
हायि। पूनाना२३४:सो। माधारा२३४या। आपोवा२३४सा।
२^३ ५ २^३ ५ २^३ ५
नोअर्षा२३४सी। आरत्ना२३४धाः। योनीमा२३४त्ता।
२^३ ५ २^३ ५ २^३ ५
स्यासीदा२३४सी। उत्सोदा२३४यिवो। हायिरण्या२३४याः।
२ ^ २ २ २ २^ ३ ५ २ ५र र
हा। वो३हा। वो३हा३। हा। ओ२३४वा। हा३४ओहोवा।
२ १ २ १ २र १र २र२३ १ १ १ १
ए३। अतिविश्वानिदुरितातरेमा२३४५। प्लवोन्वहं भवति समुद्रं वा एते प्रस्नान्ति ये संवत्सरमुपयन्ति यो वा अप्लवः समुद्रं प्रस्नाति न स तत उदेति यत्प्लवो भवति स्वर्गस्य लोकस्य समष्ट्या अतिविश्वानि दुरितातरेमेति यदेवैषां दुष्कृतं दुःशस्तं तदेतेन तरन्ति। ततो निमज्याचम्य गृहमागच्छेयुः। तत आपुनरुपाकरणाच्छन्दसामनध्यायोऽन्यच ब्रह्मयज्ञात्। इत्युत्सर्ज्जनप्रयोगः॥

ब्रह्मचारिणां, गृहस्थानां, वानप्रस्थानां, चोपाकर्म्मोत्सर्ज्जने तावदावश्यके। अन्यथाऽधीतवेदानां यातयामता स्यात्। ततोऽनध्याया उच्यन्ते। मेघाच्छादनयुक्तदिने छन्दसामध्ययनं न कार्य्यम्। विद्युत्स्तनयित्नुवर्षणेषु जातेष्वनध्यायः। उल्कापाते, भूमिचलने, उपरागद्वये च, दिनमेकमुत्तरमनध्यायः। निर्घातेऽनध्यायः। वक्ष्यमाणासु चतसृष्वष्टकास्वमावास्यायां, पौर्णमास्यां, चतुर्द्दश्यां, नाध्यायनम्। कार्त्तिक्यां फाल्गुन्यामाषाढ्यां च पौर्णमासीप्रतिपदोत्तरद्वितीयायां नाध्ययनम्। उक्तानध्यायोऽहोरात्रम्। सब्रह्मचारिणि, श्रोत्रिये च, मृतेऽहोरात्रमध्ययनं वर्ज्जयेत्। स्वदेशराजनि च मृतेऽहोरात्रमनध्यायः। आचार्य्ये

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दिवं गते त्रिरात्रमध्ययनं वर्ज्जयेत् । अनुकूलशिष्ये मृते त्वहोरात्रमनध्यायः । गीतवाद्यरोदनातिवातेषु तत्कालेऽनध्ययनम् । शिष्टाचारादन्येऽप्यनध्याया ज्ञातव्याः ॥

अथ नैमित्तिकप्रायश्चित्तान्युच्यन्ते ॥ दिव्यन्तरिक्षभौमाख्यत्रिविधोत्पाते दम्पत्योः प्रायश्चित्तम् । दोषविनिवृत्तये प्रायश्चित्तानुपदेशाद्व्याहृतिचतुष्टयहोमः । अथ वा, ग्रन्थान्तरोक्ततीर्थस्नानाभिषेकादिरूपं कुर्यात् । तच्चेतिकर्त्तव्यताकलापस्तत एवाधिगन्तव्यः । गृह उपरितनवंशे, मध्यमस्तम्भे वा, मणिके वा, भिन्ने व्यस्तसमस्ताभिर्व्याहृतिभिश्चतस्र आज्याहुतीः कुर्यात् । दुःस्वप्नेषु सञ्जातेष्वद्य नो देव सवितरित्येतामृचं जपेत् । मन्त्रस्य प्रजापतिर्ऋषिर्गायत्रीछन्दस्सविता
३ १ २ ३ १ २ ३
देवता जपे विनियोगः । अद्य नो देव सवितः प्रजावत्सावीः
१ २ १ २ ३ १ २
सौभगम् । परादुःष्वप्न्यꣳसुव । ऋगेवात्र न साम । तत्तत्कर्मसमाप्तौ सञ्चितस्याग्नेयूपस्य च स्पर्शे, कर्णक्रोशे, नेत्रस्फुरणे, सूर्योदये सूर्यास्तसमये वा निद्रायामिन्द्रियाणां निषिद्धविषयसम्बन्धे च, पुनर्मा मैत्विन्द्रियमित्येताभ्यां मन्त्राभ्यामाज्याहुतीर्जुहुयात् । अनयोर्मन्त्रयोः प्रजापतिर्ऋषिर्यजुषी अग्निर्देवतेन्द्रियापचारे प्रायश्चित्तकर्मणि समित्प्रक्षेपे आज्यहोमे वा विनियोगः । पुनर्मा मैत्विन्द्रियं पुनरायुः पुनर्भगः । पुनर्द्रविणमैतु मा पुनर्ब्राह्मणमैतु मा स्वाहा । पुनर्मनः पुनरात्मा म आगात् पुनश्चक्षुः पुनश्श्रोत्रं म

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



आगात् वैश्वानरो अदब्धस्तनूपा अन्तस्तिष्ठतु मे मनोऽमृतस्य केतु स्वाहा । उभयत्राग्नय इदं न मम । आज्यलिप्ते समिधौ वोक्तमन्त्राभ्यामादध्यात् । समिदाधाने क्षिप्रहोमविधिः । आज्यहोमे आज्यतन्त्रम् । लघुषमेध्यादिदर्शनादिषु मानसेषु च पापेषूक्तयोर्मन्त्रयोर्जपं वा कुर्यात् । अन्येषामपि साम्नामध्ययने सामान्यब्रह्मचर्य्यव्रतम् । इत्थं साङ्गं वेदमधीत्य, गुरवे दक्षिणां दत्वा, विवाहं कुर्यात् । कौथुमीयानां के वा ? ग्रन्था अध्येतव्या इतिचेदत्राह 'कश्चित्' । "द्विपञ्चाशदिमे ग्रन्थाश्शाखायाः कौथुमेरिह । प्रोक्ताः सामोदधौ यस्माच्छ्रौते स्मार्त्ते सुनिश्चिताः ॥ १ ॥ तस्माद्वै सामशाखायां ग्रन्थभेदो निगद्यते । श्रौतस्मार्त्तादिते यस्मान्न मुच्येत कथञ्चन ॥ २ ॥ वेआरण्यकमूहोऽच रहस्यं गानमुच्यते । छन्दस्यारण्यके चैवं मन्त्रास्सोत्तरकास्स्मृताः ॥ ३ ॥ छन्दस्यादित्रयं स्तोभः सपदं स्याच्चतुष्टयम् । ताण्ड्यः षड्विंशकं सामविधानार्षेयके तथा ॥ ४ ॥ देवताध्यायवंशाख्यास्संहितोपनिषत्तथा । अष्टमोपनिषच्चैव ब्राह्मणे समुदीरिताः ॥ ५ ॥ नारदी लोमशी शिक्षा गौतमी चेति वै त्रिधा । कल्पसूत्रं तथा क्षुद्रं लाट्यायनकमेव च ॥ ६ ॥ उपग्रन्थः पञ्चविधो निदानं ताण्ड्यलक्षणम् । अनुपत्स्यादनुस्तोत्रं कल्पानुपदमेव च ॥ ७ ॥ एतद्दशविधं सूत्रं सामगेषु च विश्रुतम् । ऋक्तन्त्रं सामतन्त्रञ्च सञ्ज्ञाकरणमेव च ॥ ८ ॥ धातुलक्षणकञ्च स्यादिति व्याकरणानि च । अनुक्रमणिका चेति नैगेयञ्च ततः परम् ॥ ९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



फुल्लं गोभिलगृह्यञ्च मन्त्रलक्षणकं तथा । गायत्र्यादिविधानञ्च ततस्तोभानुसंहरः ॥ १० ॥ छन्दोगपरिशिष्टं तु गृह्यासङ्ग्रह एव च । श्राद्धकल्पं ततो वेद्यासाधनं गोभिलीयकम् ॥ ११ ॥ स्नानविधिरुपाकर्म श्रावणेन परो विधिः । द्विपञ्चाशदिमे ग्रन्था वृषोत्सर्गान्तगाः स्मृताः" ॥ १२ ॥ इति कौथुमशाखायां ग्रन्थसंख्या यथाक्रमात् । एतानधीत्य निखिलं वेदोक्तं स्नातुमर्हति ॥ उक्तानेतान् ग्रन्थानधीत्य, ततो वैदिकान्धर्म्मान्विचार्य, गुरुपादयोर्दक्षिणां समर्प्य, कन्यामुद्वाहाय निश्चित्य, 'उद्वाहायाभ्यनुजानातु भवानाचार्य' इति पृष्ट्वाऽनुज्ञातो ब्रह्मचारी स्नात्वा समावृत्तो दारानवश्यमुद्वहेत् । अलाभे तु कन्याया न स्नायात् । यावज्जीवं ब्रह्मचारी भवेत् । अथ वा, ब्रह्मचर्य्यात्सन्न्यसेत् । न हि कदाचित्स्नात्वा चिरं तिष्ठेदनाश्रमित्वापत्तेः । तच्चानिष्टम् । "अनाश्रमी न तिष्ठेत क्षणमेकमपि द्विज" इति सुदर्शनभाष्योक्तत्वात् । "यस्य दत्ता भवेत्कन्या वाचा सत्येन केनचित् । सोऽन्त्यां समिधमाधास्यन्नादधीतैव नान्यथा" इति कर्म्मप्रदीपोक्तेश्च । अत्र केचित् । "विवाहेच्छाया अभावेऽपि कलौ दीर्घकालब्रह्मचर्यस्य क्वचित्क्वचिन्निषेधात्स्नानं कर्त्तव्यमिति" वदन्ति । मातुस्सपिण्डां सगोत्राञ्च कन्यां नोद्वहेत् । "कन्योद्वाहप्रश्रेष्ठ" इति गोभिलाचार्य्योक्त्या रोहिण्या गौर्य्याश्च विवाहो न श्रेष्ठ इत्यवगम्यते ॥

अथ ब्रह्मचारिव्रतलोपप्रायश्चित्तम् । स्नानदिनात्पूर्वेद्युस्तदहरेव वा कार्यम् । तत्र गोदानादीनां व्रतानां लोपे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रत्येकमेकैकं कृच्छ्रं चरित्वा गायत्र्या शताज्याहुतीर्जुहुयात्। तथा ब्रह्मचारिणः सन्ध्याऽग्निकार्यभिक्षालोप-शूद्रादिस्पर्शन-कटिसूत्रमेखलाजिनत्याग-दिवास्वाप-छत्रधारण-मालाधारणाञ्जन-पर्युषितान्नभोजनादि-सर्वब्रह्मचर्यनियमलोपप्रायश्चित्तार्थं कृच्छ्रत्रयं महाव्याहृतिहोमञ्च कृत्वा स्नानं कार्यम्। बहुधर्मलोपे तु, स्मृत्युक्तं प्रायश्चित्तान्तरं कार्यम्। अथ प्रयोगः। देशकालौ सङ्कीर्त्य मम ब्रह्मचर्यनियमलोपजनितसम्भावितदोषपरिहारेण स्नानाधिकारसम्पादनद्वारा श्रीपरमेश्वरप्रीत्यर्थमाज्यहोमपूर्वकं कृच्छ्रत्रयं तथा गोदानादिव्रतलोपे प्रतिव्रतमेकैककृच्छ्रगणनया गायत्र्या घृतहोमपूर्वकं प्रायश्चित्तमहमाचरिष्ये। इति सङ्कल्प्य विधिवदग्निं प्रतिष्ठाप्याऽऽज्यतन्त्रेण व्याहृतिहोमान्तं कृत्वा प्रधानाज्याहुतीर्जुहुयात्। यथा। व्याहृतीनां विश्वामित्रजमदग्निभरद्वाजभृगव ऋषयो, गायत्र्युष्णिगनुष्टुप्बृहत्यश्छन्दांसि, अग्निवायुसूर्यप्रजापतयो देवता, आज्यहोमे विनियोगः। ओं भूः स्वाहा। अग्नय इदं न मम। ओं भुवः स्वाहा। वायव इदं न मम। ओं स्वः स्वाहा। सूर्यायेदं न मम। भूर्भुवस्स्वः स्वाहा। प्रजापतय इदं न मम। प्रजापतिर्ऋषिर्यजुरग्निर्देवता प्रायश्चित्तहोमे विनियोगः। पाहि नो अग्न एनसे स्वाहा। अग्नय इदं न मम। प्रजापतिर्ऋषिर्यजुर्विश्वेदेवा देवता प्रायश्चित्तहोमे विनियोगः। पाहि नो विश्ववेदसे स्वाहा। विश्वेभ्यो देवेभ्य इदं न मम। प्रजापतिर्ऋषिर्यजुर्विश्वेदेवा देवता

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रायश्चित्तहोमे विनियोगः । यन्नं पाहि विभावसो स्वाहा । विश्वेभ्यो देवेभ्य इदं न मम । प्रजापतिर्ऋषिर्यजुः शतक्रतुर्देवता प्रायश्चित्तहोमे विनियोगः । सर्वं पाहि शतक्रतो स्वाहा । शतक्रतव इदं न मम । प्रजापतिर्ऋषिर्गायत्रीच्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः । पुनरूर्ज्जा निवर्त्तस्व पुनरग्न इषायुषा । पुनर्नः पाहि विश्वतः स्वाहा । अग्नय इदं न मम । प्रजापतिर्ऋषिर्गायत्रीछन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः । सह रय्या निवर्त्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्निया विश्वतस्परि स्वाहा । अग्नय इदं न मम । पुनर्व्यस्तसमस्तव्याहृतिचतुष्टयं हुत्वा, गोदानादिव्रतलोपप्रायश्चित्तार्थं प्रत्येकमष्टोत्तरशतमष्टाविंशतिमष्टौ वा गायत्र्या आज्याहुतीश्च हुत्वा, एकैकं कृच्छ्रं चरित्वा, व्याहृतिहोमादितन्त्रशेषं समापयेत् । इति ब्रह्मचारिव्रतलोपप्रायश्चित्तप्रयोगः ॥

अथ स्नानप्रयोगः ॥ अथ ब्रह्मचर्य्यव्रतान्ते ऐन्द्रचरुं कृत्वाऽऽचार्य्यगृहस्य पुरस्तादुत्तरतस्सर्वत आच्छादिते देशे प्रागग्रेषु दर्भेषूदङ्मुख आचार्य्य उपविशति, उदगग्रेषु दर्भेषु प्राङ्मुखो ब्रह्मचार्य्युपविशति । ततो नान्दीमुखश्राद्धं कुर्य्यात् । व्रीहि-शालि-मुद्ग-सर्षप-गोधूम-तिल-यवानुदकपूरिते भाण्डे निक्षिप्योष्णं कृत्वा तेन गन्धद्रव्ययुक्तेन शीतजलमिश्रितेनोष्णोदकेनाचार्य्यो ब्रह्मचारिणमभिषिञ्चेत् । अथवा, ब्रह्मचारी स्वयमेवात्मानमभिषिञ्चेत् । अस्यैव पक्षस्य मुख्यत्वे प्रमाणमु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पन्यस्यत्याचार्यः "मन्त्रवर्णा भवतीति" । अस्मिन्नभिषेकमन्त्रे 'तेनासौ मामभिषिञ्चामी'त्यस्मच्छब्दप्रयोगाल्लिङ्गात् । ततो ब्रह्मचारी ब्राह्मणाननुज्ञाप्य, गणेशं सम्पूज्य, परमेश्वरप्रीत्यर्थमाप्लवनं करिष्ये इति सङ्कल्प्य, ब्रह्मचारी स्वयमञ्जलिना पूर्वानीतमुष्णोदकमादाय ये अप्स्विति भूमावुत्सृजति । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुरग्निर्देवता भूमौ जलप्रक्षेपणे विनियोगः । ये अप्स्वन्तरग्नयः प्रविष्टा गोह्य उप गोह्यो मरूको मनोहाः । खलो विरुजस्तनूदूषिरिन्द्रियहा अति तान् सृजामि ॥ पुनरुष्णोदकं गृहीत्वा यदपामितिमन्त्रेण भूमौ प्रक्षिपति । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुरग्निर्देवता भूमौ जलप्रक्षेपणे विनियोगः । यदपां घोरं यदपां क्रूरं यदपामशान्तमति तत्सृजामि ॥ पुनरञ्जलिनोष्णोदकमादाय योरोचन इतिमन्त्रेणात्मनश्शिरस्यभिषेचनं कुर्यात् । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुरग्निर्देवता समावर्त्तनाभिषेके विनियोगः । यो रोचनस्तमिह गृह्णामि तेनाहं मामभिषिञ्चामि ॥ पुनरुदकमादाय यशस इतिमन्त्रेणात्मानमभिषिञ्चेत् । पूर्वमन्त्रवदृष्यादिः । यशसे तेजसे ब्रह्मवर्चसाय बलायेन्द्रियाय वीर्यायान्नाद्याय रायस्पोषाय त्विष्या अपचित्यै ॥ पुनरञ्जलिनाऽपो गृहीत्वा येन स्त्रियमितिमन्त्रेण स्वशिरस्यभिषिञ्चेत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिः षडष्टकामहापङ्क्तिश्छन्दोऽश्विनौ देवते अभिषेके विनियोगः । येन स्त्रियमकृणुतं येनापामृषतꣳ सुराम् । येनाक्षानभ्यषिञ्चतं येनेमां पृथिवीं महीं यद्वां तदश्विना



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



यशस्तेन मामभिषिञ्चतम् । पुनरञ्जलिनोदकमादाय तूष्णीं चतुर्थमात्मानमभिषिञ्चेत् । तत उत्थायादित्याभिमुख आदित्यमुपतिष्ठेदुद्यन्भ्राजभृष्टिभिरित्यादिभिश्चतुर्भिर्मन्त्रैः । तद्यथा । चतुर्णां मन्त्राणां मध्ये प्रातर्ल्लिङ्गेन मन्त्रेण प्रातरादित्योपस्थानम् । मध्यान्हे सान्तपनलिङ्गेन, सायान्हे सायंलिङ्गमन्त्रेणोपस्थानम् । त्रिष्वपिकालेषु चक्षुरसीतिचतुर्थमन्त्रेण तत्तत्कालोपस्थानानन्तरमुपस्थानं कुर्यात् । त्रयाणां मन्त्राणां प्रजापतिर्ऋषिर्यजुस्सूर्यो देवता सूर्योपस्थाने विनियोगः । चक्षुरसीति मन्त्रस्य प्रजपतिर्ऋषिरनुष्टुप्छन्दस्सूर्यो देवता सूर्योपस्थाने विनियोगः । उद्यन्भ्राजभृष्टिभिरिन्द्रो मरुद्भिरस्थात् प्रातर्यावभिरस्थात् । दशसनिरसि दशसनिं मा कुर्वात्वा विशाम्यामा विश ॥ चक्षुरसि चक्षुष्ट्वमस्यव मे पाप्मानं जहि सोमस्त्वा राजाऽवतु नमस्तेऽस्तु मा माहिꣳसीरिति प्रातः । उद्यन्भ्राजभृष्टिभिरिन्द्रो मरुद्भिरस्थात् सान्तपनेभिरस्थात् शतसनिरसि शतसनिं मा कुर्वात्वा विशाम्यामा विश ॥ पूर्ववच्चक्षुरसीति च मध्यान्हे । उद्यन्भ्राजभृष्टिभिरिन्द्रो मरुद्भिरस्थात्सायं यावभिरस्थात्सहस्रसनिरसि सहस्रसनिं मा कुर्वात्वा विशाम्यामा विश ॥ चक्षुरसीति च सायम् । ततो मेखलामुदुत्तमं वरुणपाशमिति मन्त्रेणाधस्तान्मोचयति । अस्य मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो वरुणो देवता मेखलामोचने विनियोगः । उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमꣳ श्रथाय । अथादित्य व्रते वयं तवानागसो अदितये स्याम ॥ १ ॥ अजिनदण्डयोस्तूष्णी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



न्त्याग आचारात् । ततो ब्राह्मणान्भोजयित्वा स्वयं भुक्त्वा केशश्मश्रुरोमनखानि वापयेच्छिखावर्जम् । अत्र "ब्राह्मणान्भोजयित्वेत्यनेन नान्दीमुखश्राद्धं विधीयत" इति भट्टनारायणादयः । "कर्मान्तविहितं ब्राह्मणभोजनमत्र विधीयत" इति भवदेवभट्टप्रभृतयः । "उभयस्मादन्यदेवेदं ब्राह्मणभोजनमि"त्यपरे । कतम? एषां पक्षो ज्यायानित्यत्र तृतीय इति ब्रूमः । श्राद्धकर्माङ्गब्राह्मणभोजनयोर्विहितत्वादादावन्ते च तयोः प्राप्तेः कपिञ्जलाधिकरणन्यायेन त्रयो भोजयितव्याः । ततः स्नात्वाऽऽत्मानमलङ्कृत्याहतं वस्त्रद्वयं परिधाय पुष्पमालां शिरसि बध्नीयाच्छ्रीरसीतिमन्त्रेण । अस्य मन्त्रस्य प्रजापतिऋषिर्यजुश्श्रीर्देवता स्रग्बन्धने विनियोगः । श्रीरसि मयि रमस्व । नेत्र्यौ स्था इतिमन्त्रेण पादयोरुपानहावाबध्नीयात् । अस्य मन्त्रस्य प्रजापतिर्यजुरुपानहौ देवते आबन्धने विनियोगः । नेत्र्यौ स्थो नयतं माम् । गन्धर्वोऽसीतिमन्त्रेण वैणवं दण्डं परिगृह्णाति । अस्य प्रजापतिर्यजुर्दण्डो देवता दण्डग्रहणे विनियोगः । गन्धर्वोऽस्युपाव उप मामव । ततस्सपरिषत्कमाचार्यमभ्येत्याचार्य्यं परिषदञ्च मन्त्रेण पश्यति । अस्य प्रजापतिर्यजुराचार्य्यो देवता प्रेक्षणे विनियोगः । यक्षमिव चक्षुषः प्रियो वो भूयासम् । तत आचार्य्यसमीप उपविश्य मुखनासिकाक्षिकर्णच्छिद्राणि स्पृशन्नोष्ठापिधानेतिमन्त्रं जपति । अस्य मन्त्रस्य प्रजापतिऋषिरनुष्टुप्छन्दो नकुली देवता मुखादिस्पर्शने विनियोगः । ओष्ठापिधाना नकुली

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



हस्तपरिमितः पविः । जिह्वे मा विह्वलो वाचं चारुमाद्येह वादय । अस्मिन्काले स्नातकायाचार्येण मधुपर्को देयो वक्ष्यमाणविधिना । ततो वृषभयुक्तं रथं गत्वा द्वे चक्रे ईषे च । मन्त्रेणाभिमृशेत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो वनस्पतिर्देवता पादत्रयेणाभिमर्शने चतुर्थपादेनास्थाने विनियोगः । वनस्पते वीड्वंगो हि भूया अस्मत्सखा प्रतरणस्सुवीरः । गोभिस्सन्नद्धो असि वीडयस्व । ततस्तूष्णीं रथमारुह्य रथे मन्त्रेण तिष्ठति । मन्त्रः । आस्थाता ते जयतु जेत्वानि । ततस्तेनैव रथेन प्रागुदग्वा गत्वा प्रादक्षिण्येनावर्त्याचार्यसमीपमागच्छति । वामदेव्यगानम् । "अस्मिन्काले स्नातकायाचार्य्येणमधुपर्को देयो नतु प्रागिति" कौत्थलशाखिनः । यथाशक्ति ब्राह्मणभोजनं कुर्यात् ॥ इति स्नानप्रयोगः ॥

अथ स्नातकव्रतान्युपदिशति । स्नानादूर्द्धं प्राचीनशिष्टानां ये तावदाचारास्तान्परिशीलयेत् । वृद्धाचारान्प्रचक्षत आचार्य्याः । अजातनवयौवनाया मैथुनं वर्ज्जयेत् । काकवन्ध्यायाः कन्याया विवाहं वर्ज्जयेत् । रजस्वलाया मैथुनं नेच्छेत् । समानप्रवरां नोद्वहेत् । गवाक्षादिद्वारेणाहृतमन्नं नाश्नीयात् । पक्वान्नस्यैवायं निषेधः । द्विवारं पक्वस्यान्नस्य भोजनं न कुर्यात् । पर्य्युषितान्नं न भुञ्जीतान्यत्र शाकमांसयवपिष्टविकारेभ्यः । वृष्टिसमये गमनं न कार्यम् । स्वयं हस्तेनोपानहौ न धरेत् । कूपस्यावेक्षणं न कुर्यात् । स्वयं फलानि वृक्षमारुह्य न गृह्णीयात् । गन्धरहितपुष्पमालां न धारयेत् । सुवर्णमालाधारणे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



न दोषः । मालेत्युक्ते स्रगिति वाचयित्वा धारयेत् । अभद्रे भद्रमिति वृथावाचं परिहरेत । भद्रे भद्रमिति ब्रूयात् । विद्यास्नातको, व्रतस्नातको, विद्याव्रतस्नातक, इति त्रयस्स्नातका भवन्ति । तत्राद्यो ब्रह्मचर्यव्रतेनैव वेदमधीत्यान्ते गोदानादीनि कृत्वा स्नाति । द्वितीयस्तत्तत्काले गोदानादीनि व्रतान्यनुष्ठाय किञ्चिद्वेदमधीत्य स्नाति । तृतीयस्तु मन्त्रव्रतानुष्ठानपूर्वकं मन्त्रवेदभागमधीत्य समग्रवेदमप्यधीत्य स्नाति । त्रयाणां मध्ये तृतीयश्श्रेष्ठः । प्रथमद्वितीयौ तुल्यौ । आर्द्रवस्त्रपरिधानं न कुर्यात् । एकवस्त्रधारी न भवेत् । मनुष्यस्तोत्रं न कुर्यात् । अदृष्टं दृष्टमिति न वदेत् । अश्रुतं श्रुतमिति न वदेत् । वेदाभ्यासविरुद्धाल्लौकिकव्यापारान्त्यजेत् । तैलपात्रमिव शरीररक्षणं कुर्यात् । न वृक्षमारोहेत् । सायम्प्रातःकाले ग्रामान्तरं न गच्छेत् । एकाकी ग्रामान्तरं न गच्छेत् । वृषलैः सह ग्रामान्तरं न गच्छेत् । महामार्गे सति कुत्सितमार्गं न गच्छेत् । भृत्यरहितो ग्रामान्तरं न गच्छेत् । समावृत्तेनैतानि व्रतानि सङ्कल्पनीयान्यनुष्ठेयानि च । अन्यानपि शिष्टाचाराननुतिष्ठेत् ॥ इति स्नातकव्रतोपदेशः ॥

अथ गोपुष्टिप्रदकाम्यकर्माण्युच्यन्ते ॥ तत्रादावनुमन्त्रणम् । गवानुमन्त्रणाङ्गं पूर्वदिने नान्दीमुखश्राद्धं प्रथमारम्भे कुर्यात् । त्रिरात्रोपवासश्च । प्रातर्गवां पुष्ट्यर्थमरण्यं नीयमानानां गवामनुमन्त्रणं करिष्ये इति सङ्कल्प्य गृहादरण्यं नीयमाना गा इमा मे विश्वत इतिमन्त्रेणानुमन्त्रयते । अस्य मन्त्रस्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रजापतिर्ऋषिरनुष्टुप्छन्द इन्द्रो देवता गवानुमन्त्रणे विनियोगः। इमा मे विश्वतो वीर्या भव इन्द्रस्य रक्षतं । पूषाꣳस्त्वं पर्याव- र्तयानष्टा आयन्तु नो गृहान् । सायमरण्यादृहं प्रत्यागता गा इमा मे मधुमतीरितिमन्त्रेणानुमन्त्रयते । अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्द इन्द्रो देवता प्रत्यागतगवानुमन्त्रणे विनियोगः । इमा मे मधुमतीर्मह्यमनष्टाः पयसा सह । गाव आज्यस्य मातर इहेमाः सन्तु भूयसीः । एतदुभयं प्रत्यहं- कार्य्यम् । इति गवानुमन्त्रणप्रयोगः ॥

अथ गवां प्रसवसमये पुष्टिप्रदश्लेष्मभक्षणप्रयोग उच्यते। गवां प्रसवसमये प्रथमजातस्य वत्सस्य माता गौर्जिह्वयाऽऽस्वादं यावत्कालं न करोति, ततः पूर्वमेव यजमानो वत्सस्य ललाटं स्वजिह्वया तूष्णीमास्वाद्य, मनसा शीघ्रं मन्त्रमुच्चार्य्य, श्लेष्म भक्षयति। गवां पुष्ट्यर्थं ललाटोल्लेहन-निगरण-कर्मणी करिष्ये। अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुःश्लेष्मा देवता श्लेष्मभक्षणे विनियोगः । गवाꣳ श्लेष्मासि गावो मयि श्लिष्यन्तु । "वसन्तादारभ्य मासत्रयेऽस्यानुष्ठानमिति" केचित् । "वर्षा- स्वित्यन्ये" । तदुभयं न साधु । प्रसवकालस्यानियतत्वात् । इति श्लेष्मभक्षणप्रयोगः ॥

अथ गोपुष्ट्यर्थं विलयनहोमः । तदङ्गं नान्दीश्राद्धम् । सर्वासु गोषु प्रसूतासु निशायां गोष्ठेऽग्निं प्रतिष्ठाप्य क्षिप्रहोमविधिना सङ्कृत्वासङ्कृत्वेतिमन्त्रेण घृतविलयनेनै- काहुतिं जुहुयात्। विलयनशब्देन घृतनिःस्पन्दनमर्द्धमथितं दधि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



चोच्यते । अनयोरन्यतरेण होमः । नाच विलयनसंस्कारो, न परिस्तरणब्रह्मोपवेशनादिकम् । काम्यत्वाद्भूमिजपमाचम् । प्रपदविरूपाक्षौ न स्तः । क्षिप्रहोमे तयोर्निषेधात् । अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दः पूषा देवता विलयनहोमे विनियोगः । सङ्क्रुह्णा सङ्ग्रहाणा ये जाता पशवो मम । पूषैषाᳬ शर्म यच्छतु यथा जीवन्तो अप्ययात् स्वाहा । पूष्ण इदं न मम । क्षिप्रहोमे विधिस्सायम्प्रातर्होमविधिना व्याख्यातः । इति विलयन होमप्रयोगः ॥

अथ वत्समिथुनयोर्लक्षणं कुर्य्याद्गवां पुष्ट्यर्थम् । अच चिराचमुपवासस्तदङ्गं नान्दीश्राद्धम् । वत्समिथुनयोः कर्णयोर्लक्षणमहं करिष्ये । ततः प्रसूतासु गोषु ताम्रमयेनासिना वत्सस्य चिन्हं कुर्याद्भुवनमसीतिमन्त्रेण । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्गायत्रीछन्दस्स्वधितिर्देवता वत्सस्य कर्णयोश्चिन्हकरणे विनियोगः । भुवनमसि साहस्रमिन्द्राय त्वा सृमो ददात् । अक्षतमरिष्टमिलादम् । गोपोषणमसि गोपोषस्येशिषे गोपोषाय त्वा सहस्रपोषणमसि सहस्रपोषस्येशिषे सहस्रपोषाय त्वा । अस्य मन्त्रस्य देवतादयः पूर्ववत् । एकः कर्णो यथा द्वेधा दृश्यते तथा छेदनं द्वयोः कर्णयोः कुर्यात् । कर्णभेदान्मन्त्रावृत्तिः । प्रथमं दक्षिणकर्णे पश्चाद्वामे । प्रथमं पुंस एव पश्चात्स्त्रियश्चिन्हकरणम् । "पुंसोऽग्रभागे स्त्रियोऽधस्ताच्चिन्हकरणमि"ति व्याचक्षाणो 'मिथुनं कर्णयोरि'ति मन्त्रलिङ्गं पीडयेदतस्तदुपेक्ष्यम् । असिना स्वधितिना चिन्ह-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



कुर्यात् । "लोहितेन स्वधितिनेतिमन्त्रलिङ्गादि"ति भट्टनारायणोपाध्यायः । "असिना वत्समिथुनयोर्लक्षणं करोतीत्यचासिपदश्रुतेर्लिङ्गाद्बलीयस्त्वादसिपदं कृत्वा खड्गबोधकमि"ति केचित् । ततो लोहितेन स्वधितिनेतिमन्त्रेणानुमन्त्रयते । अस्य मन्त्रस्य प्रजापतिर्ऋषिस्त्रिपादनुष्टुप्छन्दो गौर्देवता कृतलक्षणस्यानुमन्त्रणे विनियोगः । लोहितेन स्वधितिना मिथुनं कर्णयोः कृतम् । यावतीनां यावतीनां व ऐषमो लक्षणमकारिषम् । भूयसीनां भूयसीनां व उत्तरामुत्तरां समां क्रियासम् । अत्रापि कर्णलक्षणभेदादनुमन्त्रणभेदः । तत इयं तन्तीगवाम्मातेतिमन्त्रेण वत्सबन्धनरज्जुं प्रसार्य्यमाणामनुमन्त्र्य पुनस्तेनैव मन्त्रेण बद्धवत्सरज्जुमप्यनुमन्त्रयेत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो वत्सो देवता प्रसार्य्यमाणरज्ज्वभिमन्त्रणे विनियोगः । इयं तन्ती गवां माता सवत्सानां निवेशिनी । सा नः पयस्वती दुहा उत्तरामुत्तरां समाम् ॥ १ ॥ इदञ्च कृत्यं प्रत्यहं कार्यम् । इति वत्समिथुनलक्षणप्रयोगः ॥

अथ गोयज्ञप्रयोगः ॥ स च गवां पुष्ट्यर्थः । तस्य कालः परिभाषोक्त उदगयनादिः । तदङ्गं नान्दीश्राद्धं कृत्वा गवां पुष्ट्यर्थं गोयज्ञस्थालीपाकं करिष्ये इति सङ्कल्प्य सर्वं पार्वणस्थालीपाकवत्कुर्यात् । निर्वापकाले विशेषः । अग्नये त्वा जुष्टं निर्वपामि । पूष्णे त्वा जुष्टं निर्वपामि । इन्द्राय त्वा जुष्टं निर्वपामि । ईश्वराय त्वा जुष्टं निर्वपामि । पयसि चरुश्रपणम् । अस्य कर्म्मणः काम्यत्वाद्वक्ष्यमाणप्रकारेण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



भूमिजपपरिसमूहनविरूपाक्षप्रपदजपान् कुर्य्यात् । आज्यभागान्ते चरुहोमः । अग्नये स्वाहा । अग्नय इदं न मम । पूष्णे स्वाहा । पूष्ण इदं न मम । इन्द्राय स्वाहा । इन्द्रायेदं न मम । ईश्वराय स्वाहा । ईश्वरायेदं न मम । वृषभस्य कर्णे शृङ्गे वाऽऽभरणम्बद्ध्वा, घासादिकञ्च दत्वा, पूजनं कुर्य्यात् । सायमागतानां गवां गन्धोदकैरभ्युक्षणम् । ब्रह्मणे पूर्णपात्रदानम्, वामदेव्यगानं, ब्राह्मणभोजनं च, कुर्यात् । इति गोयज्ञप्रयोगः ॥

अथाश्वयज्ञप्रयोग उच्यते । तस्य प्रयोगो गोयज्ञवद्व्याख्यातस्तथाऽपि विशेषो ऽभिधीयते । गोयज्ञोऽश्वयज्ञश्च विद्यमानानां गवामश्वानां च पुष्ट्यर्थः । "पुष्टिकाम" इति सूत्रोक्तेरविद्यमानासु गोष्वसत्स्वश्वेषु नायं गोयज्ञोऽश्वयज्ञश्च । तथा च विद्यमानानामश्वानां पुष्ट्यर्थमश्वयज्ञमहं करिष्ये इति सङ्कल्प्य पूर्ववत्पायसचरुं कुर्यात् । निर्वापकाले विशेषः । गोयज्ञवदग्निपूषेन्द्रेश्वरेभ्यो हविर्निरूप्य यमवरुणयोर्निर्वापः । यमाय त्वा जुष्टं निर्वपामि । वरुणाय त्वा जुष्टं निर्वपामीत्याज्यभागान्ते गोयज्ञवदग्न्यादिभ्यश्चतसृभ्यो देवताभ्यश्चरुं हुत्वा, यमाय स्वाहा । यमायेदं न मम । वरुणाय स्वाहा । वरुणायेदं न ममेति जुहुयात् । अनयोः काम्यत्वात्काम्येषु वक्ष्यमाणत्रिरात्रोपोषणमशक्तौ त्रिरात्रमेकभक्तं वा । अन्ये तु "मार्गपालीदिने गोयज्ञो, नीराजनदिनेऽश्वयज्ञः" इति कर्मप्रदीपवचनादित्याहुः ॥ इत्यश्वयज्ञप्रयोगः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अथ श्रवणाकर्मप्रयोग उच्यते। तच्छ्रावण्यां पौर्णमास्यां कर्त्तव्यम्। तस्य यावज्जीवं प्रतिसंवत्सरमनुष्ठेयत्वात्प्रथमप्रयोगे नान्दीश्राद्धं कुर्यात्। प्रातरेव श्रवणाकर्म्म करिष्ये इति सङ्कल्प्याग्न्यायतनस्य पुरस्तात्संस्कृते स्थण्डिल औपासनाग्नेरेकदेशमाहृत्य प्रणयति। ततोऽतिप्रणीतस्याग्नेश्चतसृषु दिक्षु किञ्चिदधिके प्रक्रमान्तरिते देशे गोमयेनोपलिप्य प्रादेशमात्रं चतुरस्रं स्थण्डिलं कुर्यात्। त्रिपदः प्रक्रमो ग्राह्य इति। "तदुक्तं 'कर्मप्रदीपे'। संसक्तपदविन्यासस्त्रिपदः प्रक्रमः स्मृतः। स्मार्त्त कर्मणि सर्वत्र श्रौते त्वध्वर्युणोदित" इति वचनात्। ततोऽग्निमुपसमाधायातिप्रणीताग्नेरुत्तरत उदगग्रेषु दर्भेषु यवान् भर्जनकपालमुलूखलं मुसलं शूर्प्पमनुगुप्ता अपश्च सादयित्वाऽनुगुप्ताभिरद्भिः प्रोक्ष्य, चक्राघटितं मृन्मयं कपालमग्नौ संस्थाप्य, तस्मिन् कपाले सकृद्गृहीतयवमुष्टिं प्रक्षिप्य भर्ज्जति यथा यवा दग्धा न भवेयुस्तथा। ततो भ्रष्टान् यवानुदगुद्वास्य, प्रणीताग्नेः पश्चादुलूखलं दृढं संस्थाप्य, तस्मिन् भ्रष्टान्यवान् प्रक्षिप्य, मुसलमादाय पार्वणस्थालीपाकवदवहननं कुर्य्यात्। यथा यवाः सक्तवो भवन्ति तथोद्वेचं कृत्वाऽवहननं कुर्यात्। एवं सम्यक् सक्तून् कृत्वा, तान् चमसे संस्थाप्य, शूर्प्पेणाच्छाद्य गृहे निदधाति। एतावत्कर्मान्हि कर्त्तव्यम्। इतः परं वक्ष्यमाणकर्मानुष्ठानाय सञ्चरप्रदेशोऽतिप्रणीताग्नेर्दक्षिणपश्चिमयोर्मध्यमप्रदेशः। ततोऽस्तं गते सूर्येऽतिप्रणीतास्याग्नेस्समीपं गच्छति। चमसं दर्व्वीञ्च गृही-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



त्वा ततश्चमसे स्थितान् सक्तून् शूर्प्पे निक्षिप्य चमसेनोदकं गृह्णाति। ततः सञ्चरेण प्रविश्याग्निप्रणीतस्याग्नेरुत्तरतो मार्गेण पूर्वस्यां दिशि गत्वा प्राङ्मुख उपविश्य पूर्वदिशि कृते मण्डले चमसजलं हस्तेन निनीय दर्व्या सकृत्सक्तून् गृहीत्वा मन्त्रेण बलिं निवपति। वक्ष्यमाणानां चतुर्णां मन्त्राणां प्रजापतिर्ऋषिर्निगदः सर्प्पा देवता सर्पबलिकर्मणि विनियोगः। यः प्राच्यां दिशि सर्पराज एष ते बलिः। ततश्चमसेऽवशिष्टमुदकं हस्तेन गृहीत्वा बलिसमीपे निक्षिपति यथा बलिस्स्वस्थानान्न प्रच्युतो भवेत्। ततोऽप्रदक्षिणेनाभ्यावृत्य चमसं दर्वीञ्चाभ्युक्ष्य, युगपदेव प्रताप्य, पूर्ववच्चमसेनोदकं गृहीत्वा, दर्व्या सक्तून् गृहीत्वा, ऽग्नेरुत्तरतो गत्वा, दक्षिणस्यां दिशि दक्षिणाभिमुख उपविश्य, पूर्वकृतदक्षिणमण्डले चमसादुदकं पाणिना निनीय, दर्व्या सक्तून् निवपति, यो दक्षिणस्यां दिशि सर्पराज एष ते बलिरित्येतावता मन्त्रेण। पूर्ववच्चमसोदकं हस्तेन बलिसमीपे निक्षिपेत्। ततः पूर्ववदभ्यावृत्य, चमसदर्व्यावभ्युक्ष्याग्नौप्रताप्य, पश्चिममण्डलस्य पुरतः प्रत्यङ्मुख उपविश्य, तत्रैव पश्चिमस्थण्डिलेऽपो निनीय, मन्त्रेण बलिं निवपति, यः प्रतीच्यां दिशि सर्पराज एष ते बलिरिति मन्त्रः। पुनः पूर्ववदपो निक्षिप्य चमसदर्व्यावभ्युक्ष्य प्रतापयेत्। नाचाभ्यावर्त्तनं तत्रैव स्थितत्वात्। तत उत्तरस्थण्डिलस्य दक्षिणत उत्तराभिमुखो भूत्वोत्तरस्थण्डिलेऽपो निनीय, मन्त्रेण सक्तून् निक्षिप्य, पुनरपोऽवनयति पूर्ववत्। तत्र बलिमन्त्रः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



य उदीच्यां दिशि सर्पराज एष ते बलिः । अत्र "केचित्प्रतीच्यामुदीच्यां चमसदर्व्योः प्रोक्षणप्रतापनयोः प्रतिषेधं वदन्ति" तेषामेवं प्रतीच्येवमुदीचीतिसूत्रविरोधस्स्पष्ट एव । व्यावर्त्तननिषेधस्तु तत्र स्थितत्वात्स्पष्टार्थः । ततोऽवशिष्टसक्तून् शूर्प्पेणाग्निप्रणीताग्नौ तूष्णीं प्रक्षिप्य पूर्वाक्तदक्षिणपश्चिममध्यस्थ्वरमार्गेण गृह्याग्निसमीपमागच्छति । ततस्तस्याग्नेः पश्चात् भूमौ न्यञ्चौ पाणी प्रतिष्ठाप्य नमः पृथिव्या इति मन्त्रं जपेत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता भूमिजपे विनियोगः । नमः पृथिव्यै दंष्ट्राय विश्वभृन्मा ते अन्ते रिषाम सं‌हृते मा विवधीर्विहृते माऽभिसंबधीः । ऋत्विक्कर्तृकपक्षेऽप्यस्यैव मन्त्रपठनं, नान्यचोद्यः । सन्ध्यां निर्वर्त्त्य गृह्याग्नौ सायमौपासनं विधाय पायसस्थालीपाकं कुर्य्यात् । "अत्र केचिद्वैश्वदेवबलिहरणानन्तरं स्थालीपाकं वदन्ति" तन्न साधु, प्रमाणाभावात्, प्रदोषे स्थालीपाकविधिविरोधाच्च, सन्ध्याहोमयोर्नियतकालत्वात्कालात्यये प्रायश्चित्तश्रवणाच्च तयोः पूर्वमनुष्ठानं न्याय्यम् । बलिहरणन्तु न तथा । तत आचान्तोदकः प्राणानायम्य श्रवणाकर्म करिष्ये इति सङ्कल्प्याग्निमुपसमाधाय ब्रह्मोपवेशनादिब्रह्मणे पूर्णपात्रदक्षिणादानान्तं पार्वणस्थालीपाकवत्कुर्यात् । तत्र विशेषः । पात्रासादनकाले पयसोऽप्यासादनं समूलदर्भस्तम्बस्य च । निर्वापकाले श्रवणाय त्वा जुष्टं निर्वपामि । विष्णवे त्वा जुष्टं निर्वपामि । अग्नये त्वा जुष्टं निर्वपामि । प्रजापतये त्वा जुष्टं निर्वपामि ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



विश्वेभ्यो देवेभ्यस्त्वा जुष्टं निर्वपामि । आज्याभागान्ते पायस-चरुहोमाः पञ्च । श्रवणाय स्वाहा । श्रवणायेदं न मम । विष्णवे स्वाहा । विष्णव इदं न मम । अग्नये स्वाहा । अग्नय इदं न मम । प्रजापतये स्वाहा । प्रजापतय इदं न मम । विश्वेभ्यो देवेभ्यः स्वाहा । विश्वेभ्यो देवेभ्य इदं न मम । ब्रह्मणे दक्षिणादानान्तेऽग्नेरुत्तरतस्समूलं दर्भस्तम्बं प्रागग्रं प्रतिष्ठाप्य सोमो राजेत्येतन्मन्त्रं याꣳसन्धासमधत्तेति च मन्त्रं जपति। उभयोर्मन्त्रयोः प्रजापतिर्ऋषिर्जुष्टी सोमसूर्यौ देवते जपे विनियोगः । सोमो राजा सोमस्तम्बो राजा सोमोऽस्माकꣳ राजा सोमस्य वयꣳ स्मः । अहिजम्भनमसि सोमस्तम्बꣳ सोमस्तम्बमहिजम्भनमसि ॥ १ ॥ याꣳ सन्धाꣳ समधत्त यूयꣳ सप्तऋषिभिस्सह । ताꣳ सर्पामात्यक्रामिष्ट नमो वो अस्तु मा नो हिꣳसिष्ट । सूत्रे "एतमिति" निर्देशा-दन्यकर्त्तृकत्वयज्ञेऽनयोर्जपः । ततो वामदेव्यगानम् ब्राह्मण-भोजनादिकञ्च । दर्भस्तम्बे न सङ्ख्यानियमः । "यज्ञवास्तुनि मुष्ट्यां च स्तम्बे दर्भचटौ तथा । दर्भसङ्ख्या न विहिता विष्टरास्तरणेष्वपि" इति कर्मप्रदीपोक्तेः । इति श्रवणा-कर्मप्रयोगः ॥

तत उत्तरे दिवसे प्रातर्होमानन्तरं पूर्ववदौपासनाग्नौ सक्तून् कृत्वाऽन्येन वा कारयित्वा, नूतनपात्रे संस्थाप्य, पात्रान्तरेणाच्छाद्य, गृहे स्थापयति । अतऊर्द्धमाग्रहायणीपौ-र्णमासीपर्य्यन्तं प्रतिदिनं सायंहोमात्पूर्वं तूष्णीं बलिं हरेत् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



"अत्र केचित्तूष्णीमित्युक्तेरमन्त्रकं बलिहरणं मन्यन्ते"। अपरे तु "तूष्णीमित्युक्त्या वाङ्नियमनं कथ्यन्ते मन्त्रेण बलिं हरेदि"ति वदन्ति। अत्र द्वितीयः पक्षो ज्यायानारम्भे मन्त्रपाठात्त्रैविध्यवृद्धानामाचाराच्च। आचम्य प्राणानायम्य, सर्पबलिं करिष्ये इति सङ्कल्प्य, चमसे उदकं गृहीत्वा, अपेक्षितसक्तून् शूर्पे गृहीत्वा, गृह्याग्नेः पुरस्तादेतदग्नेरुल्मुकं निधाय, तत्परितः पूर्वोक्तैश्चतुर्भिर्मन्त्रैर्बलिहरणं कुर्यात्। बलेः पुरस्तादुपरिष्टाच्चापां निनयनं, चमसदर्व्योरभ्युक्षणं प्रतपनं च। नात्र बलिशेषहोमोऽवशिष्टसक्तूनां दिनान्तरे बलिहरणायोपयोक्ष्यमाणत्वात्। नात्र त्र्यम्बकर्म। "त्र्यम्बकर्म न सर्वदे"ति निषेधात्। "बलिशेषस्य हवनमग्निप्रणयनं तथा। प्रत्यहं न भवेयातामुल्मुकं च भवेत्सदे"ति कर्मप्रदीपस्मरणात्। इत्यहरहः सर्पबलिप्रयोगः॥

अथाश्वयुजीकर्मोच्यते। आश्वयुज्यां पौर्णमास्यामाश्वयुजीकर्म कर्त्तव्यम्। प्रथमे प्रयोगेऽनुज्ञां गणेशपूजनं नान्दीमुखश्राद्धं च कुर्यात्। आश्वयुजि मासे पौर्णमास्यां प्रातरौपासनं कृत्वाऽऽश्वयुजीस्थालीपाकं करिष्ये इति सङ्कल्प्य सर्वं पार्वणस्थालीपाकवत्कुर्यात्। तत्र विशेषः। पात्रासादनेऽग्नेरुत्तरतो दधिमिश्रितं घृतं, घृतमिश्रितं पयो वा पृषातकाख्यं, चर्वर्थं पयश्च, व्रीहि-शालि-मुद्ग-गोधूम-सर्षप-तिल यवादिसर्वौषधिमिश्रिताश्चाचामयान्मणींश्चासादयेत्। होमकालेऽग्नेरीशान्यां पृषातकं स्थापयेत्। निर्वापकाले, रुद्राय त्वा जुष्टं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



निर्वपामि । पयसि चरुं श्रपयेत् । आज्यभागान्तेऽवदानधर्मेण पायसचरुमवदायानो मित्रावरुणेति प्रथमं हुत्वा, पुनश्चरुमवदाय मानस्तोक इतिमन्त्रेण द्वितीयं जुहोति । आ नो मित्रावरुणेत्यस्य प्रजापतिर्ऋषिर्गायत्रीछन्दो रुद्रो देवता चरुहोमे विनियोगः । आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतं । मध्वा रजांसि सुक्रतू स्वाहा । रुद्रायेदं न मम । मानस्तोक इति मन्त्रस्य प्रजापतिर्ऋषिर्जगतीछन्दो रुद्रो देवता चरुहोमे विनियोगः । मा नस्तोके तनये मा न आयौ मा नो गोषु मा नोऽश्वेषु रीरिषः । वीरान्मा नो रुद्र भामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे स्वाहा । रुद्रायेदं न मम । अथाष्टभिर्गोनामभिर्यथापठितैराज्येन जुहुयात् । काम्यासि स्वाहा । काम्याया इदं न मम । प्रियासि स्वाहा । प्रियाया इदं न मम । हव्यासि स्वाहा । हव्याया इदं न मम । इडे स्वाहा । इडाया इदं न मम । रन्ते स्वाहा । रन्ताया इदं न मम । सरस्वती स्वाहा । सरस्वत्या इदं न मम । मही स्वाहा । मह्या इदं न मम । विश्रुते स्वाहा । विश्रुताया इदं न मम । ततस्स्विष्टकृदादिपूर्णपात्रदक्षिणादानान्तेऽग्निं प्रदक्षिणीकृत्य पूर्वमासादितं पृषातकमानीय मन्त्रेण ब्राह्मणानवेक्षयित्वा यजमानस्स्वयमवेक्षते । अस्य मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः शुक्रो देवता ऽवेक्षणे विनियोगः । तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदश्शतं जीवेम शरदश्शतम् ॥ अवेक्षणाय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ब्राह्मणानां सन्निधानाभावे पृषातकं स्वयं पश्येत् । ब्राह्मणानितिबहुवचनादेवेक्षकास्त्रयः । बहुवचनस्य त्रित्वे पर्य्यवसानस्य 'कपिञ्जलाधिकरणे' सिद्धान्तितत्वात्। ततो ब्राह्मणान्भोजयित्वा स्वयम्भुक्त्वा जातुषान्सर्वौषधिमिश्रान्मणीनाबध्नीरन् । स्वस्त्ययनाय सायं गाः पृषातकं प्राशयित्वा सहवत्सा विवासयेत् । स्वस्ति ह्यासां भवति । आबध्नीरन्नितिबहुवचनदर्शनाद्यजमानपुत्रादीनां बाहौ मणिबन्धनम् । परिभाषासूत्रेण कर्मान्ते विहितब्राह्मणभोजनमत्र द्विरेव कर्त्तव्यम् । "ब्राह्मणान्भोजयित्वा स्वयं भुक्त्वा जातुषान्मणीनिति" पुनस्सूत्रकृतोक्तत्वात् । पर्वणि रात्रिभोजननिषेधस्मरणाच्च । केचित्तु "कर्मान्ते कर्त्तव्यब्राह्मणभोजनादन्यदेवेदं ब्राह्मणत्रयभोजनमिति" वदन्ति । अन्ये तु, "ब्राह्मणान्भोजयित्वेत्यत्र पृषातकं भोजयेदिति" व्याचक्षते । एतदपि शास्त्रार्थापरिज्ञानविलसितम् । तथाहि पूर्वमीमांसायां शाबरभाष्ये जिज्ञासाऽधिकरणे । "लोके येष्वर्थेषु प्रसिद्धानि पदानि तानि सति सम्भवे तदर्थान्येव सूत्रेष्वित्यवगन्तव्यम् । नाध्याहारादिभिरेषां परिकल्पनीयोऽर्थः परिभाषितव्यो वे"त्युक्तत्वात् । अत्राश्रुतपृषातकपदाध्याहारप्रसङ्गः । किञ्च पृषातकस्य गोभक्षणं विदधत्सूत्रं व्याकुप्येत । न हि पृषातकभक्षणेन ब्राह्मणानां तृप्तिस्स्यात् । तस्मात्प्रथमत उक्तार्थ एव शिष्टैरादर्त्तव्य इत्यलम् । 'लाक्षामयमणिबन्धन'मपि नित्यं न तु काम्यम् । 'स्वस्त्ययनार्थमि'ति तु नाधिकारविधिः, वाक्यभेदप्रसङ्गात् । किन्तु मणिबन्धनस्तावकम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



एतेन "मणिबन्धनं काम्यकर्तेऽपि न दोष" इति केषाञ्चिदुक्तिः परास्ता, निर्मूलत्वात्। ननु, मैत्रावरुण्या ऋचा रौद्रचरुहोमे कथं? विनियोग उक्तः, "अन्यस्यै देवतायै हविर्निरूप्यान्यस्यै न हूयत" इति तु न्याय्यम्, "निरूप्य हविरन्यस्मा अन्यस्मै न हि हूयत" इति कर्मप्रदीपस्मरणान्मित्रावरुणचरुहोमे विनियोगो युक्त इति चेन्न, "रौद्रश्चरुः" इति श्रुते रौद्रचरुमधिकृत्यानोमित्रावरुणेति प्रथमामिति श्रुतेश्च। अन्यत्रापि ऐन्द्र्या ऋचो गार्हपत्योपस्थाने विनियोगो दृश्यते, तद्वदत्रापि लिङ्गम्बाधित्वा श्रुत्या रुद्रप्रतिपादकोयमृग्भवितुमर्हति, केनापि योगेन मित्रावरुणशब्दो रुद्रे वर्त्तिष्यते। अधिकं मीमांसान्यायविद्भिरूह्यम्। इत्याश्वयुजीकर्मप्रयोगः ॥

अथ नवयज्ञप्रयोग उच्यते। स च नित्यो गौतमेन नित्यसंस्कारमध्ये परिगणितत्वात्। स च नूतनव्रीहिभिः कर्त्तव्यो, 'नवयज्ञ' इत्यन्वर्थसंज्ञाकरणात्। तस्य कालः सूत्रान्तरोक्तः शरत्। तत्रापि शुक्लपक्षे देवनक्षत्रममावास्या पौर्णमासी वा। उक्तकालातिक्रमेऽनिष्ट्वा नवयज्ञेन नवान्नभक्षणे 'वैश्वानरश्चरुः प्रायश्चित्तं' परिशिष्टोक्तादित्यधस्तान्निरूपितम्। नवयज्ञस्य प्रथमारम्भे नान्दीमुखश्राद्धम्। प्रातरौपासनं कृत्वा ब्राह्मणाननुज्ञाप्य गणेशपूजां कुर्यात्। प्राणानायम्य सङ्कल्पं करोति नवान्नसंस्कारार्थं नवयज्ञं करिष्ये इति। ततोऽग्निमुपसमाधाय सर्वं पार्वणस्थालीपाकवत्कुर्यात्। पात्रासादनकाले प्रकृतिवत्पात्राण्यासाद्य नवान्तण्डुलान्ययश्चासादयेत्।



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



निर्वापकाले, इन्द्राग्निभ्यां त्वा जुष्टं निर्वपामि । नवानां तण्डुलानां निर्वापः । पयसि चरुश्रपणम् । आज्यभागान्ते नवचरुमवदाय जुहोति । इन्द्राग्निभ्यां स्वाहा । इन्द्राग्निभ्यामिदं न मम । चरुं हुत्वा शतायुधायेत्येतत्प्रभृतिभिश्चतसृभिराज्याहुतीर्जुहोति । एषां चतुर्णां मन्त्राणां प्रजापतिर्ऋषिराद्यस्य पङ्क्तिश्छन्दः, चयाणां त्रिष्टुप्छन्द, इन्द्रो देवा ग्रीष्मादय इद्वत्सराश्च देवताः आज्यहोमे विनियोगः । शतायुधाय शतवीर्याय शतोतयेभिमातिषाहे । शतं यो नः शरदो अजीजादिन्द्रो नेषदतिदुरितानि विश्वा स्वाहा ॥ १ ॥ इन्द्रायेदं न मम । ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति । तेषां यो अज्यानि मजीजिमावहास्तस्मै नो देवाः परिदत्तेह सर्वे स्वाहा ॥ २ ॥ देवेभ्य इदं न मम । ग्रीष्मो हेमन्त उत नो वसन्तः शरद्वर्षाः सुवितन्नो अस्तु । तेषामृतूनाᳪ शतशारदानां निवात एषामभये स्याम स्वाहा ॥ ३ ॥ ग्रीष्मादिभ्य इदं न मम । इद्वत्सराय परिवत्सराय संवत्सराय कृणुता बृहन्नमः । तेषां वयᳪ सुमतौ यज्ञियानां जोगजीता अहता स्याम स्वाहा ॥ ४ ॥ इद्वत्सरादिभ्य इदं न मम । ततः स्विष्टकृदादिकं कुर्यात् । प्राशनकाले यजमानश्चार्षेयश्चेदामहस्तेन दक्षिणहस्ते सकृदुपस्तीर्य्य मेक्षणेन हविरुच्छिष्टस्य मध्यात्पूर्वार्द्धाच्चावदाय सकृदभिघारयति । पञ्चार्षेयश्चेत्सकृदुपस्तीर्य्य मेक्षणेन हविरुच्छिष्टस्य मध्यात्पूर्वार्द्धात्पश्चार्द्धाच्चावदाय सकृदभिघारयति । अत्रोपस्तीर्णाभिघारणमुदकेन नत्वाज्येन । एवमवत्तं हविर्भद्रान्नश्रेय इति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मन्त्रेणास्वादनमकुर्वन्दन्तैरसम्भिन्दन्भक्षयेत् । पूर्ववदुपस्तीर्य्यावदायाभिघार्य्य मन्त्रेण द्वितीयं भक्षयेत् । पुनः पूर्ववत्कृत्वा मन्त्रेण तृतीयं भक्षयेत् । पुनः पूर्ववत्कृत्वाऽमन्त्रकं चतुर्थं भक्षयेत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो व्रीहयो देवता नवव्रीहिभक्षणे विनियोगः । भद्रान्नः श्रेयस्समनैष्ट देवास्त्वया वसेन समशीमहि त्वा । स नो मयोभूः पितेवाविशस्व शं तोकाय तन्वै स्योनः स्वाहा ॥ ततो भूय एवावदाय काममास्वादयन्भक्षयेत् । ये चान्येऽपि ब्राह्मणास्सन्निहितास्स्युस्तेभ्यो दत्वा यजमानो भक्षयेत् । तेषामपि पूर्ववद्भक्षणविधिः । परन्तूपस्तरणावदानाभिघारणानि यजमानकर्तृकाणि । सर्वे कृताचमना मुखं शिरोऽङ्गानि चानुलोमं पृथगमोसीतिमन्त्रेणाभिमृशेरन् । अङ्गानीत्येतद्बहुवचनस्य चित्वे पर्य्यवसानाज्जठरं दक्षिणबाहुं वामबाहुं पृथक्पृथगभिमृशेतेतियावत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः प्राणो देवताऽङ्गाभिमर्शने विनियोगः । अमोसि प्राण तदृतं ब्रवीम्यमा ह्यसि सर्वमनुप्रविष्टः । स मे जराᳬरोगमपमृज्य शरीरादयाम एधि मा मृथा न इन्द्र ॥ हविश्शेषं यजमानो भोजनकाले भक्षयेत् । वामदेव्यगानम् । ब्राह्मणभोजनम् ॥ इति नवव्रीहियज्ञप्रयोगः ॥ वर्षर्त्तौ नवश्यामाकानां पयसि चरुः पूर्वोक्तनवव्रीहियज्ञवत्कर्त्तव्यः । वसन्तर्त्तौ यवानां चरुर्नवयज्ञवत्कर्त्तव्यः । तत्र श्यामाकहविश्शेषभक्षणे मन्त्रान्तरम्, अग्निः प्राश्नातु प्रथम इति । मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो जठराग्निर्देवता श्यामाकचरुप्राशने

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



विनियोगः । अग्निः प्राश्नातु प्रथमः स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः स्वाहा ॥ यवहविश्शेषभक्षणे मन्त्रान्तरम् एतमुत्यमिति । मन्त्रस्य प्रजापतिर्ऋषिर्जगतीछन्द इन्द्रो देवता यवचरुप्राशने विनियोगः । एतमु त्यं मधुना संयुतं यवꣳ सरस्वत्या अधिवनावचर्क्रुषि । इन्द्र आसीत्सीरपतिश्शतक्रतुः कीनाशा आसन्मरुतः सुदानवः स्वाहा ॥ व्रीहियज्ञो यवयज्ञश्च गृहस्थानाम् । श्यामाकयज्ञो वानप्रस्थानामिति व्यवस्था ॥ इति नवयज्ञप्रयोगः ॥

अथाग्रहायणीप्रयोग उच्यते । आग्रहायण्यां मार्गशीर्षपौर्णमास्यां बलिहरणं श्रवणाकर्मवत्कर्त्तव्यम् । नमः पृथिव्या इत्येतन्मन्त्रं न जपति । विशेषस्तूच्यते । प्रथमारम्भे नान्दीश्राद्धम् । प्रातराहुतिं हुत्वा दर्भान् शमीं वीरणान् फलयुक्तबदरीशाखामपामार्गं शिरीषञ्चाहृत्याचार्यं वाऽक्षतसक्तून् कृत्वा तेषामेकदेशं तूष्णीमग्नौ प्रक्षिपेत् । ततो ब्राह्मणान् स्वस्ति वाचयित्वा तेभ्यो यत्किञ्चिद्दत्वा पूर्वाहृतैः षड्भिर्दर्भादिभिरेकीकृतैस्सम्भारैः प्रादक्षिण्येन नित्याग्निशालामारभ्य भित्तिपटलादिसंलग्नं धूमं शातयन् सर्वान् गृहाननुगच्छेत् । एवं धूमशातनानन्तरं दर्भादीन् सम्भारानुत्सृजेत् । ततस्तूष्णीमैशान्यां स्थापितासु तिसृषु जातशिलासु वास्तोष्पत इत्यनेन सामद्वयेन ऋचा च मणिकं प्रतिष्ठापयति । जातशिला प्रकरशिलेत्यर्थः । मणिकं हृदुदकभाण्डमित्यर्थः । वास्तोष्पतिसामप्रकाशो यथा । वास्तोष्पताइ । ध्रुवा । स्थूणा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ओ२३४वा । अ२ंसच२ंसोम्यानार२म् । द्रप्सःपुराम्भेताग्रश्व-
ता२३इनाम् । आ२३४इन्द्राः । मुनी२ । ना३१उवा२३ । सा-
२३४खा ॥ वास्तोष्पते ध्रुवा । स्थूणा३ । आ२३४ । सच२ंसो ।
म्यानाम् । द्रप्सःपुराम्भेत्ताग्रश्वता२३इनाम् । आ२३इन्द्राः ।
मुनी२ । नो२३४वा । सा२३४खा ॥ वास्तोष्पते ध्रुवा स्थूणा२ं
सच२ं सोम्यानाम । द्रप्सः पुराम्भेत्ता ग्रश्वतीनामिन्द्रो मुनी-
ना२ंसखा ॥ ततो मणिके समन्वायन्तीत्यृचा द्वावुदककुम्भावासि-
ञ्चेत् । प्रतिकुम्भमृगावृत्तिः । अस्या गृत्समदऋषिस्त्रिष्टुप्छ-
न्दोऽग्निर्देवता सेचने विनियोगः । समन्वायंत्युपयन्त्यन्याः
समानमूर्व्वं नद्यस्पृणन्ति । तमूशुचिंशुचयो दीदिवा२ंसम-
पांनपातमुपयन्त्यापः ॥ एतावत्कृत्यं पूर्वाह्णे कुर्य्यात् । श्रवणा-
कर्मवदस्तमिते बलिहरणम् । ततः सायंसन्ध्यां नित्यहोमञ्च
निर्वर्त्त्य पयसि चरुः कर्त्तव्यः । आग्रहायणीस्थालीपाकं
करिष्ये इति सङ्कल्प्य, आग्रहायण्यै त्वा जुष्टं निर्वपामीति
निर्वापः । आज्यभागान्ते चरुमवदाय जुहुयात्प्रथमा
ह्व्युवासेतिमन्त्रेण । अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टु-
प्छन्द आग्रहायणी देवता चरुहोमे विनियोगः । प्रथमा
ह्व्युवासा धेनुरभवद्यमे । सा नः पयस्वती दुहा उत्तरा-
मुत्तरा२ं समां स्वाहा ॥ आग्रहायण्या इदं न मम ।
अन्यत्सर्वं पार्वणस्थालीपाकवत्कर्त्तव्यम् । दक्षिणादानान्ते

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पश्चादग्नेर्बर्हिषि न्यञ्चौ पाणी प्रतिष्ठाप्य प्रतिक्षत्रमित्येतौ व्याहृतीश्च जपति । अनयोः प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता जपे विनियोगः । प्रतिक्षत्रे प्रतितिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रतितिष्ठामि गोषु । प्रतिप्राणे प्रतितिष्ठामि पुष्टौ प्रत्यङ्गेषु प्रतितिष्ठाम्यात्मनि । प्रतिद्यावापृथिव्योः प्रतितिष्ठामि यज्ञे ॥ १ ॥ ओं भूर्भुवस्स्वः ॥ केचिदत्र "वामदेव्यं गीत्वाऽऽग्रहायणीकर्म समापयन्ति, स्वस्तरारोहणं कर्मान्तरम्" इति च वदन्ति । परे तु, "स्वस्तरारोहणमाग्रहायण्यङ्गम्, सूत्रे तस्य कर्मान्तरत्वबोधकाथशब्दाभावात्, अध्याहारे प्रमाणाभावाच्च, पश्चादग्नेर्बर्हिषि न्यञ्चकरणवत्स्वस्तरारोहणमपि तस्मिन्नेव दिने वामदेव्यगानात्पूर्वं कर्त्तव्यं" इत्याहुः ॥ इत्याग्रहायणीप्रयोगः ॥

अथ स्वस्तरारोहणप्रयोग उच्यते ॥ उदगयने प्रागवसन्तात्पुण्ये ऽहनि पूर्वाह्णे नान्दीश्राद्धं विधाय सायम्बलिहरणान्ते पश्चादग्नेरुदगग्रैस्तृणैरुदक्प्रवणं स्वस्तरमास्तीर्य्य तस्मिन्नहतान्यूर्णामयानि कार्पासमयानि वा स्तरणान्यास्तीर्य्य दक्षिणतो गृहपतिरुपविशति, तस्योत्तरतस्तद्भ्रातर एकपाकोपजीविनश्च यथाज्येष्ठमुपविशन्ति । ततस्तेषामुत्तरतो गृहपतिप्रभृतीनां पत्न्यः क्रमेणोपविशन्ति । ततस्तासामपत्यान्यपि क्रमेण स्वायास्स्वाया मातुरुत्तरत उपविशन्ति । सम्यक् प्राङ्मुखेषूपविष्टेषु गृहपतिः सर्वोपद्रवशान्त्यर्थं स्वस्तरारोहणं करिष्ये इति सङ्कल्प्य, स्वस्तरेऽधोमुखौ हस्तौ संस्थाप्य, स्योना-

For Private And Personal

पृथिवीत्येतामृचं जपेत् । अस्याः प्रजापतिर्ऋषिरनुष्टुप्छन्दः पृथिवी देवता जपे विनियोगः। स्योना पृथिवि नो भवान्वृक्षरा निवेशनी । यच्छा नः शर्म्म सप्रथो देवान्मा भयादिति ॥ ऋचि समाप्तायां सर्वे दक्षिणपार्श्वैः प्राक्शिरसः संविशन्ति । एवमुपवेशनक्रमेण संवेशनमुत्थानं च त्रिवारमभ्यात्मं कार्यम् । ततो यथाम्नानं स्वस्त्ययनमुच्चार्य्य वामदेव्यं गायेत् । स्वस्त्ययनप्रयोगे महित्रीणामिति द्वे, त्वावत इत्येकं साम प्रयोक्तव्यम् ।

सामप्रकाशो यथा । महाइत्रा२३४इणाम् । अवा२रस्तु ।
द्युक्षम्मा२३४इत्रा । स्या२र्य्यम्णाः । दुराधा२३४र्षाम् । वरौ३हो-
२३४ । वा । णा५ स्योई हाइ ॥ द्वितीयं साम ॥ महित्रीणामवरस्तु६ए ।
द्युक्षंमित्रस्यार्यम्णाः । दुराधा२३र्षाम् । वरौ३हो२ । हुम्मा२ । वा ।
स्यो२ । या२३४औ होवा । हा औवा । औवा२३४५ ॥ त्वावतो३ ।
हौ३हो३१यि । पुरूवसो३ । हौ३हो३१इ । वयमिन्द्रा३ ।
हौ३हो३१इ । प्रणेता३ः । हौ३हो३१इ । स्मसिस्थाता३ः ।
हौ३हो३१इ । हरीणा३म् । हौ३हो३१२३४५इ । डा ।

'अरिष्टवर्गसामगानं' एके वदन्ति । तत अप उपस्पृश्य यथाकाममन्यत्र शयनं कुर्य्युः । इति स्वस्तरारोहणप्रयोगः ॥

अथाष्टकाप्रयोग उच्यते । सा च रात्रिदेवता, ऽग्निदेवता, पितृदेवता, प्रजापतिदेवता, ऋतुदेवता, वैश्वदेवी वा । अन्ये तु, "अग्न्यादयो देवता मतान्तराभिप्रायेण, गोभिलस्य तु रात्रिदे-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वताऽष्टका" इति वदन्ति, तच्च सूत्रविरोधः स्पष्ट एव । तच्च कर्म नित्यं पुरुषसंस्कारमध्ये पठितत्वात् । यदुच्च 'पुष्टिफलं' श्रूयते तत्त्वानुषङ्गिकमिति स्पष्टं भाष्ये । षड्दैवत्याऽनुसन्धानमात्रं सर्वास्वष्टकासु, न तु निर्वापकाले उक्तदेवतानामुच्चारणम् । सर्वत्राष्टका देवता: । "तास्त्वाष्टकास्तिस्त्रो हेमन्ते मांसयुक्ता: कर्त्तव्या" इति कौत्सऋषिर्मन्यते । "अष्टकात्रयं हेमन्ते कर्त्तव्यम्" इत्यौद्गाहमानिमतम् । तथैव गौतमवार्कखण्डिमतम् । गोभिलाचार्याणां मते त्वष्टकात्रयमेव, हेमन्ते तस्यैवोत्तरत्रोपदेक्ष्यमाणत्वात् । गोभिलाचार्याणां मते मध्यमाष्टका मांसस‍ञ्चिता, तत्रैव गोपशोर्विधानात् । तिसृणामष्टकानां स्वरूपमुच्यते । मार्गशीर्षपौर्णमास्या ऊर्द्धं या कृष्णाऽष्टमी तामपूपाष्टकामाचक्षते, अपूपसाध्यत्वात् । मध्या मांससाध्यत्वान्मांसाष्टका । तृतीया शाकसाध्यत्वाच्छाकाष्टका । अष्टकाश्राद्धकरणे न नान्दीमुखश्राद्धम्, "न श्राद्धे श्राद्धमिष्यते" इति कर्मप्रदीपस्मरणात् । प्रातर्होमान्तेऽपूपाष्टकां करिष्ये इति सङ्कल्प्याग्निमुपसमाधाय पात्रासादनकाले प्रकृतिवत्पात्राण्यासाद्याऽपूपाष्टकाकरणार्थं करतलप्रमाणान्यष्टौ कपालान्यासाद्य चर्वर्थं व्रीहीनपूपार्थं पिष्टान्हषदं दृषत्पुत्रञ्च समूलं बर्हिः परिस्तरणार्थं समूलदर्भांश्चासादयेत् । निर्वापकाले तण्डुलान् पिष्टांश्च गृहीत्वा तन्त्रेण निर्वपति । अष्टकायै त्वा जुष्टं निर्वपामि । तन्त्रेणावहत्य प्रक्षाल्येमे चर्वर्थास्तण्डुला इमेऽपूपार्थास्तण्डुला: इति तण्डुलान्विभज्य पिष्टार्थतण्डुलान्हषदि संस्थाप्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



हषत्पुत्रेण पिष्टान् करोति। "छिन्ने पिष्टे तथा लूने सान्नाय्ये मार्त्तिके तथा। पश्चान्मन्त्राः प्रयोक्तव्या मन्त्रा यज्ञार्थसाधकाः" इति सुदर्शनभाष्यस्मरणात् सिद्धपिष्टे मन्त्रसंस्कारः। ततश्चरुं श्रपयति। पिष्टैरपूपान् कृत्वा श्रपयति। तत्प्रकारश्च, चरोरुत्तरत अग्नावष्टौ कपालानि संस्थाप्य तेषु परिवर्त्तनमकुर्वन्नपूपान् श्रपयति। अभिघार्य्य चरुमुदगुद्वास्य, अपूपांश्चोदगुद्वास्य प्रत्यभिघारयति। आज्यभागान्ते स्रुचि सकृदुपस्तीर्य्यावदानधर्मेण चरोर्मध्यात्पूर्वार्द्धाच्चावद्यति। पश्चार्द्धेयश्चेत्पश्चार्द्धाच्च तृतीयमवद्यति। एवमपूपेभ्यः प्रत्येकंप्रत्येकं द्विस्त्रिर्वाऽवदाय सकृदभिघार्य्य सर्वाणि हवींषि पृथक्पृथक् प्रत्यभिघार्य्यावदानान्येकीकृत्याष्टकायै स्वाहेति जुहोति। अष्टकाया इदं न मम। अन्यत्सर्वं पार्वणस्थालीपाकवत्कर्त्तव्यम्। अपूपैर्ब्राह्मणान्भोजयेत्॥ इत्यपूपाष्टकाप्रयोगः॥

अथ मध्यमाष्टकाप्रयोग उच्यते। यद्यप्यत्र सूत्रकृता "गौरालभ्या" इत्युक्तं, तथाऽपि कलिवर्ज्यप्रकरणे गवालम्भस्य निषेधात्तत्प्रतिनिधित्वेन छागस्य स्मरणात्, अत्रैव प्रकरणे प्राप्तस्य सूत्रकारेण छागस्य विहितत्वात्, तत्पक्षमवलम्ब्य प्रयोगः कथ्यते। पौष्याः पौर्णमास्या उर्द्धं या कृष्णाष्टमी तस्यां प्रातर्होमान्तेऽनुज्ञां कृत्वा मध्याष्टकां करिष्ये इति सङ्कल्प्य सूर्य्योदयसामीप्य एवाग्नेः पूर्वस्यां दिशि प्रत्यङ्मुखं छागमवस्थाप्योपस्थिते पशौ यत्पशव इतिमन्त्रेण स्रुवेणाज्यं जुहोति। अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दः पशवो देवता पशो-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



रूपस्थिति होमे विनियोगः । यत्पशवः प्रध्यायत मनसा हृदयेन
च । वाचा सहस्रपाशया मयि बध्नामि वो मनः स्वाहा ॥
पशुभ्य इदं न मम । तत उपविष्टे ब्रह्मणि पात्राण्यासादयति ।
यवमिश्रोदकं पवित्रे क्षुरमेकशाखाविशाखे पलाशकाष्ठे बर्हिरि-
ध्ममाज्यं समिधौ स्रुक्स्रुवावाज्यस्थालीमनुगुप्ता अपश्चासाद्या-
ज्यतन्त्रेणाज्यसंस्कारान्तं प्रकृतिवत्कुर्यात् । ततः पशुमनामिका-
ग्रेण स्पृशन्ननु त्वा माता मन्यतामित्यनुमन्त्रयते । अस्य मन्त्रस्य
प्रजापतिर्ऋषिरनुष्टुप्छन्दः पशुर्देवताऽनुमन्त्रणे विनियोगः ।
अनु त्वा माता मन्यतामनुपिताऽनुभ्राताऽनुसगर्भ्योऽनुसखा सयू-
थ्यः । ततो यवयुक्तेन जलेन पशुं प्रोक्षति । तत्र मन्त्रः, अष्टकायै
त्वा जुष्टं प्रोक्षामीति सौत्रः । उल्मुकेन पशुं प्रदक्षिणीकुर्यात्परि-
वाजपतिरित्यृचा । अस्याः प्रजापतिर्ऋषिर्गायत्रीछन्दोऽग्निर्देव-
तोल्मुकेन पशुपरिहरणे विनियोगः । परिवाजपतिः कविर-
ग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥ पशुपानार्थं जलं
तूष्णीं दद्यात् । व्याहृतिभिरन्ये । पीतशेषमुदकं पशोरधोभागे
सिञ्चेन्मन्त्रेण । अस्य प्रजापतिर्ऋषिर्यजुः पशुर्देवतोदकसेचने
विनियोगः । आत्तं देवेभ्यो हविः ॥ अथैनं पशुमुत्तरस्यां दिशि
नीत्वा संज्ञपयन्ति । बहुवचनादन्ये बहवः संज्ञपनकर्त्तारः
सूत्रान्तरप्रसिद्धाश्शमितारो ग्राह्याः । एतेषां कल्पनमपि
पात्रासादनकाले । ते च शमितारो देवदैवत्ये पशौ प्राक्शिर-
समुदक्पादं संज्ञपयन्ति । पितृदैवत्ये दक्षिणाशिरसं प्रत्यक्-
पादं संज्ञपयन्ति । मृते पशौ यत्पशुरिति मन्त्रेण जुहोति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता संज्ञप्त-होमे विनियोगः । यत्पशुर्मायुमकृतोरोपद्भिराघ्नत । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः स्वाहा ॥ अग्नय इदं न मम । ततः पत्नी चोदकमादाय पशोर्मूर्ध्नि, सप्त द्वाराणि, स्तनचतुष्टयं, नाभिं, श्रोणिमपानं च प्रक्षालयति । "क्षालनं दर्भकूर्चेन" इति कर्मप्रदीपोक्तेः । गवि स्तनचतुष्टयं नाजे । "पत्नी चेति च—शब्दाद्दर्भकूर्चस्योपादानम्" इति भट्टनारायणोपाध्यायः । नाभेरग्रतः पूर्वासादितपवित्रे प्रागग्रेऽन्तर्द्धाय क्षुरेणानुलोमं छित्त्वा मांसचर्म्मणोरन्तरवर्त्तिनीं वपामुद्धरन्ति । अत्र बहुवचनाद्वपोद्धरणकर्त्तुरनियमः । तत उद्धृतां वपां पूर्वासादितशाखाविशाखयोः काष्ठयोः प्रसार्य्याभ्युक्ष्याग्नौ श्रपयेत् । ततः पक्वायां वपायां यथा न प्रागग्नेर्भूमिं शोणितं गच्छेत् तथा विशसथेति सम्प्रेषणं यजमानोऽन्यान् प्रति वदेत् । एतेनाग्नेःपूर्वस्यां दिशि विशसनं ज्ञायते । शृतां वपामभिघार्य्योदगुद्वास्य प्रत्यभिघारयेत् । ततः स्रुचि सकृदुपस्तीर्य्य कृत्स्नां वपां क्षुरेणावदाय द्विरभिघारयति त्र्यार्षेयाणाम् । पञ्चार्षेयाणां तु, द्विरुपस्तीर्य्य कृत्स्नां वपामवदाय द्विरभिघारयति । ततोऽष्टकायै स्वाहेति वपां जुहोति । अष्टकाया इदं न मम। ततोऽन्यत्कर्म स्थालीपाकवत्कर्त्तव्यम् । अत्र किञ्चिद्विचार्य्यते । ननूपस्थितिहोमप्रभृति वपाहोमान्तकर्मणां क्रमेणोपदेशान्मध्ये ब्रह्मोपवेशनादीनि कर्माणि कथं? अत्र पूर्वमभिहितानि, सौत्रकर्मपौर्वापर्य्यविरोधादिति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



चेन्न। वपाहोमविध्युत्तरं, "स्थालीपाकवृतान्यत्" इत्युपदिष्टान्यकर्मणां स्थालीपाकवर्त्मित्त्वात्, "हुत्वा चानुमन्त्रयेत" इत्यच चेनोपस्थितहोमानुमन्त्रणयोर्मध्येऽनुपदिष्टब्रह्मोपवेशनादीनामपि कर्त्तव्यतायास्सूचितत्वाच्च। स्पष्टोऽयमर्थो गृह्यसूचभाष्ये नारायणीये। ततः प्राचीमेकशूलां, प्रत्यगग्रां द्विशूलां, वपाश्रपणीमग्नावनुप्रहरेत। "अचानुशब्दप्रयोगाद्वपाश्रपणीप्रहरणात्पूर्वं वक्ष्यमाणकर्मोपयुक्तपाचासादनं कर्त्तव्यम्" इति मन्यन्ते। अन्ये तु, "वपाश्रपणीहोमस्य वपाहोमोत्तरकालिकनियमार्थोऽनुशब्द" इत्याहुः॥ ततोऽग्नेरुत्तरतो व्रीहीनुलूखलं मुसलं शूर्प्पं चरुस्थालीं पवित्रे मेक्षणद्वयं क्षुरं कांस्यपाचचयं सक्षशाखायुक्तं प्रस्तरञ्चासादयेत्। अच पाचाणां द्वन्द्वश आसादनम्। ततः सर्वाण्यङ्गानि गृहीत्वाऽग्नौ श्रपयेत्। वामं सक्थि क्लोमानं च वक्ष्यमाणान्वष्टक्याय स्थापयेत्। "तानि चाङ्गानि 'कर्मप्रदीपे'। हृज्जिह्वा क्रोडसक्थीनि यकृद्वक्यौ गुदं स्तनाः। श्रोणिः स्कन्धशटा पार्श्वे पश्वङ्गानि प्रचक्षते॥ पार्श्वस्य द्व्यसक्थोश्च द्वित्वाद्याहुश्चतुर्द्दश"॥ अवत्तान्यङ्गानि हृत्कांस्यपाचे निक्षिप्य प्रकृतगृह्याग्नौ श्रपयति। अस्मिन्नेव क्रमे ऽष्टकायै त्वा जुष्टं निर्वपामीति व्रीहीन्निरुप्यावहत्य चिष्फलीकृत्य प्रक्षाल्य श्रपयति। ततः शृतमोदनचरुं मांसचरुं च प्रादक्षिण्येन पृथङ्मेक्षणाभ्यां मिश्रीकरोति। यद्यपि पशोः शामिचाग्नौ श्रपणमुपदिष्टं, तथाप्यच "तस्मिन्नेवाग्नौ श्रपयति" इति सूचकृदुक्तेर्गृह्याग्नौ श्रपणं, न तु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तस्मादुद्धृतेऽग्नौ । ततः शृतं चरुद्वयमभिघार्योदगुद्वास्य प्रत्यभिघारयेत् । अस्मिन्क्रमे परिसमूहनादिसमिदाधानान्तं कर्म कुर्यात् । ततः पूर्वमासादित एकस्मिन्कांस्यपात्रे मांसरसमवनयति । ततोऽग्नेः पश्चात्पूर्वासादिते बर्हिषि प्लक्षशाखां प्रागग्रां निधाय तस्मिन्कांस्ये मांसावदानानि स्थापयति । अथवा प्लक्षशाखायुक्तप्रस्तरं प्रागग्रमस्मिन्नेव कालेऽग्नेः पश्चान्निधाय तस्मिन्मांसावदानान्यासादयति प्रागपवर्गम् । ततोऽन्यस्मिन्कांस्यपात्रे द्वादशानामवदानानां पृथक्पृथगवदानधर्मेणावदानं कुर्यात् । पुनरन्यस्मिन्पात्रे स्विष्टकृद्धोमार्थं सर्वेभ्योऽङ्गेभ्य उत्तरार्द्धपूर्वार्द्धेभ्यः पृथक्पृथगवद्यति । अत्रोपस्तरणादिकं प्रकृतिवत् । ओदनचरोरप्यवदानधर्मेण पूर्ववदेव पात्रे बिल्वफलप्रमाणमवदानम् । उत्तरार्द्धात्पूर्वार्द्धाच्च स्विष्टकृदर्थमोदनचरोरपि स्विष्टकृत्पात्रेऽवदानम् । ततः स्विष्टकृद्धोमावदानं परिहाय पूर्वगृहीतैर्मांसावदानैः सह रसमप्येकीकुर्यात् । तत आज्यभागौ हुत्वा, चतुर्गृहीतमाज्यं गृहीत्वाऽग्नावग्निरिति प्रथमया ऋचा जुहुयात् पञ्चार्षेयाणाम् । द्व्यार्षेयाणामपि चतुर्गृहीतमेवात्र पूर्ववद्विशेषाभावात्, चतुर्गृहीतमाज्यं गृहीत्वेत्यत्र विशेषोपदेशाच्च । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्विराट्त्रिष्टुप्छन्दोऽग्निर्देवता होमे विनियोगः । अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः । स नः स्योनः सुयजायजा च यथा देवानां जनिमानि वेद स्वाहा ॥ अग्नय इदं न मम । ततः प्रथमपात्रे यद्गृहीतं मांसजातं तस्मात्तृतीयांशं हस्तेन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



गृहीत्वा स्रुचि संस्थाप्य द्वितीयतृतीयाभ्यामृग्भ्यां जुहोति । द्वितीयमन्त्रान्ते न स्वाहाकारस्तृतीयमन्त्रान्ते स्वाहाकारः प्रयोज्यः । अनयोः प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽष्टका देवता होमे विनियोगः । औलूखलाः सम्प्रवदन्ति ग्रावाणो हविष्कृण्वन्तः परिवत्सरीणाम् । एकाष्टके सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं ते ॥ इडायास्पदं घृतवत्सरीसृपं जातवेदः प्रतिहव्या गृभाय । ये ग्राम्याः पशवो विश्वरूपास्तेषाꣳ सप्तानां मयि रन्तिरस्तु स्वाहा ॥ अष्टकाया इदं न मम । पुनस्तस्मादेव मांसजातादेकमंशं हस्तेन गृहीत्वा स्रुचि निधाय चतुर्थीपञ्चमीभ्यामृग्भ्यां जुहोति । चतुर्थ्यन्ते न स्वाहाकारः पञ्चम्यन्ते स्वाहाकारं प्रयुञ्जीत । अनयोः प्रजापतिर्ऋषिस्त्रिष्टुप्बृहतीछन्दसी अष्टका देवता होमे विनियोगः । एषैव सा या पूर्वा व्यौछत्सेयमप्स्वन्तश्चरति प्रविष्टा । वसूर्जिगाय प्रथमा जनित्री विश्वे ह्यस्यां महिमानो अन्तः ॥ एषैव सा या प्रथमा व्यौच्छत्सा धेनुरभवद्विश्वरूपा । संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली स्वाहा ॥ अष्टकाया इदं न मम । पुनस्तस्मिन्नेवावशिष्टं मांसजातं हस्तेनादाय स्रुचि निधाय षष्ठीसप्तमीभ्यामृग्भ्यां जुहोति । सप्तम्यन्ते स्वाहाकारः । अनयोः प्रजापतिर्ऋषिर्बृहतीछन्दोऽष्टका देवता होमे विनियोगः । यां प्रतिपश्यन्ति रात्रीं धेनुमिवायतीम् । सा नः पयस्वती दुहा उत्तरामुत्तराꣳ समाम् ॥ संवत्सरस्य प्रतिमां यां त्वा रात्रि यजामहे । प्रजामजर्य्यां नः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



कुरु रायस्पोषेण सꣳसृज स्वाहा ॥ अष्टकाया इदं न मम । ततः पात्रान्तरे स्विष्टकृदर्थमवदाय यत्स्थापितं तत्सर्वं हस्तेन स्रुचि संस्थाप्याष्टम्यर्चोत्तरार्द्धपूर्वार्द्धे जुहोति । अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता होमे विनियोगः । अन्विमन्नो अनुमतिर्यज्ञं देवेषु मन्यताम् । अग्निश्च हव्यवाहनः स नोऽदाद्दाशुषे मयः स्वाहा ॥ अग्नये स्विष्टकृत इदं न मम । ततो व्याहृतिहोमादितन्त्रशेषं पार्वणस्थालीपाकवत्समापयेत् । एवं प्रतिसंवत्सरमष्टकां कुर्यात् ॥

छागस्याप्यसम्भवे स्थालीपाकः कर्त्तव्यः । तस्य प्रयोगः । पशोः स्थाने स्थालीपाकं करिष्ये इति सङ्कल्प्य, पात्रासादनकाले प्रकृतिवत्पात्राण्यासाद्य, चरुस्थालीद्वयमोदनचर्वर्थं मांसस्थानीयपायसचर्वर्थं च शूर्पद्वयं तण्डुलान् पयश्च कांस्यपात्रचयं ज्ञत्रशाखां मेक्षणद्वयञ्चासादयेत् । निर्वापकालेऽष्टकायै त्वा जुष्टं निर्वपामीत्यादितण्डुलप्रक्षालनान्तं कृत्वा, अन्यशूर्पस्थित पायसचर्वर्थतण्डुलान् पुरस्तादग्नेः संस्थाप्य यवोदकेनाष्टकायै त्वा जुष्टं प्रोक्षामीति प्रोक्ष्य, गृह्याग्नेरङ्गारमादाय पशुवत्परिवाजपतिरिति तण्डुलान् पर्य्यग्निकरोति । ततः पर्यग्निकृतानामवहननादि कुर्यात् । अत्र तण्डुलानामेकदेशं गृहीत्वा अन्वष्टक्यर्थमन्यत्र स्थापयेत् । ओदनचरुमन्यस्थाल्यां पायसचरुञ्चान्यस्थाल्यां, दक्षिणतः पूर्वस्याधिश्रयणमुत्तरतोऽपरस्य, पृथङ्मेक्षणाभ्यां मिश्रीकरोति । ततः कांस्यपात्रे पायसचरोरास्रावणम् । ततोऽभिघारादि । अग्नेः पश्चाद्दर्हिष्योदनचरुमासाद्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्लक्षशाखायुक्ते प्रस्तरे पायसचरोर्द्वादशपिण्डान् कृत्वाऽऽसादयेत् । आज्यभागान्ते मांसावदानवद् द्वादशपिण्डेभ्य एकस्मिन् कांस्यपात्रे ऽवदानधर्मेणावदाय, मांसाष्टकावदोदनचरुमप्येवं बिल्वफलमात्रं मेक्षणेनावदाय, स्विष्टकृदर्थमन्यस्मिन्कांस्यपात्रे बिल्वमात्रमवदाय, स्रुचि गृहीत्वा, मांसावदानहोमवदष्टर्चेन होमं कुर्यादन्यत्सर्वं प्रकृतिवत् ॥ पशोः स्थाने पायसचरोर्विधानेऽप्युपस्थितहोमप्रभृति वपाहोमान्तानां पदार्थानां निवृत्तिस्तदुक्तमष्टकाप्रकरणे भट्टनारायणोपाध्यायैः,'अस्य होमस्य पशूपस्थानेन सहाभिसम्बन्धार्थस्तेन किं? भवेत् । पश्वभावे ऽपि स्थालीपाकं कुर्वीतेति तस्मिन् पक्ष उपस्थितहोमस्य निवृत्तिः स्यात् । एवं चेदनुमन्त्रणाभिचनसंज्ञप्तहोममन्त्राणामपि स्थालीपाकपक्षे निवृत्तिरेव स्यात् । प्रोक्षणमन्त्रस्तु स्थालीपाकपक्षेऽप्यविरोधात्स्यादेवेति' ॥ 'अपि वा स्थालीपाकेन' इति वक्तव्ये प्रकृतिविभक्त्यतिक्रमः किमर्थं ? उच्यते, वपायागनिवृत्त्यर्थः । इतरथा पश्वभावेऽपि विलोपार्थमस्य स्थालीपाकेन यागो माभूदित्येतत्प्रकृतिविभक्त्यतिक्रमेणैतन्निवर्त्तयति । स्थालीपाकप्रयोगोऽन्यत्राप्युक्तो यथा कर्मप्रदीपे।"चरितार्था श्रुतिः कार्य्या यस्मादप्यनुकल्पतः । अतोऽष्टर्चेन होमः स्याच्छागपक्षे चरावपि ॥ १ ॥ अवदानानि, यावन्ति क्रियेरन् प्रस्तरे पशोः । तावतः पायसान् पिण्डान् पश्वभावे ऽपि कारयेत्" ॥ २ ॥ स्थालीपाककरणेऽप्यशक्तौ स्वस्या अन्यस्या वा गोर्यथासम्भवं ग्रासमेषा मेऽष्टकेत्येतावता मन्त्रेण दद्यात् । तत्राऽप्यशक्तौ वनं गत्वा कक्ष मुपसमाधायैषा मेऽष्ट-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



केतिमन्त्रं पठेत् । उक्तानां पक्षाणामन्यतमपक्षमाश्रित्य प्रत्यब्दमष्टका कर्त्तव्यैव । कलौ पैतृके कर्मणि पशुबन्धस्य निषेधात्स्थालीपाकपक्ष एव मुख्यः ॥ इति मध्यमाष्टकाप्रयोगः ॥

अथान्वष्टक्यप्रयोग उच्यते ॥ अष्टम्यां मध्याष्टकां कृत्वोत्तरे ऽहनि नवम्यां दशम्यां वा ऽन्वष्टक्यं कुर्यात् । तच्चापराह्णे पैतृकत्वाच्छ्राद्धकल्पोक्तनियमा विप्रनिमन्त्रणादिकं च । गृहस्याग्नेय्यां दिश्यष्टमे देशे चतुःप्रक्रमपरिमितां ततोऽधिकप्रक्रमपरिमितां वा दक्षिणपूर्वायतां वा चतुरस्रां वेदिकां निर्माय, पश्चिमद्वारं कृत्वा, परितः कटादिभिराच्छादयेत् । अत्र वक्ष्यमाणकर्म दक्षिणपूर्वाभिमुखेनैव कर्त्तव्यम् । प्रक्रमस्त्रिपदो ग्राह्यः । ततोऽपराह्णे यजमानः स्नात्वा, यज्ञोपवीत्याऽऽचम्य, प्राणानायम्य, देशकालौ सङ्कीर्त्त्य, प्राचीनावीती गोत्राणां पित्रादीनां तृप्त्यर्थमन्वष्टक्यं करिष्ये इति सङ्कल्प्य परिवृतदेशस्योत्तरार्द्धे उपलिप्ते देशे विदिक्कोणं समं चतुरस्रं स्थण्डिलमरत्निमात्रं पूर्ववत्संस्कृत्य भूर्भुवस्स्वरित्यौपासनाग्निमुपवीती प्रणयति । नात्र ब्रह्मा । ततः प्राचीनावीत्याग्नेय्याभिमुखोऽग्नेः पश्चाद्दक्षिणसंस्थमुलूखलं मुसलं सकृद्विशूर्पं चरुस्थालीद्वयं पवित्रद्वयमुदकपात्रं यवोदकं मेक्षणद्वयं स्रुवमाज्यं रजतभूषितं खादिरं शङ्कुं दर्भमुष्टिं सकृदाच्छिन्नकुशान् स्तरणार्थं सकृदाच्छिन्नप्रस्तरमुष्टिं यज्ञीयकाष्ठासनं कांस्यपात्रत्रयं समिद्द्वयं तिलान् दर्वीं पिञ्जलीत्रयं सौवीराञ्जनं तैल-चन्दन-क्षौमदशासूत्राणि पिञ्जलीमेकाञ्चासादयेत् । तत



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



आग्नेय्याभिमुखो ऽग्नेः पश्चाद्दक्षिणाग्रेषु दर्भपूलूखलं दृढं संस्थाप्य तस्मिन् सकृद्गृहीतव्रीहिमुष्टिं पितृभ्यस्त्वा जुष्टं निर्वपामीतिमन्त्रेण होमपिण्डदानापेक्षितान् तण्डुलान् पितृतीर्थेन सकृन्निरुप्य, सव्योत्तराभ्यां पाणिभ्यां मुसलमादाय, सकृद्व्रीहीनवहन्ति । ततः सकृत्फलीकृत्य सकृत्प्रक्षालयेत् । ततो मध्यमाष्टकायां स्थापितं वामसक्थ्नः क्लोम्नश्च मांसपेशीमवच्छिद्य नूतनकाष्ठफलके संस्थाप्याणुशश्छिनत्ति यथा मांसमिश्रिता पिण्डा भवेयुः । ततो ऽणुशश्छिन्नं मांसजातं तस्मिन्नेवाग्नौ श्रपयति । पूर्वप्रक्षालिततण्डुलानपि पृथक्पात्रे श्रपयति । मध्यमाष्टकायां स्थालीपाकपक्षे मांसस्थाने ऽत्रापि पायसचरुं कुर्यात् । मध्यमाष्टकायां मांसस्थानीयस्थालीपाके प्रक्षालिततण्डुलानामेकदेशं श्रपणात्पूर्वं संस्थापितं यत्तेनैवात्र पायसचरुकरणं न्याय्यम् । स्थाल्यां तण्डुलाभावे एकपविचान्तर्द्धानम् । पृथक्पृथक्क्षेत्रणेन मांसमोदनं चाप्रादक्षिण्येन मिश्रीकुर्य्यात् । मांसाभावे पायसचरुम् । ततश्शृतं मांसमोदनं चाभिघार्य्याग्नेर्दक्षिणत उद्वास्य चरुद्वयं न प्रत्यभिघारयेत् । ततः परिस्तृतदेशस्य दक्षिणार्द्धे प्रादेशायामांश्चतुरङ्गुलखातांश्चतुरङ्गुलविस्तृतान्यवाकारान् साद्धाङ्गुलान्तरालान् वाय्वग्निदिङ्मुखान्तान् त्रीन् गर्त्तान् शङ्कुना कुर्यात् । ततः पूर्वकृतस्य गर्त्तस्य पुरस्ताद्विधिवत्संस्कृते देशे गर्त्तानां पश्चिमैकदेशमग्निमाहृत्य प्राङ्मुखो यज्ञोपवीती स्थापयति । ततो मूलसमीपच्छिन्नैर्दर्भैरेतमग्निं परिस्तीर्य्य मध्ये गर्त्तान् परिस्तृणाति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



"अग्न्याशाग्रैः कुशैः कार्यं कषूणां स्तरणं घनैः । दक्षिणान्तां तदग्रैस्तु पितृयज्ञे परिस्तरेत्" इति कर्मप्रदीपस्मरणाद्ग्निदिगग्रैः परिस्तरणं कर्त्तव्यम् । अत्रापि प्राचीनावीतमग्निदिगभिमुख्यं च कर्त्तुः । ततो गर्त्तानां पश्चाद्दक्षिणाग्रैः कुशैः प्रस्तरमास्तारयेद्दक्षिणाप्रवणम् । तस्मिन् प्रस्तरे काष्ठमयमासनमुपदध्यात् । आसनस्य स्थापनं नोपवेशनार्थं किन्त्वदृष्टार्थं, प्रस्तरे आसनासम्भवात् । तस्मिन् चीण्युदकपात्राणि वक्ष्यमाणानि द्रव्याणि चैकैकशः स्थापयेत् । अन्ये तु, "पुत्रादिः पूर्वमासादितानामेकमेकं यजमानस्याप्रादक्षिण्येनाहरति, यजमान आहृतं प्रस्तरे सादयति" इत्याहुः । प्रकृते प्रस्तरे चरुस्थालीद्वयं कांस्यपात्रं दर्वीमुदकं समिद्वयं पिञ्जलीमेकां चान्यान्यप्यासादयति । तान्युच्यन्ते । पत्नी प्रकृते बर्हिषि शिलां संस्थाप्य चन्दनादिगन्धद्रव्यपेषणं करोति । तस्यामेव शिलायां सौवीराञ्जनस्य घर्षणं कृत्वा तेनाञ्जनेन तिस्रो दर्भपिञ्जलीराद्रींकरोति मध्येमध्ये किञ्चिदन्तरं कृत्वा । ततश्चन्दनमञ्जनासक्तदर्भपिञ्जलीश्च तिलतैलं क्षौमदशां च स्वस्तरे स्थापयति । ततः पूर्वनिमन्त्रितानिन्दितांश्छ्रेष्ठानुदङ्मुखानयुग्मान्ब्राह्मणान् पित्रार्थं गर्त्तानां दक्षिणतश्शुचौ देश उपवेशयेत् । अत्र निमन्त्रणवरणक्रमो ऽन्यतो ग्राह्यः । विश्वेदेवार्थं युग्मब्राह्मणोपवेशनमप्यन्यतो ग्राह्यं, अस्माभिश्श्राद्धप्रयोगे वक्ष्यते । अत्र यावत्सूत्रोक्तं तावत्प्रदर्श्यते । प्राचीनावीत्युपविष्टेभ्यो ब्राह्मणेभ्य आसनार्थं दर्भान् प्रदाय तूष्णीमुदकं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दत्वा तिलोदकं ददाति मन्त्रेण। पितुर्नाम गृहीत्वा ऽमुकशर्म्मन्नेतत्ते तिलोदकं ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा । अथाप उपस्पृश्यैवं पितामहस्य प्रपितामहस्य नाम गृहीत्वा तिलोदकं दद्यात् । ततो गन्धान् पूर्वोक्तमन्त्रेण दद्यात् । अमुकशर्मन्नेष ते गन्धो ये चात्रेत्यूहः । "एतत्तिलोदकं पूर्वासादितोदकपात्रेषु तूष्णीं जलमासिच्य मन्त्रेण दातव्यं न ब्राह्मणहस्तेषु" इति केचित्। 'ब्राह्मणहस्तेषु प्रकृतत्वात्' इत्यन्ये। अस्मिन्काले ब्राह्मणानां गन्धाद्युपचाराः कर्त्तव्याः। ततोऽग्नौ करिष्यामीति पितॄननुज्ञाप्य कुर्वित्यनुज्ञातस्त्रिरुदकाञ्जलिसेचनं पर्य्युक्षणं समिदाधानं च कृत्वा, कांस्यपात्रे चरुद्वयं निःशेषं पृथक्स्रुवेणावदाय, संमिश्र्य, मेक्षणेनातिप्रणीताग्नावुपघातं जुहोति । तत्र मन्त्रौ । अनयोः प्रजापतिऋषिर्यजुः पितरो देवता होमे विनियोगः । स्वाहा सोमाय पितृमते । पूर्वाहुतिमन्त्रः । स्वाहा ऽग्नये कव्यवाहनाय । उत्तराहुतिमन्त्रः । "स्वाहापदोच्चारणे ऽग्नौ हुत्वा पश्चान्मन्त्रं समापयेत्" इति स्मृत्यन्तरोक्तं ग्राह्यम् । ततः समिदाधानादि । ततो हुतशेषात्किञ्चित्पितृब्राह्मणेभ्यो दत्वा पिण्डार्थमवशेषयेत् । ब्राह्मणभोजनकाले श्रुत्यादिकं श्रावयेत् । अत्र भोजनार्थं ब्राह्मणोपवेशन-भोजनपात्रालम्भन-संतृप्तिप्रश्नादिकं वक्ष्यमाणमासश्राद्धप्रयोगवत्कर्त्तव्यम् । पिण्डदानं ब्राह्मणानामुत्तरापोशनानन्तरमुच्छिष्टपात्रसन्निधौ छन्दोगानां कर्त्तव्यमिति श्राद्धकल्पोक्तं ग्राह्यम् । अत ऊर्द्ध्वं पिण्डदानविधिमाह सूत्रकारः । अथ प्राचीनावीती वाग्यतो यजमानः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सव्येन हस्तेन दर्भपिञ्जलीं गृहीत्वा, सव्याद्दक्षिणेन पिञ्जलीं गृहीत्वा, सव्येनान्वारभ्य, दक्षिणाग्रां गर्त्तानां मध्ये रेखामुल्लिखेदपहता इतिमन्त्रेण । प्रतिगर्त्तं मन्त्रावृत्तिः । अस्य प्रजापतिर्ऋषिः पितृदेवता यजुर्लेखोल्लेखने विनियोगः । अपहता असुरा रक्षांऽसि वेदिषदः ॥ ततः सव्यहस्तेनाति-प्रणीताग्नेरुल्मुकं गृहीत्वा, दक्षिणेनादाय, सव्येनान्वारभ्य गर्त्तानां दक्षिणभागे ये रूपाणीतिमन्त्रेण स्थापयेत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिरग्निर्देवता त्रिष्टुप्छन्द उल्मुकस्थापने विनियोगः । ये रूपाणि प्रतिमुञ्चमाना असुराःसन्तःस्वधया चरन्ति । परापुरो निपुरो ये भरन्त्यग्निष्टाल्लोकान्प्रणुदत्वस्मात् ॥ गर्त्तेषु दर्भानास्तीर्याथ पितॄनावाहयेदेत पितर इति मन्त्रेण । अस्य मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः पितरो देवता पित्रावाहने विनियोगः । एत पितरस्सोम्यासो गम्भीरेभिः पथिभिः पूर्विणेभिः । दत्तास्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं नियच्छत ॥ अथोदकपात्राणि त्रीणि पूर्वमासादितानि गर्त्तानां सन्निधौ क्रमेण स्थापयेत् । ततो वामहस्तेन प्रथमगर्त्ते स्थापितमुदकपात्रं गृहीत्वा दक्षिणेनादाय सव्येनान्वारभ्य पितृतीर्थेन पूर्वकृतगर्त्तदर्भेषूदकं निनयेत् । तत्र पितुर्नाम सम्बोधनान्तमसावित्यस्य स्थाने कृत्वा मन्त्रः पठनीयः । मन्त्रश्च । असाववनेनिक्ष्व ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा । अथाप उपस्पृश्य द्वितीयोदकपात्रं वामहस्तेन गृहीत्वा द्वितीयगर्त्तदर्भेषु पितामहस्य सम्बोधनान्तं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नाम गृहीत्वाऽवनेनिक्ष्व ये चात्रेत्यादिना पितृतीर्थेनोदकं निनयेत् । अथाप उपस्पृश्य तृतीयोदकपात्रं वामहस्तेन गृहीत्वा प्रपितामहनामयुक्तेन पूर्वोक्तमन्त्रेण तृतीयगर्त्तदर्भेषु पितृतीर्थेन निनयेत् । सर्वत्रोदकनिनयनं दक्षिणहस्तेन, वामहस्तेन पात्रग्रहणं, सव्येनान्वारम्भश्च । ततो हुतशेषस्य ब्राह्मणभोजनार्थं पक्वान्नस्य चैकीकरणम् । ततः सव्येन हस्तेन दर्व्वीं गृहीत्वा, तत्तृतीयांशं दर्व्याऽवदाय, दक्षिणहस्तेन गृहीत्वा, सव्येनान्वारभ्य, पूर्वकृतगर्त्तदर्भेषु पिण्डं निदध्यात् पितुर्नामयुक्तमन्त्रेण । अमुकशर्मन्नेष ते पिण्डो ये चात्र त्वा मनु यांश्च त्वमनु तस्मै ते स्वधा । अप उपस्पृश्य पितामह-प्रपितामहयोः पिण्डौ द्वितीयगर्त्ते तृतीयगर्त्ते च पूर्ववत्क्रमेण स्थापयेत् । पितामहपिण्डदानमन्त्रे पितामहनामग्रहणम्, प्रपितामहपिण्डदानमन्त्रे प्रपितामहनामग्रहणमिति विशेषः । यदि पित्रादीनां नामानि न जानाति, स्वधा पितृभ्यः पृथिविषद्भ्य इति पितृपिण्डं स्थापयेत्, स्वधा पितृभ्यो ऽन्तरिक्षसद्भ्य इति पितामहपिण्डं, स्वधा पितृभ्यो दिवि-षद्भ्य इति प्रपितामहपिण्डम् । अत्र केचित्, "पित्रादी-नामन्यतमस्य नाम्न्यज्ञाते त्रयाणामपि सौत्रनामभिः पिण्डनिधानम् । बहुवचनार्थत्वाल्लोकत्रयसम्बन्धविधानात्प्र-योगैकरूप्याच्च' । अन्ये तु, "पित्रादीनां मध्ये यस्य नाम न ज्ञायते तस्यैव सौत्रनाम्ना पिण्डदानम्, यस्य तु नाम ज्ञायते तस्य तन्नामयुक्तपूर्वोक्तमन्त्रेण पिण्डदानमिति न्याय्यम्, नि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मित्ते नैमित्तिकस्य युक्तत्वान्नित्यमन्त्रानुग्रहाच्च" इति वदन्ति। यथोचितमत्र ग्राह्यम् । अत्र पित्रादिनामापरिज्ञाने पृथिविषदादिनामान्तरविधानादितः पूर्वविहितेष्वर्घ्यतिलोदकगन्धावनेजनोदकदानेषु पृथिविषदादीनां नाम्नां सम्बोधनविभक्त्यन्तानां प्रयोग ऊह्यः । ऊहो यथा । पृथिविषदेतत्ते ऽर्घ्यम् । अन्तरिक्षसदेतत्ते ऽर्घ्यम् । दिविषदेतत्ते ऽर्घ्यम् । एवं तिलोदकादिषु । एवं त्रीन् पिण्डान्निधायात्र पितरो मादयध्वमिति जपति । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः पितरो देवता जपे विनियोगः । अत्र पितरो मादयध्वं यथाभागमावृषायध्वम् ॥ अप्रादक्षिण्येन पर्य्यावृत्योदङ्मुखो वा ऽनुच्छ्वसन्नमीमदन्त पितर इति जपति । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः पितरो देवता जपे विनियोगः । अमीमदन्त पितरो यथाभागमावृषायिषत ॥ ततस्तेनैव पर्य्यावर्त्तमान आगत्योच्छ्वसेत् । ततो वामहस्तेनात्तदर्भपिञ्जलीं गृहीत्वा दक्षिणेनादाय सव्येनान्वारभ्य पितृतीर्थेन पितृपिण्डे स्थापयेत्पितृनामयुक्तमन्त्रेण । मन्त्रश्च । अमुकशर्म्मन्नेतत्त आञ्जनं ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा । अप उपस्पृश्य । एवं पितामहपिण्डे प्रपितामहपिण्डे च तत्तन्नामयुक्तमन्त्रेण दर्भपिञ्जलीं स्थापयेत् । एवं तिलतैलं सुरभिचन्दनं च दद्यात् । अमुकशर्म्मन्नेतत्ते तिलतैलमित्यूहः । अमुकशर्म्मन्नेतत्ते सुरभिचन्दनं । अन्यत्सर्वं पूर्ववत् । अथ यजमान उत्तानदक्षिणपाण्युपरि वामहस्तमधोमुखमितरेतरसंलग्नं कृत्वा पूर्वकृतगर्त्ते संस्थाप्य, नमो वः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पितरो जीवाय नमो वः पितरः शूषायेति नमस्कुर्यात्। सव्योत्तानौ पाणी कृत्वा द्वितीयगर्त्ते, नमो वः पितरो घोराय नमो वः पितरो रसायेति नमस्कुर्यात्। तृतीयगर्त्ते दक्षिणोत्तानौ पाणी कृत्वा, नमो वः पितरः स्वधायै नमो वः पितरो मन्यवे इति नमस्करोति। ततः कृताञ्जलिर्नमो वः पितरः पितरो नमो व इति जपति। एषां प्रजापतिर्ऋषिरुष्णिक्छन्दः पितरो देवता निन्हवे जपे च विनियोगः। नमो वः पितरो जीवाय नमो वः पितरश्शूषाय। नमो वः पितरो घोराय नमो वः पितरो रसाय। नमो वः पितरस्स्वधायै नमो वः पितरो मन्यवे। नमो वः पितरः पितरो नमो वः॥ ततः पत्नीमवेक्षते मन्त्रेण। मन्त्रस्य प्रजापतिर्ऋषिः पितरो देवता पत्न्यवेक्षणे विनियोगः। गृहान्नः पितरो दत्त॥ ततः पिण्डानवेक्षते। मन्त्रस्य प्रजापतिर्ऋषिः पितरो देवता पिण्डावेक्षणे विनियोगः। सदो वः पितरो देष्म॥ ततो दक्षिणहस्तेन पूर्वासादितसूत्रं गृहीत्वा वामेनान्वारभ्य पितृतीर्थेन प्रथमपिण्डे निदध्यान्मन्त्रेण। अमुकशर्मन्नेतत्ते वासो ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा॥ अप उपस्पृश्य पूर्ववत्पितामहनामयुक्तमन्त्रेण पितामहपिण्डे सूत्रं निदध्यात्, तथैव प्रपितामहपिण्डे सूत्रं निदध्यात्। तत आचान्तेषु ब्राह्मणेषु मासश्राद्धवत्सुप्रोक्षितमस्त्वित्याद्यर्घपात्रमुत्तानकरणान्तं कुर्यात्। ततः सव्येन पाणिनोदकपात्रं गृहीत्वा पितृतीर्थेन पिण्डान्परिषिञ्चेदूर्जं वहन्तीरितिमन्त्रेण। अस्य मन्त्रस्य प्रजापतिर्ऋषिः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पिपीलिकामध्योष्णिक्छन्दः पितरो देवता पिण्डपरिषेचने विनियोगः। ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतः स्वधा स्थ तर्पयत मे पितृन्॥ ततो मध्यमपिण्डं पत्न्यै प्रयच्छति पुत्रकामा चेत्पत्नी, सा च मन्त्रेण प्राश्नाति। अस्य प्रजापतिर्ऋषिर्गायत्रीछन्दः पितरो देवता पिण्डप्राशने विनियोगः। आधत्त पितरो गर्भं कुमारं पुष्करस्रजम्। यथेह पुरुषः स्यात्॥ अथवा, यजमानपुत्रपौत्रभ्रात्रादिर्भवेत्। अभून्नो दूत इति मन्त्रेणोल्मुकं जलेनाभ्युक्ष्य द्वन्द्वं चरुस्थाल्यादिकं प्रक्षाल्यान्यत्र स्थापयेत्। अस्मिन्नेव क्रमे दक्षिणादानादिकं मासश्राद्धवत्कृत्वा ब्राह्मणान्विसर्ज्जयेत्। अस्य मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवतोल्मुकाभ्युक्षणे विनियोगः। अभून्नो दूतो हविषो जातवेदा अवाड्ढव्यानि सुरभीणि कृत्वा। प्रादात्पितृभ्यः स्वधया ते अक्षन् प्रजानन्नग्ने पुनरेहि योनिम्॥ ततो वामदेव्यं गीत्वा जले पिण्डान् प्रक्षिपेत्। प्रणीतेऽग्नौ वा क्षिपेत्। ब्राह्मणं वा भक्षयेत्। अथवा गवे दद्यात्॥ इत्यन्वष्टक्यप्रयोगः॥

अथ नान्दीमुखश्राद्धप्रयोगविधिरुच्यते। जातकर्मादिषु, पूर्त्तकर्मसु च, नान्दीमुखश्राद्धं कर्त्तव्यम्। तत्र पित्रर्थं युग्मान्ब्राह्मणानाशयेत्। प्रादक्षिण्येनासनाद्युपचाराः कर्त्तव्याः। तिलार्थे यवाः, अन्ये च विधयः कर्मप्रदीपोक्ता ग्राह्याः। गोभिलसूत्रानुसारिणां श्राद्धप्रयोगमग्रे वक्ष्यामः।

अथपिण्डपितृयज्ञप्रयोगः॥ अन्वष्टक्यस्थालीपाकवृत्पि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ण्डपितृयज्ञः कर्त्तव्यः । मांसवहं ब्राह्मणभोजनं च वर्ज्जयेत् । स चामावास्यायामन्वाधानदिने ऽपराह्णे कर्त्तव्यः । पिण्डपितृयज्ञं कृत्वा तस्मिन्नेव दिने मासश्राद्धं च ब्राह्मणभोजनपिण्डसहितं कर्त्तव्यम् । आहिताग्नेर्दक्षिणाग्नौ हविषश्रपणं तस्मादतिप्रणीताग्नौ होमः । अनाहिताग्नेर्गृह्याग्नौ हविषसंस्करणम्, ततो ऽतिप्रणीताग्नौ होमः । अमावास्यायामपराह्णे वैश्वदेवबलिहरणं कृत्वा पितॄणां तृप्त्यर्थं पिण्डपितृयज्ञं करिष्ये इति सङ्कल्प्य गृह्याग्निमुपसमाधाय प्राचीनावीती अग्नेः पश्चाद्दर्भेषूलूखलं मुषलं शूर्प-माज्यस्थालीं चरुस्थालीं पवित्रं व्रीहीन्मेक्षणं दर्वीं चीण्युदकपात्राणि स्रुवं अञ्जं समूलबर्हिर्मुष्टिं चौमदशां समूलकुशान् समिद्द्वयमेकां पिञ्जलीं कांस्यपात्रं तिलांश्च दक्षिणापवर्गमासादयेत् । अथाग्नेः पश्चाद्दक्षिणाग्रदर्भेषूलूखलं संस्थाप्य व्रीहिनिर्वापप्रभृति चरुश्रपणान्तं कर्मान्वष्टक्यस्थालीपाकोक्तविधिना कुर्यात् । ततोऽग्नेर्दक्षिणतश्चरुमुद्वास्याग्नेर्दक्षिणत एकं गर्तं कुर्यात् । गर्त्तस्य दक्षिणतः पञ्च भूसंस्कारान्कृत्वा तत्र गृह्याग्नेरेकदेशं प्रणयति । ततो बर्हिषा प्रणीतमग्निं समूलकुशैर्दक्षिणाग्रैर्गर्त्तमध्ये च परिस्तरेत् । गर्त्तस्य पश्चान्न प्रस्तरासादनम् । अञ्जनाभ्यञ्जनचन्दनानां नासादनं निषेधात् । नात्र ब्रह्मण उपवेशनम् । ततः पूर्ववत्पात्रेषु तिलोदकं दद्यात् । नात्राग्नौ करणस्यानुज्ञा ब्राह्मणाभावात् । पूर्ववन्मेक्षणेन चरुमवदायाहुतिद्वयं कुर्य्यात् । अत ऊर्ध्वं प्राचीनावीती

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



गर्त्तलेखाकरणं पूर्ववत्कुर्यात् । नाचोल्मुकनिधानं निषेधात् । अत्र वा गर्त्तमध्ये स्तरणम् । तत आवाहनम् । ततो रेखायां दर्भेषूदकावनेजनं, पिण्डस्थापनं, पर्य्यावर्त्त्य जपञ्च पूर्ववत्कुर्य्यात् । नाचाञ्जनाभ्यञ्जनचन्दनदानानि नमस्कारञ्च, निषेधात् । ततोऽञ्जलिकृतजपः । ततः पल्यवेक्षणं पिण्डावेक्षणं वासोनिधानं चावशिष्टानि पूर्ववत्कुर्यात् । अत्र केचित्, "वासोनिधाने पूर्ववन्न मन्त्रः, किन्तु यथामन्त्रकाण्डपठितः, स च एतद्वः पितरो वास" इत्याहुः । वस्तुतस्तु पिण्डपितृयज्ञविधेरन्वष्टक्यस्थालीपाकातिदेशाद्वासोनिधानं तत्रोक्तमन्त्रेणैवात्र विशेषानुक्तेः । मन्त्रकाण्डपठितमन्त्रः सूत्रान्तरविषयो भवितुमर्हतीति युक्तम् । ततः पिण्डपरिषेचनम्, मध्यमपिण्डदानम्, पात्रप्रक्षालनजलेन पिण्डप्रक्षेपणञ्च ॥ इति पिण्डपितृयज्ञप्रयोगः ॥

अथ शाकाऽष्टकाप्रयोग उच्यते । सा च माघमासे पौर्णमास्या अनन्तरं कृष्णाष्टम्यां कर्त्तव्या । तस्याः प्रयोगोऽपूपाष्टकाप्रयोगवत्कर्त्तव्यः । अत्रापूपानां निवृत्तिः । ओदनचरुं कृत्वा शाकव्यञ्जनं श्रपयेत् । शाकव्यञ्जनं चरुञ्च पृथक्प्रक्षणाभ्यां स्रुच्यवदाय मिश्रीकृत्याष्टकायै स्वाहेति जुहोतीति विशेषः ॥ इति शाकाष्टकाप्रयोगः ॥

अथ प्रसङ्गाद्वपाहोममन्त्र उच्यते ॥ पितृदैवत्येषु पशुषु वह वपामितिमन्त्रेण वपां जुहोति । अस्य मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता वपाहोमे विनियोगः । वह वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान्पराचः । मेदसः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



कुल्या अभि तान् स्रवन्तु सत्या एषामाशिषस्सन्तु कामास्स्वाहा ॥ अग्नय इदं न मम । यद्यप्यत्राष्टकाव्यतिरिक्तं पितृदैवत्यपशुसहितं कर्म नोक्तं, तथाऽपि "श्रोत्रिये ऽभ्यागते श्राद्धं महोक्षेण महाजेन वा दद्यात्" इत्यादिशास्त्रान्तरविहितकर्मान्तराभिप्रायेण वपाहोमे मन्त्रविशेष उक्तः । अनुपयोगात्स्पष्टमनुक्तत्वाच्च तस्य प्रयोगो नोक्तः ॥ देवदैवत्येषु पशुषु जातवेदो वपया गच्छेतिमन्त्रेण वपां जुहोति । प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दस्तत्तदुद्देश्या देवता वपाहोमे विनियोगः । जातवेदो वपया गच्छ देवा२ त्व२ हि होता प्रथमो बभूव । सत्या वपा प्रगृहीता मे अस्तु समृध्यतां मे यदिदं करोमि ॥ एतेषां पशूनां सूत्रान्तरे काम्यत्वावगमात्सूत्रकृद्भिरनुपदिष्टत्वाच्च नात्र प्रयोग उक्तः । येषु चरुकर्मसु होममन्त्रस्यानुपदेशस्तेष्वष्टकायै स्वाहा श्रवणायै स्वाहेत्यादयो मन्त्रा ऊह्याः ॥

अथ ऋणनिवृत्तिप्रयोग उच्यते ॥ स्वस्य ऋणे प्रकर्षेण ज्ञायमाने, नष्टे धनिनि, तद्वंश्येषु चासत्सु, पालाशानां मध्यमपर्णेन यत्कुसीदमित्याज्याहुतिं जुहुयात् । अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो ऽग्निर्देवता होमे विनियोगः । यत्कुसीदमप्रदत्तं मयेह येन यमस्य निधिना चराणि । इदं तदग्ने अनृणो भवामि जीवन्नेव प्रतिदत्ते ददानि ॥ १ ॥ यावदृणं तावता द्रव्येणाज्यं गृहीत्वा होमः कर्त्तव्यः । अत्र क्षिप्रहोमविधिर्ग्राह्यः ॥ इत्यृणनिवृत्तिप्रयोगः ॥

अथ हलाभियोगप्रयोग उच्यते ॥ अयमपि नित्यः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



काम्यश्च, नित्यप्रयोगपठितत्वात्। मन्वादिभिर्ब्राह्मणस्यापि जीवनार्थं कृषिकर्मणोऽभ्यनुज्ञानत्वात्। अस्य नोदगयनापेक्षाऽसम्भवात्। अथ वसन्त एव पुण्यनक्षत्रे हलाभियोगकर्माङ्गं नान्दीमुखश्राद्धम्, ब्राह्मणानुज्ञां, गणेशपूजनं च कृत्वा, हलाभियोगं करिष्ये इति सङ्कल्प्येध्माबर्हिषोरुपकल्पनादि-पूर्णपात्रदक्षिणादानान्तं पार्वणस्थालीपाकवत्कुर्यात्। निर्वापकाले, इन्द्राय त्वा जुष्टं निर्वपामि। मरुद्भ्यस्त्वा जुष्टं निर्वपामि। पर्जन्याय त्वा जुष्टं निर्वपामि। अशन्यै त्वा जुष्टं निर्वपामि। भगाय त्वा जुष्टं निर्वपामि। आज्यभागान्ते चरुहोमाः। इन्द्राय स्वाहा। इन्द्रायेदं न मम। मरुद्भ्यस्स्वाहा। मरुद्भ्य इदं न मम। पर्जन्याय स्वाहा। पर्जन्यायेदं न मम। अशन्यै स्वाहा। अशन्या इदं न मम। भगाय स्वाहा। भगायेदं न मम। ततः स्विष्टकृतः प्रागाज्यहोमाः। सीतायै स्वाहा। सीताया इदं न मम। आशायै स्वाहा। आशाया इदं न मम। अरडायै स्वाहा। अरडाया इदं न मम। अनघायै स्वाहा। अनघाया इदं न मम। दक्षिणादानान्ते वामदेव्यगानं ब्राह्मणभोजनं च। एवं कृष्यारम्भे हलाभियोगस्थालीपाकं कृत्वा कर्षणं कुर्यात्॥ ततः स्वीयक्षेत्रेषु सर्वेषु कृष्टेषु शरदि वसन्ते च सीतायज्ञः क्षेत्रस्य पूर्वार्द्धे उत्तरार्द्धे वा कार्य्यः। ततः सर्वक्षेत्रेषु बीजवपने कृते प्रवपणयज्ञः कर्त्तव्यः। स्वीयसर्वशस्यलवनानन्तरं प्रलवनयज्ञः कर्त्तव्यः। पक्वं शस्यं क्षेत्रादाहृत्य यस्मिन् प्रदेशे खलीकृते तत्र खलयज्ञः कर्त्तव्यः। खलाकृष्टे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



धान्ये समागते पर्यायणयज्ञः कर्त्तव्यः ॥ सीतायज्ञः शरदि वसन्ते च भवति। सीतायज्ञादिषु हलाभियोगस्थालीपाकान्ता नव देवता आज्येन यष्टव्याः। अचाज्यतन्त्रम्। 'क्षिप्रहोमतन्त्रम्' इति केचित्। ततः सीतायज्ञादीनामन्त उक्तकाले क्षिप्रहोमविधिनाऽग्नावाखुराजाय स्वाहेत्येकामाज्याहुतिं जुहोति। अचाखुराजयज्ञं करिष्ये इति सङ्कल्पः ॥

अथेन्द्राणीस्थालीपाकप्रयोग उच्यते ॥ अस्य स्थालीपाकस्यैकाष्टकेतिनामान्तरम्। प्रोष्ठपद्या ऊर्द्धं कृष्णाष्टम्यामिन्द्राणीस्थालीपाकं करिष्ये इति सङ्कल्प्य सर्वं पार्वणस्थालीपाकवत्कुर्य्यात्। निर्वापकाले, इन्द्राण्यै त्वा जुष्टं निर्वपामीतिनिर्वापः। आज्यभागान्ते चरुमवदायैकाष्टकातपसेतिमन्त्रेणैकामाहुतिं जुहोति। अस्य मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्द इन्द्राणी देवता स्थालीपाकहोमे विनियोगः। एकाऽष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रं। तेन देवा असहन्त शत्रून् हन्ता सुराणामभवच्छचीभिः स्वाहा॥ इन्द्राण्या इदं न मम। इति नित्यनैमित्तिकप्रयोगविधिरुक्तः ॥

अत ऊर्द्धं काम्येषु कर्मसु विधीनुपदेक्ष्यन्त्याचार्य्याः। "वक्ष्यमाणविधीनां पूर्वोक्तेषु नित्यनैमित्तिकेषु चानुष्ठानं भवतीति केचिदाचार्य्या मन्यन्ते" इति भगवान् सूत्रकार आह॥ वक्ष्यमाणकर्मकरणमन्त्राणां "मन्त्रकाण्डे नित्यनैमित्तिककर्मोपयुक्तमन्त्रपाठानन्तरमेव पाठात्काम्येष्वेवानुष्ठानं वेदपुरुषाभिप्रेतम्" इति शिष्टानामाशयः। अत एवास्माभिः पूर्वेषु कर्मसु न्यस्त-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



करणं मन्त्रवत्परिसमूहनवैरूपाक्षप्रपदजपा नोक्ताः । काम्येषु कर्मसु तन्त्र होमेष्वग्निमुपसमाधाय पश्चादग्नेन्र्यञ्चौ पाणी प्रतिष्ठाप्येदं भूमेर्भजामह इति मन्त्रं जपति । वस्वन्तं रात्रौ धनमित्यन्तं दिवा । "न्यञ्चकरणप्रकारः 'कर्मप्रदीपे' । दक्षिणं वामतो बाह्यमात्माभिमुखमेव च । करं करस्य कुर्वीत करणे न्यञ्चकर्मणः ॥ अस्यैव 'भूमिजप' इति संज्ञा । अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता भूमिजपे विनियोगः । इदं भूमेर्भजामह इदं भद्रꣳ सुमङ्गलम् । परा सपत्नान् बाधस्वान्येषां विन्दते वसु ॥ अन्येषां विन्दते धनम् ॥ तत इमꣳस्तोममिति तृचेनाग्निपरिसमूहनं कुर्यात् । "तत्प्रकारस्तु 'कर्मप्रदीपे' । कृत्वाऽग्न्यभिमुखौ पाणी स्वस्थानस्थौ सुसंहितौ । प्रदक्षिणं तथाऽऽसीनः कुर्यात्परिसमूहनम्" ॥ तिसृणां प्रजापतिर्ऋषिर्जगतीछन्दोऽग्निर्देवता परिसमूहने विनियोगः । इमꣳ स्तोममर्हते जातवेदसे रथमिव सम्महेमा मनीषया । भद्रा हि नः प्रमतिरस्य सꣳसद्यग्ने सख्ये मा रिषामा वयं तव ॥ भरामेध्मं कृणवामा हवीꣳषि ते चितयन्तः पर्वणा पर्वणा वयम् । जीवातवे प्रतराꣳ साधया धियोऽग्ने सख्ये मा रिषामा वयं तव ॥ शकेम त्वा समिधꣳ साधया धियस्त्वे देवा हविरदन्त्याहुतम् । त्वमादित्याꣳ आवह तान् ह्युश्मस्यग्ने सख्ये मा रिषामा वयं तव ॥ होमात्पूर्वमनुपर्युक्षणानन्तरं वैरूपाक्षमन्त्रं जपेत् ॥ द्विविधानि काम्यकर्माणि, होमयुक्तानि होमरहितानि च, तत्र होमयुक्तेषु वैरूपाक्षजपः प्रपदजपश्च, होमरहितेषु प्रपदजपमात्रम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तत्प्रकारः । तपश्च तेजश्चेत्यारभ्य महान्तमात्मानं प्रपद्ये इत्येतदन्तमनुच्छ्वसन्नर्थमनस्को जपित्वा विरूपाक्षो ऽसीत्यारभ्योच्छ्वसन्निगदशेषं जपेत् । अत्र निगदे प्राणानायम्य जपः प्रपदजपस्तद्रहितो वैरूपाक्षजप इति विवेकः ॥ अस्य मन्त्रस्य प्रजापतिर्ऋषिर्निगदो रुद्ररूपो ऽग्निर्देवता जपे विनियोगः । तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्मश्च सत्वं च वाक् च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु भूर्भुवःस्वरों महान्तमात्मानं प्रपद्ये । विरूपाक्षो ऽसि दन्ताञ्जिस्तस्य ते शय्यापर्णे गृहा अन्तरिक्षे विमितꣳ हिरण्मयं तद्देवानाꣳ हृदयान्ययस्मये कुम्भे अन्तःसंनिहितानि तानि बलभृच्च बलसाच्च रक्षतो प्रमनी अनिमिषतस्सत्यं यत्ते द्वादश पुत्रास्ते त्वा संवत्सरेसंवत्सरे कामप्रेण यज्ञेन याजयित्वा पुनर्ब्रह्मचर्य्यमुपयन्ति त्वं देवेषु ब्राह्मणोऽस्यहं मनुष्येषु ब्राह्मणो वै ब्राह्मणमुपधावत्युपत्वा धावामि जपन्तं मा माप्रतिजापीर्जुह्वन्तं मा माप्रतिहौषीः कुर्वन्तं मा माप्रतिकार्षीस्त्वां प्रपद्ये त्वया प्रसूत इदं कर्म करिष्यामि तन्मे राध्यतां तन्मे समृध्यतां तन्म उपपद्यताꣳ समुद्रो मा विश्वव्यचा ब्रह्मा ऽनुजानातु तुथो मा विश्ववेदा ब्रह्मणः पुत्रो ऽनुजानातु श्वात्रो मा प्रचेता मैत्रावरुणो ऽनुजानातु तस्मै विश्वरूपाक्षाय दन्ताञ्जये समुद्राय विश्वव्यचसे तुथाय विश्ववेदसे श्वात्राय प्रचेतसे सहस्राक्षाय ब्रह्मणः पुत्राय नमः ॥ काम्यकर्मानुष्ठानात्पूर्वं त्रिरात्रमुपवासः । अशक्तौ त्वेककाले भोजनं तच्च दिवा नक्तं वा । पुनःपुनरावर्त्यमानानां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



काम्यकर्म्मणां प्रथमारम्भे त्रिरात्रभोजननिषेधादिकं भवति। प्रतिपद्दिने ऽनुष्ठीयमाननित्यस्थालीपाकेन सह काम्यकर्मणां प्रयोगे तत्पूर्वदिने ऽनुष्ठीयमानोपवसथव्रतम्, न तु त्रिरात्रमुपवासो, नैमित्तिककाम्यकर्मसु निमित्तानामनियतत्वेन कर्म कृत्वा पश्चात्त्रिरात्रमुपवासादिकं कुर्यात्। इति काम्यकर्मपरिभाषा ॥

अथ काम्यकर्मविशेषा उच्यन्ते ॥ ब्रह्मवर्चसकामो ऽरण्यं गत्वा प्रागग्रेषु दर्भेष्वासीनः कामसिद्धिपर्य्यन्तं प्रपदमन्त्रं प्रयुञ्जीत। प्रपदजपविधानं तूक्तमेव। पुत्रकामः पशुकामो वोदगग्रेष्वासीनो ऽरण्ये प्रयुञ्जीत। उभयकामस्योदगग्रेषु प्रागग्रेषु चासनम्। प्रपदप्रयोगार्थं प्रपदकर्मारम्भात्पूर्वं नान्दीमुखश्राद्धं, ब्राह्मणानुज्ञां, गणेशपूजनं च, कर्त्तव्यम् ॥

अथ पशुस्वस्त्ययनकर्मोच्यते ॥ उदगयने, शुक्लपक्षे, पुण्यनक्षत्रे, प्रातः कृतनित्यक्रियो गवां स्वस्त्ययनार्थं पशुस्वस्त्ययनकर्म करिष्ये इति सङ्कल्प्य, पूर्ववदग्निं प्रतिष्ठाप्य क्षिप्रहोमविधिना व्रीहियवौ मिश्रीकृत्य ताभ्यां सहस्रबाहुर्गौपत्य इतिमन्त्रेण जुहुयात्। नात्र परिसमूहन-विरूपाक्ष-प्रपदजपाः। "न कुर्यात्क्षिप्रहोमेषु द्विजः परिसमूहनम्। विरूपाक्षञ्च न जपेत्प्रपदं च विवर्ज्जयेत्" इतिकर्मप्रदीपस्मरणात्॥ अस्य मन्त्रस्य प्रजापतिरृषिरुष्णिक्छन्दः प्रजापतिर्देवता पशुस्वस्त्ययनहोमे विनियोगः। सहस्रबाहुर्गौपत्यः पशूनभि-



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



रक्षतु । मयि पुष्टिं पुष्टिपतिर्दधातु मयि प्रजां प्रजापतिस्स्वाहा॥ प्रजापतये इदं न मम । ततो ब्राह्मणभोजनम् ॥

अथ परचित्तप्रसादकरकर्मोच्यते ॥ यस्य पुरुषस्य प्रसादात्स्वकार्य्यानुकूलमिच्छेत्तस्मै महावृक्षफलानि कौतोमताख्यमन्त्रेण परिजप्य दद्यात् । मन्त्रितफलान्यात्मन एकाधिकानि युग्मानि चत्वारि षष्ठाष्टौ वा स्थापयेत् । वृक्षाश्च चूत-पनस-नारिकेर-बीजपूरादयः । एषामन्यतमफलान्यभिमन्त्र्य दद्याद्विशेषानुक्तेः । कौतोमतमितिमन्त्रस्य प्रजापतिऋषिस्त्रिपादनुष्टुप्छन्दो वागोषधी देवते ऽयुग्ममहावृक्षफलदाने विनियोगः । कौतोमतं संवननं सुभागं करणं मम । नाकुलीनाम ते माता ऽथाहं पुरुषानयः । यन्नौ कामस्य विच्छिन्नं तन्नौ सन्धेह्योषधे ॥

अथ वृक्षइवेतिपञ्चर्चप्रयोगा उच्यन्ते ॥ तत्राद्यं पृथिवीप्राप्त्यर्थं पार्थिवं कर्म, तच्च वृक्षइवेत्यादिपञ्चर्चविषयम् । तदनुष्ठानायार्द्धमासमुपवासः । अशक्तावर्द्धमासं दिवानक्तं वा पेयां पीत्वोपवसेत् । पेयाशब्देन यवागूर्ग्राह्या । अथवा, यस्यां पेयायामात्मप्रतिबिम्बदर्शनं भवेत्सा ग्राह्या । इत ऊर्द्ध्वं यत्रार्द्धमासव्रतकथनं तत्राशक्तौ पेयापानं वेदितव्यम् । उपवासान्ते पौर्णमास्यां निशि ग्रीष्मे ऽप्यक्षीणजलह्रदं गत्वा, अथवा, "मध्ये स्थण्डिलमन्ते च वारिणा परिसंवृतम् । अविदासिनं ह्रदं विद्यात्तादृशं कर्मणो विदुः" इति गृह्यासङ्ग्रहोक्तलक्षणं ह्रदं वा गत्वा, नाभिमात्रजले स्थित्वा, चास्ये ऽक्षततण्डुलान् प्रक्षिप्य, मनसा पञ्चर्चं उच्चार्य, प्रत्यृचमन्ते

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



स्वाहापदमुच्चार्य्यास्येनोदके आस्यस्थतण्डुलान् जुहुयात् । प्रतिस्वाहाकारं होमः । अस्या ऋचः प्रजापतिर्ऋषिरनुष्टुप्छन्द आदित्यो देवता ऽक्षततण्डुलहोमे विनियोगः । वृक्ष इव पक्वस्तिष्ठसि सर्वान् कामान् भुवस्य मे । यस्त्वेवं वेद तस्मै मे भोगान् धुक्ष्वाक्षतान् वृहन् स्वाहा ॥ आदित्यायेदं न मम । एवं वक्ष्यमाणाभिश्चतसृभिः स्वाहान्ताभिर्ऋग्भिरक्षततण्डुलान् जुहुयात्प्रत्यृचम् । एतैर्होमेन गृहक्षेत्रराज्यादिप्राप्तिः । अतः पार्थिवकर्मेति नाम ॥

अथास्यामेवोक्तर्चि भोगार्थं कर्मोच्यते ॥ त्रिरात्रमुपोष्योपवासान्ते पौर्णमास्यां मध्याह्ने यस्य धनिकस्य सकाशादात्मनो भोगान् साधयितुमिच्छेत्तस्य सन्दर्शने स्थित्वा वृक्ष इवेत्यृचा ऽऽदित्यमुपतिष्ठेत । एवमुपस्थानेनाभिप्रेतार्थसिद्धिर्भवति ॥

अथ वृहत्पत्रस्वस्त्ययनप्रयोगः ॥ तस्य फलं महावाहनानां हस्त्यश्वादीनामायुरारोग्यसिद्धिः । तदर्थमादित्ये परिवेषसंयुक्ते ऽक्षततण्डुलान्द्वितीययर्चा क्षिप्रहोमविधिना ऽग्नौ जुहुयात् । आदित्यपरिवेषस्यानियतकालत्वादेतत्कर्म कृत्वा पश्चात्त्रिरात्रव्रतमनुष्ठेयम् । अस्याः पूर्ववदृषिच्छन्दोदेवताः, पत्रस्वस्त्ययनार्थमक्षततण्डुलहोमे विनियोगः । ऋतᳪ सत्ये प्रतिष्ठितं भूतं भविष्यता सह । आकाश उपनिरज्जतु मह्यमन्नमथो श्रियं स्वाहा । आदित्यायेदं न मम ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अथ क्षुद्रपशुस्वस्त्ययनप्रयोगः ॥ अस्य फलं क्षुद्रपशूनामजादीनामायुरारोग्यप्राप्तिः । यदा चन्द्रमाः परिवेषितो भवेत्तदा तिलतण्डुलान् तृतीयया पूर्ववज्जुहुयात्पश्चादुपवासः । अस्याः प्रजापतिर्ऋषिरनुष्टुप्छन्दश्चन्द्रमा देवता तिलतण्डुलहोमे विनियोगः । अभि भागो ऽसि सर्वस्मिꣳस्तदु सर्वं त्वयि श्रितम् । तेन सर्वेण सर्वो माविवासन विवासय स्वाहा । चन्द्रायेदं न मम ॥

अथ स्वस्त्यर्थकर्मप्रयोग उच्यते ॥ यानर्थान् साधयितुं पुरुषो ऽन्यत्र गच्छति गमनात्पूर्वं चतुर्थ्या ऋचाऽऽदित्योपस्थानं कर्त्तव्यं, तेनाभिप्रेतार्थवान् स्वस्तिमांश्च पुनरागच्छति । अस्या ऋचः प्रजापतिर्ऋषिरनुष्टुप्छन्द आदित्यो देवतोपस्थाने विनियोगः । कोश इव पूर्णो वसूनां त्वं प्रीतो ददसे धनम् । अदृष्टो दृष्टमाभर सर्वान् कामान् प्रयच्छ मे ॥

अथ प्रवासाद्गृहागमनप्रयोगः ॥ पञ्चम्या सूर्यमुपस्थाय प्रवासाद्गृहमागच्छेत् । अस्या ऋचः प्रजापतिर्ऋषिरनुष्टुप्छन्द आदित्यो देवतोपस्थाने विनियोगः । आकाशस्यैष आकाशो यदेतद्भाति मण्डलम् । एवं त्वा वेद यो वेदेशानेशान् प्रयच्छ मे ॥ इत इवेत्यादयः पञ्चर्चप्रयोगास्समाप्ताः ॥

अथानकाममारकर्मप्रयोग उच्यते ॥ तस्य फलं कुष्ठराजयक्ष्मादिभ्यः पापरोगेभ्यः परप्रयुक्ताभिचाराच्च यद्भयं तन्निवृत्तिः । तदर्थमहरहर्नित्यकर्मानुष्ठानान्ते भूर्भुवस्स्वरोꣳ सूर्य इवेति मन्त्रमनकाममाराख्यं जपेत् । अस्य मन्त्रस्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रजापतिर्ऋषिर्यजुरात्मा देवता जपे विनियोगः । भूर्भुवस्स्वरोऽ सूर्य्य इव दृशे भूयासमग्निरिव तेजसा वायुरिव प्राणेन सोम इव गन्धेन बृहस्पतिरिव बुद्ध्या ऽश्विनाविव रूपेणेन्द्राग्नी इव बलेन ब्राह्मणभाग एवाहं भूयासं पाप्मभागा मे द्विषन्तः ॥ १ ॥

अथालक्ष्मीनिर्णोद होमप्रयोग उच्यते ॥ तस्य फलम लक्ष्मीनिवृत्तिस्तेषां होमानामनुष्ठानं शुक्लपक्षे कृष्णपक्षे प्रतिपदि स्थालीपाके प्रधानचरुहोमानन्तरं स्विष्टकृद्धोमात्प्रागाज्येन कर्त्तव्यम । तत्र पञ्चदश मन्त्राः । मूर्द्धोऽधीत्यादयः षट्, या तिरश्चीति सप्तमी, वामदेव्यसाम्न ऋक्त्रयम्, व्याहृतयस्तिस्रः, अपेहीति, प्रजापते नत्वदेवतानीति च । षण्णां मन्त्राणां प्रजापतिर्ऋषिरनुष्टुप्छन्दो ऽग्निर्देवता ऽलक्ष्म्यपनोदने विनियोगः । मूर्द्धोऽधि मे वैश्रवणाङ्किरसो ऽनुप्रवेशिनः । ललाटाद्वस्वरान् घोरान् विघनान्विहृहामिव स्वाहा ॥ १ ॥ अग्नय इदं न मम । ग्रीवाभ्यो मे स्कन्धाभ्यां मे नस्तो मे ऽनुप्रवेशिनः । मुखान्मे वद्दान् घोरान् विघनान् विहृहामिव स्वाहा ॥ २ ॥ अग्नय इदं न मम । बाहुभ्यां मे यतोयतः पार्ष्ण्योरन्तुतानधि । उरस्तो वद्दान् घोरान् विघनान्विहृहामिव स्वाहा ॥ ३ ॥ अग्नय इदं न मम । वङ्क्षणाभ्यां मे लोहितादान्यो निहान्यजिहानधि । ऊरुभ्यो निश्चिषो घोरान् विघनान् विहृहामिव स्वाहा ॥ ४ ॥ अग्नय इदं न मम । जङ्घाभ्यां मे यतोयतः पार्ष्ण्योरन्तुतानधि । पादयोर्विकिरान् घोरान् विघनान् विहृहामिव स्वाहा ॥ ५ ॥ अग्नय इदं न

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मम । परिबाधं यजामहे ऽणुजङ्घं शबलोदरम् । यो नो ऽयं परिबाधते दानाय भगाय च स्वाहा ॥ ६ ॥ अग्नय इदं न मम । या तिरश्ची निपद्यते अहं विधरणी इति । तां त्वा घृतस्य धारया यजे संराधनीमहम् । संराधन्यै देव्यै देष्ट्र्यै स्वाहा ॥ संराधन्या इदं न मम । वामदेवीसाम्नामृचां वामदेव ऋषिर्गायत्रीछन्द इन्द्रो देवता होमे विनियोगः । कया नश्चित्र आभुवदूती सदावृधः सखा । कया शचिष्ठया वृता स्वाहा ॥ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु स्वाहा ॥ अभीषुणः सखीनामविताजरितॄणां । शतं भवास्यूतये स्वाहा ॥ इन्द्रायेदं न मम । पूर्वाहुतिद्वये ऽप्येवम् । भूः स्वाहा । भुवस्स्वाहा । स्वः स्वाहा ॥ अपेहीति मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो ऽग्निर्देवता ऽलक्ष्म्यपनोदनहोमे विनियोगः । अपेहि त्वं परिबाध माविबाध विबाधथाः । सुगं पन्थानं मे कुरु येन मा धनमेष्यति स्वाहा ॥ अग्नय इदं न मम । प्रजापत इतिमन्त्रस्य प्रजापतिर्ऋषिः पङ्क्तिश्छन्दः पजापतिर्देवता ऽऽज्यहोमे विनियोगः । प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां स्वाहा ॥ प्रजापतय इदं न मम । इत्यलक्ष्मीनिर्णोदप्रयोगः ॥

अथ यशस्कामोपस्थानप्रयोग उच्यते ॥ प्रतिदिनं नित्योपस्थानानन्तरं यशोवृद्ध्यर्थं यशोऽहं भवामीत्यादिभिः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पञ्चभिर्ऋग्भिरादित्यमुपतिष्ठेत। प्रातःकाले, दिशः प्रातरन्हस्य तेजस इति पाठः । मध्यान्हे, मध्यन्दिनस्य तेजस इतिपाठः । अपराह्णे, अपराह्णस्य तेजस इतिपाठः । एषां मन्त्राणां प्रजापतिर्ऋषिर्निगद आदित्यो देवतोपस्थाने विनियोगः । यशोऽहं भवामि ब्राह्मणानां यशो राज्ञां यशो विशां । यशस्सत्यस्य भवामि भवामि यशसां यशः ॥ १ ॥ पुनर्मा यन्तु देवता या मदपचक्रमुः । मरुत्वन्तो महान्तो भवाम्यस्मिन् पात्रे हरिते सोमपृष्ठे ॥ २ ॥ रूपंरूपं मे दिशः प्रातरन्हस्य तेजसः । अन्नमुग्रस्य प्राशिषमस्तु वयि मयि त्वयीदमस्तु त्वयि मयीदम् ॥ ३ ॥ यदिदं पश्यामि चक्षुषा त्वया दत्तं प्रभासया । तेन मा भुञ्ज तेन भुक्षिषीय तेन मा विश ॥ ४ ॥ अहनो अत्यपीपरद्रात्रियो अतिपारयत् । रात्रियो अत्यपीपरदहनो अतिपारयत् ॥ ५ ॥ इति यशस्कामोपस्थानप्रयोगः ॥

अथ स्वस्त्ययनकरोपस्थानमुच्यते ॥ तत्र प्रातःकाले नित्योपस्थानान्ते आदित्यं नावमित्यृचोद्यन्तत्वेतियजुषा च कर्त्तव्यम् । सायमपरान्हे काले आदित्यं नावमित्यृचा प्रतितिष्ठन्तत्वेतियजुषा चोपस्थानं कर्त्तव्यम् । "उपस्थानमन्त्रे आदित्यपदश्रुतेरादित्यस्योपस्थानम्" इति शिष्टा मन्यन्ते । आदित्यं नावमारोक्षमितिमन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्द आदित्यो देवता स्वस्त्ययनोपस्थाने विनियोगः । आदित्यं नावमारोक्षं पूर्णामपरिपादिनीम् । अच्छिद्रां पारयिष्णवीᳪ शतारित्राᳪ स्वस्तये । ओं नम आदित्याय, नम आदित्याय,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नम आदित्याय॥ उद्यन्तमितिमन्त्रस्य प्रजापतिर्ऋषिर्यजुरादित्यो देवता पूर्वाह्नप्रार्थने विनियोगः। उद्यन्तं त्वाऽऽदित्यानूदियासम् ॥ प्रतितिष्ठन्तं त्वेतिमन्त्रस्य प्रजापतिर्ऋषिर्यजुरादित्यो देवता सन्धिवेलायामपराह्णप्रार्थने विनियोगः। प्रतितिष्ठन्तं त्वाऽऽदित्यानुप्रतितिष्ठासम् ॥ इति स्वस्त्ययनकरोपस्थानप्रयोगः ॥

अथाचितशतकामप्रयोग उच्यते॥ आचितः शकटभारः, शतमित्युपलक्षणं, तेन बहुशकटभारधनधान्यादिप्राप्तिफलमित्यर्थः। आचितशतकामः पूर्ववद्द्विमासव्रतं शुक्लपक्षे कृत्वा, व्रतान्ते कृष्णप्रतिपदि द्रोणपरिमितं कृतौदनं ब्राह्मणान्भोजयित्वा, ऽस्तमयसन्धिवेलायां ग्रामात्प्रत्यग्गत्वा, चतुष्पथेऽग्निमुपसमाधाय, क्षिप्रहोमविधिनाऽऽदित्याभिमुखः प्रकृतव्रीहिकणान् जुहुयात्, भल्लाय स्वाहा भल्लाय स्वाहेतिमन्त्राभ्यां। भल्लायेदं न मम। तन्त्रशेषं समापयेत्। एवमेवोत्तरत्र कृष्णपक्षद्वये कर्त्तव्यम्। कृष्णपक्षद्वयमध्ये शुक्लपक्षे कर्त्तुर्ब्रह्मचर्यमात्रं, नतूपवासः। इत्याचितशतकामप्रयोगः॥

अथ वास्तोष्पतियज्ञ उच्यते ॥ तस्योदगयनादिकाल आदावेवोक्तः। तत्र प्रथमं गृहनिर्म्माणार्थं भूमिपरिग्रहाय लक्षणान्युच्यन्ते। "समं, तृणादियुक्तं, नदीतटाकादिभेदवृक्षपाषाणादिपतनप्रभृतिनिमित्तविशेषैर्भाविभिरविनाशि, प्रागुदगन्यतमदिगवस्थितप्रवाहोदकं, क्षीरिणीकण्टकयुक्तकटुयुक्तौषध्युत्पत्तिरहितम्, ब्राह्मणस्य गौरपांसुसहितम्, क्षत्रियस्य लोहितधूलिसहितम्, वैश्यस्य कृष्णरजस्कम्, मुञ्जदर्भादिभिरपि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



हन्यमाने विदारणरहित-मेकवर्ण-मशुष्क-मनूषरं, सर्वदिक्षु मरु-प्रदेशरहितं, सदा जलेनाक्लिन्नम्, ब्रह्मवर्चसकामस्य दर्भसंयुक्तं, बलकामस्य वीरणादिमहातृणसहितं, पशुकामस्य मृदुतृणयुतं, चतुरस्रं, वोन्नतं, मण्डलाकारं वा, सर्वदिक्ष्वितरेतराभिमुखा-वस्थितस्वयमुत्पन्नाल्पगर्त्तयुक्तं, भूस्थानं जोषयेत्"। सेवयेदि-त्यर्थः। परिगृह्णीयादिति यावत्। तस्मिन्नुक्तलक्षणे प्रदेशे, "यशस्कामो बलकामः प्राग्द्वारं गृहं कुर्वीत, पुत्रपशुकाम उदग्द्वारं, सर्वकामो दक्षिणद्वारम्। प्रत्यग्द्वारं न कुर्वीत। अनुद्वारं न कुर्वीत। गृहद्वारं न कुर्वीत"॥ यथा गृहमध्ये सन्ध्योपासनहोमार्चनभोजनादीनि कुर्वतां गृहाद्बहिर्वर्त्तिनि-न्द्यजनानां दर्शनं न भवेत्तथा गृहं कुर्वीत॥ "वर्ज्जयेत्पूर्वतो ऽश्वत्थं प्लक्षं दक्षिणतस्तथा। न्यग्रोधमपराद्देशादुत्तरे चाप्युदु-म्बरम्॥ १॥ अश्वत्थादग्निभयं ब्रूयात्प्लक्षाद्ब्रूयात्प्रमायुकाम्। न्यग्रोधाच्छस्त्रसम्पीडामक्ष्यामय उदुम्बरात्"॥ २॥ प्रमायुका नष्टायुषः। अक्ष्यामय अक्षिरोगः॥ "आदित्यदैवतो ऽश्वत्थः प्लक्षो ऽयं यमदैवतः। न्यग्रोधो वारुणो वृक्षः प्राजापत्य उदुम्बर" इतिसूत्रादुक्तस्थानान्यतमस्थानस्थिताश्वत्थादिवृक्षयु-क्तस्थानं परिवर्ज्जयेत्। "स्थानान्तराभावे उक्तदिगवस्थितान-श्वत्थादीन् समूलमुद्धरेत्" इति केचिद्व्याख्यातारः। समूलवृक्षो-द्धरणे यस्य वृक्षस्य या देवतोक्ता तां देवतामभियजेत। अत्र विशेषानुक्तेरभियजेतेति सामान्यचोदनया तत्तद्देवताकवैदि-कमन्त्रजपो वा ऽऽज्यहोमो वोभयं वा ग्राह्यं, "तदुक्तं 'मनुना'।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



फलदानां च वृक्षाणां छेदने जप्यमृक्शतम्" । किञ्च "एतास्वेव देवता अभियजेत" इति सूत्र चकारात्तत्तद्वृक्षदेवतायागो जपश्च कर्त्तव्यः । "मध्ये ऽग्निमुपसमाधाय कृष्णया गवा यजेत, अजेन वा श्वेतेन सपायसाभ्यां पायसेन वा" ॥ ततो गृहनिर्म्माणानन्तरं गृहमध्ये ऽग्निं प्रतिष्ठाप्य गोपशसि कृष्णैादनेन सह श्वेतेनाजेन यजेत । पशोरसम्भवे पायसेन चरुणा वा यजेत । तस्यैवं प्रयोगः । पुण्ये नक्षत्रे पुण्यतिथैा वास्तोष्पतियज्ञाङ्गं नान्दीमुखश्राद्धं कृत्वा, ब्राह्मणाननुज्ञाप्य, गणेशपुजनं च कृत्वा, वास्तोष्पतियज्ञं करिष्ये इति सङ्कल्प्याग्निमुपसमाधाय मध्याष्टकोक्तप्रकारेणाजमुपस्थाप्योपस्थितहोमादिवपाहोमान्तं कुर्यात् । पशुस्थानीयपायसचरुर्मध्याष्टकायां पशुस्थानोक्तस्थालीपाकवत्कर्त्तव्यः । तत्र प्रोक्षणे वास्तोष्पतये त्वा जुष्टं प्रोक्षामि । निर्वापे वास्तोष्पतये त्वा जुष्टं निर्वपामीति विशेषः । वपाहोमे जातवेदो वपया गच्छ देवानिति मन्त्रः पूर्वमुक्तो देवदैवत्यत्वात् । चरुहोमे वास्तोष्पतये स्वाहेति मन्त्रः । सर्वत्र वास्तोष्पतय इदं न मम । अङ्गावदाने मध्याष्टकायां द्वादशोक्तान्यत्र चतुर्दशाङ्गानीति विशेषः । वपाहोमानन्तरं मध्याष्टकावत्पायसचरुं मांसचरुं च श्रपयित्वा प्लक्षशाखायुक्तप्रस्तरे आसादयेत् । ततो नवे काष्ठे मांसावदानानि संस्थाप्याणुशश्छित्वैकस्मिन् कांस्यपात्रे संस्थाप्य तत्र वसाज्यपायसान्यवसिच्य सर्वं मिश्रीकरोति । ततः स्रुचि सकृदुपस्तीर्य्य द्व्यार्षेयश्चेद्यजमानो वसाज्यपायसमिश्रीकृतमां-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सावदानं हविषो मध्यात्त्रिवारं पूर्वार्द्धाच्च त्रिवारमवद्यति । पञ्चार्षेयश्चेदुक्तहविषो मध्याद्द्विः पूर्वार्द्धाद्द्विः पश्चार्द्धाद्द्विरवद्यति। सकृदभिघार्य्य हविषोऽवदानस्थानानि च पृथक्पृथगाज्येन प्रत्यभिघार्य्य वास्तोष्पत इतिमन्त्रेण जुहुयात्। अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो वास्तोष्पतिर्देवता वास्तोष्पतिहोमे विनियोगः। वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमीवो भवानः। यत्ते महे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा ॥ वास्तोष्पतय इदं न मम। पशुस्थाने पायसचरुपक्षे पायसचरुपिण्डांश्चतुर्दश कृत्वा, तान् घृतादिभिस्संसृज्यैकस्मिन् कांस्यपात्रे संस्थाप्य, प्रस्तर आसाद्य, तस्माद्धविषो मांसावदानवत्सकृदभिघार्य्य, षट्कृत्वोऽवदाय, पुनः सकृदभिघार्य्यावदानस्थानानि प्रत्यभिघार्य, वास्तोष्पत इत्यृचा जुहोति। ततो वामदेवीभिर्ऋग्भिस्तिसृभिर्महाव्याहृतिभिस्तिसृभिश्च षडाज्याहुतीर्हुत्वा प्रथमाहुतिवन्मांसावदानानि पायसचरुं वाऽष्टगृहीतमवदाय प्रजापतये स्वाहेति जुहोति। वामदेव्यस्तिस्र ऋचोऽलक्ष्मीनिर्णोदप्रयोगे उक्ताः। ततः स्विष्टकृदादिकं कर्म प्रकृतिवत्समाप्य वक्ष्यमाणान्दशबलीन्हुतशेषेण कुर्यात्। ततोऽग्नेः प्रदक्षिणं गत्वा प्रथमं इन्द्राय नम इति पुरस्ताद्बलिं दद्यात्। वायवे नम इत्याग्नेये। यमाय नम इति दक्षिणतः। पितृभ्यः स्वधेति निर्ऋतिदिशि। वरुणाय नम इति प्रतीच्याम्। महाराजाय नम इति वायव्याम्। सोमाय नम इत्युत्तरतः। महेन्द्राय नम इत्यैशा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



न्याम् । वासुकये नम इत्यधस्तात् । नमो ब्रह्मण इति दिवि॥ अत्रापि बलिहरणे सुभूमिकरणमुभयतः परिषेचनञ्च वैश्वदेवबलिहरणवत्कर्त्तव्यम् । ततो वामदेव्यगानं ब्राह्मणभोजनञ्च। इति वास्तोष्पतियज्ञप्रयोगः

ततः प्रतिदिनं वैश्वदेवे नित्यबलिहरणानन्तरं काम्यतया, प्राच्यै नमः । उर्द्धायै नमः। अवाच्यै नम इति बलित्रयं कुर्यात् । एतस्य बलित्रयस्य पूर्वस्मिन् वास्तोष्पतियज्ञे ऽपि दशबलिहरणानन्तरमनुष्ठानं मन्यन्ते। प्रकृतबलित्रयस्य संवत्सरेसंवत्सरे व्यतीते उत्तरदिने वा प्रयोगः । अथ व्रीह्याग्रयणयवाग्रयणयोर्मध्यकाले प्रतिदिनं प्रकृतकर्मणि बलित्रयं कर्त्तव्यम् ॥

अथ स्वस्त्ययनकर्मप्रयोग उच्यते ॥ श्रवणाकर्मण्याग्रहायणीकर्मणि चासादितानां व्रीहीणां फलीकृतानां मध्ये एकदेशं गृहीत्वा ऽन्यत्र संस्थापयेत् । तानेवाक्षततण्डुलान् समादाय ग्रामात्प्रागुदग्वा गत्वा चतुष्पथे विधिवदग्निमुपसमाधाय क्षिप्रहोमविधिना हयेराक इत्येकैकया ऽक्षततण्डुलानञ्जलिना जुहुयात्। एषां चतसॄणां प्रजापतिर्ऋषिरनुष्टुप्छन्दो हयादयो देवता आरण्याग्रहायणीकर्मणि स्वस्त्ययनहोमे विनियोगः । हये राके सिनीवालि सिनीवालि पृथुष्टुके। सुभद्रे पथ्ये रेवति यथा नो यश आवह स्वाहा॥ हयादिभ्य इदं न मम । ये यन्ति प्राञ्चः पन्थानो य उ चोत्तरत आयुः। ये चेमे सर्वे पन्थानस्तेभिर्नो यश आवह स्वाहा॥ हयादिभ्य इदं न मम । यथा यन्ति प्रपदो यथा मासा अहर्ज्जरम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



एवं मा श्रीधातारः समवयन्तु सर्वतः स्वाहा ॥ धयादिभ्य इदं न मम । यथा समुद्रं स्रवन्तीः समवयन्ति दिशोदिशः । एवं मा सखायो ब्रह्मचारिणः समवयन्तु दिशोदिशः स्वाहा ॥ धयादिभ्य इदं न मम । इत्यमक्षततण्डुलैश्चतस्र आहुतीर्हुत्वा तन्त्रशेषं परिसमाप्य तूष्णीं कतिपयपदानि प्राच्यां गत्वोर्ध्वं पश्यन् वसुवन एधीत्यनेन मन्त्रेण चिरभ्यस्तेन देवजनेभ्य इति प्रकृताक्षततण्डुलानञ्जलिनोर्ध्वं क्षिपेत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुर्देवजना देवता ऽक्षततण्डुलानामूर्द्ध्व-प्रक्षेपणे विनियोगः । वसुवन एधि वसुवन एधि वसुवन एधि । देवजनेभ्यः ॥ ततः पुनरक्षततण्डुलान् गृहीत्वा ऽधस्तात्पश्यन् तिर्यगितरजनेभ्य इत्यञ्जलिना प्रक्षिपेत् । ततो ऽत्रापि वसुवन एधि वसुवन एधि वसुवन एधि । इतरजनेभ्य इति प्रयोक्तव्यः । "तथेतरजनेभ्य" इतिसूत्रे तथाशब्दश्रवणात् । ततो बलिमनवलोकयन् प्रकृताग्निसमीपमागत्य होमबल्य-वशिष्टानक्षतान् भ्रातृपुत्रशिष्यादिभिर्मित्रैश्च सह भक्षयेत् ततो वामदेव्यगानम् । अस्य कर्मणः स्वस्त्ययनफलम् । इति स्वस्त्ययनकर्मप्रयोगः ॥

अथ प्रसादकरकर्मोच्यते ॥ अथ पुण्ये दिवसे प्रातर्नित्यकर्मान्ते लिप्रहोमविधिनाऽग्निं प्रतिष्ठाप्य वशङ्गमाविति-मन्त्रेण व्रीहिहोमः, शङ्खश्वेतिमन्त्रेण यवहोमश्च कर्त्तव्यः । यस्य कस्यचित्पुरुषस्य स्त्रियो वा सकाशाद्द्रव्यप्राप्तिमिच्छति तस्य नाम मन्त्रेऽसावित्यस्य स्थाने प्रथमान्तत्वेन प्रयोक्तव्यम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अनयोर्म्मन्त्रयोः प्रजापतिर्ऋषिर्यजुश्चन्द्रादित्यौ देवते पृथग्व्रीहियवहोमे विनियोगः । वशङ्गमौ देवयानौ युवᳪस्थो यथा युवयोः सर्वाणि भूतानि वशमायन्त्येवं ममासौ वशमेतु स्वाहा ॥ चन्द्रायेदं न मम । शङ्कुश्च मन आयुश्च देवयानौ युवᳪस्थो यथा युवयोस्सर्वाणि भूतानि वशमायन्त्येवं ममासौ वशमेतु स्वाहा ॥ सूर्यायेदं न मम । तन्त्रशेषं समापयेत् । होमे यस्य नाम परिगृहीतं स तु प्रसन्नस्सन् सर्वस्वं होमकर्त्त्रे ददाति । उक्तफलप्राप्तिपर्य्यन्तं प्रतिदिनमेतत्कर्म कर्त्तव्यम् । इति प्रसादकरकर्मप्रयोगः ॥

अथैकाक्षर्य्यायामृचि चत्वारि कर्माणि फलभेदात्साधनभेदात्प्रथमतृतीययोरनुष्ठानाय पूर्वमर्द्धमासव्रतं, द्वितीयचतुर्थयोर्व्रतविशेषानुक्तेस्सामान्यं सूत्रोक्तत्रिरात्रव्रतं कर्त्तव्यम् । अथ क्रमेण तेषां प्रयोगा उच्यन्ते । तत्र प्रथममायुष्यकामस्यायुष्करं कर्म । तत्र पौर्णमास्यां रात्रौ, सम्पूर्णायुरभिवृद्ध्यर्थमायुष्करं कर्म करिष्ये इति सङ्कल्प्य विधिवदग्निं प्रतिष्ठाप्य क्षिप्रहोमविधिना खादिरान् समिल्लक्षणसंयुक्तान् शतं शङ्कूनेकाक्षर्य्या ऋचा जुहुयात् । अस्याः प्रजापतिर्ऋषिर्यजुर्वाग्देवता खादिरशङ्कुहोमे विनियोगः । आकूतीं देवीं मनसा प्रपद्ये यज्ञस्य मातरᳪ सुहवा मे अस्तु । यस्यास्त्वमेकमक्षरं परᳪ सहस्रा अयुतञ्च शाखास्तस्यै वाचे निहवे जुहोम्यामा वरो गच्छतु श्रीर्यशश्च स्वाहा ॥ वाच इदं न मम । शङ्कूनां पृथक्पृथङ्मन्त्रेण होमः । ततस्तन्त्रशेषं समापयेत् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



"शङ्कुलक्षणं 'कर्मप्रदीपे' । सत्वच: शङ्कव:कार्य्यास्तीक्ष्णाग्रा वीतकण्टका: । समिल्लक्षणसंयुक्ता: सूचीतुल्यास्तथायता:" ॥ १ ॥

अथ वधकामस्य वधकरकर्मोच्यते । मारणकर्मेति नामान्तरम् ॥ तत्करिष्यन् प्रथमकर्मोक्तकाले क्षिप्रहोमविधिनैकाक्षर्य्यामन्त्रेण लोहमयान् सूचीतुल्यान् शतं शङ्कूनग्नौ जुहुयात् ॥

अथ ग्रामकामस्यामोघनामकं तृतीयं कर्मोच्यते ॥ तस्य प्रयोग: । पूर्वोक्तकाले ग्रामात्प्रागुदग्वा पर्वते चतुष्पथे वा गत्वा परितश्शुद्धं स्थण्डिलं परिकल्प्यारण्यैर्बहुगोमयशुष्कैरेव तत्स्थण्डिलं भृशं प्रतापयेत् । निश्शेषाङ्गारापोहनानन्तरं भूमिर्यथा ज्वालायुक्ता स्यात्तथा तपनम् । ततोऽङ्गारान् सर्वानपसार्य्य शीघ्रमास्यं घृतेनापूर्य्य मनसैकाक्षर्य्यामन्त्रमुच्चार्य्यास्येन घृतं प्रतप्ते स्थण्डिले जुहुयात् । नाच क्षिप्रहोमविधि: । अत्र यावद्देवोक्तं तावदेव कर्त्तव्यमुदकहोमवत् । ततो ज्वलन्ती भूमिस्स्यात्तदा द्वादशानां ग्रामाणां शीघ्रं प्राप्ति: । होमानन्तरे धूमे जाते ग्रामत्रयावाप्ति: फलम् । अथवा षण्णामष्टानां वा । एतदमोघकर्मेत्याचक्षते ॥

ततो वृत्त्यविच्छित्तिकामस्य वृत्तिप्रदकर्मोच्यते ॥ वृत्तीनां पत्नीपुत्रगोभूमिधान्यहिरण्यादिसाधनानामविच्छित्तिर्वृत्त्यवच्छित्ति: । अनवाप्तानां तासां प्राप्तिश्च फलम् । तत्करिष्यन् त्रिरात्रव्रतं कृत्वा प्रतिदिनं सायम्प्रातर्विधिवदग्निं प्रतिष्ठाप्य क्षिप्रहोमविधिनैकाक्षर्य्यामन्त्रेण हरितगोमयान् जुहुयात् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



स्मृत्यन्तरात्सायम्प्रातर्होमकालाविरोधेन प्रातर्होमानन्तरं सायं होमात्पूर्वं गोमयहोमः । विशेषानुक्तेः प्रातरेकैवाहुतिः । 'सायमपि तथा' इति केचिद्व्याख्यातारः । वार्षिकमासचतुष्टये प्रकृतं कर्म कर्त्तव्यं हरितगोमयलाभसम्भवादिति । पूर्ववत्तन्त्र-शेषं समापयेत् । इत्येकाहुत्यामन्त्रप्रयोगः ॥

अथ सम्पदर्थं पण्यहोमप्रयोग उच्यते ॥ तस्य चिराच-मुपवासः । नत्वेकैकभक्तव्रतं पुनर्वचनात् । व्रतान्ते ऽग्निं प्रतिष्ठाप्य क्षिप्रहोमविधिनेदमहमिमं विश्वकर्माणमितिमन्त्रेण पण्यहोमं कुर्यात् । होमानन्तरत्वादिपण्यप्राप्त्यर्थमाज्येन होमः । होमार्हपण्यधान्यादिप्राप्त्यर्थं तत्तद्द्रव्येण होमः । आहुतिरेकैव सकृदेवानुष्ठानम् यथोक्तकाले, अथवा काम्यद्र-व्यप्राप्तिपर्य्यन्तं वा ऽस्यावृत्तिः । अस्य मन्त्रस्य प्रजापतिर्ऋ-षिर्निगदो विश्वकर्मा देवता पण्यलाभकर्मणि पण्यहोमे विनियोगः ॥ इदमहमिमं विश्वकर्माणꣳ श्रीवत्समभिजुहोमि स्वाहा ॥ विश्वकर्मणे इदं न मम । ततस्तन्त्रशेषं समापयेत् ॥

अथ पण्यवस्त्रप्राप्त्यर्थं तन्तुहोमः । गोप्राप्त्यर्थं गोवाल-लोमभिः ॥ पण्यस्य वाससस्तन्तून्समादाय प्रकृतमन्त्रेण पूर्ववज्जुहुयात् ॥

ततो यशस्कामस्य सहायकामस्य चोभयपक्षप्रतिपदि पूर्णहोम उच्यते ॥ पौर्णमास्याः प्रतिपदि यागाद्दर्शे यागादूर्ध्वमुक्तफलसिद्ध्यर्थं पूर्णहोमं करिष्ये इतिसङ्कल्प्य क्षिप्रहोमविधिना जुहुयात् । पूर्णहोमन्त्रेण सकृदाज्यं यश-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



स्कामश्चेत्, इन्द्रामवदादित्यृचा सहायकामश्चेत् । पूर्णहोममिति मन्त्रस्य प्रजापतिर्ऋषिर्निगदोऽग्निर्देवता यशस्कामस्य पूर्णहोमे विनियोगः । पूर्णहोमं यशसे जुहोमि योऽस्मै जुहोति वरमस्मै ददाति वरं वृणे यशसा भामि लोके स्वाहा ॥ अग्नय इदं न मम । इन्द्रामवदादिति मन्त्रस्य प्रजापतिर्ऋषिर्गायत्रीछन्द इन्द्रो देवता सहायकामस्य पूर्णहोमे विनियोगः । इन्द्रामवदात्तमो वः परस्तादहं वो ज्योतिर्मामभ्येत सर्वे स्वाहा । इन्द्रायेदं न मम ॥

अथ पुरुषाधिपत्यकामस्याधिपत्यप्रदकर्मोच्यते ॥ तत्करिष्यन् पूर्वमष्टरात्रमुपोष्य व्रतान्ते औदुम्बरस्रुवचमसेध्मानि समादाय, ग्रामात्प्रागुदग्वा निष्क्रम्य, चतुष्पथेऽग्निमुपसमाधायेदं भूमेर्भजामह इति न्यृच्या पाणी कृत्वेमं स्तोममिति परिसमूह्याज्यतन्त्रेणाज्यसंस्कारान्तं कृत्वा, ऽग्निमनुपर्युक्ष्य, प्रपदवैरूपात्तजपं कृत्वा, व्याहृतित्रयेण हुत्वाऽऽदित्याभिमुखोऽन्नं वा एकच्छन्दस्यमिति मन्त्रेण श्रीर्वा एषेति मन्त्रेण चाज्यं जुहुयात् । अनयोः प्रजापतिर्ऋषिर्निगद आदित्यो देवताऽऽज्यहोमे विनियोगः । अन्नं वा एकछन्दस्यमन्नꣳ ह्येकं भूतेभ्यश्छदयति स्वाहा ॥ आदित्यायेदं न मम । श्रीर्वा एषा यत्सत्वानो विरोचनो मयि सत्वमवदधातु स्वाहा ॥ आदित्यायेदं न मम । तन्त्रशेषं समापयेत् । उक्तफलसिद्धये कर्मान्तरम् । अन्नस्य घृतमिति तृतीयामाहुतिं गृह्याग्नौ जुहोति । अत्राप्याज्यतन्त्रम् । अन्नस्य घृतमिति मन्त्रस्य प्रजापतिर्ऋषिर्बृहती-



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



छन्दोऽग्निर्देवताऽऽज्यहोमे विनियोगः । अन्नस्य घृतमेव रसस्तेजः सम्पत्कामो जुहोमि स्वाहा ॥ अग्नय इदं न मम । तन्त्रशेषं समाप्य ब्रह्मणे दक्षिणां दत्वा वामदेव्यगानं कृत्वा ब्राह्मणान्भोजयेत् । इति पुरुषाधिपत्यप्रदप्रयोगः ॥

अथ पशुकामस्य पशुप्रदप्रयोग उच्यते ॥ तत्करिष्यन् गोष्ठेष्वग्निमुपसमाधायाज्यतन्त्रेण व्याहृतिचयहोमान्ते ऽन्नस्य घृतमितिपूर्वोक्तमन्त्रेणाज्याहुतिं कुर्यात् । ततस्तन्त्रशेषं समापयेत् । इतिपशुप्रदप्रयोगः ॥

अथ गोषु तप्यमानासु तत्तापशान्तये होम उच्यते ॥ पूर्ववद्गोष्ठाग्निमुपसमाधाय क्षिप्रहोमविधिना लोहचूर्णानि अन्नस्य घृतमितिमन्त्रेण जुहुयात् । अस्य चीवरहोमकर्मेति नाम । उक्तानामाधिपत्यप्रदपशुप्रदचीवरहोमकर्मणां परिभाषासूचोक्तकाले सकृदेवानुष्ठानम्, अभ्यासानुपदेशात् । सकृत्प्रयोगेणोक्तफलाप्राप्तावावृत्तिं वा कुर्यात् ॥

अथ स्वस्त्ययनग्रन्थिकरणप्रयोगः ॥ मार्गं गच्छतः प्रतिभये जाते स्वकीयस्यान्यस्य वा वस्त्रस्य दशानां त्रीन् ग्रन्थीन् कुर्यात् । अन्नं वा एक छन्दस्यमित्यादिभिरुक्ताभिस्तिसृभिर्ऋग्भिस्स्वाहान्ताभिरेकैकयर्चा एकैकग्रन्थिकरणम् । एतत्कर्मणा सहायानामपि स्वस्त्ययनम् ॥ इति स्वस्त्ययनग्रन्थिकरणप्रयोगः ॥

अथाचितसहस्रकामस्याज्यतसक्ताहुतिप्रयोगः ॥ तत्करिष्यन्नग्निमुपसमाधाय क्षिप्रहोमविधिना ऽज्यतसक्ताहुतिसहस्रं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पूर्वोक्ताभिस्त्रयस्त्रिंशदुत्तरत्रिशतवारमभ्यस्ताभिस्तिसृभिर्ऋग्भिः प्रथमयाच जुहुयात् । ततस्तन्त्रशेषं समापयेत् ॥

ततो गवाश्वमहिषादिपशुकामस्य गोमयहोमप्रयोग उच्यते ॥ तत्करिष्यन् वत्सस्य वत्सायाश्च गोमयमादायोक्ताभिस्तिसृभिर्ऋग्भिस्सहस्रं जुहुयात् । ऋचामभ्यासः पूर्ववत् । क्षिप्रहोमविधिरेकस्मिन्नेव दिने होमो न तु दिनान्तरे । "उक्तञ्च 'भट्टनारायणीयभाष्ये' । चतुर्णां वत्सरूपाणां प्रकृतानाञ्च गोमयम् । एकस्मिन्नेव पूर्वाह्णे जुहुयात्सक्तुहोमवत्" ॥ १ ॥ ततस्तन्त्रशेषं समापयेत् । इतिगोमयहोमप्रयोगः ॥

अथ क्षुद्रपशुकामस्याविपुरीषहोम उच्यते ॥ अविमिथुनयोः पुरीषमादाय पूर्ववत्सहस्रं जुहुयात् । उक्ता ऋचः । ऋगभ्यासश्चोक्तः । इत्यविपुरीषहोमः ॥

अथ वृत्त्यविच्छित्तिकामस्य कम्बूकहोमप्रयोग उच्यते ॥ तस्य फलं विद्यमानवृत्तीनामविच्छित्तिः सातत्यमिति यावत् । अविद्यमानवृत्तीनां प्राप्तिश्च फलम् । तत्करिष्यन्नग्निं प्रतिष्ठाप्य क्षिप्रहोमविधिना कम्बूकान् सायम्प्रातर्जुहुयात् । क्षुधे स्वाहा । क्षुत्पिपासाभ्याᳲ स्वाहा । क्षुध इदं न मम । क्षुत्पिपासाभ्यामिदं न मम । तण्डुलानामवहननसमये निर्गतचूर्णानि 'कम्बूका' इत्यभिधीयन्ते । ततस्तन्त्रशेषं समापयेत् । इदं सायमाहुतेः पूर्वं प्रातराहुतेः पश्चात्कर्त्तव्यम् । इतिकम्बूकहोमप्रयोगः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अथ विषनिवृत्तिजपप्रयोग उच्यते ॥ विषयुक्तजन्तुभिः सर्प्पादिभिर्दष्टं प्राणिमात्रं जलेनाभ्युक्षन्माभैषीर्न मरिष्यसीति-मन्त्रं जपेत् । अभ्युक्षणजपौ युगपदेव । अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दः सर्प्पा देवता विषापनोदने विनि-योगः । माभैषीर्न मरिष्यसि जरदृष्टिर्भविष्यसि । रसं विषस्य नाविदमुग्रं फेनमिवास्यम् ॥ अनेन कर्मणा विषनिवृत्तिर्जीवति च । इति विषचिकित्साप्रयोगः ॥

अथ स्नातकस्य स्वस्त्ययनप्रयोग उच्यते ॥ स्नातको रात्रौ स्वापसमये तुरगोपायेतिमन्त्रेण वैणवं दण्डं शयनसमीपे स्थापयेत् । अथवा, "हस्ते स्थापयित्वा निद्रां कुर्यात्" इति केचित् । एवं कृते चोरवृश्चिकसर्पाद्युपद्रवनिवृत्तिः । अस्यम-न्त्रस्य प्रजापतिर्ऋषिर्यजुर्दण्डो देवता दण्डस्थापने विनियोगः । तुरगोपाय मा नाथ गोपाय अशस्तिभ्यो अरातिभ्यः स्वस्त्य-यनमसि ॥

अथ क्रिमिचिकित्साजप उच्यते ॥ पुरुषस्य स्त्रिया वा यस्मिन्नङ्गे क्रमयस्सन्ति तदङ्गमभ्युक्षन् हतस्ते अत्रिणा क्रिमिरितिमन्त्रं जपेत् । अभ्युक्षणजपौ युगपत्कर्त्तव्यौ । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्बृहतीछन्दो ऽत्र्यादयो देवताः क्रिमि-पातने विनियोगः । हतस्ते अत्रिणा क्रिमिर्हतस्ते जमदग्निना । गोतमेन तिनीकृतो ऽचैव त्वा क्रमे ब्रह्मवद्यमवद्यम् ॥ भरद्वाजस्येतिमन्त्रस्य प्रजापतिर्ऋषिस्त्रिपादनुष्टुप्छन्दो भर-द्वाजो देवता क्रिमिपातने विनियोगः । भरद्वाज मन्त्रेण

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सन्निनोमि क्रिमे त्वा क्रिमिꣳ ह वक्रतोदिनं क्रिमिमन्त्रानुचारिणं क्रिमिं द्विशीर्षमर्जुनं द्विशीर्षꣳ ह चतुर्हनुम् ॥ हतः क्रिमीणामिति क्रिमिमिन्द्रस्येति मन्त्रयोः प्रजापतिर्ऋषिरनुष्टुप्छन्दो भरद्वाजो देवता कृमिपातने विनियोगः । हतः क्रिमीणां क्षुद्रको हता माता हतः पिता । अथैषां भिन्नकः कुम्भो य एषां विषधानकः ॥ क्रिमिमिन्द्रस्य बाहुभ्यामवाञ्चं पातयामसि । हतः क्रिमयस्साशातिकाः सनीलमक्षिकाः ॥ इति कृमिपातनप्रयोगः ॥

अथ पशूनां कृमिनिवर्त्तनजप उच्यते ॥ पशूनामङ्गे विद्यमानकृमिपातनं कर्त्तुमिच्छेत्तदा कृष्टक्षेत्रे विद्यमानं लोष्टं गृहीत्वा ऽऽकाशे गृहपटले निदध्यात् । तस्य लोष्टस्य रेणुभिः पूर्वाह्णे कृमियुक्तपशोरङ्गं परिकिरन् पूर्वोक्तामृचं जपेत् । परिकिरन् सर्वतो विक्षिपतीत्यर्थः । एवं कृते पशोः कृमिनिवृत्तिः स्यात् । इति काम्यप्रयोगा उक्ताः ॥

अथ मधुपर्कप्रयोग उच्यते ॥ सति सम्भवे पुत्रदारादिभिस्सह यजमानो विष्टरौ पाद्यमर्घ्यमाचमनीयम्मधुपर्कं वस्त्रयुगलं यथाविभवमाभरणपात्रादिकञ्च समादायार्हणप्रदेशस्योत्तरतो गां बध्वोपतिष्ठेरन्नर्हणा पुत्रवाससेतिमन्त्रेण । अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दो ऽर्हणीयो देवता धेनूपस्थाने विनियोगः । अर्हणा पुत्रवाससा धेनुरभवद्यमे । सा नः पयस्वती दुहा उत्तरामुत्तराꣳ समाम् ॥ अत्र, 'उपतिष्ठेरन्' इति बहुवचनात्पुत्रादयो ऽप्युपस्थानकर्त्तारः । ततो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ऽर्हणीय इदमहमिमामितिमन्त्रं प्रतितिष्ठमानो जपेत् । यस्मिन्प्रदेशे पूज्यस्य पूजनं कर्त्तुमिच्छन् पूजक उपस्थितो भवेत्तत्र पूज्यो जपति । अथवा, यजमानो यस्मिन् काले ऽर्हणां कर्त्तुमारभते तदेदमहमितिमन्त्रं जपेत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुरर्हणीयो देवता जपे विनियोगः । इदमह-मिमां पद्यां विराजमन्नाद्यायाधितिष्ठामि ॥ ततो यजमानो दर्भमयं विष्टरं विष्टरद्वयं वा पूज्याय दद्यात् । तत्प्रयोगो विष्टरो विष्टरो विष्टरः प्रतिगृह्यताम् । एवं पाद्यार्घ्याचमनी-यमधुपर्कान्प्रत्येकं त्रिस्त्रिर्निवेद्य दद्यात् । विष्टरद्वयपक्षे विष्टरौ विष्टरौ विष्टरौ प्रतिगृह्येताम् । पादप्रक्षालनार्थमुदकं पाद्यम् । दध्यक्षतपुष्पसंयुतं जलमर्घ्यम् । आचमनार्थमुदकमा-चमनीयम् । दधिघृतसंयुक्तं मधु मधुपर्कः । ततः पूजकदत्तं विष्टरमर्च्यः प्रतिगृह्णाति । विष्टरं या ओषधीरितिमन्त्रेणोद-गग्रमास्तीर्योपविशेत् । विष्टरद्वये दत्ते एकं पूर्वं मन्त्रेणास्तीर्य्य द्वितीयं विष्टरमुत्तरमन्त्रेण पादयोरधस्तात्कुर्यात् । अनयोः प्रजापतिर्ऋषिरनुष्टुप्छन्द ओषधयो देवताः पूर्वविष्टरासादने, उत्तरस्य पादयोरधस्तादास्तरणे विनियोगः । या ओषधीस्सो-मराज्ञीर्बह्वीः शतविचक्षणाः । ता मह्यमस्मिन्नासने ऽच्छिद्राः शर्म यच्छत ॥ इतिपूर्वमन्त्रः । या ओषधीस्सोमराज्ञीर्विष्ठिताः पृथिवीमनु । ता मह्यमस्मिन् पादयोरच्छिद्राः शर्म यच्छत ॥ इत्युत्तरमन्त्रः । ततो ऽर्चकः पाद्यं पाद्यं पाद्यं प्रतिगृह्यतामिति ददाति, तदा ऽर्च्यः यतो देवीरितिमन्त्रेण पाद्यं प्रेक्षते । अस्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मन्त्रस्य प्रजापतिर्ऋषिर्विराट्छन्द आपो देवताः पाद्यप्रेक्षणे विनियोगः। यतो देवीः प्रतिपश्याम्यापस्ततो मा राद्धिरागच्छतु॥ ततः पूजकदत्तं पाद्यं गृहीत्वा पूज्यो जलेन स्वकीयसव्यं पादं सव्यं पादमवनेनिज इतिमन्त्रेण प्रक्षालयति। अनयोर्मन्त्रयोः प्रजापतिर्ऋषिर्निगदोऽऽक्तणीयश्रीर्देवता सव्यदक्षिणपादप्रक्षालने विनियोगः। सव्यं पादमवनेनिजेऽस्मिन् राष्ट्रे श्रियं दधे। दक्षिणं पादमवनेनिजेऽस्मिन् राष्ट्रे श्रियमावेशयामि॥ ततः शेषेणोदकेन पूर्वमन्यमित्यनेन मन्त्रेणोभौ पादौ पूर्ववत्प्रक्षालयति। अस्य मन्त्रस्य प्रजापतिर्ऋषिर्निगदोऽऽक्तणीयश्रीर्देवता पादद्वयप्रक्षालने विनियोगः। पूर्वमन्यमपरमन्यमुभौ पादाववनेनिजे। राष्ट्रस्यर्द्ध्या अभयस्यावरुद्ध्यै॥ ततः पूजकोऽर्घ्यपात्रमादायार्घ्यमर्घ्यमर्घ्यं प्रतिगृह्यतामित्युक्त्वा तेनैव पात्रेणार्घ्यमञ्जलावासेचयेत्। तदर्घ्यमञ्जलिनाऽन्नस्य राष्ट्रिरितिमन्त्रेण प्रतिगृह्णीयात्। अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुरर्घ्यं देवता ऽर्घ्यप्रतिग्रहणे विनियोगः। अन्नस्य राष्ट्रिरसि राष्ट्रिस्ते भूयासम्॥ ततोऽर्चक आचमनीयमाचमनीयमाचमनीयं प्रतिगृह्यतामिति दद्यात्। तद्दत्तमुदकमर्च्य आचामेत् यशोऽसीति सकृन्मन्त्रेण द्विस्तूष्णीम्। अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुराचमनीयं देवता ऽऽचमने विनियोगः। यशोऽसि यशो मयि धेहि॥ ततः कांस्यपात्रे दधि मधु घृतं संसृज्य, संस्थाप्य, वर्षीयसा कांस्यपात्रेणापिधाय दद्यात्। ततोऽर्चकः पूर्वोक्तमधुपर्कपात्रं गृहीत्वा मधुपर्को

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मधुपर्को मधुपर्कः प्रतिगृह्यतामिति वदेत्। ततो ऽर्च्यो यशसो यशोऽसीत्येतावता मन्त्रेण प्रतिगृह्णीयात् । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुर्मधुपर्को देवता मधुपर्कप्रतिग्रहणे विनियोगः। यशसो यशोऽसि॥ ततो हस्ते दत्तं मधुपर्कं यशसो भक्षो ऽसीतिमन्त्रेण त्रिः पिबेत्तूष्णीं चतुर्थम्। हस्तेनैव मधुपर्कभक्षणमिति शिष्टाः। अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुर्मधुपर्को देवता मधुपर्कभक्षणे विनियोगः। यशसो भक्षो ऽसि महसो भक्षो ऽसि श्रीर्भक्षोऽसि श्रियं मयि धेहि॥ ततो ऽर्च्यो द्विराचामति। मधुपर्कशेषं ब्राह्मणाय दद्यात्। तत आचान्तोदकायार्च्याय वस्त्रादिकं दद्यात् । ततो गौर्गौर्गौरिति नापितो ब्रूयात् । ततो ऽर्च्यो मुञ्च गां वरुणपाशादितिमन्त्रं ब्रूयात्। अस्य मन्त्रस्य प्रजापतिर्ऋषिर्बृहतीछन्दो गौर्देवता गोमोक्षणे विनियोगः । मुञ्च गां वरुणपाशाद्द्विषन्तं मे ऽभिधेहि। तं जह्यमुष्य चोभयोरुत्सृज गामत्तु तृणानि पिबतूदकम्॥ ततो मा । रुद्राणामित्यनेन मन्त्रेण गामनुमन्त्रयते। अस्य मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दो गौर्देवता गावानुमन्त्रणे विनियोगः । माता रुद्राणां दुहिता वसूनां स्वसा ऽऽदित्यानाममृतस्य नाभिः । प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट॥ एवं मधुपर्कणाचार्यर्त्विजः, समावर्त्तनानन्तरं स्नातको, राजा, विवाहे वरः, प्रियो, ऽतिथिश्चेत्येते षट् पूज्याः। तत्तच्छाखोक्तविधिना मधुपर्कं दद्यात्॥ इति मधुपर्कप्रयोगः॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



इति श्रीमद्राजाधिराजश्रौतस्मार्त्तानुष्ठानतत्परोदय-प्रतापाद्यादत्तदेववर्म्मसोमयाजिनो निदेशेन सुब्रह्मण्यवि-दुषा विरचितेयं गोभिलीयगृह्यकर्म्मप्रकाशिका समाप्ता ॥

॥ शुभमस्तु ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

# गोभिलीयगृह्यकर्मप्रकाशिकाशुद्धिपत्रम् ।

| अशुद्धम् | शुद्धम् | पृष्ठे | पं॰ |
|---|---|---|---|
| हार्यवति | हार्यवंति | २ | १७ |
| चतुर्कं | चतुर्कं | ४ | ५ |
| पिङ्गाल्या | पिङ्गूल्या (एवं सर्वत्र) | ६ | ७ |
| प्राङ्मुख | प्राङ्मुख | १० | ६ |
| गर्भा | गर्भा | ० | १३ |
| दर्भायः | दर्भायैः | ११ | ५ |
| ज्याग्ना | ज्याग्नौ | ० | २३ |
| हुस्ना | हुम्मा | १४ | २१ |
| वपास्तू | वापास्तू | १६ | १२ |
| तत्रत्य | तत्रात्य | २३ | १७ |
| प्राङ्मामु | प्राङ्मुमु | २८ | ७ |
| अवृत्ता | आवृत्ता | ३० | १६ |
| अदेवाज | अग्नेवाज | ३१ | १२ |
| आग्नयक्षिस्वंदम | आग्नेयक्षिस्वंदमं | ० | १९ |
| बृहन्ता | बृहन्तौ | ३२ | २ |
| २ १ भानुं | २ भानुं | ० | ५ |
| २ यया | २ यया | ० | ७ |
| आर्यिं | आर्पिं | ० | ९ |
| वर्यंसा | वर्पसा | ० | ११ |
| २ स्वसारं | १ २ स्वसारं | ० | १४ |
| ३ अंगिर | ३ अंगिर | ० | १५ |
| १ १ अतिथिं | १ २ अतिथिं | ३३ | १८ |
| ३ २ सर्पिरा | ३ १२ सर्पिरा | ३४ | १ |
| २ २ पावकं | ३ २ पावकं | ० | ४ |
| २ २ ३ विश्पतिं | ३ २ ३ विश्पतिं | ० | ७ |
| दूतष्ट्यस्य | दूतमित्यस्य | ० | १५ |
| ३ १ ३ पुरोहितं | ३ १ २ पुरोहितं | ० | १८ |
| सूयादया | सूर्यादया | ३५ | १७ |
| अस्तमिस्ते | अस्तमिते | ३६ | ४ |

| अशुद्धम् | शुद्धम् | पृष्ठे | पं॰ |
|---|---|---|---|
| आवसस्य | आवसथ्य | ३७ | ३ |
| सूत्रो | सूत्रो | ४० | १ |
| आचमेत् | आचामेत् | ४१ | ११ |
| गृहपत्तिः | गृहपतिः | ० | १८ |
| लाङ्गलापद्धति | लाङ्गलपद्धति | ४५ | १४ |
| परिधत्तवासमेति | परिधत्तधसवा-समेति | ४९ | ५ |
| मंत्रयंधूं | मंत्रैर्धूं | ५३ | १३ |
| ननाधेहि | नाधेहि | ५५ | ९ |
| पाणियहण | पाणिग्रहण | ५७ | ९ |
| नदानान्तं | दानान्तं | ५८ | १८ |
| होष्यामिति | होष्यामीति | ५९ | १५ |
| भार्यानम | भार्यानाम | ६० | २१ |
| ऋंते | ऋते | पृष्ठे ६१–६२ | २२–१–२ पं० |
| विवाहादिवसात् | विवाहादिवसात् | ६३ | ९ |
| गर्भधान | गर्भाधान | ६५ | १५ |
| जनिष्यते | जनिष्यते | ७१ | २० |
| अहिर्बुध्न्याय | अहयेबुध्न्याय | ७८ | १५ |
| संस्कारिष्यामि- | संस्कारिष्यामि- | ८१ | ७ |
| वापामि | वपामि | ८२ | २० |
| नाध्यापयेयुः | नाध्यापयेयुः | ८५ | २ |
| तथा | यथा | ० | ८ |
| छब्दो | छन्दो | ८८ | ४ |
| प्रयानां | प्रायानां | ८९ | ११ |
| प्रजाप्रजापतिः | प्रजापतिः | ० | १६ |
| भावर्त्तेति | भावासेति | ९२ | १२ |
| त्रिरुदका | त्रिरुदका | ९३ | १८ |
| पुनररूप | पुनरुप | ९६ | २२ |
| स्यस्तो | स्युस्तोभ | १०५ | १३ |
| तृप्यन्त | तृप्यन्तु | १०८ | १८ |
| २ वृधे | १२ वृधे | ११० | १३ |
| १ १ बृहत् | २ १ बृहत् | ० | १६ |

For Private And Personal

| अशुद्धम् | शुद्धम् | पृष्ठे | पं० |
| --- | --- | --- | --- |
| २र<br>जैषम् | १र<br>जैषम् | १११ | १ |
| तर्प्ययेत् | तर्प्पयेत् | ११४ | ७ |
| शोभया | शोभया | ११६ | ४ |
| गृहपति<br>३ २<br>यजतं | गृहपतिं<br>३ २<br>यजतं | ० | ६ |
| नभता | नभन्ता | ० | १४ |
| तवन्त्यं | तवंत्यं | ० | १५ |
| २ २<br>प्रवृक्तः<br>र<br>वृधे | २<br>प्रवृक्तः<br>१र<br>वृधे | ११७ | ७ |
| १ र २<br>द्यौरक्षा<br>२<br>समचू | १र २<br>द्यौरक्षा<br>२र<br>समचू | ० | ११ |
| १र<br>मनो | १ र<br>मनो | ० | १३ |
| २ ५र<br>हा३४श्री | २ ५र<br>हा३४ । श्री | १२३ | ४ |

| अशुद्धम् | शुद्धम् | पृष्ठे | पं० |
| --- | --- | --- | --- |
| २र ३३<br>तरेम | २ र ३<br>तरेम | ० | ५ |
| त भिवना | तदभिवना | १२६ | २२ |
| स्यांद्दति | स्यद्दति | १३१ | १२ |
| र्ज़ुषी | यंजुषो | १४१ | ८ |
| तू | तु | १४२ | २ |
| श्यमाकानां | श्यामाकानां | १४७ | १६ |
| पतस्वतो | पयस्वती | १४६ | १८ |
| त्तैनैवात्र | त्तनैवात्र | १६२ | १२ |
| र्दभे | र्दभैं | ० | २२ |
| मानं | मात्मार्ण | १७६ | ८ |
| श्वात्रात | श्वात्राय | ० | २० |
| सूत्र | सूत्रे | १८६ | २ |
| पुजनं | पूजनं | ० | ८ |
| विर्वपामि | निर्वपामि | ० | १३ |
| चतुर्व्दश | चतुर्दश | १८७ | ६ |
| होमन्त्रण | होममन्त्रेण | १६२ | २२ |
| मा । | माता | २०० | ४१ |

इति शुद्धिपत्रम् ।

# नित्याह्निकप्रयोगानुक्रमणिका ।


| विषयाः | पृष्ठे | पं० | विषयाः | पृष्ठे | पं० |
|---|---|---|---|---|---|
| मङ्गलाचरणम् | १ | १ | अथ ब्रह्मयज्ञप्रयोगः | ४१ | ८ |
| ब्राह्मे मुहूर्ते परमेश्वरध्यानम् | ० | ८ | अथ महायज्ञप्रयोगाः | ४२ | ७ |
| मलमूत्रविसर्जनविधिः | ० | ११ | अथानाहिताग्नेर्वैश्वदेवः | ४४ | ७ |
| शौचे मृत्संख्यादि | २ | ४ | अथ पितृयज्ञस्यानौघनित्यश्राधप्रयोगः | ४५ | ४ |
| गंडूषसंख्या | ० | ७ | अथ मनुष्ययज्ञप्रयोग; | ० | १६ |
| अथाचमनविधिः | ० | १० | अथ भोजनप्रयोगः | ४६ | १६ |
| अथ दन्तधावनप्रयोगः | ३ | ७ | सायंसंध्या | ४७ | १० |
| अथ प्रातःस्नानप्रयोगः | ० | १८ | अथ सायमौपासनहोमप्रयोगः | ० | २० |
| अथ प्रातःसन्ध्याविधिः | ५ | १ | सन्ध्याकालातिक्रमप्रायश्चित्तम् | ४८ | १ |
| अथ प्रातर्होमप्रयोगः | ८ | १६ | यजमानप्रवासादौ वैश्वदेवबलिहरणम् | ० | ३ |
| अथ माध्याह्निकस्नानविधिः | १० | ६ | सूतके मृतके च स्नानादिविचारः | ४६ | ३ |
| अथ माध्याह्निकसन्ध्या | १६ | ८ | | | |
| ततस्तर्पणम् | १८ | १ | | | |
| मासादिसामानि | २१ | १ | | | |


इत्यनुक्रमणिका समाप्ता ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ श्रीगणेशाय नमः ॥

# ॥ अथ नित्याह्निकप्रयोगः ॥

यस्य प्रसादात्परमात्मरूपे मय्येव भातीव समस्तलोकः।
तं देशिकं स्वात्मपरं महान्तं ध्यायामि चित्ते सकलेष्टसिद्ध्यै॥ १ ॥

कर्मप्रदीपगोभिलीयगृह्यपरिशिष्टानुसारेण नित्याह्निकप्रयोगो विरच्यते॥ तत्र श्रेयस्कामो ब्राह्मणः क्षत्रियो वैश्यो वा तुरीययामे उत्थाय, करिष्यमाणधर्म्मान् तत्साधनीभूतार्थायातिं व्ययञ्च चिन्तयित्वा, सकलहृदयगुहावासं सर्ववेदान्तवेद्यमशनायाद्यतीतमपेतब्रह्मक्षत्रादिभेदं सर्वज्ञं सर्वशक्तिकं भगवन्तं सच्चिदानन्दघनं परमेश्वरं चिरं ध्यायेत्। "तदुक्तं 'मनुना'—ब्राह्मे मुहूर्त्ते बुध्येत धर्म्मार्थौ चानुचिन्तयेत्। कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च—इति" ॥ अत्र वेदतत्त्वार्थमित्यनेन परमात्मोच्यते॥ ततो मलमूत्रविसर्जनार्थं गच्छेत्। तत्रेतिकर्त्तव्यता—तत्रादौ जलपूरितं हृत्पात्रं वक्ष्यमाणमृत्सङ्ख्यानुगुण्येनापेक्षितां मृदं च समादाय, ग्रामाद्बहिर्देवालय-नदीतीर-तडागसमीप-मार्ग-गोष्ठ-भस्म-जल-वल्मीक-पर्वत-चिति-यज्ञभूम्यादिवर्ज्जितं निर्ऋतिदेशं गत्वा, मृदं द्वेधा विभज्यैकां गुदलिङ्गशौचार्थमपरां हस्तपादशौचार्थञ्च परिकल्प्य, जलपात्रं च संस्थाप्य, यज्ञोपवीतं निवीतं कृत्वा दक्षिणकर्णे निधाय, वाससा शिर आवेष्ट्य, मुखं नासापुटद्वयं च वाससा बध्वा, ऽयज्ञतृणैराच्छादितभूप्रदेशे दिवा सन्ध्ययोश्चोदङ्मुखो रात्रौ



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



चेद्दक्षिणाभिमुख ऊर्ध्वमधश्च वाय्वग्निविप्रादित्यजलादीननवलोकयन् वाग्यतः पुरीषं केवलमूत्रं वा विसृजेत्। अन्धकारे रात्रौ वा भये समुत्पन्ने च नोक्तदेशनियमः॥ ततो मृदा जलेन च शौचं कुर्यात्। "तदुक्तं 'मनुना'–एका लिङ्गे गुदे तिस्रस्तथैकत्र करे दश। उभयोः सप्त दातव्या मृदश्शुद्धिमभीप्सता"॥ "शौचक्रममाह 'आश्वलायनः'–लिङ्गशौचं पुरा कृत्वा गुदशौचं ततः परम्" ॥ "गण्डूषसङ्ख्यामाह 'आश्वलायनः'–कुर्याद्द्वादश गण्डूषान्पुरीषोत्सर्जने ततः। मूत्रोत्सर्गे तु चत्वारि भोजनान्ते तु षोडश। भक्ष्यभोज्यावसाने तु गण्डूषं ह्येकमाचरेत्" ॥

अथाचमनविधिः। तत्र पादौ हस्तौ च प्रक्षाल्यान्तर्जानुकरस्त्रिवारं माषमग्नमुदकं ब्रह्मतीर्थेन पीत्वा, सलोमकौष्ठौ द्विरङ्गुष्ठमूलेन परिमृज्य, पादौ शिरश्चाभ्युक्ष्य, संहताभिस्तर्जनीमध्यमानामिकाभिर्जलेन मुखे स्पृष्ट्वा, अङ्गुष्ठतर्जनीभ्यां नासिकापुटद्वयं स्पृष्ट्वा, अङ्गुष्ठानामिकाभ्यां चक्षुषी, पुनस्ताभ्यां श्रोत्रे, कनिष्ठाङ्गुष्ठाभ्यां नाभिं, पाणितलेन हृदयं, सर्वाङ्गुलिभिः शिरः, अङ्गुल्यग्रैर्बाहुमूले संस्पृशेत्। प्रत्यङ्गं जलेन स्पर्शः कार्यः। उक्तरीत्या गण्डूषान्कृत्वा यज्ञोपवीती त्रिराचामेत्। केवलमूत्रोत्सर्गे द्विराचामेत्। गच्छन्, तिष्ठन्, हसन्, दिशो विलोकयन्, न प्रणतो, न पादौ प्रसार्य, नाङ्गुलिभिरुद्धृत्य, नातीर्थेन, न शब्दं कुर्वन्, नापूतमदृष्टञ्च, न जानुभ्यां हस्तौ बाह्यौ कृत्वा, नैकवस्त्रो, न प्राचीनावीती, न निवीती, नोष्णजलेन फेनजलेन वा, नोपानहौ धृत्वा, न वस्त्रेण

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



शिरो वेष्टयित्वा, गले बद्धवस्त्रो नाचामेत् । आचमनानन्तरमशुचिज्ञाने पुराचामेत् । ब्राह्मणो हृदयं गताभिः क्षत्रियः कण्ठगताभिर्वैश्यस्तालुगताभिरद्भिराचामेत् । यथोक्तविधिना-ऽऽचमनाभाव उच्छिष्टो भवति । विधिवदाचमने शुद्धो भवति । सुप्त्वा, भुक्त्वा, क्षुत्वा, स्नात्वा, पीत्वा, वस्त्रं धृत्वा, ऽऽपणं गत्वा, श्मशानं गत्वा, पुनराचामेत् ॥ इत्याचमनविधिः ॥

अथ दन्तधावनप्रयोगः ॥ षष्ठ्यष्टम्येकादशी-द्वादशी-चतुर्दशी-पर्वद्वय-सङ्क्रान्तिदिन-व्रतदिन-श्राद्धदिन-तत्पूर्वदिनभिन्नेषु दिवसेषु नारदाद्युक्ताम्र-पालाश-बिल्वा-पामार्ग-शिरीष-खदिर-करञ्ज-करवीर-कदम्ब-कण्टकि-क्षीरिवृक्षादिसमुद्भूतेनाष्टाङ्गुलेन काष्ठेन प्रादक्षिण्येन दन्तान् शोधयेत् । "दन्तधावनकाष्ठप्रमाणं 'कर्मप्रदीपे'—नारदाद्युक्तवार्क्षं यदष्टाङ्गुलमपाटितम् । सत्वचं दन्तकाष्ठं स्यात्तदग्रेण प्रधावयेत्" ॥ अत्र काष्ठाभिमन्त्रणे मन्त्रः—आयुर्बलं यशो वर्चः प्रजापशुवसूनि च । ब्रह्मप्रज्ञाञ्च मेधाञ्च त्वं नो देहि वनस्पते ॥ एवं दन्तान्विशोध्य, जिह्वां चोन्मथ्य, द्वादशकृत्वो ऽद्भिर्गण्डूषान्कुर्य्यात् । इति दन्तधावनप्रयोगः ॥

अथ प्रातःस्नानप्रयोगः ॥ मृत्तिकाकुशादिकं समादाय, नद्यादिकं गत्वा, तटे शुचौ देशे कुशादिकं संस्थाप्योपवीती बद्धशिखः प्रक्षालितपाणिपादः प्राङ्मुख आचम्य, नद्यादौ प्रवाहाभिमुखस्तटाकादौ तु सूर्य्याभिमुखस्तूष्णीं स्नात्वा, द्विराचम्य, जलाद्बहिरासीनः प्राङ्मुखो दर्भपवित्रपाणिर्देशकालौ

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सङ्कीर्त्त्य परमेश्वरप्रीत्यर्थं प्रातःस्नानमहं करिष्ये इति सङ्कल्प्य, इदं विष्णुर्विचक्रम इत्यादिभिः षड्भिर्मन्त्रैर्मृत्तिकामभिमन्त्र्य, शिरःप्रभृति पादान्तं तयोपलिप्यापोहिष्ठेतितिसृभिर्ऋग्भिर्मार्जनं कृत्वा ऽन्तर्जले निमग्नःसन्नघमर्षणसूक्तं पठन् स्नात्वा, पुनरापोहिष्ठेत्यादिमार्जनं कुर्यात् । तत आचम्य स्नानाङ्गतर्पणं कुर्य्यात् । यथा देवतीर्थेन–ब्रह्मादयो देवास्तृप्यन्तु । देवपत्न्यस्तृप्यन्तु । देवसुतास्तृप्यन्तु । देवगणास्तृप्यन्तु ॥ निवीती ऋषितीर्थेन–गोतमादय ऋषयस्तृप्यन्तु । ऋषिपत्न्यस्तृप्यन्तु । ऋषिसुतास्तृप्यन्तु । ऋषिगणास्तृप्यन्तु ॥ अथ प्राचीनावीती पितृतीर्थेन द्विगुणदर्भैस्तर्प्पयेत्–अग्निकव्यवाहनादयः पितरस्तृप्यन्तु । पितृपत्न्यस्तृप्यन्तु । पितृसुतास्तृप्यन्तु । पितृगणास्तृप्यन्तु ॥ तत आचम्य, शुद्धे वाससी परिधाय, द्विराचम्य, यथाकुलं पुण्ड्रं धृत्वा, सन्ध्योपासनं कुर्यात् । उक्तरीत्या वारुणस्नानाशक्तौ पञ्चविधस्नानेष्वन्यतमं स्नानं कुर्य्यात् ॥ अत्र पराशरः–"पञ्चस्नानानि दिव्यानि कीर्त्तितानि महर्षिभिः । तानीह संप्रवक्ष्यामि यथावदनुपूर्वशः ॥ १ ॥ आग्नेयं वारुणं ब्राह्म्यं वायव्यं दिव्यमेव च । आग्नेयं भस्मना स्नानमवगाहं तु वारुणम् ॥ २ ॥ यत्तु सातपवर्षेण दिव्यं स्नानं तदुच्यते" ॥ असमर्थश्चेद्गृहेऽमन्त्रकं स्नानं कुर्यात् । "तदुक्तं 'छन्दोगपरिशिष्टे'–यथाऽहनि तथा प्रातर्नित्यं स्नायादनातुरः । दन्तान्प्रक्षाल्य नद्यादौ गृहे चेत्तदमन्त्रकम्" ॥ इति प्रातःस्नानविधिः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अथ प्रातःसन्ध्याविधिः ॥ तत्र प्रमाणानि–"अहरहः सन्ध्यामुपासीत" इतिश्रुतिः । "कस्माद्ब्राह्मणस्सायमासीनस्सन्ध्यामुपास्ते कस्मात्प्रातस्तिष्ठन्" इत्यादि "सायञ्च प्रातश्च सन्ध्यामुपास्ते" इत्यन्तं षड्विंशब्राह्मणं ॥ "पूर्वां सन्ध्यां जपन्तिष्ठेत्सावित्रीमार्कदर्शनात् । पश्चिमां तु समासीनः सम्यगृक्षविभावनात् ॥ न तिष्ठति च यः पूर्वां नोपास्ते यस्तु पश्चिमाम् । स शूद्रवद्बहिष्कार्य्यः सर्वस्माद्द्विजकर्मणः" इति मनुः ॥ सन्ध्योपासनं नाम सन्ध्याकालाभिमानिदेवताभिध्यानम् । सा च देवता निर्गुणा परब्रह्मरूपा, तस्या उपासनं प्रत्यगभिन्नत्वेन । तथा च तैत्तिरीयारण्यकश्रुतिः–"असावादित्यो ब्रह्मेति ब्रह्मैव सन् ब्रह्माप्येति य एवं वेद" इति । एतेन गायत्र्यावाहनमन्त्रे उद्वासनमन्त्रे च देवीपदश्रुतेः 'स्त्रीदेवतोपास्या' इति तु परास्तम् । देवीपदस्य छन्दोविशेषणत्वेन स्वातन्त्र्येण स्त्रीदेवतासमर्पकत्वाभावाच्च । तथा च व्यासः–"न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह । सोऽहमस्मीत्युपासीत विधिना येन केनचित्" ॥ इत्यलमतिविस्तरेण ॥ तस्य कालः सूर्योदयात्पूर्वं घटिकाद्वयं । "रात्र्यन्त्यामनाडी द्वे सन्ध्याकालमुदीर्य्यते" इति दक्षस्मरणात् । शङ्खः–"प्रातः सन्ध्यां सनक्षत्रां मध्याह्ने स्नानकर्मणि । सादित्यां पश्चिमां सन्ध्यामुपासीत यथाविधि" ॥ प्राङ्मुख आसीनः सव्ये पाणौ त्रीन्कुशान्दक्षिणहस्ते कुशद्वयञ्च धृत्वा पूर्ववदाचम्य, देशकालौ सङ्कीर्त्त्योपात्तसमस्तदुरितक्षयद्वारा परमेश्वरप्रीत्यर्थं प्रातस्सन्ध्यामुपासिष्ये इति सङ्कल्प्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



स्वस्य परितः प्रादक्षिण्येन जलेन सिञ्चन्नात्मानं रक्षेत् । ततः सोदकबिन्दुभिः कुशैः प्रणवेनैकं, समस्ताभिर्व्याहृतिभिरेकं, गायत्र्या चैकं, आपोहिष्ठेत्यादिभिर्नवभिस्सप्रणवैर्वाक्यैर्नव मार्ज्जनं शिरसि कुर्यात् ॥ ओंकारस्य ब्रह्मा ऋषिर्गायत्रीछन्दो ऽग्निर्देवता, व्याहृतीनां विश्वामित्रजमदग्निभरद्वाजा ऋषयो गायत्र्युष्णिगनुष्टुप्छन्दांसि अग्निवायुसूर्या देवताः, तत्सवितुर्विश्वामित्रर्षिर्गायत्रीछन्दः सविता देवता, आपोहिष्ठेतितिसृणामृचां सिन्धुद्वीपर्षिर्गायत्रीछन्द आपो देवता, मार्ज्जने विनियोगः । ॐ भूर्भुवःस्वः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥ ॐ आपो हिष्ठा मयोभुवः । ॐ ता न ऊर्ज्जे दधातन । ॐ महेरणाय चक्षसे । ॐ यो वः शिवतमो रसः । ॐ तस्य भाजयतेह नः । ॐ उशतीरिव मातरः । ॐ तस्मा अरङ्गमाम वः । ॐ यस्य क्षयाय जिन्वथ । ॐ आपो जनयथा च नः ॥ आयातु वरदा देवि अक्षरं ब्रह्मसंमितम् । गायत्रीं छन्दसां मातेदं ब्रह्म जुषस्व मे ॥ इति गायत्रीमावाह्य प्राणायामं कुर्यात् । स च यथा—अङ्गुष्ठतर्ज्जनीभ्यां नासापुटद्वयं बध्वा, प्राणवायुं निरुध्य, सप्तव्याहृतिसहितां प्रतिव्याहृतिप्रणवयुतां गायत्रीं शिरसा सह त्रिवारं पठेदित्ययमेकः प्राणायामः । भूरादिसप्तव्याहृतीनां विश्वामित्र-जमदग्नि-भरद्वाज-गौतमा-त्रि-वशिष्ठ-कश्यपा ऋषयो, गायत्र्युष्णिगनुष्टुब्बृहती-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पङ्क्तिचिष्टुब्जगत्यश्छन्दांसि, अग्निवाय्वर्कवागीशवरुणेन्द्रविश्वेदेवा देवताः, तत्सवितुरितिगायत्र्या विश्वामित्र ऋषिर्गायत्रीछन्दस्सविता देवता, ओमापो ज्योती रस इतिशिरसः प्रजापतिर्ऋषिर्यजुर्ब्रह्माग्निवायुसूर्या देवताः, प्राणायामे विनियोगः । ॐ भूः । ॐ भुवः । ॐ स्वः । ॐ महः । ॐ जनः । ॐ तपः । ॐ सत्यं । ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् । ॐ आपो ज्योती रसोमृतं ब्रह्म भूर्भुवःस्वरोम् ॥ एवं प्राणायामं कृत्वा सूर्यश्चेत्यपः पिबेत् । सूर्यश्चमेति नारायण ऋषिः प्रकृतिश्छन्दः सूर्यो देवता आचमने विनियोगः । सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु यत्किञ्च दुरितं मयि इदमहं मामभृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ ततो द्विराचामेत् । ततो दक्षिणहस्तेन जलमुद्धृत्य, नासिकाग्रे संयोज्य, ऋतञ्चेत्यघमर्षणं प्राणान्निरुध्यानिरुध्य वा त्रिस्सकृद्वाजपित्वा, जलमुत्सृजेत् । अस्य मन्त्रस्याघमर्षणऋषिर्भाववृत्तपरमेश्वरो देवता ऽनुष्टुप्छन्द अश्वमेधावभृथे विनियोगः । ॐ ऋतं च सत्यं चाभीद्धात्तपसो ऽध्यजायत । ततो रात्र्यजायत ततस्समुद्रो अर्णवः ॥ समुद्रादर्णवादधि संवत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥ सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीञ्चान्तरिक्षमथो स्वः ॥ तत उत्थाय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



त्रिकोणाञ्जलिना जलमादाय, प्रणवव्याहृतियुक्तगायत्र्या ऽभिमन्त्र्य, सूर्याभिमुखं सूर्याय त्रिरर्घ्यं दद्यात् । तत आत्मानं प्रदक्षिणं प्रक्रम्याचम्य स्वस्तिकाञ्जलिहस्त उदुत्यमित्यादिना-ऽऽदित्यमुपतिष्ठेत् । उदुत्यमित्यस्य प्रस्कण्व ऋषिर्गायत्रीछन्दः सूर्यो देवता, चित्रमित्यस्य कुत्स ऋषिस्त्रिष्टुप्छन्दः सूर्यो देवता, उपस्थाने विनियोगः । उदुत्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥ १ ॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्राद्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ॥ ततः प्रणवव्याहृतिगायत्रीणामृष्यादीन् पूर्ववत्स्मृत्वा जपे विनियोगः । ततो नाभिसमावुत्तानकरौ कृत्वा पर्वमालया सूर्योदयपर्यन्तं वाग्यतस्तिष्ठन्नष्टोत्तरशतं प्रणवव्याहृतिपूर्विकां गायत्रीं जपेत् । तत उत्तमे शिखरे इत्युपस्थानं कुर्यात् । उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि । ब्राह्मणेभ्यो ऽभ्यनुज्ञाता गच्छ देवि यथासुखम् ॥ ततो द्विराचम्य ब्रह्मार्पणं कुर्यात् ॥ इति प्रातस्सन्ध्याविधिः ॥

अथ प्रातर्होमप्रयोगः । अथ यजमानश्शुचिः प्रक्षालितपाणिपादः पत्न्या सह प्राणानायम्य, सूर्योदयात्पूर्वं प्रातरौपासनहोमं होष्यामीति सङ्कल्पं कृत्वा ऽग्निप्रज्वलनं कुर्यात् । अग्नेः पश्चादनुगुप्तापो होमद्रव्यं समिद्द्वयं सजलं चमसं चासादयेत् । ततस्सूर्योदये जाते तूष्णीमग्नौ समिधं प्रक्षिप्याग्निं प्रज्वाल्य विविक्तानग्निकणांस्तूष्णीमेकीकुर्यात् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तदेव परिसमूहनम् । तत उदकाञ्जलिसेचनमदितेऽनुमन्यस्वेत्यादिभिः कुर्यात् । त्रयाणां प्रजापतिर्ऋषिरेकपदागायत्रीछन्दोऽदितिरनुमतिः सरस्वती च क्रमेण देवता उदकाञ्जलिसेचने विनियोगः । दक्षिणं जानु भूमौ संस्थाप्याग्नेर्दक्षिणतो निर्ऋतिमारभ्याग्निदिक्पर्यन्तमञ्जलिना चमसोदकेन परिषिञ्चेददितेऽनुमन्यस्वेतिमन्त्रेण । तत अग्नेः पश्चान्निर्ऋतिमारभ्य वायुदिक्पर्यन्तमनुमतेऽनुमन्यस्वेतिमन्त्रेण सिञ्चेत् । अग्नेरुत्तरतो वायुदिशमारभ्यैशानदिक्पर्यन्तं सरस्वत्यनुमन्यस्वेतिमन्त्रेण सिञ्चेत् । तत अञ्जलिनोदकमादाय देव सवितरित्यनेन मन्त्रेण सकृत्त्रिर्वाऽग्निं प्रदक्षिणं परिषिञ्चेत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुस्सविता देवता ऽनुपर्युक्षणे विनियोगः । देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥ पर्युक्षणे विशेषः । पर्युक्षणारम्भकोटिमभ्यन्तरतः अवसानकोटिं च बहिः कुर्वन् होमीयद्रव्यं पर्युक्षणधारया ऽभ्यन्तरतः कुर्वन्परिषिञ्चेत् । ततस्तूष्णीमग्नौ समिधमाधाय त्रिः प्रक्षालितान् प्रगतोदकान् यवान् व्रीहीन् वा दक्षिणहस्तेन मध्ये ऽग्नौ जुहोति । सूर्याय स्वाहा । सूर्यायेदं न मम । पुनरवशिष्टं हविरादाय मनसा मन्त्रमुच्चार्योत्तरार्द्धपूर्वार्द्धे जुहोति । प्रजापतये स्वाहा । प्रजापतय इदं न मम । अथ तूष्णीमग्नौ समिधमाधाय पूर्ववत्पर्युक्षणमुदकाञ्जलिसेचनं च कुर्यात् । मन्त्रे विशेषः । अदितेऽन्वमंस्था इति दक्षिणतः । अनुमतेऽन्व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मंस्था इति पश्चिमतः । सरस्वत्यन्वमंस्था इत्युत्तरतः ॥ अथ प्रदक्षिणमग्निं परिक्रम्याग्निपरिचर्य्यार्थं यस्मिन् चमसे स्थापितं जलं तदग्न्यगाराद्बहिरवनीयान्येनोदकेन चमसं प्रक्षाल्य पूरयित्वा स्वस्थाने निधाय वामदेव्यं गीत्वा ब्रह्मार्पणं कुर्यात् । इति प्रातर्होमविधिः ॥

अथ माध्याह्निकस्नानविधिः ॥ तत्र गोभिलसूत्रम् । "अथ स्नानविधिं व्याख्यास्यामो नदीं देवखातं गर्त्तप्रस्रवणादिकं वा स्नानार्थं गत्वा, तत्तीरं जलेन प्रक्षाल्य, तद्देशे मृत्तिकां कुशं गोमयं तिलानक्षतांश्चोपकल्पयेत्" । परकीयतटाकादिकं चेत्तस्मात्पञ्च मृत्पिण्डानुद्धृत्य बहिर्निक्षिपेत् । ततः पावका नः सरस्वतीति तीर्थं नमस्कुर्य्यात् । अस्य मधुच्छन्दा ऋषिर्गायत्रीछन्दस्सरस्वती देवता तीर्थनतौ विनियोगः । पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टुधिया वसुः ॥ ततो मृद्भिर्जलेन पादादिगात्राणि प्रक्षालयेत् । वामपाणिना पादौ लिङ्गं गुदं हस्तञ्च संक्षाल्य, दक्षिणेन जठरं हृदयं हस्तं मस्तकञ्च प्रक्षाल्य, तूष्णीं स्नात्वा, तटमागत्योपविश्य, बद्धशिखो यज्ञोपवीत्याऽऽचम्य, प्राङ्मुख उदङ्मुखो वा कुशहस्तश्शुचिस्समाहितो देशकालौ सङ्कीर्त्य, समस्तदुरितक्षयद्वारा परमेश्वरप्रीत्यर्थं स्नानमहं करिष्ये इति सङ्कल्प्य, दक्षिणहस्तेन जलमादाय सप्तवारं सप्तव्याहृतिभिः सकृद्गायत्र्या च तज्जलमभिमन्त्र्याचामेत् । ततो यथाविधि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



द्विराचामेत् । ततस्तीर्थाभिमानिनीं वरुणदेवतां ध्यात्वा सहस्रशीर्षा-घृतवती-अश्वक्रान्ते-इत्यादिभिस्तिसृभिर्ऋग्भिर्मृत्तिकां गृह्णीयात् । आसां क्रमेण नारायण-भरद्वाज-वामदेवा ऋषयः, अनुष्टुप्जगत्यनुष्टुप्छन्दांसि, पुरुषो द्यावापृथिवी मृत्तिका च देवता, मृत्तिकाग्रहणे विनियोगः । सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् । स भूमिꣳ सर्वतो वृत्वा ऽत्यतिष्ठद्दशाङ्गुलम् ॥ घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा । द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥ ॐ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे । मृत्तिके हर मे पापं यन्मया पूर्वसञ्चितम् । त्वया हतेन पापेन सर्वपापैः प्रमुच्यते ॥ तत इदं विष्णुर्विचक्रम इतिषड्भिर्ऋग्भिर्जलेन च मृत्तिकां सम्मृज्यात् । इदं विष्णुरितिषण्णां मेधातिथिर्ऋषिर्गायत्रीछन्दो विष्णुर्देवता मृत्तिकासम्मर्दने विनियोगः । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुले ॥ १ ॥ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ॥ २ ॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥ ३ ॥ तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ ४ ॥ तद्विप्रासो विपन्यवो जागृवाꣳसः समिन्धते । विष्णोर्यत्परमं पदम् ॥ ५ ॥ अतो देवा अवन्तु नो यतो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



विष्णुर्विचक्रमे । पृथिव्या अधिसानवि ॥ ६ ॥ तत ऊर्द्ध्वौ पाणी कृत्वा उद्वयं तमसः परीति उदुत्तममिति चादित्यावेक्षणं कुर्यात् । उद्वयमित्यस्य प्रस्कण्व ऋषिः पङ्क्तिश्छन्दः सूर्यो देवता, उदुत्तममितिशुनःशेप ऋषिस्त्रिष्टुप्छन्दो वरुणो देवता, सूर्यावेक्षणे विनियोगः । उद्वयं तमसः परि ज्योतिः पश्यन्त उत्तरꣳ स्वः पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमꣳ श्रथाय । अथादित्य व्रते वयं तवानागसो अदितये स्याम ॥ तत उद्धृताऽसि वराहेणामोसीतिमन्त्राभ्यां प्रातिलोम्येन शिरआद्यङ्गेषु मृत्तिकालेपनं कुर्यात् । प्रथमं मस्तके, ततस्कन्धे, ततः पार्श्वयोः, ऊरुद्वये, पादद्वये च । अनयोर्वामदेवप्रजापती ऋषी, अनुष्टुप्त्रिष्टुभौ छन्दसी, पृथिवीन्द्रौ देवते, अङ्गेषु मृत्तिकालेपने विनियोगः । उद्धृताऽसि वराहेण कृष्णेन शतबाहुना । मृत्तिके ब्रह्मदत्ताऽसि काश्यपेनाभिमन्त्रिता ॥ १ ॥ अमोऽसि प्राण तदृतं ब्रवीम्यमा ह्यसि सर्वमनुप्रविष्टः । स मे जराꣳ रोगमपमृज्य शरीराद्याम एधि मामृथा न इन्द्र ॥ २ ॥ पुनः सहस्रशीर्षेत्यादिभिर्मृत्तिकां गृहीत्वेत्येतदादि मृत्तिकालेपनान्तं कर्म पूर्ववत्कुर्यात् । ततो गावश्चिद्घासमन्यव इतिमन्त्रेण मस्तकाद्यङ्गेषु प्रातिलोम्येन गोमयेन लेपनं कुर्यात् । अस्य सौभरिर्ऋषिः ककुप्छन्दो मरुतो देवता गोमयलेपने विनियोगः । गावश्चिद्घासमन्यवस्सजात्येन मरुतः सबन्धवः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



रिहते ककुभो मिथः ॥ ततोऽङ्गुष्ठतर्जनीभ्यां नासापुटं बध्वा प्राणानायम्य ऋतञ्च सत्यञ्चेत्यघमर्षणं मनसा त्रिर्जपेत् । मन्त्रस्तूक्तः । ततो जलाभिमानिनीं देवतां ध्यात्वा नाभिप्रमाणजले स्थित्वा शन्नोदेव्या आपोहिष्ठीयाभिस्तिसृभिरुपास्मै गायतेत्यादिभिर्नवभिः पावमानीभिश्चतसृभिस्तरत्समन्दीभिस्तिसृभिरेतोन्विन्द्रमित्यादिभिस्तमुष्टवाम नकिइन्द्र त्वदुत्तरं पवित्रमित्यादिभिर्ऋग्भिस्तिसृभिः प्रत्यृचं ऋगन्ते कुशैर्मार्जनं कुर्यात् । शन्नोदेवीरिति सिन्धुद्वीपो गायत्र्यापः, आपो हिष्ठेतितिसृणां सिन्धुद्वीपो गायत्र्यापः, उपास्मा इत्यादितिसृणामृचामसितकश्यपवैखानसा ऋषयो गायत्रीछन्दः सोमो देवता, तरत्समन्दीत्यवत्सार ऋषिर्गायत्रीछन्दः सोमो देवता, एतोन्विन्द्रमितितिसृणां तिरश्च ऋषिरनुष्टुप्छन्द इन्द्रो देवता, तमुष्टवामेति तिरश्च ऋषिरनुष्टुप्छन्द इन्द्रो देवता, नकिइन्द्रेति वामदेवऋषिर्गायत्रीछन्द इन्द्रो देवता, पवित्रं त इतितिसृणां पवित्रऋषिर्जगतीछन्दः सोमो देवता, मार्जने विनियोगः।

ॐ शन्नो देवीरभिष्टये शन्नो भवन्तु पीतये। शंयोरभिस्रवन्तु नः ॥ १ ॥ ॐ आपो हिष्ठा मयोभुवस्ता न ऊर्ज्जे दधातन। महेरणाय चक्षसे ॥ १ ॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ॥ २ ॥ तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ ३ ॥ उपास्मै

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



गायतानरः पवमानायेन्दवे । अभि देवा२ इयक्षते ॥ १ ॥
अभि ते मधुना पयोथर्वाणो अशिश्रयुः । देवं देवाय देवयु ॥ २ ॥
स नः पवस्व शं गवे शं जनाय शमर्वते । श२ राजन्नोषधीभ्यः ॥ ३ ॥
दविद्युतत्या रुचा परिष्टोभन्त्या कृपा । सोमाः शुक्रा गवा
शिरः ॥ ४ ॥ हिन्वानो हेतृभिर्हित आवाजं वाज्यक्रमीत् ।
सीदन्तो वनुषो यथा ॥ ५ ॥ ऋधक्सोमस्वस्तये संजग्मानो
दिवाकवे । पवस्व सूर्यो दृशे ॥ ६ ॥ पवमानस्य ते कवे वाजिन्त्सर्गा
असृक्षत । अर्वन्तो न श्रवस्यवः ॥ ७ ॥ अच्छाकोशं मधुश्चुत-
मसृग्रं वारे अव्यये । अवावशन्त धीतयः ॥ ८ ॥ अच्छासमु-
द्रमिन्दवोस्तंगावो न धेनवः । अग्मन्नृतस्य योनिमा ॥ ९ ॥
तरत्समन्दीधावति धारासुतस्यान्धसः । तरत्समन्दीधावति ॥ १ ॥
उस्रा वेद वसूनां मर्त्तस्य देव्यवसः । तरत्सम० ॥ २ ॥
ध्वस्रयोः पुरुषन्त्योरासहस्राणि दद्महे । तरत्स० ॥ ३ ॥
आययोस्त्रिंशतं तना सहस्राणि च दद्महे । तरत्समन्दीधा-
वति ॥ ४ ॥ एतोन्विन्द्र२ स्तवाम शुद्ध२ शुद्धेन साम्ना ।
शुद्धैरुक्थैर्वावृध्वा२स२ शुद्धैराशीर्वान्ममत्तु ॥ १ ॥ इन्द्रशुद्धो न
आगहि शुद्धः शुद्धाभिरूतिभिः । शुद्धो रयिं निधारय शुद्धो
ममद्धि सोम्यः ॥ २ ॥ इन्द्र शुद्धो हि नो रयि२ शुद्धो रत्नानि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दाशुषे । शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजꣳ सिषाससि ॥ ३ ॥ तमुष्टवाम यं गिर इन्द्रमुक्थानि वावृधुः । पुरूण्यस्य पौꣳस्या सिषासन्तो वनामहे ॥ १ ॥ नकि इन्द्र त्वदुत्तरं न ज्यायो अस्ति वृत्रहन् । नक्येवं यथा त्वम् ॥ १ ॥ पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तः संतदाशत ॥ १ ॥ तपोष्पवित्रं विततं दिवस्पदेऽर्चन्तो अस्य तन्तवो व्यस्थिरन् । अवन्त्यस्य पवितारमाशवो दिवः पृष्ठमधिरोहन्ति तेजसा ॥ २ ॥ अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः । मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमादधुः ॥ ३ ॥ ॐ भूः पुनातु । ॐ भुवः पुनातु । ॐ स्वः पुनातु । ॐ भूर्भुवः स्वः पुनातु । इतिसमाचारान्मार्जयेत् ॥ तत उक्तविधिना त्रीन् प्राणायामान् कृत्वा, जले त्रिवारं मज्जनं विधाय, जले निमग्नस्सन् सहस्रशीर्षेत्यादि ऋक्त्रयं जपेत् । तिसृणां नारायण ऋषिरनुष्टुप्छन्दः पुरुषो देवता ऽघमर्षणे विनियोगः । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिꣳसर्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहा भवत्पुनः । तथा विष्वङ्व्यक्रामदशनानशने अभि ॥ २ ॥ पुरुष एवेदꣳ सर्वं यद्भूतं यच्च

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



भाव्यं । पादोस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥
ततस्त्रिःप्राणायामं कृत्वा, तूष्णीं त्रिवारमवगाह्याचम्य, पुनः
शन्नो देव्यादिभिरुक्ताभिः पूर्ववन्मार्जनं कृत्वा, प्रातःस्नानवस्त्रा-
नाङ्गतर्पणं विधाय, तीरमागत्याचमनवस्त्रधारणादिकं कुर्य्यात्।
एवं विस्तरेण स्नानं न प्रातः । "तदुक्तं 'कर्म्मप्रदीपे'—
अल्पत्वाद्धोमकालस्य बहुत्वात् स्नानकर्म्मणः । प्रातर्न तनुयात्
स्नानं होमलोपो हि गर्हितः ॥ इति माध्याह्निकस्नानविधिः ॥

अथ माध्याह्निकसन्ध्या सा च प्रातःसन्ध्यावदनुष्ठेया ।
तत्र विशेषं वक्ष्यामः । सूर्य्येतिस्थाने आपः पुनन्त्विति
पठेत् । अस्य वामदेव ऋषिरनुष्टुप्छन्द आपो देवता आचमने
विनियोगः । आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् ।
पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम् ॥ यदुच्छिष्टमभोज्यं
यद्वा दुश्चरितं मम । सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहं
स्वाहा ॥ अर्घ्यमेकं दद्यात् । "सूर्योपस्थाने भूम्यलग्नपार्ष्णिर्वा
गुल्फ एकपाद ऊर्ध्वपादो वा कृताञ्जलिर्वा ऊर्द्ध्वबाहुः
प्रातःकालवदुदुत्यं चित्रं देवानामितिऋग्द्वयेन सूर्य्यमुपस्थाय
विभ्राडादिदशतेस्समाप्तिपर्यन्तं तदर्वागिच्छया जपेत्" इति
कर्मप्रदीपः । स्नानसूत्रे तु—"उदुत्यं चित्रं आयंगौः अपत्ये
तरणिरुद्यामित्यादिभिर्ऋग्भिः सवितुरुपस्थानं कुर्य्यात्" ।
विभ्राडितिसूर्य्यो जगती सूर्य्यः, आयं गौरितितिसृणां सूर्य्यो
गायत्री सूर्य्यः, अपत्ये इत्याद्यष्टर्चस्य प्रस्कण्वो गायत्री सूर्य्यः,
उपस्थाने विनियोगः । ओं उदुत्यं जातवेदसं देवं वहन्ति केतवः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दृशे विश्वाय सूर्य्यम्॥ ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य
वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा
जगतस्तस्थुषश्च ॥ ॐ विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञ-
पतावविहुतं । वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति
बहुधा विराजति ॥ ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य
वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा
जगतस्तस्थुषश्च ॥ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ।
पितरं च प्रयन्त्स्वः ॥ अन्तश्चरति रोचनास्य प्राणादपानती ।
व्यख्यन्महिषो दिवम् ॥ त्रिꣳशद्धाम विराजति वाक् पतंगाय
धीयते । प्रतिवस्तोरहद्युभिः ॥ अपत्ये तायवो यथा नक्षत्रा
यन्त्यक्तुभिः । सूराय विश्वचक्षसे ॥ अदृश्रन्नस्य केतवो
विरश्मयो जनाꣳ अनु । भ्राजन्तो अग्नयो यथा ॥ तरणिर्वि-
श्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमाभासि रोचनम्॥ प्रत्यङ्दे-
वानां विशः प्रत्यङ्ङुदेषि मानुषान् । प्रत्यङ्विश्वꣳ स्वर्दृशे ॥
येनापावकचक्षसा भुरण्यन्तं जनाꣳ अनु । त्वं वरुण पश्यसि ॥
उद्यामेषि रजः पृथ्वहामि मा नो अक्तुभिः । पश्यंजन्मानि
सूर्य ॥ अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः । ताभिर्याति
स्वयुक्तिभिः ॥ सप्त त्वा हरितो रथे वहन्ति देव सूर्य ।



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



शोचिष्केशं विचक्षण ॥ ततस्तर्पणं कुर्यात् । प्राङ्मुखो दक्षिणं जान्वाच्य शुक्लतिलसहितैः कुशोदकैर्यज्ञोपवीती देवतीर्थेन सकृदञ्जलिना अग्न्यादींस्तर्पयेत् ॥ ॐ नमो ब्रह्मणे नमो ब्राह्मणेभ्यो नम आचार्येभ्यो नम ऋषिभ्यो नमो देवेभ्यो नमो वेदेभ्यो नमो वायवे च मृत्यवे च विष्णवे च नमो वैश्रवणाय चोपजयाय च ॥ कृताञ्जलिरिमं मन्त्रं पठित्वा तर्पयेत् ॥ ॐ अग्निस्तृप्यतु । ॐ वषट्कारस्तृप्यतु । ॐ महाव्याहृतयस्तृप्यन्तु । ॐ गायत्री तृप्यतु । ॐ ब्रह्मा तृप्यतु । ॐ विष्णुस्तृप्यतु । ॐ वेदास्तृप्यन्तु । ॐ देवास्तृप्यन्तु । ॐ छन्दांसि तृप्यन्तु । ॐ यज्ञास्तृप्यन्तु । ॐ अध्ययनं तृप्यतु । ॐ द्यावापृथिव्यौ तृप्येताम् । ॐ अन्तरिक्षं तृप्यतु । ॐ अहोरात्राणि तृप्यन्तु । ॐ मासास्तृप्यन्तु । ॐ ऋतवस्तृप्यन्तु । ॐ संवत्सरस्तृप्यतु । ॐ वरुणस्तृप्यतु । ॐ समुद्रास्तृप्यन्तु । ॐ नद्यस्तृप्यन्तु । ॐ गिरयस्तृप्यन्तु । ॐ क्षेत्राणि तृप्यन्तु । ॐ वनानि तृप्यन्तु । ॐ ओषधयस्तृप्यन्तु । ॐ वनस्पतयस्तृप्यन्तु । ॐ पशवस्तृप्यन्तु । ॐ नागास्तृप्यन्तु । ॐ उरगास्तृप्यन्तु । ॐ सुपर्णास्तृप्यन्तु । ॐ वयाꣳसि तृप्यन्तु । ॐ गावस्तृप्यन्तु । ॐ वसवस्तृप्यन्तु । ॐ रुद्रास्तृप्यन्तु । ॐ आदित्यास्तृप्यन्तु । ॐ मरुतस्तृप्यन्तु । ॐ सिद्धास्तृप्यन्तु । ॐ साध्यास्तृप्यन्तु । ॐ गन्धर्वास्तृप्यन्तु । ॐ पिशाचास्तृप्यन्तु ॐ यक्षास्तृप्यन्तु । ॐ रक्षाꣳसि तृप्यन्तु । ॐ भूतानि तृप्यन्तु । ॐ नक्षत्राणि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तृप्यन्तु । ॐ अश्विनौ तृप्येताम् । ॐ अप्सरसस्तृप्यन्तु । ॐ चतुर्विधभूतग्रामस्तृप्यतु । ॐ मरीचिस्तृप्यतु । ॐ अत्रिस्तृप्यतु ॐ अङ्गिरास्तृप्यतु । ॐ पुलस्तिस्तृप्यतु । ॐ पुलहस्तृप्यतु । ॐ क्रतुस्तृप्यतु । ॐ प्रचेतास्तृप्यतु । ॐ वसिष्ठस्तृप्यतु । ॐ भृगुस्तृप्यतु । ॐ नारदस्तृप्यतु । एवमादयः स्वस्ति कुर्वन्तु तर्पिताः स्वस्ति कुर्वन्तु तर्पिताः ॥ ततः प्राचीनावीती दक्षिणाभिमुखः सव्यं जान्वाच्य पितृतीर्थेन द्विगुणकुशैः सकृष्णतिलैस्त्रिस्त्रिस्तर्पयेत् । ॐ राणायनिस्तृप्यतु । ॐ सात्यमुग्रिस्तृप्यतु । ॐ व्यासस्तृप्यतु । ॐ भागुरिस्तृप्यतु । ॐ औगुण्डिस्तृप्यतु । ॐ गौल्गुलविस्तृप्यतु । ॐ भानुमानौपमन्यवस्तृप्यतु । ॐ कराटिस्तृप्यतु । ॐ मशकोगार्ग्यस्तृप्यतु । ॐ वार्षगण्यस्तृप्यतु । ॐ कौथुमिस्तृप्यतु । ॐ शालिहोत्रिस्तृप्यतु । ॐ जैमिनिस्तृप्यतु । त्रयोदशैते सामगाचार्य्याः स्वस्ति कुर्वन्तु तर्प्पिताः स्वस्ति कुर्वन्तु तर्पिताः ॥ ॐ शटिस्तृप्यतु । ॐ भाल्लविस्तृप्यतु । ॐ काल्वविस्तृप्यतु । ॐ ताण्ड्यस्तृप्यतु । ॐ वृषाणस्तृप्यतु । ॐ शमबाहुस्तृप्यतु । ॐ रुरुकिस्तृप्यतु । ॐ अगस्त्यस्तृप्यतु । ॐ बष्कशिरास्तृप्यतु । ॐ हूहूस्तृप्यतु । दशैते मे प्रवचनकर्तारः स्वस्ति कुर्वन्तु तर्पिताः० ॥ ॐ कव्यवालस्तृप्यतु । ॐ नलस्तृप्यतु । ॐ सोमस्तृप्यतु । ॐ यमस्तृप्यतु । ॐ अर्यमातृप्यतु । ॐ अग्निष्वात्तास्तृप्यन्तु । ॐ सोमपीथास्तृप्यन्तु । ॐ बर्हिषदस्तृप्यन्तु । ॐ यमस्तृप्यतु । ॐ धर्मराजस्तृप्यतु ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ॐ मृत्युस्तृप्यतु। ॐ अन्तकस्तृप्यतु। ॐ वैवस्वतस्तृप्यतु । ॐ कालस्तृप्यतु । ॐ सर्वभूतक्षयस्तृप्यतु । ॐ औदुम्बरस्तृप्यतु। ॐ दध्नस्तृप्यतु। ॐ नीलस्तृप्यतु । ॐ परमेष्ठीतृप्यतु । ॐ वृकोदरस्तृप्यतु । ॐ चित्रस्तृप्यतु । ॐ चित्रगुप्तस्तृप्यतु । ततो ऽमुकगोत्रो ऽस्मत्पिता ऽमुकशर्म्मा तृप्यतु । अमुकगोत्रो ऽस्मत्पितामहो ऽमुकशर्म्मा तृप्यतु । अमुकगोत्रो ऽस्मत्प्रपितामहो ऽमुकशर्म्मा तृप्यतु। अमुकगोत्रो ऽस्मन्मातामहो ऽमुकशर्मा तृप्यतु । अमुकगोत्रो ऽस्मत्प्रमातामहो ऽमुकशर्मा तृप्यतु। अमुकगोत्रो ऽस्मद्वृद्धप्रमातामहो ऽमुकशर्मा तृप्यतु । अमुकगोत्रा ऽस्मन्माता ऽमुकीदेवीदा तृप्यतु। अमुकगोत्रा ऽस्मत्पितामही अमुकीदेवीदा तृप्यतु। अमुकगोत्रा ऽस्मत्प्रपितामही अमुकीदेवीदा तृप्यतु। अमुकगोत्रा ऽस्मन्मातामही अमुकीदेवीदा तृप्यतु। अमुकगोत्रा ऽस्मत्प्रमातामही अमुकीदेवीदा तृप्यतु। अमुकगोत्रा ऽस्मद्वृद्धप्रमातामही अमुकीदेवीदा तृप्यतु । ततः पितृव्यादीनेकैकाञ्जलिना तर्पयेत्। ततो निवीती कुशमध्यैरुदङ्मुखः श्वेततिलैर्ऋषितीर्थेन तर्पयेत्। ॐ सनकस्तृप्यतु२। ॐ सनन्दनस्तृप्यतु२ । ॐ सनातनस्तृप्यतु२। ॐ कपिलस्तृप्यतु२। ॐ आसुरिस्तृप्यतु२ । ॐ वोढुस्तृप्यतु२ । ॐ पञ्चशिखस्तृप्यतु२ । एतान्प्रत्येकं द्वाभ्यामञ्जलिभ्यां तर्पयेत्। स्नानवस्त्रं जलाद्वहिर्निष्पीडयेत्। तत्र मन्त्रः। ये चास्माकं कुले जाता अपुत्रा गोत्रिणो मृताः। ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥ तत उपवीती आचम्य, हृदयसमौ करौ कृत्वा, गायत्रीं जपित्वा,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



गायत्रीमुद्दास्य, भासादिसामानि पठेत् ॥ भासस्य वायुर्जगती सूर्यः, दशस्तोभस्य जमदग्निस्त्रिष्टुबग्निः, उन्नयेत्यस्यादित्योऽनुष्टुबात्मा, औशनस्यौशना गायत्र्यग्निः, शुद्धाशुद्धीययोरिन्द्रोऽनुष्टुबिन्द्रः, राजनरौहिणयोरिन्द्रस्त्रिष्टुबिन्द्रः, बृहत्साम्नो भरद्वाजो बृहतीन्द्रः, रथन्तरस्य वसिष्ठो बृहतीन्द्रेशानौ, सेतुसाम्नो विशोकस्त्रिष्टुबात्मा, महानाम्नीनां प्रजापतिर्विराडिन्द्रः, पुरीषपदानां पदपङ्क्तिर्वा, महादिवाकीर्त्यस्य सूर्यो जगती सूर्यः, ज्येष्ठसाम्नां प्रजापतिस्त्रिष्टुबग्निः, आज्यदोहानामग्निर्वैश्वानरस्त्रिष्टुप्, देवव्रतानां देवा उत्कृती रुद्रः, पुरुषव्रतानां पुरुषोऽनुष्टुप् पञ्चानां गायत्र्यन्तिमा आत्मा, तवश्यावीयसाम्नः प्रजापतिर्विश्वामित्रो गायत्री सविता, सन्त्वाभूतानीति विश्वेदेवास्त्रिष्टुबादित्यः, उर्वीचित्रं देवानामन्तश्चरति आदित्यस्त्रिष्टुब्गायत्री सूर्यः, उत्तरयोरादित्यो गायत्री सूर्यः, उदुत्यं चित्रमित्यतीषङ्गस्य सूर्यस्त्रिष्टुब्गायत्री सूर्यः, सधस्थस्य इन्द्रो ऽनुष्टुप्सूर्यः, मरुतां भूता गायत्री सूर्यः, सर्पराज्ञीनां प्रजापतिर्गायत्री सूर्यः, घर्मरोचनस्येन्द्रा ऽनुष्टुप्सूर्यः, परिधीनामिन्द्रा गायत्री सूर्यः, ऋतुसाम्न ऋतवो ऽनुष्टुप्सूर्यः, चक्षुःसाम्नो मित्रावरुणौ गायत्री सूर्यः, श्रोत्रसाम्नो मित्रावरुणौ त्रिष्टुब्गायत्री सूर्यः, शिरःसाम्न इन्द्रो गायत्रीत्रिष्टुभौ सूर्यः, जपे विनियोगः ॥

भासम् ॥ हाउहाउहाउ । ओहा । ओहा । ओहाइ । इहोहो । ३ । इहियो । ३ । हुम् । ३ । हो । ३ । ह९ । ३ । इडा । ३ । ऋतंमे । ३ । हस् । ३ । प्रत्नस्यवृष्णो अरुषस्य-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नमा२३हाः । प्रनोवचोविदथाजातवेदा२३साई । वैश्वानराय-
मतिर्नव्यसेशू२३ची: । सोमइवपवतेचाहरग्ना२३या३इ ।
हाउहाउहाउ । श्रोहा । श्रोहा । श्रोहायि । इहैाहो । ३ ।
इहियो । ३ । हुम् । ३ । हो । ३ । ह२ । ३ । इडा । ३ ।
ऋतम्मे । ३ । हस् । २ । हा२३४ । श्रौहोवा । इहैाहो ।
भद्रम् । इहैाहो । श्रेयः । इहैाहो । वामम् । इहैाहो ।
वरम् । इहैाहो । सुवम् । इहैाहो । श्रस्ति । इहैाहो ।
श्रभ्राजीत् । इहैाहो । ज्योतिः । श्रभ्राजीत् । इहैाहो ।
दीदिवः । ए२३ । हियाहाउवा३ । भा२३४५स् ॥ १ ॥ दश-
स्तोभम् ॥ हाउहाउहाउ । श्रोहा । श्रोहा । श्रोहा ।
हाश्रोवा । ३ । ऊ२ । ३ । श्रो२ । ३ । हाउवाक् । ३ ।
श्रायुर्यन् । ३ । एश्रायुः । ३ । श्रायुः । ३ । वयाः । २ ।
वयः । इन्द्रन्नरोनेमधिता हवा२न्तायि । यत्पार्यायुनजतेधि-
या२स्ताः । शूरोनृषाताश्रवसश्चका२मायि । श्रागोमतिव्रजेभ-
जातुवा२न्नाः । हाउहाउहाउ । श्रोहा । श्रोहा । श्रोहा ।
हाश्रोवा । ३ । ऊ२ । ३ । श्रो२ । ३ । हाउ वाक् । ३ ।
श्रायुर्यन् । ३ । एश्रायुः । ३ । श्रायुः । ३ । वयाः । २ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वा२ । या२३४ । ओ२होवा । ए । आयुष्मा अस्मभ्यं वर्चोधादे-
वेभ्या२३४५ः ॥ २ ॥ उन्नयम् ॥ उन्नयामि । होइ । ३ । आदित्यं
प्राञ्चंयंतमुन्नयामि । होइ । ३ । अहोरात्राण्यरित्राणि ।
होइ । ३ । द्यौर्नौर्हाउ । ३ । तस्यामसावादित्य ईयते हाउ । ३ ।
तस्मिन्वयमीयमान ईयामहे हाउ । ३ । ईयामहे हाउ । २ ।
ईयामहे ३ । हाउवा । प्रियेधामऽस्त्रियच्चरे । २ । प्रियेधामऽ-
स्त्रियच्चरे२३४५ ॥ ३ ॥ गायत्रीसामैशनम् ॥ प्रेष्ठं वः । अता२३
इथीम् । स्तौषेमित्रं । इवप्रा२३याम् । अग्ना इरा३था३म् ।
नावा२३हा३४३यि । दा२३४योईहाइ ॥ ४ ॥ शुद्धाशुद्धीयम् ॥
एतोन्विन्द्रऽस्तवामा । शुद्धऽशुद्धेन सा२३म्ना । शुद्धैरुक्थैर्वा-
वृध्वा२३ऽसाम् । शुद्धैरा२३शी ३ । र्वा२न् । ममा३४औ२होवा ।
तू २३४५ ॥ ५ ॥ एतोन्विद्रऽस्तवाईमा । शुद्धऽशुद्धे । न ।
साम्ना२ । शुद्धाइरु३क्था३यिः । वावा२ध्वा२३४ऽसाम् ।
शुद्धैरा२३शी । र्वान्ममत्तु । इडा२३भा३४३ । ओ२३४५इ ।
डा ॥ ६ ॥ राजनम् ॥ हुम् । ३ । हो । ३ । हऽ । ३ ।
ओ२हा । ३ । ओ२होइ । २ । ओ२होइ । इन्द्रनरो । नेऽमधि ।
ताह्वंतायि । ३ । वयोहृचत् । ३ । विश्वाष्टयेविधर्मणे । ३ ।

For Private And Personal

यत्पारिया: । युनज । ताइधियस्ता: । ३ । सत्यमोज: । ३ ।
रज:सुव: । ३ । शूरोन्टषा । ता३श्रव । सश्वकामायि । ३ ।
भद्र॒सुधा । २ । भद्र॒सुधे । षम्नूर्जं । इषम्नूर्जम् । २ ।
आगोमतायि । व्रजेभ । जातुवन्ना: । ३ । हृचद्याश: । ३ ।
दिविद्धेश्हस् । २ । दिविद्धे ३ । हाउवा । वागीडाभुवो-
वृहद्भा२३४५: ॥ ७ ॥ रौहिणम् ॥ हाउ । ३ । आइही । ३ ।
आयिहिया । ३ । आसाउ । ३ । आयाम् । ३ । नामा: । ३ ।
किट् । किट् । इन्द्रं नरोनेमधिताहवा२न्ताइ । यत्पार्यायुनजते-
धिया२स्ता: । शूरोन्टषाताश्रवसश्वका२मायि । आगोमन्निव्र-
जेभजातुवा२न्ना: । मना२३होइ । प्राणा२३होयि । चक्षू२३-
होयि । श्रोत्रा२३॒होइ । घोषा२३होयि । व्रता२३॒होयि ।
भूता२३॒होयि । पाना२३॒होयि । चित्ता२३॒होयि ।
धीता२३॒होयि । सुवा२३होयि । ज्योता२३यिहो२ । वा२३४-
औहोवा । ऊ२३४५ ॥ ८ ॥ हृचत् ॥ औहोइत्वामिद्धिहवाम-
हाइए । सातौवाजा । स्याकारा२३४वा: । तुवा३४ । औहोवा ।
वृचाइषुवायि । द्रासा३१त् । पतिन्ना२३४रा: । त्वांकाष्ठा३४ ।
औहोवा । सू२अर्वा२३४ । ता: । उहुवाईहाउ । वा । हस् ॥ ९ ॥
रथन्तरम् ॥ आभित्वाशूरनोनुमोवा । आदुग्धाइवधेनवईशान-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मस्यजगतः । सुवा२३इश्राम् । आइआनमा२३इन्द्रा३ । तास्थू२३४षा । ओवाई । हाउवा । अस् ॥ १० ॥ सेतु ॥ हाउ । ३ । सेतूं२स्तर । ३ । दुस्त । रान् । ३ । दानेनादानं । ३ । हाउ । ३ । अहमस्मिप्रथमजा ऋता२३स्या३४५ । हाउ । ३ । सेतूं२स्तर । ३ । दुस्त । रान् । ३ । अक्रोधेन क्रोधम् । २ । अक्रोधेनक्रोधम् । हाउ । ३ । पूर्वं देवेभ्यो अमृतस्य ना२३मा३४५ । हाउ । ३ । सेतूं२स्तर । ३ । दुस्त । रान् । ३ । श्रद्धया-श्रद्धाम् । ३ । हाउ । ३ । योमाददातिसइदेवमा२३वा३४५त् । हाउ । ३ । सेतूं२स्तर । ३ । दुस्त । रान् । ३ । सत्यनानृतम् । ३ । हाउ । ३ । अहमन्नमन्नमदन्तमा२३द्मी२३४५ । हाउ हाउ हाउवा । एषागतिः । ३ । एतदमृतम् । ३ । स्वर्गच्छ । ३ । ज्योतिर्गच्छ । ३ । सेतूं२स्तीर्त्वा चतुरा२३४५ः ॥ ११ ॥ महानाम्न्यः ॥ ए२ । विदामघवन्विदाः । गातुमनुशं२सिषः । दाइशा३१उवा२३ । ई३४डा । ए२ । शिक्षाशचीनां पताथि । पूर्वीणां पुरू२ । वसा३१उवा२३ । ई३४डा । आभिष्टमभा२यि । ष्टिभिरा३१ उवा२३ । ई३४डा । स्वर्णां२शू२रः । हा३१उवा२३ । ई३४डा । प्रा । चेतनप्रचेतया । इन्द्रा । द्युम्नायना२इषाइ । इडा । इन्द्रा । द्युम्नायना२इषाई । अथा । इन्द्रा । द्युम्नायना२इषाइ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ड्डा । एवाह्हिशक्रोराये वाजायवा१ज्रीइवाः । शविष्ठवज्त्रिं ना३ । जासाइ । मऽह्हिष्ठवज्त्रिंना२३हो । जासा३१उवा२३ । इट् इडा२३४५ । आया । ह्विपिबमा२त्सुवा । इडा२३४५ ॥ ए२ । विदाराये सुवीरियाम् । भुवो वाजानां पतिर्वशा२२ । अनुआ३१ उवा२३ । ई३४डा । ए२ । मऽह्हिष्ठवज्त्रिं न्टं जसाइ । यःशवि- ष्ठःशूरा२ । णा३१उवा२३ । इ३४डा । योमऽह्हिष्ठो मघो२ । ना३१उवा२३ । ई३४डा । अंऽशुर्नशोचा२इः । चा३१उवा२३ । इ३४डा । चा इ । कित्वोअभिनोनया । ईन्द्रो । विदेतमू२स्तु ह्वायि । इडा । ईन्द्रो । विदेतमू२स्तु ह्वायि । अथा । ईन्द्रो । वि- देत मू२स्तु ह्वायि । इडा । ईशे ह्वि शक्रस्तमूतयेह्वा१मा३ह्वायि । जेतारमपरा३ । जायिताम् । सनःस्वर्षद्ता२३होयि । द्वायि षा३१उवा२३ । इट् इडा२३४५ । कातूः । क्रन्दक्रता२महान् । इडा२३४५ ॥ ए२ । इन्द्रं धनस्य सातयायि । ह्वामहे जेतार- मपरा२ । जितमा३१उवा२३ । ई३४डा । ए२ । सनःस्वर्षद- तिद्विषाः । सानःस्वर्षदता२ई । द्विष आ३१उवा२३ । ई३४डा । पूर्वस्य यत्त आ२ । द्रिव आ३१उवा२३ । ई३४डा । अंऽशुर्म- दाया२ । दा३१उवा२३ । ई३४डा । सू । म्न आधेह्विनोवसाउ । पूर्तीः । शविष्ठशा२स्यतायि । ईडा । पूर्तीः । शविष्ठशा२स्यतायि ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अथा । पूर्वीः । प्रविष्टभा२स्यतायि । इडा । वर्षीहि प्रक्रोनू-
नन्तंनव्य८सा१न्या३सायि । प्रभोजनस्यवा३ । चाहान् ।
समयेषु ब्रवा२३होयि । वाहा३१उवा२३ । इट् इडा२३४५ ।
भूरो । योगोषुगा२क्रतायि । इडा । साखा । सुभ्रेवो२हयूः ।
इडा२३४५ । आयिवा । हियेवा२३४५ । हो.य । हो ।
वाहा३१उवा२३ । ई३४डा । आयिवा । हि यम्ना२३४५यि ।
होयि । हो । वाहा३१उवा२३ । ई३४डा । आयिवा ।
हि इन्द्रा२३४५ । होयि । हो । वाहा३१उवा२३ । ई३४डा ।
आइवा । हि पूषा२३४५न् । होयि । हो । वाहा३१उवा२३ ।
ई३४डा । आयिवा । हिदेवा२३४५ः । होयि । हो ।
वाहा३१उवा२३ । इ३४डा ॥ १२ ॥ महादिवाकीर्त्यम् ।
हाउ ॥ ३ । आयुः । ३ । ज्योतिः । २ । ज्योता३४ ।
औहोवा । ए३ । वाग्ज्योती२३४५ः ॥ १३ ॥ एवाहियेवा२३४ ।
औहोवा । हा८हु८हा८हु८हु८३४ । औहोवा । ३ । हियेवा ।
हियेग्नाइ । हि इन्द्रा । हिपूषान् । हि देवा२३४५ः ॥ १४ ॥
वयोमनोवयः प्राणाः । वयश्चक्षुर्वयःश्रोत्राम् । वयोघोषोवयो-
व्रातान् । वयो२३भूताउ । वा३ । ई२३४५ ॥ १५ ॥
वयोमना२३ः । होइहोवाओ२३४वा । वयः प्राणा२३ः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



होइहौवाओ२३४वा । वयस्त्वू२३ः । होइहौवाओ२३४वा ।
वयःओचा२३म् । होइहौवाओ२३४वा । वयोघोषा२३ः ।
होइहौवाओ२३४वा । वयोव्रता२३म् । होइहौवाओ२३४वा ।
वयोभूता२३म् । होइहौवाओ२३४५वा६५६ । ऊ२३४५ ॥ १६ ॥
ऊऽ२र्क् । हाउ । ३ । होइवाक् । ३ । धर्मा२धर्मः ।
३ ॥ १७ ॥ धर्म्मविधर्म्म । ३ । सत्यंगाय । ३ । ऋतंवद । ३ ।
ऋ२ंवंव२०वंव२०वम् । ३ ॥ १८ ॥ औहोहोवाहोयि । २ ।
औहोहोवाहा३१उ । वा२३ । भू२३४वात् । विभ्राड्वृहत्पिब-
तुसोम्यंम । ध्वौहोहोवाहोयि । औहोहोवाहोइ । औहो-
होवाहा३१उ । वा२३ । जा२३४नात् । आयुर्दधद्यज्ञपताव-
विह्रुतं । औहोहोवाहोइ । २ । औहोहोवाहा३१उ । वा२३ ।
वा२३४ह्वात् । वातजूतोयोअभिरक्षतित्मना । औहोहोवाहो-
यि । २ । औहोहोवाहा३१उ । वा२३ । का२३४रात् ।
प्रजाःपिपर्त्तिबहुधाविराजति । औहोहोवाहोइ । २ ।
औहोहोवाहा३१उ । वा२ । ए । अभ्राजीज्योतिरभ्रा-
जी२३४५त ॥ १९ ॥ भूमिः । ३ । अन्तरिक्षं । ३ । द्यौः । २ ।
द्या३४ । औहोवा । ए३ । भूताया२३४५ ॥ २० ॥ द्यौः । ३ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



२ १ २ १र ३र २ ५र र २
अन्तरिक्षं । ३ । भूमिः । २ । भूमा३४ । औहोवा । ए३ ।
१र ३ १ १ १ १ २र १र ३र २
आयुषे२३४५ ॥ २१ ॥ हाउ३ । ज्योतिः । २ । ज्याता३४ ।
५र र ३ १ १ १ १ २र २र ३ ४र ५
औहोवा । ई२३४५ ॥ २२ ॥ हाउ३ । आज्यदोहम् । ३ ।
२१र २ १ २ ३ ४ ५ २र १र २ १ र
मूर्द्धानंदाइ । वा३अर । तिंपृथिव्याः । वैश्वानराम् । ऋतआ ।
२र ३ ४ ५ २ १ २ १ २ ३ ४र ५
जातमग्नीम् । कवीऽसम्रा । जा३मति । थिञ्जनानाम् ।
२र १ २ १ २ ३ ४र ५ २र २र ३ ४र ५
आसन्नप्या । चा३ञ्जन । यन्तदेवाः । हाउ३ । आज्यदोहम् । २ ।
२र ३ ४ ५ २र २र १ २ २र
आज्यदो५हाउ । वा । ए । आज्यदोहम् । २ । ए ।
र १ ३ १ १ १ १ २र २र १ २
आज्यदोहा२३४५म् ॥ २३ ॥ हाउ३ । हुम् चिदोहम् ।
२ १ २ २ १ २ २र १र २र
चिदोहम् । चिदोहम् । मूर्द्धानंदाइ । पूर्ववत् । हाउ३ ।
२र १ २ २ १ २ २ २ २ ३ १ १ १ १
हुम् चिदोहम् । चिदोहम् । चिदो३ । हाउ । वा३ । ई२३४५ ॥
२र १ २ २र १र २र १
हाउ३ । च्योहम् । ३ । मूर्द्धानं० पूर्ववत् । हाउ३ । च्यो० ।
१ २ २ २ २ १ १ २
च्यो३हाउ । वा३ । ए३ । ऋतम् ॥ २४ ॥ देवव्रतानि ॥ अधिप ।
१ १ २ १ १ २ १ १ २१ १ २
तायि । मिचप । ताइ । चचप । तायि । स्वः पतायि । धनप-
१ २ १ र २ १र र र २ १र २ १र २ १
ता२यि । ना२माः । मन्यना वृत्रहा सूयेण स्वराड्यज्ञेन मघ-
२र १ २र १र २१र र २र १ २र र २ १ र २१र
वा दक्षिणास्य प्रिया तनूराट् । विश्वं दाधार । वृषभस्त्वष्टा वृत्रेण
२ र १ २१र २ १ २ १र २ १र र २ र १
प्राचीपतिरग्निन गयः पृथिव्या स्तृणिकोग्निना विश्वं भूतम् ।
१ २ र १ र र २ १ २ र र १र र २ १र र र २
भ्यभवो वायुना विश्वाः प्रजा अभ्यपवथा वषट्कारेणाद्भाक्सोमेन
र १र २र र १र १र र २र र र २ १ २
सोमपाः समित्या परमेष्ठी । ये देवा देवाः । दिविषदः ।

For Private And Personal

स्थ तेभ्यो वो देवा देवेभ्यो नमः । ये० । अन्तरिक्षसदः ।
स्थते० । येदे० । पृथिवीषदः । स्थ० । येदे० । अप्सुषदः । स्थ० ।
येदे० । दिक्षुसदः । स्थते० । य० । आशासदः । स्थ
तेभ्यो वो देवा देवेभ्यो नमः । अवज्यामिव धन्वनो
विते मन्युन्नयामसि मृडतान्न इह अस्मभ्यम् ।
इडा२३भा । य इदं विश्वं भूतम् । युयो३ । आउ । वा२३ ।
ना२३४मा: ॥ २५ ॥ अधिप । तायि । मिचप । तायि ।
क्षचप । ताइ । स्वः पताइ । धनपता२इ । ना२मा: । नम
उत्तिभ्यश्चोत्तन्वानेभ्यश्च नमो नीषंगिभ्यश्चोपवीतिभ्यश्च न
मोस्यद्भ्यश्च प्रतिदधानेभ्यश्च नमः प्रविध्यद्भ्यश्च प्रव्याधिभ्यश्च
नमः त्सरद्भ्यश्च त्सारिभ्यश्च नमः स्रो । तेभ्यश्च स्रायिभ्यश्च
नमस्तिष्ठद्भ्यश्चोपतिष्ठद्भ्यश्च नमो यते च वियते च नमः पथे
च विपथाय च । अव ज्यामिव धन्वनो वि ते मन्युन्नयामसि
मृडतान्न इह अस्मभ्यम् । इडा२३भा । य इदं विश्वं भूतम् ।
युयो३ । आउ । वा२३ । ना२३४मा: ॥ २६ ॥ अधिप । तायि ।
मिचप । ताइ । क्षचप । ताइ । स्वःपताइ । धनपता२इ ।
ना२मा: । नमोन्नाय नमोन्नपतय एकाक्षाय चावपन्नादाय
च नमोनमः । रुद्राय तीरसदे नमः स्थिराय स्थिरधन्वने

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir
For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नमः प्रतिपदाय च परिरिणे च नमः स्त्रियंत्रकाय चक्र ।
र्पाहृने च नम आश्रायेभ्यश्च प्रत्याश्रायेभ्यश्च नमः कृत्य-
भ्यश्च विरिंफेभ्यश्च नमः संहृते च विहृते च। अवज्या० । इडा२३भा ।
यद्दं० । युयो३ । आउ । वा२३ । ना२३४मा: ॥ २७ ॥
पुरुषव्रतानुगानम् ॥ उहुवा हाउ । ३ । सहस्रशीर्षा: पुरू२३षा: ।
सहस्राक्ष: सहस्रा२३पात् । सभूमि२ सर्वतो वा२३त्त्वा । अत्य-
तिष्ठद्दशांगु२३लाम् । उहुवा हाउ२ । उहुवा३ हाउ । वा३ ।
इट् इडा२३४५ ॥ २८ ॥ उहुवै होवा२ । ३ । त्रिपादूर्ध्वउदै-
त्पुरू२३षा: । पादोस्येहाभवत्पु२३ना: । तथा विष्व२ वियक्रा२३-
मात् । अशनानशने आ२३भो । उहुवै होवा२ । २ । उहुवै ।
हो२ । वा२३४ । औहोवा । ई२३४डा । उहुवै होवा२ । २ ।
उहुवै । हो२ । वा२३४ । औहोवा । सू२३४वा: ।
उहुवै होवा२ । २ । उहुवै । हो२ । वा२३४ । औहोवा ।
ऊ२३४५ ॥ २९ ॥ हुयै होवा२ । ३ । पुरुषएवेद२ सा२३र्वम् ।
यद्भूतं यच्च भावा२३याम् । पादोस्य सर्वाभूता२३नी । त्रिपादस्या-
मृतंदा२३इवी । हुयै होवा२ । २ । हुयै । हो२ ।
वा२३४ । औहोवा । ई२३४डा । हुयै होवा२ । २ । हुयै ।
हो२ । वा२३४ । औहोवा । ज्यो२३४ती: । हुयै होवा२ । २ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



हुयै । होऽ२ । वा२३४ । औहोवा । ई२३४५ ॥ ३० ॥
हाउ३ । नावानस्य । महा२३यिमा३ । हाउ३ । ततो
ज्यायाꣳश्च पूरू२३षा३: । हाउ । ३ । उतामृतत्वस्येशा२३
ना३: । हाउ । ३ । यदन्नेनातिरोहा२३ती३ । हाऽउ३ । वा३
हुट् हुडा२३४५ ॥ ३१ ॥ हाऽउ३वा । ततो विराडजायत ।
हाऽउ३वा । विराजो अधिपूरुषः । हाऽउ३वा । सजातो अत्य-
रिच्यत । हाऽउ३वा । पश्चाद्भूमिमथोपुरः । हाऽउ३वा३ ।
ई२३४५ ॥ ३२ ॥ हाउ३ । अस्मीनस्मिन् । ३ । न्टम्याइ-
न्टम्याम् । ३ । निधाइमाहे । ३ । कयानश्चित्रा३आभू१वा२त् ।
ऊतीसदावृ३धाः सा१खा२ । कयाशचिष्ठा३यावा१त्ता२३ ।
हाउ३ । अस्मीनस्मिन् । ३ । न्टम्याइन्टम्याम् । ३ ।
निधाइमाहे । २ । निधा२३इ । मा२ । हा२३४औहोवा ।
सुवर्ज्योती२३४५: ॥ ३३ ॥ नवश्यावीयम् ॥ हाउ३ । ऊ२ । ३ ।
हुऊ२ । ३ । हुयाहाउ । २ । हुया३हाउ । वा३ ।
हुट् हुडा२३४५ ॥ ३४ ॥ हाऽउ३वा । अग्निरस्मिजन्मनाजात
वेदाः । हुडा । सुवः । हुडा । हाऽउ३वा । घृतं मे चक्षुरमृतंम आसन् ।
हुडा । सुवः । हुडा । हाऽउ३वा । त्रिधातुरर्कोरजसोविमानः ।
हुडा । सुवः । हुडा । हाऽउ३ । वा । अजस्रं ज्योतिर्हविरस्मिसर्वम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



हुडा । सुवः । हुडा ॥ ३५ ॥ हाउ३ । पात्यग्निर्विपो अग्रंपदंवेः ।
हा३१उवा२३ । सू२३४वाः । हुह । हा३१उवा२३ ।
ज्यो२३४तीः । हाउ३ । पातियह्वश्चरण॰सूरियास्या ।
हा३१उवा२३ । सू२३४वाः । हुह । हा३१उवा२३ ।
ज्यो॰३४तीः । हाउ३ । पातिनाभासप्तशीर्षाणमाग्निः ।
हा३१उवा२३ । सू२३४वाः । हुह । हा३१उवा२३ ।
ज्यो२३४तीः।हाउ३।पातिदेवानामुपमादमाष्वः।हा३१उवा२३।
सू२३४वाः । हुह । हा३१उवा२३ । ज्यो२३४तीः ॥ ३६ ॥
हुया२ । ३ । हुयाहाउ । ३ । हुन्द्रंनरो । ने३मधि ।
ताहवंताइ । हवंते३ । ह॰ह॰हा॰हा॰ह॰ । ३ । हवंते । ३ ।
यत्पारियाः । युनज । ताइधियस्ताः । धियस्ता३: । ह॰०३ ।
धियस्ताः । ३ । शूरोन्नृषा । ता३श्रव । सश्चकामाइ ।
चकामे३ । ह॰ह॰हा॰हा॰ह॰ । ३ । चकामे । ३ ।
आगोमताइ । व्रजेभ । जातुवन्नाः । तुवन्ना३ः । ह॰ह॰हा॰-
हा॰ह॰ । ३ । तुवन्नः । ३ । हुया२ । ३ । हुयाहाउ२ ।
हुया३हाउ । वा । ए । व्रतमेसुवरेशकुनः ॥ ३७ ॥ आजा
औहो होहाइ । त्यग्नेसमिधानादी१दिवा२: । जिह्वा औहो
होहायि । चरंत्यजारा१सानी२ । सत्वा औहो होहायि ।

१६

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नो अग्नेपयसावसू३वीत् । रयिंवर्चाहशौहो३ । हुम्मा२ ।
दा । औ३होवा । होपृइ । डा ॥ ३८ ॥ संत्वाभूतान्यैरयन् ।
होइ । संत्वाभव्यान्यैरयन् । होइ । संत्वाभविष्यदैरयत् ।
होइ । संत्वाभुवनमैरयत् । होइ । संत्वाभतमैरयत् । होइ ॥ १ ॥
उवी२उवि । उविहो२उवि । ३ । इती२इति । इतिहो२इति । ३ ।
असी२असि । असिहो२असि । ३ । अहृहचादिवंपृथिवीम् ।
असी२असि । असिहो२असि ॥ एवंचि: ॥ पतिर ।
स्यपामोषधीना३म् । औइ । पताइरा२३४सी । पतिर ।
स्यपामोषधीना३म् । औइ । पताइरा२३४सी । पतिर ।
स्यपामोषधीना३म् । औइ । पताइरा२३४सी । चाइ ।
चंदेवानामुदगादनीकम् । वापिश्वेषां देवाना२समिदजस्रंज्यो-
तिरातत२म् । होयि३ । आयुर्यन् । ३ । अव: । ३ । चक्षुर्मि-
त्रस्यवरुणस्याग्नेः । सुवः स२सर्पस२सार्पा । ३ । जनावन२सु-
वा२सुवः । जना२वना२म् । सुवा२सुवः । ३ । आप्राद्यावा-
पृथिवी आन्तरी२३क्षा३म् । सृपिप्रसृपएही । ३ । अस्तो-
घतस्वभानवाएही । विप्रानविष्टयामताएही । ग्रावाणोबर्हिषि-
प्रियाएही । इन्द्रस्य र२हियंहहादैही । इन्द्रा२ । स्वरा२ ।
ह्विया२म् । हृदिन्द्रस्यर२हियंहहादैही । इन्द्रा२ । ३ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सूर्यआत्माजगतस्तस्थुषा२३श्चा३ । अन्तश्चरतिरोचनाऐ-
ही । ३ । अस्यप्राणादपाननताऐही । ३ । व्यख्यन्महिषोदिवा-
मैही । ३ । प्रोणति प्रोणति । ३ । प्रो । णति । २ । प्रो२३ ।
णता३४औहोवा । ए३ । देवा दिवा ज्योती२३४५: ॥ २ ॥
उवी२ । ३ । हिगी२ । ३ । हिगिगि । ३ । आयंगौः
पृश्निरक्रमीदैही । ३ । असदन्मातरं पुरा ऐही । ३ । पितरं
च प्रयन्स्वाऐही । ३ । उवी२ । ३ । हिगी२ । ३ । हिगिगि । ३ ।
उवी । ३ । हिगी । ३ । हिगिगी । ३ ।
आयंगौःपृश्निरक्रमीदैही । असदन्मातरं पुरा ऐही । पितरं
चप्रयंत्स्वाऐही । उवी । ३ । हिगी । ३ । हिगिगी । ३ ॥ ३ ॥
हाउहाउहाउ । भ्राजा औवा । ३ । उदुत्यंजा । ३ । चित्रं
देवानामुदगादनी२३का३म् । हाउ२हाउ । भ्राजा औवा । ३ ।
तवेदसम् । ३ । चक्षुर्मित्रस्य वरुणास्य आ२३ग्ना३यि: ।
हाउ२हाउ । भ्राजाऔवा३ । देवं वहा । ३ । आप्राद्यावापृथिवी
आन्तरी२३क्षा३म् । हाउ२हाउ । भ्राजा औवा । ३ ।
तिकेतवः । ३ । सूर्य आत्माजगतस्तस्थुषा२३श्चा३ । हाउ२हाउ ।
भ्राजा औवा । ३ । दृशे विश्वा । ३ । सूर्य० । हाउ२हाउ ।
भ्राजा औवा । ३ । यसूर्यम् । २ । यसू२३रियाउ । वा३ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ए३ । देवाद्दिवाज्योती२३४५: ॥ ४ ॥ हाउ३ । सहो भ्राज । २ ।
सहो भ्राजा । पोभ्राजा । २ । पोभ्राज । अभ्राजीत् । ३ ।
व्यभ्राजीत् । ३ । अदिद्युतत् । ३ । अदिद्युतद्विश्वं भूतऽ सहो·
बृ२हात् । अदिद्युतद्भ्राट्प्रा२भ्राट् । अदिद्युतद्घर्मा अहृहृ२-
चात् । अदिद्युतद्घर्मंउषसो अरोचा२या: । हाउ३ ।
सहोभ्राज । २ । सहोभ्राजा । पोभ्राजा । २ । पोभ्राज ।
अभ्राजीत् । ३ । व्यभ्राजीत् । ३ । अदिद्युतत् । २ ।
अदिद्युता३त् । हाउवा । ए । अदिद्युतत् घर्मा अहृहृचदुषसां
दिवि सूर्या विभाती२३४५ ॥ ५ ॥ औहोऔहोवा । होयि । २ ।
औहोऔहोवा । हा३१उ । वा२३ । भू२३४वात् ।
अन्तश्चरतिरोचना । औहोऔहोवा । होयि । २ ।
औहोऔहोवा । हा३१उ । वा२३ । जा२३४नात् । अस्य
प्राणादपानती । औहो० । २ । औहो० । हा३१उ । वा२३ ॥
वा२३४द्वात् । व्यख्यन्महिषोदिवम् । औहो० । २ । औहो० ।
हा३१उ । वा२३ । का२३४रात् । औहो० । २ । औ० ।
हा३१उ । वा२३ । भ२३४ती: । औ० । २ । औहो० ।
हा३१उ । वा२ । अभ्राजीज्योतिरभ्राजीत् । औहोऔहोवा ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



होयि । २ । औहोऔहोवा । हाइ१उ । वा२३ । ए३ ।
सर्वान्कामानश्नीमही२३४५ ॥ ६ ॥ हाउ३वा । इन्द्रः ।
आजाओवा । ३ । आयंगैाः पृश्निरक्रमीदैही । हाउ३वा ।
इडा । आजाऔवा । ३ । असदन्मातरं पुराऐही । हाउ३वा ।
सात्यम् । आजाओवा । ३ । पितरं च प्रयंत्स्वाऐही । हाउ३वा ।
दीर्घा: ॥ ७ ॥ हाउ३वा । भूतम् । आजा ओवा । ३ ।
अन्तश्चरति रोचनाऐही । हाउ३वा । पृथिवी । आजा ओवा । ३ ।
अस्य प्राणादपानताऐही । हाउ३वा । साहः । आजा ओवा । ३ ।
व्यख्यन्महिषोदिवामैही । हाउ३वा तेजः ॥ ८ ॥ हाउ३वा ।
आपः । आजा ओवा । ३ । त्रिंशद्धामविराजताऐही ।
हाउ३वा । ऊषा । आजा ओवा । ३ । वाक्पतंगायधीयताऐही ।
हाउ३वा । दीप्तः । आजा ओवा । ३ । प्रतिवस्तोरहद्युभाऐही ।
हाउ३वा । ज्योतिः ॥ ९ ॥ उद्यं लोकानरोचयः । होयि ।
इमां लोकानरोचयः । होयि । प्रजा भूतमरोचयः । होयि ।
विश्वं भूतमरोचयः । हो२हा२३४औहोवा । घर्मोज्यो-
ती२३४५: ॥ १० ॥ हाउ२हाउ । आजाओवा । ३ ।
दिदीहिविश्वतस्पृथुः । उदुत्यं जाता३वायिदा१सा२म् । देवं
वहन्ती३कायिता१वा२: । दृशे विश्वाया३सूरा१या२म् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अपत्यतायाऽवोयाऽथाऽ । नक्षत्रायन्तीऽयाक्तूऽभाऽयिः ।
सूरायविश्वाऽचाक्षाऽसाऽयि । अदृश्रन्नस्याऽकायिताऽवाऽः ।
विरश्मयोजाऽनाऽ२आऽनूऽ । भ्राजन्तोअग्नाऽयोयाऽथाऽ३ ।
हाउऽहाउ । भ्राजा ओवाऽ । भ्राजाऽओऽवाऽ५ ६ ।
ई२३४५ ॥ ११ ॥ हाउऽहाउ । शुक्राओवा । ३ ।
दिदीह्विविश्वतस्पृथुः । उदुत्यं जाताऽवायिदाऽमाऽम् । देवं
वहन्तीऽकायिताऽवाऽः । दृशे विश्वायाऽसूराऽयाऽम् । अपत्ये
तायाऽवोयाऽथाऽ । नक्षत्रायन्तीऽयाक्तूऽभाऽयिः । सूरायवि-
श्वाऽचाक्षाऽसाऽयि । अदृश्रन्नस्याऽकायिताऽवाऽः । विर-
श्मयोजाऽनाऽ२आऽनूऽ । भ्राजन्तोअग्नाऽयोयाऽथाऽ३ । हाउऽ-
हाउ । शुक्राओवा । २ । शुक्राऽओऽवाऽ५ ६ । ई२३४५ ॥ १२ ॥
हाउऽहाउ । भ्ना ओवा । ३ । दिदीह्वि विश्वतस्पृथुः ।
तरणिर्विश्वाऽदाशाऽताऽः । ज्योतिष्कृदसीऽसूराऽयाऽ ।
विश्वमाभासीऽरोचाऽनाऽम् । प्रत्यङ्देवाऽनां वाऽयिशाऽः ।
प्रत्यङुदेषीऽमानूऽषाऽन् । प्रत्यङ्विश्व२सूऽवाहेऽशाऽयि ।
येनापावकाऽचाक्षाऽसाऽ । भुरण्यन्तंजाऽनाऽ२आऽनूऽ ।
त्वं वरुणाऽपाश्याऽसाऽ३यि । हाउऽहाउ । भ्ना ओवा । २ ।
भूनाऽओऽवाऽ५ ६ । ई२३४५ ॥ १३ ॥ हाउऽहाउ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तेजा ओवा । ३ । दिदीहि विश्वतस्पृथुः । तरणिर्विश्वा३दर्शा१-
ता२ः । ज्योतिष्कृ० । विश्वमा० । प्रत्यङ्दे० । प्रत्यङ्दे० । प्रत्यङ्वि-
श्व० । येना पावका० । भुरण्यन्तं० । त्वं वरुणा३पश्या१सा२३यि ।
हाउ२हाउ । तेजा ओवा२ । तेजा३ओ५वा६५६ । ई२३४५ ॥ १४ ॥
हाउ२हाउ । सत्याओवा । ३ । दिदी० । उद्यामेषिरा३जाः
पा१थू२ । अहामिमानो३आक्तु१भा२यिः । पश्यञ्जन्मानी३-
सूरा१या२ । अयुक्तसप्ता३शुन्ध्यु१वा२ः । सूरोरथस्या३नप्त्या१-
या२ः । ताभिर्यातिस्वा३युक्ता१यिभी२ः । सप्तत्वा हरी३तोरा१-
था२यि । वहन्तिदेवा३सूरा१या२ । शोचिष्केशंवी३चाक्षा१-
णा२३ । हाउ२हाउ । सत्या ओवा । २ । सत्या३ओ५वा६५६ ।
ई२३४५ ॥ १५ ॥ हाउ२हाउ । ऋता ओवा । ३ । दिदीहि
विश्वतस्पृथुः । उद्यामेषिरा३जाःपा१थू२ । अहामि० । पश्यं० ।
अयु० । सूरा० । ताभिया० । सप्त० । वहन्ति० ।
शोचिष्केशंवी३चाक्षा१णा२३ । हाउ२हाउ । ऋता ओवा । २ ।
ऋता३ओ५वा६५६ । ई२३४५ ॥ १६ ॥ वाक् मनःप्राणः प्राणो-
पानौ व्यानश्चक्षुःश्रोत्रं२शर्म्मवर्म्मभूतिप्रतिष्ठा । आदित्यः पिच्य-
म । ३ । आयुः पिच्यम् ॥ १७ ॥ अन्तर्ष्वेषू३रोचा१सा२यि । ३ ।
अन्तश्चरती३रो वा१ना२ । अस्य प्राणादा३पाना१ता२यि ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



व्यख्यन्मही३षोदा१यिवा२म् । अन्तर्ह्वे-वेषू३रोचा१सा२यि । २ ।
अन्तर्ह्वे-वेषू३रो२३ । चा२ । सा२३४ । ओ होवा । ए३ ।
देवादिवाज्योती२३४५ः ॥ १८ ॥ हाउ३ । भ्राजाभ्राज । ३ ।
आयूरायुः । ३ । उदुत्यंजा । ३ । तवेदसम् । ३ । चित्रं
देवानामुदगादनी२३का३म् । हाउ३ । भ्राजाभ्राज । ३ ।
आयूरायुः । ३ । देवं वहा । ३ । चक्षुर्मित्रस्य वरुणास्य
आ२३ग्ना३यिः । हाउ३ । भ्राजाभ्राज । ३ । आयूरायुः । ३ ।
तिकेतवः । ३ । आप्राद्यावापृथिवी आन्तरी२३क्षा३म् । हाउ३
भ्राजाभ्राज । ३ । आयूरायुः । ३ । दृशेविश्वा । ३ ।
सूर्यआत्मा जगतस्तास्थुषा२३श्चा३ । हाउ३ । भ्राजाभ्राज । ३ ।
आयूरायुः । ३ । यसूर्य्यम् । २ । यसू२३रियाउ । वा३ ।
ए३ । देवादिवाज्योती२३४५ः ॥ १९ ॥ हाउ२हाउ ।
भ्राजा ओवा । ३ । उदुत्यंजा । ३ । हाउ३वा । आर्चिः ।
इन्द्रन्नरोनेमधिताहवा२३न्ता३यि । हाउ२हाउ । भ्राजा
ओवा । ३ । तवे२सम् । ३ । हाउ३वा । शोचिः । हाउ२हाउ ।
भ्राजा ओवा । ३ । देवं वहा । ३ । हाउ३वा । तापः ।
यत्पार्य्ययुनजतायिधिया२३स्ता३ः । हाउ२हाउ । भ्राजा
ओवा । तिकेतवः । ३ । हाउ३वा । हारः । हाउ२हाउ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



३र २र ३र र २र र २ऽ १ २
भ्राजा ओ३ा । ३ । हस्रोविश्वा । ३ । हाउ३वा । साहः ।
१र र र र ० २ २र र^ ३र २र
सूरोन्दषातास्रवसास्वका२३मा३यि । हाउ२हाउ । भ्राजा
३र र २र २ऽ १ २ २र र^
ओवा । ३ । यसूर्य्यम् । ३ । हाउ३वा । नार: । हाउ२हाउ ।
३र २र ३र र २र र २ऽ
भ्राजा ओवा । ३ । हस्रोविश्वा३ । हाउ३वा । भा२: ।
१र र र ० २ २र र^ ३र २र
आगोमतिव्रजेभजातुवा२३न्ना३: । हाउ२हाउ । भ्राजा
३र र २र २ऽ ^ ३ १ १ १ १
ओवा । ३ । यसूर्य्यम् । ३ । हाउ३वा३ । ई२३४५ ॥ २० ॥
इतिमाध्याह्निकप्रयोगः ॥

अथ ब्रह्मयज्ञप्रयोगः । ब्रह्मयज्ञो नाम ब्रह्मणो वेदस्य यज्ञो जपः, स च तर्प्पणादर्वाक् प्रातराहुतेः पश्चाद्वा वैश्वदेवान्ते वा कर्त्तव्यः । "उक्तं चैतत्'कर्मप्रदीपे'-यश्च श्रुतिजपश्चोक्तो ब्रह्मयज्ञः स चोच्यते। स चार्वाक् तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः । वैश्वदेवावसाने वा नान्यत्रार्त्तौ निमित्तकात्" ॥ १ ॥ अथ ग्रामाद्वहिर्नद्यादौ गत्वा पदौ हस्तौ च प्रक्षाल्य, द्विराचम्य, प्रागग्रेषूदगग्रेषु वा दर्भेषु प्राङ्मुख आसीनः पवित्रपाणिर्देशकालौ सङ्कीर्त्त्य, परमेश्वरप्रीत्यर्थं ब्रह्मयज्ञेन यक्ष्ये इति सङ्कल्प्य जान्वोरुपरि प्रसृताङ्गुलिकौ गोकर्णाकृतिबद्धहस्तौ संस्थाप्य शिरःकम्पनादिकमकुर्वन् ऋषिच्छन्दोदैवतब्राह्मणानि स्मृत्वा, प्रणवव्याहृतीश्चोच्चार्य्य, गायत्रीं पादंपादमर्द्धर्चशः समग्रां च पठित्वा, सामपठनसमये दक्षिणहस्ताङ्गुलिमध्यपर्वसु अङ्गुष्ठेन स्वरानारोपयन्,दीर्घाक्षरं सव्यहस्ताङ्गुलिना प्रदर्शयन्, सामसु यवान्तरमृतुतिलान्तरं कुर्वन्, हस्ताग्रदृष्टिर्मध्यमस्वरेण

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रथमदिने यथाशक्ति वेदादिमारभ्य किञ्चित्पठित्वा, पुनः प्रणवं व्याहृतीः पूर्ववत्सावित्रीं चिः पठित्वा, नमो ब्रह्मण इति त्रिवारं पठित्वा समापयेत् । एवं विधिना वेदजपो ब्रह्मयज्ञः । एते च नियमा नारदशिक्षायां द्रष्टव्याः । द्वितीयदिने ब्रह्मयज्ञे प्रथमदिनपठितवेदभागोपरितनग्रन्थमारभ्य पाठः । वेदसमाप्तौ पुनर्वेदादिमारभ्य पाठः । इति ब्रह्मयज्ञप्रयोगः ॥

अथ महायज्ञप्रयोगाः ॥ ते च पञ्च—ब्रह्मयज्ञः, पितृयज्ञो, देवयज्ञो, भूतयज्ञो, मनुष्ययज्ञश्चेति । ब्रह्मयज्ञस्तूक्तः । पितृयज्ञोनाम तर्पणं श्राद्धं वा, पित्र्योबलिर्वा । भूतेभ्यो बलिर्भूतयज्ञः । अतिथिपूजनं मनुष्ययज्ञः । स्पष्टमेतत्'कर्मप्रदीपे' । प्रायशो वैश्वदेवे दैविको होमो देवयज्ञः, भूतेभ्यो बलिहरणं, पैतृको बलिश्चास्त्येव । अतो वैश्वदेवप्रयोगो गोभिलानुसारेणोच्यते । मध्यान्हे पत्न्या अन्यथा वा पाके कृते दर्भेषासीनः प्राङ्मुखो गृहपतिर्देशकालौ सङ्कीर्त्य पञ्चसूनाघनिर्हरणद्वाराऽऽत्मसंस्कारार्थं प्रातर्वैश्वदेवं करिष्ये इति सङ्कल्प्य लौकिकाग्निश्चेद्विधिवत्स्थण्डिले प्रतिष्ठापयेत् । गृह्याग्निश्चेन्न संस्कारः । ततः शुचिभूतां पत्नीमन्यां वा भूतमिति वाचयित्वा, तदन्नं समिद्द्वयं चमसं चाग्नेः पश्चात् संस्थाप्य, गृहपतिरोमित्युच्चैरुच्चार्य्य, तस्मै नमस्तन्माख्या इत्युपांशु प्रातजपति । ततोऽग्निमुपसमाधाय, तूष्णीं परिसमूह्योदकाञ्जलिचयसेचनं पर्य्युक्षणं च कृत्वा, समिधमाधायान्नं प्रोक्ष्य हविष्यैर्व्यञ्जनैरुपसिच्य, प्रजापतये स्वाहेति मनसोच्चार्य मध्ये जुहोति । प्रजापतय इदं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



न मम । अग्नये स्विष्टकृते स्वाहा । अग्नये स्विष्टकृत इदं न मम । ततस्तूष्णीं समिधमाधाय पर्य्युक्षणादि चमसपूरणान्तं कर्म्म क्षिप्रहोमविधिना कुर्य्यात् । ततो हुतशेषेणाग्नेः पश्चाद्भागे बलिहरणं कुर्य्यात् । पश्चिमभागे प्रागपवर्गमपो निनीय, बलिचतुष्टयपर्य्याप्तमन्नं सकृदेव गृहीत्वा, प्रागपवर्गांश्चतुरो बलीन्निदध्यात् । यथा । पृथिव्यै नमः । पृथिव्या इदं न मम । वायवे नमः । वायव इदं न मम । विश्वेभ्यो देवेभ्यो नमः । विश्वेभ्यो देवेभ्य इदं न मम । प्रजापतये नमः । प्रजापतय इदं न मम । चतुर्षु पुनः पूर्ववज्जलप्रक्षेपः । ततः पूर्ववत्स्थापितबलिचतुष्टयस्योत्तरत अपो निनीय, पूर्ववदन्नमादाय, अद्भ्यो नमः । अद्भ्य इदं न मम । ओषधिवनस्पतिभ्यो नमः । ओषधिवनस्पतिभ्य इदं न मम । आकाशाय नमः । आकाशायेदं न मम । कामाय नमः । कामायेदं न मम । इति बलिचतुष्टयं दत्वा पूर्ववदुपरि जलं प्रक्षिपेत् । ततस्तेषामुत्तरत अपो निनीय, पूर्ववदन्नमादाय, मन्यवे नमः । मन्यव इदं न मम । इन्द्राय नमः । इन्द्रायेदं न मम । वासुकये नमः । वासुकय इदं न मम । ब्रह्मणे नमः । ब्रह्मण इदं न मम । इति बलिचतुष्टयं दत्वा तदुपरि पूर्ववज्जलं प्रक्षिपेत् । तेषामुत्तरत अपो निनीय रक्षोजनेभ्यो नम इति बलिं दत्वा पूर्ववज्जलं क्षिपेत् ॥ रक्षोजनेभ्य इदं न मम । अप उपस्पृश्य पूर्ववत्सर्वबलीनां दक्षिणतः पितृतीर्थेनापो निनीय, बलिशेषमुदकेनाप्लाव्य, प्राचीनावीती पातितवामजानुः पितृतीर्थेन पितृभ्यः स्वधेति बलिं दद्यात् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पितृभ्य इदं न मम । तदुपरिजलं निक्षिप्याप उपस्पृश्य कृताञ्जलिपुटोऽग्निं प्रार्थयेत् । आरोग्यमायुरैश्वर्यं धीर्धृतिः शं बलं यशः । ओजो वर्चः पशून्वीर्यं ब्रह्म ब्राह्मण्यमेव च ॥ सौभाग्यं कर्मसिद्धिञ्च कुलज्यैष्ठ्यं सुकर्तृताम् । सर्वमेतत्सर्वसाक्षिन्द्रविणोद रिरीहि नः ॥ ततो वामदेव्यगानम् ॥ इति वैश्वदेवबलिहरणप्रयोगः ।

अथानाहिताग्निश्चेद्गृह्यतिभिर्गौतमोक्ताग्न्यादिभिर्मन्त्रैः शाकलमन्त्रैश्च वैश्वदेवं कुर्य्यात् । प्राङ्मुखो देशकालौ सङ्कीर्त्त्य, पूर्ववत्सङ्कल्प्य, पञ्च भूसंस्कारान्कृत्वा, तत्र पचनाग्निं यथाविधि संस्थाप्य, चिरुदकाञ्जलिसेचनं पर्य्युक्षणं समिदाधानं च कृत्वा ऽन्नमभ्युक्ष्य जुहुयात् । भूः स्वाहा । अग्नय इदं न मम । भुवः स्वाहा । वायव इदं न मम । स्वः स्वाहा । सूर्यायेदं न मम । अग्नये स्वाहा । अग्नय इदं न मम । धन्वन्तरये स्वाहा । धन्वन्तरय इदं न मम । विश्वेभ्यो देवेभ्यः स्वाहा । विश्वेभ्यो देवेभ्य इदं न मम । प्रजापतये स्वाहा । प्रजापतय इदं न मम । अग्नये स्विष्टकृते स्वाहा । अग्नये स्विष्टकृत इदं न मम । देवकृतस्यैनसोऽवयजनमसि । नात्र स्वाहाकारः । सर्वत्राग्नय इदं न ममेति त्यागः । पितृकृतस्यैनसोऽवयजनमसि । मनुष्यकृतस्यैनसोऽवयजनमसि । अस्मत्कृतस्यैनसोऽवयजनमसि । यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि । यत्स्वपन्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि । यद्विद्वांसश्चाविद्वांसश्चैनश्चकृम तस्यावयजनमसि । एनस

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



एनसोऽवयजनमसि । इति हुत्वा तूष्णीं समिदाधानादि कृत्वा, साग्निकवत् गृह्योक्तबलिहरणं कृत्वा, वामदेव्यं गायेत् ॥ इति निरग्निकवैश्वदेवबलिहरणप्रयोगः ॥

अथ पितृयज्ञस्थानीयनित्यश्राद्धप्रयोगः ॥ "तदुक्तं 'कर्मप्रदीपे'—अप्येकमाशयेद्विप्रं पितृयज्ञार्थसिद्धये । अदैवं नास्तिचेदन्यो भोक्ता भोज्यमथापि वा । तस्य प्रयोगः । आचान्तः प्राणानायम्य प्राङ्मुखो देशकालौ सङ्कीर्त्त्य प्राचीनावीती गोत्राणां पितृपितामहप्रपितामहानां शर्म्मणां, गोत्राणां मातुः पितृपितामहप्रपितामहानां शर्म्मणां च तृप्त्यर्थं पितृयज्ञभूतनित्यश्राद्धं करिष्ये इतिसङ्कल्प्योदङ्मुखमेकं ब्राह्मणं बहून्वोपवेश्य एकब्राह्मणपक्षे वर्गद्वयपितृभ्यो नम इत्यर्चयेत् । ततो वर्गद्वयपितर इदं पाद्यम्, अथवा तत्तन्नाम्ना वा पाद्यं दद्यात् । तत आचान्तानुपवेशयेत् । यथा वर्गद्वयपितृभ्य इदमासनं स्वधा । अथवा चतुर्थ्यन्तं तत्तन्नामोच्चारणं कृत्वा, पित्र इदमासनं स्वधा । एवं गन्धाद्युपचारान्दत्वा, भोजनपात्रमास्तीर्य्यान्नादिपरिवेषणं कृत्वा मासश्राद्धवत्परिषिच्य, भोजनपात्रमालभ्यान्नसङ्कल्पं कुर्य्यात् । एतदन्तं नित्यश्राद्धं नोद्धम् । इति पितृयज्ञस्थानीयनित्यश्राद्धप्रयोगः ॥

अथ मनुष्ययज्ञप्रयोगः । "तत्र 'मनुः'—भिक्षामप्युदपात्रं वा सत्कृत्य विधिपूर्वकम् । वेदतत्त्वार्थविदुषे ब्राह्मणायोपपादयेत् ॥ एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः । अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥ नैकग्रामीणमतिथिं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



विप्रं साङ्गनिकं तथा । उपस्थितं गृहे विद्याद्भार्य्या यत्रागतोऽपि वा ॥ न वार्य्यपि प्रयच्छेत्तु बैडालव्रतिके द्विजे । न बकव्रतिके विप्रे नावेदविदि धर्मवित् ॥ त्रिष्वप्येतेषु दत्तं हि विधिनाऽप्यर्ज्जितं धनम् । दातुर्भवत्यनर्थाय परत्रादातुरेव च ॥ धर्म्मध्वजी सदा लुब्धश्छाद्मिको लोकदम्भिकः । बैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः ॥ अधोदृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः । शठो मिथ्या विनीतश्च बकव्रतचरो द्विजः" इति ॥ मनुष्ययज्ञं करिष्ये इति सङ्कल्प्य यथोक्तानतिथीन्सम्पूज्यान्नपरिवेषणं कृत्वा अन्नसङ्कल्पं कुर्य्यात् । यथा। इदमन्नाद्यातृप्तेर्दत्तं दास्यमानं च सनकादिमनुष्येभ्यो हन्तेति जलमुत्सृजेत् ॥ इति मनुष्ययज्ञः ॥ नित्यश्राद्धकरणासमर्थस्य तर्पणेन वैश्वदेवबलिहरणान्तर्गतपितृबलिहरणेन वा पितृयज्ञसिद्धिः । उक्तविधिना मनुष्ययज्ञकरणासमर्थश्चेन्निवीती किञ्चिदन्नमुद्धृत्य मनुष्येभ्यो हन्तेत्यन्नमुत्सृजेत् । अथान्यत्रोक्तं गोश्ववायसबल्यादिकं दद्यात् ॥

अथ भोजनप्रयोगः । पाणी पादौ मुखञ्च प्रक्षाल्याचम्य प्राङ्मुखोऽन्नानि भुञ्जीत । गोमयाद्युपलिप्ते शुचौ देशे भोजनपात्रं संस्थाप्यान्नपरिवेषणे जाते गायत्र्याऽन्नं प्रोक्ष्य सत्यं त्वर्त्तेन परिषिञ्चामीति प्रातः । ऋतं त्वा सत्येन परिषिञ्चामीति सायं परिषिञ्चेत । ततो ऽमृतोपस्तरणमसीति जलं पीत्वा प्राणाहुतीः कुर्यात् । अङ्गुष्ठतर्ज्जनीमध्यमाभिरन्नं मुखे जुहुयात् । प्राणाय स्वाहा । अङ्गुष्ठमध्यमानामिकाभिः, व्यानाय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



स्वाहा । अङ्गुष्ठानामिकाकनिष्ठिकाभिः, अपानाय स्वाहा । सर्वाभिः, समानाय स्वाहा । तर्जनीं विना अन्याभिः, उदानाय स्वाहा ॥ ततो वाग्यतो यथासुखमन्नमश्नीयात् । ततोऽमृतापिधानमसि इत्यपः पीत्वाऽवशिष्टजलं पितृतीर्थेन भूमौ दद्यात् । ततो मृज्जलाभ्यां मुखहस्तपादक्षालनं कृत्वा द्विराचम्य, प्राणानां ग्रन्थिरसि रुद्रो माविशान्तकः । तेनान्नेनाप्यायस्व ॥ इति हृदयं स्पृष्ट्वा परमात्मानं ध्यायेत् । इति भोजनप्रयोगः ॥

ततो यथासम्भवं श्रुतिस्मृतिपुराणादिकं पठेत्पाठयेच्छृणुयाद्वा धनार्जनोपायं वा कुर्यात् । ततो ऽधिवृत्तसूर्ये गृह्याग्नेः प्रादुष्करणं कृत्वा अर्द्धास्तसमये सायंसन्ध्यां कुर्यात् । सा च प्रातःसन्ध्यावदनुष्ठेया । तत्र विशेषो विधीयते आचमने । अग्निश्चमेतिनारायण ऋषिः प्रकृतिश्छन्दोऽग्निर्देवताऽऽचमने विनियोगः । अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुम्पतु यत्किञ्च दुरितं मयि इदमहं मामममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा ॥ सायमासीनः सूर्याभिमुखो गायत्र्या त्रिरर्घ्यं दद्यात् । नासाग्रसमौ करौ कृत्वाऽऽसीनः नक्षत्रोदयपर्यन्तं गायत्रीं जपेत् इति विशेषः ॥ इति सायंसन्ध्याप्रयोगः ॥

अथ सायमौपासनहोमप्रयोगः । स च प्रातरौपासनहोमवत्कर्तव्यः । तत्र विशेषः । अग्नये स्वाहेति पूर्वाहुतिः । प्रजापतये स्वाहेत्युत्तराहुतिः ॥ सायंवैश्वदेवं प्रातर्वैश्वदेववत् । सन्ध्या-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



त्रये ऽप्युक्तकालातिक्रमे एकं प्राणायामं कृत्वा सव्याहृतिकया गायत्र्या एकमर्घ्यं दद्यात् । तत्र सङ्कल्पः । सन्ध्याकालातिक्रमप्रायश्चित्तार्थं प्राणायामपूर्वकमर्घ्यदानं करिष्ये । यजमानप्रवासे रोगादिना पीडिते यजमाने च ब्राह्मणद्वारा होमा बलयश्च कर्तव्याः । दम्पत्योर्भोजनं वैश्वदेवबलिहरणं विना तावदयुक्तम् । यदि स्त्री बाला रोगिणी गर्भिणी वा स्यात्तदा वैश्वदेवात्पूर्वं भोजनं न दोषावहम् । एवं बालवृद्धातुराणामपि पूर्वं भोजनम् । एवं सायंप्रातर्वैश्वदेवबलिहरणं यावज्जीवं कर्तव्यम् । स्त्री च सायं बलीन्हरेत्प्रातः पुमान् । उपवासदिनेऽपि तथा, पुरुषसंस्कारकत्वात् । अन्नसंस्कारस्त्ववान्तरफलम् । विवाहे औपासनानन्तरं वैश्वदेवारम्भः । कालान्तरे चेत्तदा प्रायश्चित्तपूर्वकं वैश्वदेवारम्भः । सर्वार्थं पक्वस्य, अथवा पित्रर्थं पक्वस्य, अथवा ब्राह्मणभोजनार्थं पक्वस्य वा ऽन्नमादाय वैश्वदेवबलिहरणं कृत्वा सर्वान् ब्राह्मणान् भोजयेत् । स्वयञ्च भुञ्जीत । श्राद्धे चाग्नौकरणान्ते, अथवा विकिरान्ते, अथवा पिण्डदानान्ते, वैश्वदेवबलिहरणं कुर्यात् । अग्निष्टोमादियज्ञे यजमानस्य वैश्वदेवनिवृत्तिः । एकस्मिन्काले व्रीहियवानां धान्यानां पाके एकस्मात् पाकात् गृहीत्वा सकृदेव बलिहरणम् । वैश्वदेवबलिहरणानन्तरं बहुब्राह्मणभोजनार्थं पुनः पाके वैश्वदेवबलिहरणं न । एकपाकोपजीविनां भ्रातृपुत्रादीनां भोजनार्थं बहुषु महानसेषु पाके जाते गृहपतिपाकादेव वैश्वदेवबलिहरणं कुर्यात् । प्रत्यभावे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मध्याह्ने समस्य कुर्यात् । आश्वलायनगृह्यपरिशिष्टे तथोक्तत्वात् । इति सायमौपासनवैश्वदेवादिप्रयोगः ॥

सूतके मृतके चामन्त्रकं स्नानं, मनसा सन्ध्योपासनमर्घ्यप्रदानं दशवारं गायत्रीजपं च कुर्यात् । औपासनं ब्राह्मणद्वारा कर्तव्यम् । अन्येषां स्मार्तकर्मणां त्यागः । "सूतके कर्मणां त्यागः सन्ध्यादीनां विधीयते" इति कर्मप्रदीपवचनं तु वाचिकसन्ध्यानिषेधपरं ज्ञेयम् । "अहोरात्रस्य संयोगे सन्ध्यामुपास्ते" इति छन्दोगषड्विंशब्राह्मणे चोदितत्वात् । अग्निहोत्रवत्छ्रौतत्वान्न सन्ध्यायास्त्यागः । "तथा च 'पुलस्त्य':—सन्ध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत् । न त्यजेत्सूतके वाऽपि त्यजन् गच्छत्यधो द्विजः । सूतके मृतके चैव सन्ध्याकर्म न सन्त्यजेत् । मनसोच्चारयेन्मन्त्रान्प्राणायाममृते द्विजः" ॥ प्रसङ्गात्किंचित्सूतकमुच्यते । "तत्र 'पराशर':—तावत्तत्सूतकं गोत्रे चतुर्थपुरुषेण तु । दायाद्विच्छेदमाप्नोति पञ्चमो वाऽऽत्मवंशजः ॥ चतुर्थे दशरात्रं स्यात् षण्निशः पुंसि पञ्चमे । षष्ठे चतुरहाच्छुद्धिः सप्तमे तु दिनत्रयम् ॥ भृग्वग्निमरणे चैव देशान्तरमृतेऽथ वा । बालप्रेते च संन्यस्ते सद्यःशौचं विधीयते" ॥ अग्निहोत्रस्य न त्यागः । "श्रौते कर्मणि नाशुचिः" इति श्रुतिः ॥ स्मृतिश्च—"शिल्पिनः कारवो वैद्या दास्यो दासास्तथैव च । राजानः श्रोत्रियाश्चैव सद्यः शौचं प्रकीर्तितम् ॥ सव्रतः शस्त्रपूतश्च आहिताग्निश्च यो द्विजः । राज्ञश्च सूतकं नास्ति यस्य चेच्छति पार्थिवः ॥ ४ ॥ इति सूतकविचारः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



इति श्रीमद्राजाधिराजश्रौतस्मार्त्तानुष्ठानतत्परोदयप्रतापाद्यादत्तदेववर्म्मसोमयाजिनो निदेशेन सुब्रह्मण्यविदुषा विरचितोऽयं नित्याह्निकप्रयोगः समाप्तः ॥

For Private And Personal

# अथ नित्याह्निकप्रयोगशुद्धिपत्रम् ।

| अशुद्धम् | शुद्धम् | पृष्ठे | पं० |
|---|---|---|---|
| पुराचामेत् | पुनराचामेत् | ३ | २ |
| मन्त्र | मन्त्रै | ४ | २ |
| प्राणावायुं | प्राणावायुं | ६ | १८ |
| २ ३ सूर्यम् | १२ सूर्यम् | ८ | ७ |
| १२ ३ वरुणस्या | १२ ३ वरुणस्या | ० | ८ |
| ३ पृथ्वी | ३ १ पृथ्वी | ११ | ७ |
| २ ३ २ मधुदुघे | २ ३ १२ मधुदुघे | ० | ८ |
| ३ २ ३ स्वधर्मणा | ३ १ २ ३ स्वधर्मणा | ० | ८ |
| ३ २ २ स्वस्तये | ३ १२ स्वस्तये | १४ | ६ |
| इन्द्रश्शुद्धो | इन्द्रशुद्धो | ० | १६ |
| सोम्यः | सोम्य | ० | १८ |
| ३ २— प्रभु | ३ १ प्रभु | १५ | ५ |
| ३ स्पदे | ३ १ स्पदे | ० | ७ |
| ३ १ २ तितेजसा | ३ १ २ तितेजसा | ० | ८ |
| २ विहूतं | २ विहूतं | १७ | ४ |
| २र ३र हाश्रोवा | २र ३१र हाश्रोवा | २२ | ११ |
| नौहाउ | नौहाउ | २३ | ४ |
| र शुद्धे | २ शुद्धे | २३ | १२ |
| १ होइ | १ होइ | २४ | १० |
| महानाम्नः | महानाम्न्यः | २५ | १२ |
| २ १ छन्दश्च | २ १ छन्दश्च | २६ | १३ |
| हियेग्ना | हियग्ना | २७ | १५ |
| १र वयःश्री | २ १र वयःश्री | २८ | २ |
| कवी७ | कवि७ | २९ | ५ |
| २र हुम् | २ हुम् | ० | ८-१० |
| मन्यना | मन्युना | ० | १४ |
| सूयणा | सूर्यणा | ० | ० |
| २ १ प्रजा | २१र प्रजा | ० | १७ |
| १र र दे वा | र र देवा | ३० | १ |
| १र र दे वा | र र दे वा | ० | ४ |
| ३ इडा | १ इडा | ० | ६ |
| नीषंगि | निषंगि | ० | ९ |
| १ चविप | २ १: चविप | ० | १३ |
| १ २ धनप | १ २ धनप | ० | १६ |
| १ इडा | १ इडा | ३१ | ३ |
| १ १ मतं | २ १ मतं | ० | १९ |
| २ ह७ | १ ह७ | ३३ | १४ |
| दीर्घा | दीर्घाः | ३७ | ६ |
| वातेजः | वा । त्वेजः | ० | ९ |
| र र मिमानो | र र मिमानो | ३९ | ६ |
| २ र रायुः | र २ रायुः | ४० | ११ |

इति शुद्धिपत्रम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ श्रीगणेशाय नमः ॥

# अथ मासश्राद्धप्रयोगः ।

अथ कौथुमीयानां गोभिलीयश्राद्धकल्पसूत्रकर्मप्रदीपगोभिलोक्तपिण्डपितृयज्ञान्वष्टक्यप्रयोगान् संवीक्ष्य मासश्राद्धप्रयोगो विरच्यते । तस्य कालमाह सूत्रकारः ॥ "श्राद्धममावास्यायां पितृभ्यो दद्यात्, पञ्चमीप्रभृति वाऽपरपक्षस्य यदहरुपपद्यते" इति । अस्यार्थः । दर्शे ऽथवाऽपरपक्षस्य पञ्चम्यादितिथिषु यस्मिन्नहनि सर्वमुपपद्यते सम्पद्यते तस्मिन्नहनि (पितृभ्यः) पितृपितामहप्रपितामहेभ्यः, मातुः पितृपितामहप्रपितामहेभ्यश्च, श्राद्धं कुर्य्यात् । "मातामहानाञ्चैवं" इत्युत्तरत्र सूत्रकृता वक्ष्यमाणत्वात् । एवञ्चोक्तषड्दैवताकं मासश्राद्धमितियावत् । श्राद्धञ्च द्विविधं, पार्वणमेकोद्दिष्टञ्चेति । त्रिपुरुषोद्देशेन क्रियमाणं पार्वणमथवा पर्वसम्बन्धि पार्वणम् ॥ एकपुरुषोद्देशेन क्रियमाणमेकोद्दिष्टम् ॥ सर्वेषामपि श्राद्धानां मासश्राद्धं प्रकृतिः, तत्रैव सर्वाङ्गोपदेशात्, "इष्टीनां दर्शपौर्णमासवत्" । छन्दोगानधिकृत्य—"पिण्डपितृयज्ञवदुपचारः, पिण्डपितृयज्ञवद्धुत्वा हुतशेषं पाणिषु दद्यात्" इति श्राद्धकल्पसूत्रात् पिण्डपितृयज्ञतन्त्रमत्र ग्राह्यम् । अतो गृह्याग्नावेव चरुश्रपणम् । तेनाग्नावेव होमः । अनग्निमतो "ब्राह्मणभोज-



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नपाकादन्नमुद्धृत्य विप्रपाणिषु होम" इति युक्तेयं व्यवस्था ॥ अथ कर्मप्रदीपोक्ताः पदार्था उच्यन्ते । "समूलास्सकृदाच्छिन्ना हरिताः कुशाः पितृदैवत्याः । कल्माषवर्णा देवदैवत्याः । साग्रं द्विदलं प्रादेशमात्रमनन्तर्गर्भि पवित्रम् । एवं लक्षणाश्च-तस्रः पिञ्जूल्यः । दक्षिणाप्रवणो देशः । दक्षिणं जानु भूमौ पातयित्वा यवैर्ऋजुभिः कुशैश्च यज्ञोपवीती विप्रदक्षिण भाग उदङ्मुखोपविष्टो दैवं परिचरेत् । प्राचीनावीती वामजानु भूमौ पातयित्वा विप्राग्रतो दक्षिणाभिमुखोऽपविष्टः पितृतीर्थेन तिलैर्द्विगुणकुशैश्च पैतृकाणि कुर्यात् । अर्घ्यादिषु गोत्रनामकीर्त्तनं, नतु वस्वादिरूपकीर्त्तनम् । तदपीच्छन्त्यन्ये" ॥ अथसूत्रोक्तयाज्यब्राह्मणा उच्यन्ते ॥ गृह्यकर्मप्रकाशिकोक्त-लक्षणास्त्रयः स्नातकाः । एकेषां मते, यतयो गृहस्थास्साधवो वा श्रोत्रियास्तदसम्भवे ज्ञानवृद्धा वयोवृद्धा वा श्राद्धे निमन्त्रणीयाः, अनिन्द्याः स्वकर्मस्था ब्राह्मणाश्च ॥ उक्ताभावे स्वाचाराश्शिष्या अपि । द्विर्नग्न-शुक्ल-विक्लिध-श्यावदन्त-वि-द्धप्रजनन-व्याधिताधिकव्यङ्गि-श्वित्रि-कुष्ठि-कुनखि-वर्ज्जमुक्ता निमन्त्रणीयाः ॥ देवार्थे कृतस्नानान् शुचीनाचान्तान्प्राङ्मुखान्यु-ग्मान्द्विचतुरादीन्ब्राह्मणान्प्रागग्रेषूदगग्रेषु वा कुशेषूपवेशयेत् ॥ पित्राद्यर्थे एकैकस्यायुग्मांस्त्रिप्रभृतीनुदङ्मुखान्स्नातान् शुची-नाचान्तान्ब्राह्मणान्यथाशक्त्युपवेशयेत् । अथवा, देवार्थे द्वौ, पित्राद्यर्थे त्रीन् । अथवा देवार्थे एकं, पितृपितामहप्रपिता-महार्थे चैकं वा । मातामहाद्यर्थमप्येवम् । पित्राद्यर्थं माता-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मह्वाद्यर्थमाद्विकमेव देवार्थं उपवेशयेत् ॥ दैवपूर्वं श्राद्धं कुर्वीत । देवार्थे एकः पित्राद्यर्थे एको मातामह्वाद्यर्थे एकः, इतीमं जघन्यपक्षमाश्रित्य प्रयोग उच्यते । यस्मिन्नहनि श्राद्धं क्रियते तत्पूर्वेद्युर्यजमानस्सायमौपासनं हुत्वा, अनिन्द्या-न्ब्राह्मणान्समाहूय, देवार्थं प्राङ्मुखं ब्राह्मणं पित्राद्यर्थेऽप्युदङ्मुखं वृणुयात् । तत्प्रकारश्च । कर्त्ता यज्ञोपवीती कुशानादाय पुरूरवार्द्रवसञ्ज्ञकेभ्यो विश्वेभ्यो देवेभ्य इदमासनं स्वाहेत्या-सनं दत्वा, स्वदक्षिणहस्तेन भोक्तृदक्षिणजानु स्पृशन् अमुकगोत्राणाम्मम पितृपितामहप्रपितामहानाममुकामुकश-र्म्मणां मातुः । पितृपितामहप्रपितामहानाममुकामुकशर्म्मणां, श्वो मासश्राद्धं कर्त्ताऽस्मि तत्र पुरूरवार्द्रवसञ्ज्ञकेभ्यो विश्वेभ्यो देवेभ्यो भवता क्षणः कर्त्तव्यः । ॐ तथेति भोक्तुः प्रतिवचनम्। प्राप्नोतु भवानिति कर्त्ता पृच्छेत् । प्राप्नवानीति भोक्तुरनुज्ञा। एवं सर्वत्र प्रश्नेषु । ततः कर्त्ता प्राचीनावीती स्वदक्षिणहस्तेन भोक्तृवामजानु स्पृशन्नुदङ्मुखाय विप्राय पितृपितामहप्रपिता-महेभ्यः स्वधा इदमासनमित्यासनं दद्यात् । ततः पूर्ववद्गोत्रा-दिकमुक्त्वा पितृपितामहप्रपितामहार्थे भवता क्षणः कर्त्तव्यः । प्रतिवचनं पूर्ववत् । एवं मातामहाद्यर्थमपि निमन्त्रयेत् । निमन्त्रितब्राह्मणो नान्यस्यान्नमश्नीयात् । कर्त्ता भोक्ता च मैथुनादिकं वर्ज्जयेत् । श्राद्धदिने प्रातर्वा निमन्त्रणम् । ततो मध्याह्ने श्राद्धाङ्गस्नानं कृत्वा स्नातान्पूर्वनिमन्त्रितान्ब्राह्मणा-न्समाहूय, पादप्रक्षालनाद्यर्थमुदकं दत्वा प्रक्षालितपादाना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



चान्तान् देवार्थे प्राङ्मुखम्, पित्राद्यर्थे उदङ्मुखम्, मातामहाद्यर्थे चोदङ्मुखं विप्रमासनेषूपवेश्याचाराद्दीपं श्राद्धसमाप्तिपर्य्यन्तं स्थापयेत्। दर्भेष्वासीनोऽयुग्मकुशपाणिः प्राङ्मुखः प्राणानायम्य, देशकालौ सङ्कीर्त्त्य, परमेश्वरप्रीत्यर्थं प्राचीनावीती अमुकगोत्राणां पितृपितामहप्रपितामहानाममुकामुकशर्म्मणाममुकगोत्राणाम्मातुः पितृपितामहप्रपितामहानाममुकामुकशर्म्मणाञ्चाक्षय्यतृप्त्यर्थं सम्भवन्नियमोपचारदक्षिणाभिः पार्वणविधानेन मासश्राद्धं करिष्ये इति सङ्कल्पः । अथासनदानम् । यवजलसहितं कुशद्वयमादाय पुरूरवार्द्रवसञ्ज्ञकेभ्यो विश्वेभ्यो देवेभ्यः स्वाहेति हस्ते जलमासिच्यासनदक्षिणभागे कुशान्दद्यात् । ततः प्राचीनावीती सतिलजलद्विगुणकुशानादाय पितृपितामहप्रपितामहेभ्यः स्वधा इति हस्ते जलमासिच्य वामभागे कुशान्दद्यात् । एवं मातामहादीनामपि । तत उपवीती यवानादायोङ्कारं कृत्वा विश्वान्देवान् भवन्त्यावाहयिष्ये इति पृच्छति । ओमावाहयेत्यनुज्ञातो विश्वेदेवास आगत इत्यावाहयेत्। अस्य गृत्समद ऋषिर्विश्वेदेवा देवता गायत्रीछन्दो विश्वेदेवावाहने विनियोगः। विश्वेदेवास आगत शृणुताम इमꣳ हवम्। एदं बर्हिर्निषीदत ॥ अस्याहोरात्रे ऋषिर्विश्वेदेवा देवतास्त्रिष्टुपछन्दो विश्वेदेवावाहने विनियोगः । विश्वेदेवाः शृणुतेमꣳ हवंमे ये अन्तरिक्षे य उपद्यविष्ठ। ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् ॥ ओषधयस्संवदन्ते सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मण-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



स्त्व९ राजन् पारयामसि ॥ पुरूरवार्द्रवसञ्ज्ञकान् विश्वान्देवा-न्भवत्यावाहयामि इति देवब्राह्मणपुरतो यवान्प्रक्षिपेत् । ततः प्राचीनावीती, तिलानादाय वामजानुस्पृशन्नोमित्युच्चार्य्य पितृनावाहयिष्ये इतिपृष्ट्वा ओमावाहयेत्यनुज्ञातः । अनयोः शंख ऋषिरनुष्टुप्छन्दः पितरो देवता पित्रावाहने विनियोगः । उशन्तस्त्वा निधीमह्युशन्तस्समिधीमहि । उशन्नुशत आवह पितृन् हविषे अत्तवे ॥ एत पितरः सोम्यासो गम्भीरेभिः पथिभिः पूर्विणेभिर्दत्तास्मभ्यं द्रविणेह भद्र९ रयिञ्च नः सर्ववीरं नियच्छत ॥ आयन्तु नः पितरः सोम्यासो ऽग्निष्वात्ताः पथिभिर्देवयानैः । अस्मिन् यज्ञे स्वधया मदन्त्वधिब्रुवन्तु ते अवन्त्वस्मान् ॥ अमुकगोत्रानमुकशर्मणः पितृनावाहयामीत्यावा-[illegible], अपहता असुरा रक्षांऽसि वेदिषदः । इत्यप्रदक्षिणं तिलान्विकिरेत [illegible] अप उपस्पर्शनम् । एवं मातामहादीनामप्यनुज्ञाना[illegible] । ततो यज्ञियवृक्षचमसेष्वर्घ्यं गृह्णाति । तद्यथा । पुरतः कुशानास्तीर्य्य तेषु सौवर्णराजतौदुम्बरखड्गमणिमयानामन्यतमानि पात्राणि पत्रपुटानि चमसान्वाऽऽसादयेत् । तेषु पवित्रान्तर्हितेष्वप आसिञ्चति । प्रागग्रकुशेषु देवपात्रमुदगपवर्गं, दक्षिणाग्रकुशेषु दक्षिणापवर्गाणि पितृपात्राणि भवेयुः । पित्रादित्रयस्य मातामहादित्रयस्य च पृथक्पृथगर्घ्यपात्रम् । देवपात्र उदगग्रे, पितृपात्रेषु दक्षिणाग्राणि पवित्राणि निधाय, गन्धोदकं मिश्रीकृत्य, देवपात्रे शन्नोदेवीरित्युदकं पूरयित्वा, यवोऽसीति यवान्प्रक्षिपेत् । अस्य मन्त्रस्य दध्यङ्ङाथर्वण ऋषिगा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



यत्रीछन्द आपो देवता अपामासेचने विनियोगः ॥ शन्नो देवी-
रभिष्टये शन्नो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥ यवोऽसि
यवयास्मद्द्वेषो यवयारातीः ॥ तत्पात्रं कुशैः प्रच्छादयेत् । ततः
प्राचीनावीती सव्यं जानु भूमावाधाय, शन्नो देवीरिति गन्ध-
मिश्रितेन जलेन पितृतीर्थेन पितृपात्रं पूरयित्वा, तिलो-
सीति पितृतीर्थेन तिलानावपेत् । प्रतिपात्रं मन्त्रावृत्तिः । ति-
लोऽसि सोमदैवत्यो गोसवो देवनिर्मितः । प्रत्नमद्भिः प्रक्तः
स्वधया पितॄनिमाल्लोकान्प्रीणया हि नः स्वधा नमः ॥ ततः
कुशैः प्रच्छादयेत् । एवमन्येष्वर्घ्यपात्रेषूदकपूरणादिकं कुर्य्यात् ।
ततो यज्ञोपवीती देवकरे पवित्रे निधाय, हस्तद्वयेनार्घ्यपात्र-
मादाय, या दिव्या आपः पयसा सम्बभूवुर्य्या अन्तरिक्ष उत
पार्थिवीर्याः । हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः
शंस्योनाः सुहवा भवन्तु ॥ गोत्रस्य शर्मणो मम पित्रादेर्मा-
सश्राद्धे पुरूरवार्द्रवसञ्ज्ञका विश्वेदेवा एतद्वोऽर्घ्यमिति देव-
विप्रहस्तेऽर्घ्यं दद्यात् । अस्त्वर्घ्यमिति भोक्ता प्रतिवदेत् । पुनः
शुद्धोदकं दत्वा, पित्रर्घ्यपात्रस्थपवित्रमादाय, पितृहस्ते
दक्षिणाग्रं तत्पवित्रं निधाय, तदर्घ्यपात्रं गृहीत्वा, या दिव्या
इतिमन्त्रान्ते गोत्रादिकमुक्त्वा, पितश्शर्म्मन्नेतत्तेऽर्घ्यम् येचात्र
त्वामनुयांश्च त्वमनु तस्मै ते स्वधा ॥ इति किञ्चिज्जलमवशेष्यार्घ्यं
दद्यात् । अस्त्वर्घ्यमिति भोक्तुः प्रतिवचनम् । अप उपस्पृशेत् ।
पूर्ववच्छुद्धोदकदानाद्यर्घ्यपवित्रस्थापनान्तं कर्म कुर्यात् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



उक्तविधिना पितामहप्रपितामहयोस्तत्तन्नाम सम्बोधनान्तमुच्चार्य्य तत्तदर्घ्यपात्रादर्घ्यं दद्यात् । पित्राद्यर्थमेकब्राह्मणपक्षेऽप्यर्घ्यपात्रत्रयं, तत्रस्थमुदकमेकस्यैव हस्ते प्रत्येकं गोत्राद्युच्चार्य्य त्रिरर्घ्यं पूर्ववद्दद्यात् । एवं मातामहादीनामपि । ततः पित्राद्यर्घ्यपात्रत्रयस्थकुशानादाय, पितृपात्रे निधाय, सर्वपात्रस्थान्संस्रावान्मातामहपात्रे समवनीय, तत्पात्रद्वयं स्ववामभागे पृथक्पृथङ्न्युब्जति । तत्र मन्त्रः । शुन्धन्तां लोकाः पितृषदनाः पितृषदनमसि पितृभ्यः स्थानमसि ॥ तत्तत्पात्रस्थपवित्रकुशान्न्युब्जीकृततत्पात्रोपरि स्थापयेत् । अत्र यज्ञोपवीतगन्ध-पुष्प-धूप-दीप-वाससां प्रदानम् । तदलाभे यज्ञोपवीतं हिरण्यञ्च दद्यात् । तत्प्रकारो यथा । सम्बोधनान्तं तत्तन्नामोक्त्वा, एतत्ते यज्ञोपवीतम् । एष ते गन्धः । एतत्ते पुष्पमेतत्ते हिरण्यमित्यादि । ततो ब्राह्मणानां पुरतो नीवारचूर्णेन पाषाणचूर्णेन वा पितृपूर्वं मण्डलानि कृत्वा, तत्र प्रक्षालितानि पात्राणि स्थापयेत् । तत उपवीती घृताक्तमन्नमुद्धृत्याग्नौ करिष्यामीति पितॄननुज्ञाप्य कुर्व्वित्यनुज्ञातः, साग्निकश्चेत्तर्हि गृह्याग्निसमीपमागत्योपविश्योपवीती क्षिप्रहोमविधिना गृह्याग्नौ जुहुयात् । अनयोः प्रजापतिर्ऋषिर्यजुः पितरो देवतोपघातहोमे विनियोगः । स्वाहा सोमाय पितृमते ॥ इति हुत्वा, स्वाहाऽग्नये कव्यवाहनाय ॥ इति द्वितीयाहुतिं हुत्वोपरिष्टात्तन्त्रं समापयेत् । निरग्निकश्चेद्ब्राह्मणहस्ते वाग्नौ करणं करिष्ये इति पृष्ट्वा, पितृब्राह्मणहस्तं भोजनपात्रे कृत्वा, हस्ते शुद्धो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दकं दत्वा, पूर्वोक्ताहुतिद्वयं कुर्य्यात् । ब्राह्मणाभावे जले उक्ताहुतिद्वयं वा । तदुक्तं 'हेमाद्रौ,' "साग्निरग्नावनग्निस्तु द्विजपाणावथाप्सु वा । कुर्य्यादग्नौ क्रियां नित्यां लौकिकेनेति निश्चिताम्" ॥ हुतशेषं ब्राह्मणभोजनपात्रे दत्वा, किञ्चित्पिण्डार्थमवशेषयेत् ॥ ततो भोजनपात्रं घृतेनाभिघार्य्यान्नादिपरिवेषणं कुर्यात् । अथ भोजनपात्रं वामहस्तेन स्पृष्ट्वा दक्षिणहस्तेनोदकमादाय, ॐ सत्यन्त्वर्त्तेन परिषिञ्चामीत्यन्नमभ्युक्ष्याग्रे प्रादक्षिण्यं यवान्विकीर्य्य, न्युब्जीकृताभ्यां दक्षिणोत्तराभ्यां पाणिभ्यां पृथिवीते पात्रमिति भोजनपात्रमालभ्य जपेत् । पृथिवी ते पात्रं द्यौरभिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा । तत इदं विष्णुर्विचक्रम इति ऋचा वा, विष्णो हव्यं रक्षस्वेति यजुषा वा, भोक्तुरङ्गुष्ठमन्ने स्थापयेत् । इदं विष्णुरिति काण्वो मेधातिथि ऋषिर्गायत्रीछन्दो विष्णुर्देवता जपे विनियोगः । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं । समूढमस्य पांसुले ॥ ततो वामहस्तेनान्नपात्रमालभ्य दक्षिणहस्तेन कुशोदकमादाय, दत्तमिदमन्नादिकमातृप्तेर्दास्यमानञ्च पुरूरवार्द्रवसञ्ज्ञकेभ्यो विश्वेभ्यो देवेभ्यः स्वाहा न ममेति देवब्राह्मणपुरतो जलमुत्सृजेत् । एवं पितृपात्रेऽपि । तत्र विशेषः । प्राचीनावीती पितृधर्मेण यवस्थाने तिलान्विकिरेत्सव्योत्तराभ्यां पाणिभ्यां पात्रालम्भनम् । दास्यमानमित्यन्तमुक्त्वा, गोत्रेभ्यः शर्मभ्यः पितृपितामहप्रपितामहेभ्यः स्वधा । एवं मातामहा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दीनामपि । ततः पूर्वापोशनार्थं पितृपूर्वं जलं दत्वा, सव्याहृतिकां गायत्रीं मधुवाता इत्यृचं जपित्वा, मधुमधुमधु इति त्रिर्जपित्वा, यथासुखं जुषध्वमिति वदेत् । ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ अस्य गौतम ऋषिर्विश्वेदेवा देवता गायत्रीछन्दो जपे विनियोगः । मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ मधु नक्तमुतोषसि मधुमत्पार्थिवꣳरजः । मधुद्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाꣳअस्तु सूर्य्यः । माध्वीर्गावो भवन्तु नः ॥ मधुमधुमधु इति ॥ एवममृतोपस्तरणमसीति प्रतिब्राह्मणं वदेत् । ततो ब्राह्मणा युगपत्पूर्वापोशने प्राणाहुतिषु च तत्समकालं तान्मन्त्रान्क्रमेण सकृदेव पठेयुः । सर्वत्रामृतोपस्तरणमसि । प्राणाय स्वाहा । व्यानाय स्वाहा । अपानाय स्वाहा । समानाय स्वाहा । उदानाय स्वाहा । ब्रह्मणे स्वाहा । ततो व्याहृतिसामादीन्यभिश्रावयिष्ये इति भोक्तॄन् पृष्ट्वाऽभिश्रावयेति तैरनुज्ञातः कर्त्ता व्याहृतिसामादीन्यभिश्रावयेत् । अशक्तश्चेत्तत्पठनार्थमृत्विजो वृणुयात् । ततः सव्येन व्याहृतिपूर्वां गायत्रीं तस्याश्चैव गायत्रं यद्वा उविश्वपतिरित्यादि पितृसंहितामिदं ह्यन्वोजसेत्यादि माधुच्छन्दसीं संहितामश्नत्सु द्विजेषु जपेत् । यथा । ओ३म् । भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ ॐ तत्सवितुर्वरेणियोम् । भार्गोदेवस्य धीमाहीऽ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



धियो यो नः प्रचो१२१२। हुम्। आ२। दायो। आ२३४५॥ २॥
यद्वा ऊऽ२३विश्पतिश्शितः। सुप्रीतोमनुषोविशे। विश्वायिदा-
ऽ२३ग्नीः। प्रतिरक्षा। सिसेधता। औ३होवा। होऽ५इ।
डा॥ १॥ अहा। वो३हा। २। सनादग्नाइ। मृणसि। यातुधानान्।
नत्वारक्षा। सी३पृत। नासुजिग्यूः। अनुदहा। सहमू। राक्ष-
यादाः। अहा। वो३हा। २। मातादूहेत्याः। मुक्षत। दा३४ऽ३यि।
वी३या५या६५६ः॥ २॥ अक्षन्नमीमद। तहो३। आऽ२३४।
वप्रियाअधू। षता। अस्तोषतस्वभानवः। विप्रानाऽ२३वो।
ष्ठायामती। योजानू३वा३यि। द्रा२ता२३४औहोवा।
हा२३४री॥ ३॥ ओ३हायि। ओ३हा। ओहा। इया२।
ओ३हा३ण। अभिक्षिपा। ष्टा३क्तृष। णाव्ययोधाम।
अङ्गीषिणाम्। अवाव। शंतवाणीः। वनावसा। नो३वह। णोन-
सिन्धूः। ओ३हाइ। ओ३हा। ओहा। इया२। ओ३हा३ण।
विरलधाः। दयते। वा३४३। री३या५णा६५६यि॥ ४॥
हो। होइ। अक्रान्त्समुद्रः प्रथमेविध। र्माण्। हो। होइ।
जनयन्प्रजाभुवनस्यगो। पाः। हो। होइ। वृषापवित्रेअधिसा-
नो२अ। व्यायि। हो। हो। वृहत्सोमोवा२वृधेस्वानोअ। द्रा।
औ३होवाहाउवा३। ए३। स्वानोअ। द्री२३४५ः॥ ५॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



कानी । क्रान्ती२ । क्रान्ती२ । हरिरासृज्यमाऽ२३ना३ः ।
सायिदान् । वाना२ । वाना२ ॥ स्यजठरेपुनाऽ२३ना३ः ।
नृभीः । याता२याता२ । क्षुणुतेर्निर्णिजाऽ२३ङ्गा३म् । आताः ।
माती२म्माती२म् । जनयता२३ । स्वा२धा२३४औहोवा-
भी२३४५ः ॥ ६ ॥ कनिक्रन्दिहा । होई । हरिरासृज्य ।
मा२३४नाः । हाहोइ । सीदन्वनस्यजठरेपुनाऽ२३नाः ।
हाहोइ । नृभिर्यतःक्षुणुतेर्निर्णिजाऽ२३ङ्गाम् । हाहोइ
अतोमतायिम् । जनयताऽ२३ । स्वाऽ२धा२३४औहोवा-
भी२३४५ः ॥ ७ ॥ इति पितृसꣳहिता ॥ इदाईमे । हियाइनू
ओ१जासा२ । सुतꣳराधा । नाम्पा१ता२यि । पिबातुवस्यागिर्वा
णा२३४ः । पिबा३४तुवा३ । स्याऽ२गा२३४औहोवा ।
वा२३४णाः ॥ १ ॥ इदꣳहिया४औहो । नूइओजो२३४सा ।
सुतꣳराधा । ना३२म् । पा२३४ताइ । पिबातुवस्या२३ । ग ।
वाहायि । वा२३४णाः । एहियाईहा । होइइ । डा ॥ २ ॥
इदह्यनूईओजसा । सुतꣳराधा नाम्पातौ । होवाइहाइ । पिबा-
तुव । स्यगायिर्वाणौ । होवाइहाइ । पिबातुवौ । होवाइहा । स्यगा-
येइः । वा२ना२३४औहोवा । ष्टनस्तुता२३४५ः ॥ ३ ॥ त्वामिदा ।
होयि । हियोनराईण । अयाइप्यन्वा । ज्ञाइनभूर्णा२३४याः । सइ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



न्द्रस्तोमवाहसः । इहाश्रुधा । औहोऽ३४वाहाइ । उपास्वासा ।
औहोऽ३४वाहा । रमागाऽ२३हाऽ३४३यि । औऽ२३४५इ । डा ॥ ४ ॥
सपूर्व्यामहोनाऽ६मे । वेनःक्रतुऽ३भाइरानजेऽ३ । हाऽ३हा । औऽ३-
होऽ३वा । आइहीऽ२ । यस्यद्वाराऽ३मानुष्पीताऽ३ । हाऽ३ हा । औऽ३-
होऽ३वा । आइहीऽ२ । दाइवेषुधाऽ३ । हाऽ३हाइ । औऽ३होऽ३वा । आ-
इहीऽ२ । यआऽ२३ । नाऽ२जाऽ२३४औहोवा । मधुश्रुताऽ२३४५ः ॥५॥
पुराम्भिन्दुर्युवाकवीः । अमितौजाअजायाऽ२३ता । आ
इन्द्रोविश्वाऽ३ । स्याकर्म्मोऽ२३४णाः । धर्त्ता । वाज्रीवा ऊँ२३४वा ।
पूरुऽ५ष्टुताः । होऽ५इ । डा ॥ ६ ॥ औवा । उपप्रक्षेमधुमति-
क्षियन्तः । औवा । औइ । पुष्येमरइन्धिमहेतआऽ२३यिन्द्रा ।
औ । वा औ वा । औ । वाहाऽ३१उवाऽ२३ । उऽ३४या ॥ ७ ॥
हा औऽ२३४हाइ । इहाऽ३१ । पवस्वसो । माऽ३मधु । माऽ२ऋतावा ।
अपोवसा । नोऽ३अधि । सानोअव्याऽ३ । अवद्रोणा नीऽ३घृत
वन्तिरोहा । हा औऽ२३४हाइ । इहाऽ३१ । मदिन्तमो । मत्सरः ।
आऽ३४ऽ३यि । द्राऽ३पाऽ५नाऽ६५६ः ॥ ८ ॥ सुरूपकृत्नुमूतये-
सुदुघामा । वगोऽ२ । दुहयाऽ३१उवाऽ२३ । इऽ२३४डा ।
सूऽ२३४वाः । जुहुमाऽ२३सी । द्यविद्यवियाऽ३१उवाऽ२३ । ज्योऽ२३४-
त्तीः ॥ ९ ॥ इति माधुच्छन्दसीसंहिता ॥ भोजनान्ते प्राचीना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वीती पितुरुच्छिष्टपुरतश्चतुरङ्गुलदेशे दर्भानास्तीर्य्य प्रत्यगपवर्गमपो निनीय, तत्र येत्वग्निदग्धा इतिमन्त्रेण पितृतीर्थेन तिलमिश्रितमन्नं विकिरेत् । येत्वग्निदग्धा जीवा येऽप्यदग्धाः कुले मम । भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥ ततो हस्तकुशांस्त्यक्त्वा, हस्तौ प्रक्षाल्य, द्विराचम्यान्यशान्धृत्वा, द्विजेभ्यः पितृपूर्वमुत्तरापोशनं दत्वा, सव्याहृतिकां गायत्रीं मधुमतीं मधुमधुमधु इति च त्रिर्जपित्वा आचान्तेषु द्विजेषु तृप्ताः स्थ इति पृच्छेत् । तृप्ताः स्म इति प्रत्युक्ते ऽन्नशेषैः किं? क्रियतामिति पृष्ट्वा, इष्टैस्सहभुज्यतामित्यनुज्ञातो ब्राह्मणानां हस्तक्षालनात्पूर्वमुच्छिष्टसन्निधौ पिण्डान् दद्यात् "पिण्डपितृयज्ञवत्" । तत्राप्यन्वष्टक्यवदित्युक्तेरन्वष्टक्योक्तविधिना पिण्डदानं यद्यपि भवति तथाप्यत्र "प्रत्याब्दिकं च शेषेषु पिण्डास्स्युः षडिति स्थितिः" इति कर्मप्रदीपवचनात्षण्णां पिण्डदानम् । पिण्डपितृयज्ञवदुल्मुकनिधान-प्रस्तरास्तरणाञ्जनाभ्यञ्जन-सुरभिदान-नमस्कारमन्त्रोपलक्षितनिन्हवानां निषेधो ऽत्रापि भवति । अन्यत्सर्वमन्वष्टक्यवत्कुर्यात् । सुबोधाय पुनरुच्यते । अथ प्राचीनावीति वाग्यतो यजमान उच्छिष्टपात्रस्य बाहुमात्रप्रदेशे चतुरस्रं मण्डलं विधाय, गोमयेनोपलिप्य, दक्षिणाप्रवणां सैकतेन वेदिकां कृत्वा ऽभ्युक्ष्य, दक्षिणाग्रान्कुशानास्तीर्य्य, तत्पूर्वभागे मातामहाद्यर्थं तथाग्रान्कुशानास्तीर्य्य, सव्येन पिञ्जूलीं गृहीत्वा, सव्याहदक्षिणेनादाय, पिञ्जूल्यग्रेणास्तृतकुशोपरि दक्षिणाग्रां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



रेखामुल्लिखेदपहता इतिमन्त्रेण । अस्य प्रजापतिर्ऋषिर्यजुः पितरो देवता रेखोल्लेखने, विनियोगः । अपहता असुरा रक्षांसि वेदिषदः । एवं मातामहादिदर्भेष्वपि । ततः पिञ्जूलीं त्यक्त्वा अप उपस्पृशेत् । अथ एत पितरः सोम्यास इतिमन्त्रेण पितॄनावाहयेत् । ततो द्विगुणकुशजलमादाय प्राचीनावीती सव्यं जान्वाच्य, पितृतीर्थेन कुशमूलमध्याग्रभागेषु क्रमेणावनेजनं कुर्यात् । अमुकगोत्रामुकशर्म्मन्पितः पिण्डस्थानेऽवनेनिक्ष्व ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा । अप उपस्पृशेत् । एवं पितामहप्रपितामहयोः । एवं मातामहादीनामपि । ततः सर्वपाकाल्पेन हुतशेषं घृतञ्च मिश्रीकृत्य, तिलान्संयोज्य, बिल्वमात्रान्पिण्डान् कृत्वा, दक्षिणहस्तेन गृहीत्वा, सव्येनान्वारभ्य, पितृतीर्थेनावनेजनक्रमेण पिण्डान्निदध्यात्पितृन्नामयुक्तमन्त्रेण । अमुकगोत्रामुकशर्म्मन्पितरेष ते पिण्डः ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा । अप उपस्पृश्य एवं पितामहप्रपितामहयोः पिण्डौ क्रमेण स्थापयेत् । पिण्डदानमन्त्रे तत्तन्नामग्रहणमिति विशेषः । ततो मातामहादीनामपि तत्तत्स्थाने पिण्डनिधानम् । पिण्डपात्रक्षालनजलेन प्रत्यवनेजनं कृत्वा पिण्डपात्रमधोमुखं स्थापयेत् । ततोऽत्र पितरो मादयध्वमिति जपति । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः पितरो देवता जपे विनियोगः । अत्र पितरो मादयध्वं यथा भागमावृषायध्वम् ॥ अप्रादक्षिण्येन पर्यावृत्योदङ्मुखो दक्षिणाभिमुखो वा ऽनुच्छ्वसन्नमीमदन्तपितर इति जपेत् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः पितरो देवता जपे विनियोगः । अमी मदन्त पितरो यथाभागमावृषायिषत । ततः कृताञ्जलिर्नमो वः पितरः पितर इति जपति । अस्य प्रजापतिर्ऋषिरुष्णिक्-छन्दः पितरो देवता जपे विनियोगः । नमो वः पितरः पितरो नमो वः ॥ ततः पत्नीमवेक्षते । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः पितरो देवता पत्न्यवेक्षणे विनियोगः । गृहान्नः पितरो दत्त ॥ ततः पिण्डानवेक्षते । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः पितरो देवता पिण्डावेक्षणे विनियोगः । सदो वः पितरो देष्म ॥ ततः सव्यहस्तेन पूर्वासादितसूत्रं गृहीत्वा दक्षिणेनादाय सव्येनान्वारभ्य पितृतीर्थेन प्रथमपिण्डे निदध्यात् । अमुकगोत्रामुकशर्म्मन्पितरेतत्ते वासः ये चात्र त्वा-मनु यांश्च त्वमनु तस्मै ते स्वधा । ततोऽप उपस्पृश्य, पितामहनामयुक्तमन्त्रेण पितामहपिण्डे सूत्रं निदध्यात् । तथैव प्रपितामहपिण्डे सूत्रं निदध्यात् । मातामहादिपिण्डेष्व-प्येवम् । अत्रापि दक्षिणहस्तेन सूत्रनिधानं वामेनान्वारम्भः । यथाचारं गन्ध-पुष्प-धूप-दीप-नैवेद्यादिभिः पिण्डपूजनम् । ततो भोक्तृभ्यो मुखहस्तप्रक्षालनाद्यर्थमुदकं दत्वा स्वयं हस्तौ प्रक्षाल्याचामेत् । अथाचान्तेषु भोक्तृषु सव्येन सुसम्प्रोक्षितमस्तु इति द्विजाग्रभूमिं जलेनासिञ्चेत् । अस्त्विति प्रतिवचनम् । शिवा आपः सन्त्विति द्विजहस्तेषु जलं प्रयच्छेत् । सौमनस्यम-स्त्विति भोक्तृहस्तेषु कुसुमानि । अक्षतञ्चारिष्टञ्चास्त्वित्यक्षता-न्दद्यात् । अथ प्राचीनावीती सव्यञ्जान्वाच्य कुशोदकं गृहीत्वा,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अमुकगोत्रस्य पितुरमुकशर्म्मणो दत्तं श्राद्धमक्षय्यमस्तु इति पितृब्राह्मणहस्ते जलं दद्यात् । अस्त्वक्षय्यमिति भोक्तृप्रतिवचनम् । एवं पितामहप्रपितामहयोः । एवं मातामहादीनामपि पृथक्पृथगक्षय्योदकदानम् । एकब्राह्मणपक्षेऽप्येवं तत्रैव त्रिर्दद्यात् । न तन्त्रं, तदुक्तं 'कर्म्मप्रदीपे' । "अर्घ्येऽक्षय्योदके चैव पिण्डदानेऽवनेजने । तन्त्रस्य तु निवृत्तिः स्यात्स्वधावाचन एवच" इति ॥ ततोऽघोराः पितरः सन्त्विति कर्त्ता । सन्त्वघोराः पितर इति प्रतिवदेयुर्भोक्तारः । गोत्रं नो वर्द्धतामिति कर्त्ता । वर्द्धतामिति भोक्तारः । ततो न्युब्जीकृतपित्रर्घ्यपात्रमातामहार्घ्यपात्रयोरुपरि स्थापितान्स्वधानिनयनीयान्सपवित्रान्कुशान्सव्येनाप्रादक्षिण्येनादाय, पित्रादिपिण्डोपरि मातामहादिपिण्डोपरि च क्रमेणास्तीर्य्य, स्वधां वाचयिष्ये इति पृच्छति । वाच्यतामिति भोक्तारः । ततो गोत्रेभ्यश्शर्म्मभ्यः पितृभ्यस्स्वधोच्यताम् । अस्तुस्वधेति भोक्ता प्रतिवदेत् । एवं पितामहेभ्यः प्रपितामहेभ्यश्च । तथैव मातामहादीनामपि । ततो न्युब्जीकृतपित्रर्घ्यपात्रमुत्तानं कृत्वा, तेनोदकमादाय, पित्रादिपिण्डत्रयोपरि धारां दद्यादूर्ज्जं वहन्तीरितिमन्त्रेण । एवं मातामहाद्यर्घ्यपात्रेण मातामहादिपिण्डत्रयोपरि धारां दद्यात् । अस्य मन्त्रस्य प्रजापतिर्ऋषिः पिपीलिकामध्योष्णिक्छन्दः पितरो देवता पिण्डपरिषेके विनियोगः । ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं२ स्वधास्थ तर्प्पयत मे पितॄन् ॥ ततो देवहस्ते जलं दत्वा, विश्वेदेवाः प्रीयन्तामिति वाचयेत् । प्रीयन्तां विश्वेदेवा इति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रतिवचनम् । ततः पिण्डान्भोजनपात्राणि च स्वस्थानाच्चालयेत् । ततो देवपूर्वं यथाशक्ति दक्षिणां दद्यात् । विश्वेदेवा इयं वो दक्षिणा । पितृपितामहप्रपितामहा इयं वो दक्षिणा । एवं मातामहादीनाम् । ततः कर्त्ता भोक्तृन्प्रति प्रार्थयेत् । दातारो नोऽभिवर्द्धन्तां वेदाः संततिरेव च । श्रद्धा च नो माव्यगमद्बहुदेयञ्च नोऽस्त्विति ॥ ततो भोक्तारः । दातारो वोऽभिवर्द्धन्तां वेदाः सन्ततिरेव वः । श्रद्धा च वो माव्यगमद्बहुदेयञ्च वोऽस्त्विति प्रतिवदेयुः ॥ ततः कर्त्ता । अन्नञ्च नो बहुभवेदतिथींश्च लभेमहि । याचितारश्च नः सन्तु माच याचिष्म कञ्चन ॥ ततो भोक्तारः । अन्नं च वो बहुभवेदतिथींश्च लभध्वम् । याचितारश्च वः सन्तु माच याचिढ्वं कञ्चन ॥ एता एवाशिषस्सन्त्विति कर्त्ता । एताः सन्त्वाशिष इति भोक्तारः । ततः स्वस्ति भवन्तो ब्रुवन्तु । ॐ स्वस्तीति भोक्तारः । ततः कर्त्ता आशिषः प्रतिगृह्य पितृपूर्वं वाजेवाजे इति विसर्ज्जयेत् । तद्यथा । पितृपङ्क्तिमुख्यस्य ब्राह्मणस्याङ्गुष्ठमपसव्येन गृहीत्वा, वाजेवाजेवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥ इत्येतया पितृपूर्वं विसृज्य मातामहादीन्विसृजेत् । ततः सव्येन विश्वान्देवान्विसृज्य सर्वानुत्थापयेत् । ततः सर्वे देवविप्राः पादप्रक्षालनदेशे प्राङ्मुखाः पित्रादयश्चोदङ्मुखास्तिष्ठेयुः । ततः कर्त्ता जलपात्रं गृहीत्वा, ब्राह्मणानां परितो जलधारां प्रादक्षिण्येन दद्यात् आमावाजस्येतिमन्त्रेण । आमा वाजस्य प्रसवो जगम्या । देवे द्यावापृथिवी



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



विश्वरूपे । आमागन्तां पितरा मातरा चामा सोमो अमृतत्वेन गम्यात् ॥ अथ सीमान्तमनुव्रज्य, प्रदक्षिणां कृत्वा, ब्राह्मणानभिवाद्य, गृहं प्रविश्य, वामदेव्यं गीत्वा ब्रह्मार्पणं कुर्यात् । अस्य वामदेव्यस्य वामदेव ऋषिर्गायत्रीछन्द इन्द्रो देवता जपे

३ र ४ २ ४र ५ १
विनियोगः । काऽ५या । नश्चा३इचा३आभुवात् । ऊ ।
र २ १र २ १ २ र २ १ २^
तीसदावृधः स । खा । औ३होहाइ । कया२३श्चाइ ।
३ र २ १ – १ २ ३ र
ष्ठयौहो३ । हुम्मा२ । वा२र्त्ता३५ हाइ ॥ १ ॥ काऽ५स्त्वा ।
४ २ ४ ५ १ २र १ २ १ २ र २
सत्यो३मा३दानाम् । मा । हिष्ठोमात्सादन्ध । सा । औ३होहाइ ।
१ २^ ३र २ १ – १ २
हृढा२३चिदा । रुजोहो३ । हुम्मा२ । वाऽ२सो३५ हायि ॥ २ ॥
३ र ५ ४ २ ४ ५ १ १र १ २र
आऽ५भी । षुणा३:सा३खीनाम् । आ । विताजरायितृ ।
१ १ र २ १ २^ ३ र २
णाम् । औ२३होहायि । शता२३म्भवा । सियौहो३ ।
१ – १ २
हुम्मा२ । ताऽ२यो३५ हायि ॥ ३ ॥

इति मासश्राद्ध प्रयोगः ।

# अथैकोद्दिष्टश्राद्धप्रयोगः ।

अथ पित्रादिमृततिथावेकोद्दिष्टं कर्त्तव्यमिति केचित् । पार्वणं कर्त्तव्यमित्यपरे । पार्वणश्राद्धप्रयोगस्तु मासश्राद्धप्रयोगवदेव । एकोद्दिष्टश्राद्धप्रयोगोऽपि प्रायशो मासश्राद्धप्रयोगवदेव । तथाऽपि बालबोधाय पुनर्लिख्यते ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पूर्वेद्युस्सायं मासश्राद्धोक्तलक्षणं ब्राह्मणमाहूय, गोमयेनोपलिप्तायाम्भूमावासन उपवेश्य, प्राचीनावीती, अमुकगोत्रायामुकशर्मणे पित्र इदमासनं स्वधा । भोक्तुर्दक्षिणजानु स्वदक्षिणहस्तेनान्वारभ्य, अमुकगोत्रस्यामुकशर्म्मणो मम पितुः श्वः प्रत्याब्दिकैकोद्दिष्टश्राद्धं भविष्यति तत्र पित्रर्थे भवता क्षणः कर्त्तव्यः । ॐ तथेति प्रतिवचनम् । प्राप्नोतु भवान् प्राप्नवानीति भोक्ता । ततः कर्त्ता भोक्ता च मैथुनादिकं वर्ज्जयेत् । श्राद्धदिने प्रातर्वा निमन्त्रणम् । ततः परेद्युः प्रातः स्नात्वा शुचौ देशे स्वयं सपिण्डद्वारा वा पाकमारभेत् । ततो मध्याह्ने सुस्नातः कर्त्ता सुस्नातं प्राङ्निमन्त्रितं ब्राह्मणं प्रक्षालितपाणिपादमाचान्तं गृहे शुचौ देशे उदङ्मुखमासने उपवेशयेत् । श्राद्धसमाप्तिपर्य्यन्तं दीपं प्रज्वाल्य स्थापयेत् । ततः प्राङ्मुखो दर्भेष्वासीनो दर्भान्धारयमाणः पवित्रपाणिः, आचम्य, प्राणानायम्य, देशकालौ सङ्कीर्त्त्य, प्राचीनावीती, अमुकगोत्रस्य ममपितुरमुकशर्मणः प्रत्याब्दिकश्राद्धं सम्भवता नियमेन सम्भवद्भिरुपचारैः सम्भवन्त्या दक्षिणया यथासम्भवमेकोद्दिष्टविधानेन करिष्ये इति सङ्कल्प्यः । पातितवामजानुर्दक्षिणाभिमुखः प्राचीनावीती द्विगुणकुशैः पितृकर्म कुर्य्यात् । नात्रावाहनमेकोद्दिष्टे तन्निषेधात् । किन्त्वासनादिकमेव । तद्यथा—गोत्राय पित्रे इदमासनं स्वधा इत्यासनवामभागे कुशान्दत्वा, भोक्तुर्दक्षिणजान्वन्वारभ्य, गोत्रस्य मम पितुश्शर्म्मणः प्रत्याब्दिकैकोद्दिष्टश्राद्धं भवति तत्र पित्रर्थे भवता क्षणः कर्त्तव्यः । प्राप्नोतु भवान् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्राश्नवानीति प्रतिवचनम् । अस्य प्रजापतिर्ऋषिः पितरो देवता तिलविकरणे विनियोगः । अपहता असुरा रक्षांसि वेदिषदः । इति मन्त्रेण ब्राह्मणस्य पुरतस्तिलान्विकीर्य्याप उपस्पृशति । ततोऽर्घ्यं गृह्णाति । सौवर्णराजतौदुम्बरमणिमयखड्गर्यज्ञियवृक्षचमसाद्यन्यतमपात्रं, पत्रपुटमेकं वा, पुरतो दक्षिणाग्रकुशेषु संस्थाप्य, दक्षिणाग्रमेकं पवित्रं निधाय शन्नोदेवीरितिमन्त्रेण पितृतीर्थेन पात्रान्तरगृहीतेन गन्धमिश्रितजलेनार्घ्यपात्रं पूरयेत । मन्त्रस्य प्रजापतिर्गायत्र्याप अपामासेचने विनियोगः । शन्नो देवीरभिष्टये शन्नो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥ ततस्तस्मिन् तिलोऽसीति तिलानावपेत् । तिलोऽसि सोमदैवत्यो गोसवो देवनिर्म्मितः । प्रत्नमद्भिः प्रक्तः स्वधया पितरमिमं लोकं प्रीणयाहि नः स्वधा नमः ॥ ततो गन्धादिभिरभ्यर्च्य कुशैः प्रच्छादयेत् । ततः पितृहस्ते शुद्धोदकं दत्वाऽर्घ्यपात्रस्थपवित्रमादाय, पितृहस्ते दक्षिणाग्रं तत्पवित्रं निधाय, तदर्घ्यं हस्ताभ्यां गृहीत्वा, या दिव्या इतिमन्त्रान्ते गोत्रादिकमुक्त्वा, पितृहस्ते ऽर्घ्यं दद्यात् । तद्यथा । या दिव्या आपः पयसा संबभूवुर्या अन्तरिक्ष उत पार्थिवीर्याः । हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः शंस्योनाः सुहवा भवन्तु ॥ अमुकगोत्रस्य मम पितुरमुकशर्म्मणः सांवत्सरिकैकोद्दिष्टश्राद्धे अमुकगोत्रपितरमुकशर्म्मन्नेतत्तेऽर्घ्यं ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा, इत्यर्घ्यं दद्यात् । अस्त्वर्घ्यमिति भोक्ता प्रतिवदेत् । ततः पितृहस्ते पुनः शुद्धोदकं दत्वा, पवित्रमादाय, तत्पवित्र-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मर्घ्यपात्रे निधाय, तदर्घ्यपात्रं श्राद्धदेशात्प्राच्यां दिशि स्ववामभागे दक्षिणाग्रदर्भोपरि दक्षिणाग्रं न्युब्जीकरोति शुन्धन्तां लोका इतिमन्त्रेण । शुन्धन्तां लोकाः पितृषदनाः पितृषदनमसि पितृभ्यः स्थानमसि ॥ तत्पवित्रं तत्कुशांश्च तदुपरि स्थापयेत्। ततो ब्राह्मणाय गन्ध-पुष्प-धूप-दीप-वासो-यज्ञोपवीतानां सम्प्रदानम् । वस्त्राभावे यज्ञोपवीतं हिरण्यञ्च दद्यात् । तद्यथा । अमुकगोत्र पितरमुकशर्म्मन्नेष ते गन्धः । एवमेतत्ते पुष्पम् । एष ते धूपः । एष ते दीपः । एतत्ते वासः । एतत्ते यज्ञोपवीतम् । एतत्ते हिरण्यम् ॥ नाग्नौ करणमेकोद्दिष्टे तन्निषेधात् ॥ ततो भोजनप्रदेशमुपलिप्तमपि पुनर्गोमयेनोपलिप्य, नीवारचूर्णेन-पाषाणचूर्णेन वा मण्डलं कृत्वा, तत्र प्रक्षालितपात्रं स्थापयेत् । ततो भोजनपात्रमाज्येनाभिघार्य्य कर्त्ता पत्नी वा यथाविधि-परिवेषणं कुर्य्यात् । ततो भोजनपात्रं वामहस्तेन स्पृष्ट्वा, सव्यञ्जान्वाच्य, दक्षिणहस्तेनोदकमादाय, ॐ भूर्भुवस्स्वः सत्यन्त्वर्त्तेन परिषिञ्चामीत्यन्नं प्रोक्ष्य, परितस्तिलान्विकीर्य्य, सव्योत्तराभ्यां पाणिभ्यां पृथिवी ते पात्रमितिभोजनपात्रमालभ्य जपेत् । पृथिवी ते पात्रं द्यौरभिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा ॥ तत इदं विष्णुर्विचक्रम इति-ऋचा विष्णो हव्यं रक्षस्वेति यजुषा वा भोक्तुरङ्गुष्ठमन्ने स्थापयेत् । इदं विष्णुरिति काण्वो मेधातिथिर्ऋषिर्गायत्री छन्दो विष्णुर्देवता जपे विनियोगः । ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं । समूढमस्य पांसुले ॥ इति भोक्तुरङ्गुष्ठमन्नेऽवधाय,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वामहस्तेन तिलोदकमादाय, इदमन्नं व्यञ्जनादिसहितमातृप्तेर्दत्तं दास्यमानञ्च, गोत्राय पित्रे ऽमुकशर्म्मणे स्वधा इत्यन्नसङ्कल्पं कृत्वा, पूर्वापोशनार्थमुदकं दत्वा, सव्याहृतिकां गायत्रीं, मधुवाता ऋतायत इति, मधुमधुमधु इति च, त्रिर्जपित्वा यथासुखं जुषस्वेति वदेत् । ॐ भूर्भुवःस्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसि मधुमत्पार्थिवꣳरजः । मधु द्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥ मधुमधुमधु इति । ततो ब्राह्मणस्य पूर्वापोशने प्राणाहुतिषु च तत्समकालं तान्मन्त्रान्क्रमेण सकृदेव पठेत् । अमृतोपस्तरणमसि । प्राणाय स्वाहा । व्यानाय स्वाहा । अपानाय स्वाहा । समानाय स्वाहा । उदानाय स्वाहा । ब्रह्मणे स्वाहा । ततो ब्राह्मणभोजनकाले मासश्राद्धोक्तानि सामानि पठेत्पाठयेद्वा । भोजनान्ते पितुरुच्छिष्टस्य पुरतश्चतुरङ्गुलदेशे दर्भानास्तीर्य्य, प्रत्यगपवर्गमपो निनीय, तत्र ये त्वग्निदग्धा इति मन्त्रेण पितृतीर्थेन तिलमिश्रितमन्नं विकिरेत् । ये त्वग्निदग्धा जीवा ये ऽप्यदग्धाः कुले मम । भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥ हस्तौ प्रक्षाल्याचम्योत्तरापोशनं दत्वा सव्याहृतिकां गायत्रीं मधुवाता ऋतायत इति मधुमधुमधु इति च पूर्ववज्जपेत् । तृप्ताः स्थ इत्यस्य स्थाने स्वदितमिति पृच्छेत् । अस्तु स्वदितमिति प्रत्युक्ते । अन्नशेषैः किं? क्रियतामित्युक्ते

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



द्विष्टैः सह भुज्यतामिति प्रत्युक्ते ब्राह्मणभोजनार्थपाकादन्नमुद्धृत्योच्छिष्टसन्निधौ पित्रे पिण्डं दद्यात् ॥ तद्यथा । प्राचीनावीती वाग्यतो यजमान उच्छिष्टपात्रस्य बाहुमात्रप्रदेशे चतुरस्रं मण्डलं विधाय, गोमयेनोपलिप्य, दक्षिणाप्रवणां सैकतेन वेदिकां कृत्वाऽभ्युक्ष्य दक्षिणाग्रान्कुशानास्तीर्य्य सव्येन पिञ्जूलीं गृहीत्वा, सव्याद्दक्षिणेन गृहीत्वा, पिञ्जूल्यग्रेणास्तृतकुशोपरि दक्षिणाग्रां रेखामुल्लिखेदपहता इतिमन्त्रेण । अस्य प्रजापतिर्ऋषिर्यजुः पितरो देवता रेखोल्लेखने विनियोगः । अपहता असुरा रक्षाꣳसि वेदिषदः ॥ ततः पिञ्जूलीं त्यक्त्वाऽप उपस्पृशेत् । अथेत पितरः सोम्यास इतिमन्त्रेण पितरमावाहयेत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः पितरो देवता पित्रावाहने विनियोगः । एत पितरस्सोम्यासो गम्भीरेभिः पथिभिः पूर्विणेभिः । दत्तास्मभ्यं द्रविणेह भद्रꣳ रयिञ्च नः सर्ववीरं नियच्छत ॥ ततो द्विगुणकुशजलमादाय प्राचीनावीती सव्यं जान्वाच्य, पितृतीर्थेन कुशोपरि मार्जनं कुर्यात् । अमुकगोत्र पितरमुकशर्मन् पिण्डस्थानेऽवनेनिक्ष्व ये चात्र त्वामनु याꣳश्च त्वमनु तस्मै ते स्वधा । अप उपस्पृशेत् । ततः सर्वपाकाल्पेनान्नं घृतञ्च मिश्रीकृत्य, तिलान्संयोज्य बिल्वमात्रं पिण्डं कृत्वा दक्षिणहस्तेन गृहीत्वा, सव्येनान्वारभ्य, पितृतीर्थेनावनेजनस्थाने पिण्डं निदध्यात्पितृनामयुक्तमन्त्रेण । अमुकगोत्र पितरमुकशर्मन्नेष ते पिण्डः ये चात्र त्वामनु याꣳश्च त्वमनु तस्मै ते स्वधा ॥ अप

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



उपस्पृश्य, पिण्डपात्रक्षालनजलेन पूर्ववत्प्रत्यवनेजनं कृत्वा, पिण्डपात्रमधोमुखं स्थापयेत् । ततोऽत्र पितर्मादयस्वेति जपति । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः पिता देवता जपे विनियोगः । अत्र पितर्मादयस्व यथाभागमावृषायिष्ट । अप्रादक्षिण्येन पर्य्यावृत्योदङ्मुखोऽनुच्छ्सन्नमीमदत पितेति जपेत । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः पिता देवता जपे विनियोगः । अमीमदत पिता यथाभागमावृषायिष्ट ॥ ततः कृताञ्जलिर्नमस्ते पितः पितरिति जपति । अस्य प्रजापतिर्ऋषिर्यजुरुष्णिक्छन्दः पिता देवता जपे विनियोगः । नमस्ते पितः पितर्नमस्ते ॥ ततः पत्नीमवेक्षते । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः पिता देवता पत्न्यवेक्षणे विनियोगः । गृहान्नः पितरो दत्त ॥ ततः पिण्डमवेक्षते । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः पिता देवता पिण्डावेक्षणे विनियोगः । सदो वः पितरो देष्म ॥ ततः सव्येन हस्तेन पूर्वासादितसूत्रं गृहीत्वा, दक्षिणेनादाय, वामेनान्वारभ्य, पितृतीर्थेन पिण्डे निदध्यात् । अमुकगोत्र पितरमुकशर्म्मन्नेतत्ते वासः ये चात्र त्वामनु याꣳश्च त्वमनु तस्मै ते स्वधा ॥ तत अप उपस्पृश्य यथाचारं गन्ध-पुष्प-धूप-दीप-नैवेद्यादिभिः पिण्डपूजनम् । ततो भोक्त्रे मुखहस्तप्रक्षालनाद्यर्थमुदकं दत्वा स्वयं हस्तौ प्रक्षाल्याचामेत् । अथाचान्ते भोक्तरि सव्येन सुसंप्रोक्षितमस्त्विति द्विजाग्रभूमिं जलेनासिञ्चेत् । अस्त्विति प्रतिवचनम् । शिवा आपः सन्त्विति द्विजहस्ते जलं प्रयच्छेत् । सौमनस्यमस्त्विति भोक्तृहस्ते कुसुमानि । अक्षतं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



चारिष्टमस्त्वित्यक्षतान्दद्यात् । अथ प्राचीनावीती सव्यं जान्वाच्य, कुशोदकं गृहीत्वा, गोत्रस्य मम पितुः शर्मणः सांवत्सरिकैकोद्दिष्टश्राद्धे दत्तमक्षय्यमुपतिष्ठताम् । अस्त्वक्षय्यमिति भोक्ता वदेत् । अघोरः पिताऽस्तु । अस्त्वघोरः पिता । गोत्रं नो वर्द्धतामिति कर्त्ता । गोत्रं वो वर्द्धतामिति भोक्ता वदेत् । ततो न्युब्जीकृतपात्रोपरि स्थितपवित्रकुशान्कृत्वेनाप्रादक्षिण्येनादाय, पिण्डोपर्य्यास्तीर्य्य स्वधां वाचयिष्ये इति पृच्छेत् । वाच्यतामित्युक्ते, अमुकगोत्राय पित्रेऽमुकशर्म्मणे स्वधोच्यतामिति कर्त्ता ॥ अस्तु स्वधेति प्रतिवचनम् ॥ ततो न्युब्जीकृतपात्रमुत्तानं कृत्वा, तेनोदकमादाय, ऊर्ज्जं वहन्तीरिति पिण्डोपरि धारां दद्यात् ॥ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतः स्वधास्थ तर्पयत मे पितरम् ॥ ततः पिण्डभोजनपात्रचालनम् । ततो दक्षिणादानम् । गोत्र पितरमुकशर्म्मन्निदं ते दक्षिणा । ततो दातारो नो ऽभिवर्द्धन्तां वेदाः सन्ततिरेव नः । श्रद्धा च नो माव्यगमद्बहुदेयञ्च नोऽस्तु ॥ इति भोक्तारं प्रति प्रार्थयेत् । ततो भोक्तुः प्रतिवचनम् । दातारो वो ऽभिवर्द्धन्तां वेदाः सन्ततिरेव वः । श्रद्धा च वो माव्यगमद्बहुदेयञ्च वोऽस्तु ॥ पुनः कर्त्ता । अन्नञ्च नो बहुभवेदतिथींश्च लभेमहि । याचितारश्च नः सन्तु माच याचिष्म कञ्चन ॥ इति प्रार्थयेत् । ततो भोक्ता । अन्नञ्च वो बहुभवेदतिथींश्च लभध्वम् ॥ याचितारश्च वः सन्तु माच याचिद्धं कंचन ॥ इति प्रतिवदेत् । ततः कर्त्ता । एता एवाशिषः सन्तु । एताः सन्त्वा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



शिष इति भोक्ता प्रतिवदेत् ॥ ततः कर्त्ता स्वस्ति भवान् ब्रवीतु । स्वस्तीति भोक्ता ॥ ततः कर्त्ता आशिषः प्रतिगृह्य ब्राह्मणस्य दक्षिणाङ्गुष्ठमपसव्येन परिगृह्याभिरम्यतामित्युक्ता पितरं विसृजेत् । ततः पादप्रक्षालनदेशे उदङ्मुखस्य पितुः परितो जलधारां दद्यादामावाजस्येतिमन्त्रेण । आमा वाजस्य प्रसवो जगम्या देवे द्यावापृथिवी विश्वशंभूः । आमागन्तां पितरा मातरा चामा सोमो अमृतत्वेन गम्यात् ॥ ततः सीमान्तमनुव्रज्य, प्रदक्षिणनमस्कारान्विधाय, गृहं प्रविश्य, वामदेव्यं गीत्वा, ब्रह्मार्पणं कुर्यात् ॥

इति श्रीमद्राजाधिराजश्रौतस्मार्तानुष्ठानतत्परोदयप्रतापाद्यादत्तदेववर्म्मसोमयाजिनो निदेशेन सुब्रह्मण्यविदुषा विरचितो मासश्राद्धैकोद्दिष्टप्रयोगः समाप्तः ॥ शुभम् ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

# अथ मासश्राद्धशुद्धिपत्रम् ।

| अशुद्धम् | शुद्धम् | पृष्ठे | पं० |
|---|---|---|---|
| भुर्भु | भूर्भु | ९ | १९ |
| २^<br>आ२३४५ | २^११११<br>आ २३४५ | १० | १ |
| १ २र<br>प्रति | १ २<br>प्रति | ० | ३ |
| र<br>रो३ | २<br>रो३ | ० | १४ |
| १ १<br>हो । हो । | १ १<br>हो । होइ । | ० | १७ |
| १<br>स्वा२<br>१रर<br>ओहोवा | १ ^<br>स्वा२<br>१रर<br>ओहोवा | ११ | ४ |
| ओजो | ओजा | ० | १२ |
| इदह्यनू | इदꣳह्यनू | ० | १५ |
| ३<br>ॐ | ३<br>ओ | १२ | ८ |
| पुष्येर्म | पुष्येम | ० | १० |
| सानोअव्या३ | सानोअव्याइ | ० | १३ |
| १ ३<br>दुहपा | १ २<br>दुहया | ० | १६ |
| शान्धृत्वा | कुशान्धृत्वा | १३ | ५ |
| प्रतिवचम् | प्रतिवचनम् | १९ | ९५ |

इति शुद्धिपत्रम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

# मण्डपपूजादिप्रयोगानुक्रमणिका ।


| विषयाः | पृष्ठे | पं० |
|---|---|---|
| मण्डपपूजाप्रयोगः | १ | • |
| अथ वास्तुशान्तिप्रयोगः | ३ | २१ |
| वास्तुमण्डलचक्रम् | १० | • |
| महागणपतिप्रयोगः | ११ | १ |
| नवग्रह-लोकपाल-दिक्पालपूजाप्रयोगः | १३ | १७ |
| अथ मातृकापूजाप्रयोगः | १५ | २० |
| अथायुष्यशान्तिजपः | १७ | ९ |
| अथ नान्दीश्राद्धप्रयोगः | १९ | १२ |
| अथ हिरण्यश्राद्धम् | ३५ | ६ |
| अथ पुण्याहवाचनप्रयोगः | ३६ | ५ |
| प्रधानसङ्कल्पादि | ४६ | ४ |
| आज्यतन्त्रप्रयोगः | ४७ | १० |
| पञ्चभूसंस्काराः | ४८ | १ |
| प्रार्थनाप्रयोगः | ५६ | १८ |


इत्यनुक्रमणिका ॥

For Private And Personal


Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रीगणेशाय नमः ।

मण्डपरचना ।




# मण्डपपूजादिप्रयोगः ।

अथ मण्डपपूजाप्रयोगः । तच्च तावत्कतिपयानां स्मार्त्तकर्मणां गृहेऽनुष्ठानसम्भवे न मण्डपापेक्षा, येषान्तु न सम्भवति तेषामवश्यं मण्डपापेक्षा । गृहेऽनुष्ठानसम्भवेऽपीच्छया



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मण्डपेऽप्यनुष्ठानम्, निषेधाभावात्। तथा च तन्त्रेषु, पुराणेषु च, दीक्षाप्रकरणे, मूर्त्तिप्रतिष्ठाप्रकरणादौ च, मण्डपनिर्माणं तत्पूजाप्रकारश्च विस्तरेणोक्तः सङ्क्षेपेणाच प्रतिपाद्यते। षोडश द्वादशाष्टौ वा हस्ताः प्रमाणम्। मण्डपः समचतुरस्रः। आग्नेयादिषु चतुर्षु कोणेषु यज्ञीयवृक्षजाश्चत्वारः स्तम्भाः। प्रतिदिशं द्वारम्। प्रतिद्वारं स्तम्भद्वयम्। मध्ये स्तम्भचतुष्टयम्। प्रतिद्वारं तोरणम्। एवमुक्तलक्षणयुतं मण्डपं शिल्पिवरेण निर्माय, मध्यस्तम्भचतुष्टयान्तराले चतुरङ्गुलोन्नतां वेदिकां कुर्यात्। ततो मङ्गलकर्मारम्भदिने तत्पूर्वदिने वा सपत्नीको यजमानो मण्डपं पूजयेत्। तद्यथा। श्वः करिष्यमाणामुककर्माङ्गं मण्डपदेवतास्थापनं पूजनञ्च करिष्ये। ततो वेदिकायामाग्नेयस्तम्भे। ॐ भूर्भुवः स्वः वसुदामावाहयामि। नैर्ऋत्यस्तम्भे। ॐ भूर्भुवः स्वः भद्रामावाहयामि। वायव्यस्तम्भे। ॐ भूर्भुवः स्वः अदितिमावाहयामि। ईशानस्तम्भे। ॐ भूर्भुवः स्वः नन्दामावाहयामि। ततो मण्डपस्याग्नेयकोणस्थस्तम्भमारभ्य प्रादक्षिण्येन पूर्वद्वारस्थदक्षिणस्तम्भपर्यन्तं द्वादशसु स्तम्भेषु वक्ष्यमाणदेवताः स्थापयेत्। ॐ भूर्भुवः स्वः भूतिमावाहयामि ॥१॥ ॐ भूर्भुवः स्वः सरस्वतीमावाहयामि ॥ २ ॥ ॐ भूर्भुवः स्वः पूर्वसन्ध्यामावाहयामि ॥ ३ ॥ ॐ भूर्भुवः स्वः मध्यसन्ध्यामावाहयामि ॥ ४ ॥ ॐ भूर्भुवः स्वः पश्चिमसन्ध्यामावाहयामि ॥ ५ ॥ ॐ भूर्भुवः स्वः गायत्रीमावाहयामि ॥ ६ ॥ ॐ भूर्भुवः स्वः सावित्रीमावाहयामि ॥ ७ ॥ ॐ भूर्भुवः स्वः बृहस्पतिमावा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ह्वयामि ॥ ८ ॥ ॐ भूर्भुवः स्वः अदितिमावाह्वयामि ॥ ९ ॥ ॐ भूर्भुवः स्वः उन्नतामावाह्वयामि ॥ १० ॥ ॐ भूर्भुवः स्वः विनतामावाह्वयामि ॥ ११ ॥ ॐ भूर्भुवः स्वः सिनीवालीमावाह्वयामि ॥ १२ ॥ ततः पश्चिमद्वारेण निर्गत्य पूर्वद्वारतोरणे, सुदृढतोरणाय नमः इति तोरणं सम्पूज्य द्वारशाखयोः, ध्रुवाय नमः । अध्वराय नमः । द्वारदेशे, इन्द्राय नमः । ऋग्वेदाय नमः । इति पूजयेत् । तत आग्नेय्यां दिशि, अग्नये नमः । ततो दक्षिणद्वारतोरणे, सुभद्रतोरणाय नमः । द्वारशाखयोः, सोमाय नमः । आपाय नमः । द्वारदेशे, यमाय नमः । यजुर्वेदाय नमः । नैर्ऋत्यां दिशि, निर्ऋतये नमः । इति पूजयेत । ततः पश्चिमद्वारतोरणे, भीमतोरणाय नमः । द्वारशाखयोः, अनिलाय नमः । अनलाय नमः । द्वारदेशे, वरुणाय नमः । सामवेदाय नमः । वायव्यां दिशि, वायवे नमः । उत्तरद्वारतोरणे, शुभतोरणाय नमः । द्वारशाखयोः, प्रत्यूषाय नमः । प्रभासाय नमः । द्वारदेशे, सोमाय नमः । अथर्ववेदाय नमः, ऐशान्यां दिशि, ईशानाय नमः । ईशानपूर्वयोर्मध्ये, ब्रह्मणे नमः । पश्चिमनिर्ऋतिमध्ये, अनन्ताय नमः । प्राच्याम्, गणेशाय नमः । मण्डपाद्बहिः, रुद्रेभ्यो नम इत्येवमक्षतैः पुष्पैर्वा यथालाभं सम्पूजयेत् । इति मण्डपपूजाप्रयोगः ॥

अथ वास्तुशान्तिप्रयोगः । सा च प्रतिसंवत्सरम् मत्स्यपुराणोक्तकाले कामनया गृहे पत्तने वा कर्त्तव्या । नूतनगृ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



हनिर्माणे गृहप्रवेशात्पूर्वदिने वास्तुशान्तिं कुर्यात् । देवताप्रतिष्ठादिषु, विवाहादिमङ्गलकार्य्येषु च, वास्तुशान्तिः कर्त्तव्येति क्वचित्पुराणेषु तन्त्रेषु च श्रूयते । विवाहादिषु मातृकापूजनदिवसात्पूर्वं कस्मिंश्चिच्छुभे दिने पूजनहोमबल्यात्मिका वास्तुशान्तिर्विस्तरेण कर्त्तव्या । अथवा, वास्तुमण्डले शिख्यादिदेवतापूजनमात्रं वा। अत्र तु देवतापूजनमात्रं लिख्यते । अथ गृहे विवाहमण्डपे वा, ऐशान्यां चतुरङ्गुलोच्छ्रितामेकहस्तामष्टहस्तां वा वेदिकां निर्माय, गोमयेनोपलिप्य, तत्र वास्तुपीठं संस्थाप्य, तत्र कुङ्कुमादिना सुवर्णरजतान्यतमशलाकया नैर्ऋतीमारभ्याग्नेयीपर्य्यन्तामेकां रेखामालिख्य, तत उत्तरं पश्चिममारभ्य प्रागायता अङ्गुलिद्वयान्तराला, अङ्गुलिचतुष्टयान्तराला, अङ्गुल्यन्तराला वा, नव रेखाः समालिखेत् । एवं प्रागायता दशरेखाःसम्पन्नाः । ततो नैर्ऋतीमारभ्योदगायतां वायव्यान्तामेकां रेखामालिख्य ततो दक्षिणमारभ्योदगायता नव तिर्य्यग्रेखास्समालिखेत् । एवमेकाशीतिकोष्ठात्मकं वास्तुमण्डलं भवेत् । रेखाक्रमेण प्रागायतासु दशसु रेखासु शान्तादिदेवता नमोन्तेन चतुर्थ्यन्तेन वा तत्तन्नाम्ना पूजनीयाः। ताश्च देवताः । शान्ता १ यशोवती २ कान्ता ३ विमला ४ प्राणवाहिनी ५ सती ६ सुमती ७ नन्दा ८ सुभद्रा ९ सुमुखा १० । एवं लेखनक्रमेणोदगायतासु दशसु रेखासु दश देवताः पूजनीयाः । ताश्च देवताः । हिरण्या १ सुव्रता २ लक्ष्मीः ३ विभूतिः ४ विमला ५ प्रिया ६ जया ७ ज्वाला ८

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



विशोका ९ विशदा १० । होमपक्षे वास्तुमण्डलस्य पश्चिमभागे कुण्डं स्थण्डिलं वा कुर्य्यात् । ततो वास्तुमण्डले स्वस्वपदे वक्ष्यमाणदेवताः शिख्यादिक्रमेण ब्रह्मादिक्रमेण वा पृथक्पृथगावाह्य, पृथक् समष्ट्या वाऽऽसनाद्युपचारान् दद्यात् । तत्रायं क्रमः । यजमानः स्वयं वाग्यतः शुचिराचम्य, कुशेष्वासीनः कुशपवित्रपाणिः प्राङ्मुखो यज्ञोपवीती प्राणानायम्य, सङ्कल्पं करोति । देशकालौ सङ्कीर्त्त्यायुरारोग्यैश्वर्य्यैहिकामुष्मिकाभीप्सितसकलमनोरथावाप्तये वास्तुसञ्जातसकलदोषापनुत्तये वास्तुमण्डलस्थदेवतापूजां करिष्ये । ततः स्वपुरतः सुगन्धद्रव्यवासितोदकपूरितं पात्रं संस्थाप्य, पुष्पादिभिरलङ्कृत्य, गन्धादिभिरभ्यर्च्य, तज्जलं गङ्गादिमहानदीजलत्वेन विभाव्य, गायत्र्या चाभिमन्त्र्य, तेनोदकेन वास्तुमण्डलमात्मानं पूजाद्रव्याणि च प्रोक्षयेत् । ततस्तत्तत्पदे ब्रह्मादिदेवताप्रतिमास्संस्थाप्य, तत्र ब्रह्मादीन् पूजयेत् । तत्र वास्तुमण्डले ईशानकोष्ठमारभ्य प्रादक्षिण्येन प्रथमपङ्क्तौ द्वात्रिंशत्कोष्ठानि भवन्ति, द्वितीयपङ्क्तौ चतुर्विंशतिकोष्ठानि, तृतीयपङ्क्तौ षोड़शकोष्ठानि, चतुर्थपङ्क्तावष्टौ कोष्ठानि, मध्ये कोष्ठमेकमित्येवमेकाशीतिकोष्ठानि भवन्ति । तत्र प्रथमं मध्यकोष्ठमेकं, तत्परित अष्टौ कोष्ठानि, एतेषु नवसु कोष्ठेषु वास्तोष्पतिं ब्रह्माणं समस्ताभिर्व्याहृतिभिरावाहयेत् । तद्यथा । ॐ भूर्भुवः स्वः वास्तोष्पतिं ब्रह्माणमावाहयामि । एवं सर्वत्र । ततस्तृतीयपङ्क्तौ षोड़शकोष्ठानि । तत्र ईशानकोष्ठाद्दक्षिणकोष्ठं प्रथमत्वेन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



परिकल्प्य प्रादक्षिण्येन षोड़शकोष्ठानि गणयितव्यानि । तत्र प्रथमद्वितीयतृतीयकोष्ठात्मके पदे, ॐ भूर्भुवः स्वः अर्य्यमणमावाहयामि । तत आग्नेयकोणे चतुर्थकोष्ठे, ॐ भूर्भुवः स्वः सवितारमावाहयामि । ततः पञ्चमषष्ठसप्तमकोष्ठत्रयात्मके पदे, ॐ भूर्भुवः स्वः विवस्वन्तमावाहयामि । ततो नैर्ऋतकोणेऽष्टमकोष्ठे, ॐ भूर्भुवः स्वः विबुधाधिपमावाहयामि । तदुत्तरतो नवमदशमैकादशकोष्ठत्रयात्मके पदे, ॐ भूर्भुवः स्वः मित्रमावाहयामि । तत उत्तरे वायव्यकोणे द्वादशे पदे, ॐ भूर्भुवः स्वः राजयक्ष्माणमावाहयामि । ततस्त्रयोदशचतुर्दशपञ्चदशकोष्ठत्रयात्मके पदे, ॐ भूर्भुवः स्वः पृथ्वीधरमावाहयामि । तत उत्तर ईशानकोष्ठे षोड़शपदे, ॐ भूर्भुवः स्वः आपवत्समावाहयामि । अत्र केचित्, "षोड़शकोष्ठात्मिकायामुक्तपङ्क्तावैशानाग्नेयकोणमध्यवर्त्तिकोणत्रयात्मके पदे, अर्य्यमणम् । आग्नेयनैर्ऋतकोणद्वयमध्यवर्त्तिकोणत्रयात्मकदक्षिणपदे, सवितारम् । ततो नैर्ऋतवायव्यकोणमध्यवर्त्तिकोणत्रयात्मकपश्चिमपदे, विवस्वन्तम् । वायव्यैशानकोणद्वयमध्यवर्त्तिकोणत्रयात्मके उत्तरपदे विबुधाधिपम् । ऐशानकोणे आपवत्सम् । आग्नेयकोणे मित्रम् । नैर्ऋतकोणे राजयक्ष्माणम् । वायव्यकोणे पृथ्वीधरमावाहयेत्" इति वदन्ति, यथोचितं विद्वद्भिर्ग्राह्यम् । ततश्चतुर्विंशतिकोष्ठात्मिकायां द्वितीयपङ्क्तौ ऐशानकोणे, ॐ भूर्भुवः स्वः अपमावाहयामि । तत आरभ्य दक्षिणतः सप्तमे पदे आग्नेयकोणे,

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ॐ भूर्भुवः स्वः सावित्रमावाहयामि । तत आरभ्य पश्चात्सप्तमे पदे नैर्ऋत्यकोणे, ॐ भूर्भुवः स्वः जयमावाहयामि । तत आरभ्योत्तरतस्सप्तमे पदे वायव्यकोणे, ॐ भूर्भुवः स्वः रुद्रमवाहयामि । ततः प्रथमपङ्क्तावैशानकोष्ठं प्रथमत्वेन परिकल्प्य तत आरभ्य प्रादक्षिण्येन द्वात्रिंशत्कोष्ठानि परिगणयितव्यानि । ततस्तत्र क्रमेण शिख्यादिदेवताः पूजयेत् । तत्र ऐशानकोणे प्रथमकोष्ठे, ॐ भूर्भुवः स्वः शिखिनमावाहयामि । तद्दक्षिणतो द्वितीयकोष्ठे, ॐ भूर्भुवः स्वः पर्ज्जन्यमावाहयामि । तद्दक्षिणतस्तृतीयकोष्ठे, तदधो द्वितीयपङ्क्तिस्थतृतीयकोष्ठे च, ॐ भूर्भुवः स्वः जयन्तमावाहयामि । ततश्चतुर्थे तदधस्स्थितचतुर्थकोष्ठे च, ॐ भूर्भुवः स्वः इन्द्रमावाहयामि । पञ्चमे तदधश्च, ॐ भूर्भुवः स्वः सूर्यमावाहयामि । षष्ठे तदधश्च, ॐ भूर्भुवः स्वः सत्यमावाहयामि । सप्तमे तदधश्च, ॐ भूर्भुवः स्वः भृशमावाहयामि । अष्टमे, ॐ भूर्भुवः स्वः आकाशमावाहयामि । नवमे आग्नेयकोणे, ॐ भूर्भुवः स्वः वायुमावाहयामि । ततो दक्षिणवीथ्यां दशमे कोष्ठे, ॐ भूर्भुवः स्वः पूषणमावाहयामि । तदधस्तदुत्तरकोष्ठद्वये, ॐ भूर्भुवः स्वः वितथमावाहयामि । तदधस्तदुत्तरकोष्ठद्वये, ॐ भूर्भुवः स्वः गृहक्षतमावाहयामि । तदधस्तदुत्तरकोष्ठद्वये, ॐ भूर्भुवः स्वः यममावाहयामि । तदधस्तदुत्तरकोष्ठद्वये, ॐ भूर्भुवः स्वः । गन्धर्वमावाहयामि । तदधस्तदुत्तरकोष्ठद्वये, ॐ भूर्भुवः स्वः भृङ्गराजमावाहयामि । तदध एक

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



कोष्ठे, ॐ भूर्भुवः स्वः मृगमावाहयामि। ततः पश्चिमवीथ्यां तदधो निर्ऋतिकोणे, ॐ भूर्भुवः स्वः पितृगणमावाहयामि। तदुत्तरकोष्ठे, ॐ भूर्भुवः स्वः दौवारिकमावाहयामि। तदुत्तरकोष्ठे तदूर्ध्वे च, ॐ भूर्भुवः स्वः सुग्रीवमावाहयामि। तदुत्तरकोष्ठे तदूर्ध्वे च, ॐ भूर्भुवः स्वः पुष्पदन्तमावाहयामि। तदुत्तरकोष्ठे तदूर्ध्वे च, ॐ भूर्भुवः स्वः वरुणमावाहयामि। तदुत्तरकोष्ठे तदूर्ध्वे च, भूर्भुवः स्वः असुरमावाहयामि। तदुत्तरकोष्ठे तदूर्ध्वे च, ॐ भूर्भुवः स्वः शेषमावाहयामि। तदुत्तरे, ॐ भूर्भुवः स्वः पापमावाहयामि। तदुत्तरे वायव्यकोणे-ॐ भूर्भुवः स्वः रोगमावाहयामि। तत उत्तरवीथ्यां रोगस्योर्द्ध्वकोष्ठे, ॐ भूर्भुवः स्वः अहिमावाहयामि। तदूर्ध्वं तद्दक्षिणकोष्ठद्वये, ॐ भूर्भुवः स्वः मुख्यमावाहयामि। तदूर्ध्वं दक्षिणकोष्ठद्वये, ॐ भूर्भुवः स्वः भल्लाटमावाहयामि। तदूर्ध्वं दक्षिणकोष्ठद्वये, ॐ भूर्भुवः स्वः सोममावाहयामि। तदूर्ध्वं दक्षिणकोष्ठद्वये, ॐ भूर्भुवः स्वः सर्पमावाहयामि। तदूर्ध्वं तद्दक्षिणकोष्ठद्वये, ॐ भूर्भुवः स्वः अदितिमावाहयामि। तदूर्ध्वकोष्ठे, ॐ भूर्भुवः स्वः दितिमावाहयामि। इत्थं वास्तुमण्डले पञ्चचत्वारिंशद्देवता आवाह्य, मण्डलाद्बहिश्चरक्यादिदेवता आवाहयेत्। मण्डलाद्बहिरैशान्याम्, ॐ भूर्भुवः स्वः चरकीमावाहयामि। ततो मण्डलाद्बहिराग्नेयकोणे, ॐ भूर्भुवः स्वः विदारीमावाहयामि। ततो मण्डलाद्बहिर्निर्ऋ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



त्रिकोणे, ॐ भूर्भुवः स्वः पूतनामावाहयामि । ततो मण्डला-द्बहिर्वायव्यकोणे, ॐ भूर्भुवः स्वः पापराक्षसीमावाहयामि । ततो मण्डलाद्बहिः पूर्वदिशि, ॐ भूर्भुवः स्वः स्कन्दमावाहयामि । ततो मण्डलाद्बहिर्दक्षिणदिशि, ॐ भूर्भुवः स्वः अर्यमणमावाहयामि । ततो मण्डलाद्बहिः पश्चिमदिशि, ॐ भूर्भुवः स्वः जृम्भकमावाहयामि । ततो मण्डलाद्बहिरुत्तरदिशि, ॐ भूर्भुवः स्वः पिलिपिच्छमावाहयामि । ततः पूर्वदिशि, ॐ भूर्भुवः स्वः उग्रसेनमावाहयामि । ततो दक्षिणदिशि, ॐ भूर्भुवः स्वः डामरमावाहयामि । ततः पश्चिमदिशि, ॐ भूर्भुवः स्वः महाकालमावाहयामि । ततो मण्डलाद्बहिरुत्तरदिशि, ॐ भूर्भुवः स्वः अश्विनावावाहयामि । ततः पूर्वदिशि, ॐ भूर्भुवः स्वः गणेशमावाहयामि । ततो दक्षिणदिशि, ॐ भूर्भुवः स्वः दुर्गामावाहयामि । ततः पश्चिमदिशि, ॐ भूर्भुवः स्वः वातमावाहयामि । उत्तरदिशि, ॐ भूर्भुवः स्वः बीभत्समावाहयामि । पुनः पूर्वदिशि, ॐ भूर्भुवः स्वः इन्द्रमावाहयामि । आग्नेयकोणे, ॐ भूर्भुवः स्वः अग्निमावाहयामि । दक्षिणदिशि, ॐ भूर्भुवः स्वः यममावाहयामि । नैर्ऋतकोणे, ॐ भूर्भुवः स्वः निर्ऋतिमावाहयामि । पश्चिमदिशि, ॐ भूर्भुवः स्वः वरुणमावाहयामि । वायव्यकोणे, ॐ भूर्भुवः स्वः वायुमावाहयामि । उत्तरदिशि, ॐ भूर्भुवः स्वः कुबेरमावाहयामि । ईशानकोणे ॐ भूर्भुवः स्वः ईशानमावा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



यामि । ऊर्द्धभागे, ॐ भूर्भुवः स्वः ब्रह्माणमावाहयामि। अधः, ॐ भूर्भुवः स्वः अनन्तमावाहयामि । तत ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इमानि व आसनानि । ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इमानि वः पाद्यानि । ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इमानि वोऽर्घ्याणि । ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इमानि व आचमनीयानि । ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इमानि वः स्नानीयानि । ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इमानि वो वस्त्राणि । ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इमानि वो यज्ञोपवीतानि । ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इमे वो गन्धाः । ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इमानि वः पुष्पाणि । ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इमे वो धूपाः । ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इमे वो दीपाः । ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इमानि वो नैवेद्यानि । ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इमानि वो नैवेद्यान्त आचमनीयानि । ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इमानि वस्ताम्बूलानि । ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इमानि वः सुवर्णपुष्पाणि । ॐ भूर्भुवः स्वः ब्रह्मादयो देवा इदं वो नीराजनम् । ॐ भूर्भुवः स्वः ब्रह्मादयो देवा अयं वः पुष्पाञ्जलिः । ततः प्रदक्षिणनमस्कारस्तोत्राणि विधाय प्रार्थयेत । ततः प्रणवव्याहृतिभिरावाहनक्रमेण प्रातिलोम्येन वा देवता उद्वासयेत् । इति-वास्तुपूजाप्रयोगः ॥

For Private And Personal

# अथ वास्तुमण्डलचक्रं लिख्यते।

ब्रह्माणं पूर्वा

ऐशानी — आग्नेयी

इन्द्रं
गणेशं
उग्रसेनं
स्कन्दं

ईशानं चरकीं — अग्निं विदारीं

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| शिखिनं | पर्ज्जन्यं | जय | इं | सू | स | भ | आकाशं | वायुं |
| दितिं | आपं | न्तं | द्रं | र्यं | त्यं | शं | सावित्रं | पूषणं |
| अ | दितिं | आपवत्सं | अर्य्य | म | णं | सवितारं | वित | थं |
| स |  | पृथ्वी |  |  |  | विव |  | गृह | क्षतं |
| सो | मं | धरं |  | वास्तोष्पतिं ब्रह्माणं |  | स्वन्तं | य | मं |
| भल्ला | टं | अ |  |  |  | अ | गन्ध | र्वं |
| मु | ख्यं | राजयक्ष्माणं | मि | त्र | म | विबुधाधिपं | भृंग | राजं |
| अहिं | रुद्रं | शो | असु | वरु | पुष्प | सुग्री | जयं | मृगं |
| रोगं | पापं | षं | रं | णं | दन्तं | वं | दौवारिकं | पितृगणं |

उत्तरा — कुबेरं शैलमल्लं अदितिं पिलिपिच्छं

दक्षिणा — यमं जम्भं [illegible]

वायुं पापराक्षसीं — निर्ऋतिं पूतनां

जंभकं
महाकालं
वातं
वरुणं

अनन्तम्

वायवी — नैर्ऋती

पश्चिमा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अथ महागणपतिपूजाप्रयोगः । तत्र तावत्सर्वेषां स्मार्त्तकर्मणां बहिर्भूतमन्तर्भूतं चेति द्विविधमङ्गम् । तत्र तत्तत्कर्मसङ्कल्पप्रभृति कर्मसमाप्तिपर्यन्तं सूत्रोक्तं यदङ्गजातं तदन्तर्भूतमन्तरङ्गम् । यत्कर्म सङ्कल्पात्पूर्वं सूत्रेण विहितमाभ्युदयिकश्राद्धं वायव्यपशुबन्धत्रेधातवीयेष्ट्यादिवत् पौराणिकदेशकुलाचारप्रसिद्धगणेशपूजादिकञ्च बहिर्भूतमङ्गं बहिरङ्गम् । उभयोरप्यनुष्ठानस्यावश्यकत्वेन सैाचाङ्गानां सूत्रकारेणैवेतिकर्त्तव्यताया उक्तत्वान्महागणपतिपूजनस्याविहितत्वेऽपि तत्पूजनस्य करिष्यमाणकर्मणः निर्विघ्नपरिसमाप्तयेऽवश्यानुष्ठेयत्वेन तत्पूजनप्रयोगः सङ्क्षेपेण प्रदर्श्यते । तत्र "व्यस्ताभिः समस्ताभिर्व्याहृतिभिरावाहनादिकं" बोधायनेनोक्तम् । "वैनायकसामभिः पूजनं" छन्दोगब्राह्मणे तावदाम्नातम् । अन्ये तु "गणानान्त्वेतिमन्त्रेण पूजनं" कुर्वन्ति । परे तु "तत्तन्नाममन्त्रेण पूजनं" कुर्वन्ति । तत्रादो यजमानः सुस्नातः कृतपूर्वाह्निकक्रियः समलङ्कृतः पत्न्या सह कुशपवित्रपाणिर्दर्भेष्वासीनः प्राङ्मुखो विघ्नेशकुलदेवतादीन् ध्यायेत् । तद्यथा । यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथाऽन्ये । विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशनाय ॥ १ ॥ विघ्नध्वान्तनिवारणैकतरणिर्विघ्नाटवीहव्यवाट् विघ्नव्यालकुलोपमर्द्दगरुडो विघ्नेभपञ्चाननः । विघ्नोत्तुङ्गगिरिप्रभेदनपविर्विघ्नाब्धिकुम्भोद्भवो विघ्नाघोघघनप्रचण्डपवनो विघ्नेश्वरः पातु नः ॥ २ ॥ या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता या वीणावरदण्डमण्डित-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



करा या श्वेतपद्मासना। या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैस्सदा वन्दिता सा मां पातु सरस्वती भगवती निश्शेषजाड्यापहा॥ ३॥ तदेवलग्नं सुदिनं तदेव ताराबलञ्चन्द्रबलं तदेव । विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥ ४ ॥ लक्ष्मीनारायणाभ्यां नमः । उमामहेश्वराभ्यां नमः । शचीपुरन्दराभ्यां नमः । वाणीहिरण्यगर्भाभ्यां नमः । मातापितृभ्यां नमः । इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः । वास्तुदेवताभ्यो नमः । ग्रामदेवताभ्यो नमः । स्थानदेवताभ्यो नमः । सर्वेभ्यो देवेभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमः । इत्येवं ध्यात्वा, प्राणानायम्य, देशकालौ सङ्कीर्त्य, करिष्यमाणस्यामुककर्मणः निर्विघ्नपरिसमाप्तिकामो महागणपतिपूजां करिष्ये । ततो गोमयेनोपलिप्ते स्थण्डिले प्रतिमायामक्षतपुञ्जे फले वा गणेशमावाहयेत् । तद्यथा । स्वपुरतः पात्रस्थमुदकं गायत्र्याऽभिमन्त्र्य, तेनोदकेनात्मानं पूजाद्रव्याणि च प्रोक्षयेत् । ततः कराभ्यां पुष्पाण्यादाय, ॐ भूः अस्मिन् बिम्बे महागणपतिमावाहयामि । ॐ भुवः महागणपतिमावाहयामि । ॐ स्वः महागणपतिमावाहयामि । ॐ भूर्भुवः स्वः महागणपतिमावाहयामीत्यावाह्य प्रणवव्याहृतिभिरासनाद्युपचारान्दद्यात् । तद्यथा । ॐ भूर्भुवः स्वः महागणपते इदं ते आसनं । आस्यताम् । ततः पूर्वोक्तमन्त्रमुच्चार्य्य महागणपते स्वागतम् । महागणपते इदं ते पाद्यम्। इदं तेऽर्घ्यम्। इदं ते आचमनीयम्। इदं ते स्नानीयमुदकम् । स्नानान्ते पुनराचमनीयम् । इदं ते

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वस्त्रयुगम् । इमानि ते आभरणानि । इदं ते यज्ञोपवीतम् । अयन्ते गन्धः । इमानि ते पुष्पाणि । अयं ते धूपः । अयं ते दीपः । इदं ते नैवेद्यम् । इदं ते नैवेद्यान्ते आचमनीयम् । इदं ते ताम्बूलम् । इदं ते सुवर्णपुष्पम् । इदं ते कर्पूरनीराजनम् । अयं ते पुष्पाञ्जलिः । पुष्पाञ्जलिमन्त्रो यथा । ॐ राजाधिराजाय प्रसह्यसाहिने नमो वयं वैश्रवणाय कुर्महे । स मे कामान् कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु कुबेराय वैश्रवणाय महाराजाय नमः ॥ १ ॥ प्रदक्षिणनमस्कारस्तोत्राणि विधाय प्रार्थयेत् । प्रार्थनामन्त्रो यथा । वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ । अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ १ ॥ अनया पूजया श्रीमहागणपतिः प्रीणातु । ततो व्यस्ताभिस्समस्ताभिर्महाव्याहृतिभिर्महागणपतिमुद्वासयेत् । प्रयातु भगवान् महागणपतिः शोभनार्थं पुनरागमनाय। अथवा, करिष्यमाणकर्मसमाप्तिपर्यन्तं प्रत्यहं महागणपतिं विधिवदाराध्य कर्मान्ते उद्वासयेत् ॥ इति महागणपतिपूजाप्रयोगः ॥

अथ नवग्रह-लोकपाल-दिक्पाल-सामान्यपूजाप्रयोगः। तच्च नवग्रहपूजनं नवग्रहयज्ञाङ्गं, तच्च बोधायनादिभिरुक्तम् । अत्र तु नवग्रहपूजनमात्रं मङ्गलकर्माङ्गत्वेन लिख्यते । तन्महागणपतिपूजनानन्तरं कर्त्तव्यम् । तद्यथा । यजमानः प्राणानायम्य, कुशपवित्रपाणिर्देशकालौ सङ्कीर्त्य, करिष्यमाणस्यामुकशुभकर्मणः प्रारम्भकर्मापेक्षयाऽशुभस्थानेषु स्थितानां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ग्रहाणां प्रातिकूल्यनिवृत्तये नवग्रहपूजनं, तथा च यथोक्तशुभफल-प्राप्त्यर्थं लोकपालदिक्पालपूजनञ्च करिष्ये इति सङ्कल्प्य, ततः स्वपुरतो वेदिकायां धान्यपुञ्जेषु फलेषु वा, पूर्वलिखिते सकेसरेऽष्टदले पद्मे। मध्ये, भास्करम्। दक्षिणे, भौमम्। उत्तरे, गुरुम्। ईशाने, बुधम्। पूर्वे, भार्गवम्। आग्नेये, सोमम्। पश्चिमे, शनिम्। नैर्ऋते, राहुम्। वायव्ये, केतुम्। एवं याज्ञवल्क्योक्तक्रमेण भास्करादीनावाह्य क्रमेण पूजयेत्। तद्यथा। ॐ भूर्भुवः स्वः भास्करमावाहयामि। एवं चन्द्राङ्गा-रकबुधबृहस्पतिशुक्रशनिराहुकेतूनामावाहनमूह्यम्। ततस्तत-स्तेषु दिक्षु लोकपालपूजनम्। पूर्वे। ॐ भूर्भुवः स्वः उग्रसे-नमावाहयामि। दक्षिणे। ॐ भूर्भुवः स्वः डामरमावाहयामि। पश्चिमे। ॐ भूर्भुवः स्वः महाकालमावाहयामि। उत्तरे। ॐ भूर्भुवः स्वः अश्विनावावाहयामि। ततः पूर्वस्यां दिशि। ॐ भूर्भुवः स्वः इन्द्रमावाहयामि। आग्नेय्यां। ॐ भूर्भुवः स्वः अग्निमावाहयामि। दक्षिणस्यां। ॐ भूर्भुवः स्वः यममा-वाहयामि। नैर्ऋत्यां। ॐ भूर्भुवः स्वः निर्ऋतिमावाहयामि। पश्चिमायां। ॐ भूर्भुवः स्वः वरुणमावाहयामि। वायव्यां। ॐ भूर्भुवः स्वः। वायुमावाहयामि। उत्तरस्यां। ॐ भूर्भुवः स्वः। कुबेरमावाहयामि। ऐशान्यां। ॐ भूर्भुवः स्वः ईशानमावा-हयामि। पूर्वेशानयोर्मध्ये। ॐ भूर्भुवः स्वः ब्रह्माणमावाह-यामि। पश्चिमनिर्ऋतिमध्ये। ॐ भूर्भुवः स्वः अनन्तमावा-हयामि। ॐ भूर्भुवः स्वः भास्करादयो देवाः सुप्रतिष्ठिताः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सन्तु । तत ॐ भूर्भुवः स्वः भास्करादयो देवा इमानि व आसनानि । ॐ भूर्भुवः स्वः भास्करादयो देवा इमानि वः पाद्यानि । ॐ भूर्भुवः स्वः भास्करादयो देवा इमानि वोऽर्घ्याणि । ॐ भूर्भुवः स्वः भास्करादयो देवा इमानि व आचमनीयानि । ॐ भूर्भुवः स्वः भास्करादयो देवा इमानि वः स्नानीयानि । ॐ भूर्भुवः स्वः भास्करादयो देवा इमानि वो वस्त्राणि । ॐ भूर्भुवः स्वः भास्करादयो देवा इमानि वो यज्ञोपवीतानि । ॐ भूर्भुवः स्वः भास्करादयो देवा इमे वो गन्धाः । ॐ भूर्भुवः स्वः भास्करादयो देवा इमानि वः पुष्पाणि । ॐ भूर्भुवः स्वः भास्करादयो देवा इमे वो धूपाः । ॐ भूर्भुवः स्वः भास्करादयो देवा इमे वो दीपाः । ॐ भूर्भुवः स्वः भास्करादयो देवा इमानि वो नैवेद्यानि । ॐ भूर्भुवः स्वः भास्करादयो देवा इमानि वो नैवेद्यान्त आचमनीयानि । ॐ भूर्भुवः स्वः भास्करादयो देवा इमानि वः ताम्बूलानि । ॐ भूर्भुवः स्वः भास्करादयो देवा इमानि वः सुवर्णपुष्पाणि । ॐ भूर्भुवः स्वः भास्करादयो देवा इदं वो नीराजनम् । ॐ भूर्भुवः स्वः भास्करादयो देवा अयं वः पुष्पाञ्जलिः । ततः प्रदक्षिणनमस्कारस्तोत्राणि विधाय प्रार्थयेत् ॥ इति नवग्रह-लोकपाल-दिक्पाल-पूजाप्रयोगः ॥

अथ मातृकापूजाप्रयोगः । स च शुभकर्मारम्भदिवसस्य पूर्वेद्युः प्रातरभ्युदयश्राद्धात्पूर्वमेव कर्त्तव्यः । ताश्च मातरः कर्मप्रदीपोक्ताः । गौरी । १ । पद्मा । २ । शची । ३ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मेधा । ४ । सावित्री । ५ । विजया । ६ । जया । ७ । देवसेना । ८ । स्वधा । ९ । स्वाहा । १० । 'मातरो' लोकमातरः । धृतिः । ११ । पुष्टिः । १२ । तथा तुष्टिः । १३ । आत्मदेवतया सह । गणेशेनाधिका ह्येता वृद्धौ पूज्याश्चतुर्दश । 'आत्मदेवता' कुलदेवतेत्यर्थः । १४ । एतासां मातॄणां पूजनं समस्ताभिर्व्याहृतिभिर्महागणपतिपूजनवत्कर्त्तव्यम् । तद्यथा । देशकालौ सङ्कीर्त्त्यामुककर्माङ्गत्वेन मातृकापूजनं करिष्ये इति सङ्कल्प्य, पटप्रतिमाक्षतपुञ्जान्यतमेषु मातॄर्यजेत् । ततश्शुद्धोदकपूरितं पात्रं स्वपुरतस्संस्थाप्य, गायत्र्याऽभिमन्त्र्य, तेनोदकेन पूजाद्रव्याण्यात्मानं च प्रोक्षयेत् । ॐ भूर्भुवः स्वः गौरीमावाहयामि । ॐ भूर्भुवः स्वः पद्मामावाहयामि । ॐ भूर्भुवः स्वः शचीमावाहयामि । ॐ भूर्भुवः स्वः मेधामावाहयामि । ॐ भूर्भुवः स्वः सावित्रीमावाहयामि । ॐ भूर्भुवः स्वः विजयामावाहयामि । ॐ भूर्भुवः स्वः जयामावाहयामि । ॐ भूर्भुवः स्वः देवसेनामावाहयामि । ॐ भूर्भुवः स्वः स्वधामावाहयामि । ॐ भूर्भुवः स्वः स्वाहामावाहयामि । ॐ भूर्भुवः स्वः धृतिमावाहयामि । ॐ भूर्भुवः स्वः पुष्टिमावाहयामि । ॐ भूर्भुवः स्वः तुष्टिमावाहयामि । ॐ भूर्भुवः स्वः कुलदेवतामावाहयामि । ॐ भूर्भुवः स्वः गौर्याद्या मातरो व इमान्यासनानि । एवमन्येऽपि महागणपतिपूजोक्तोपचाराः कर्त्तव्याः । ततो भित्तौ, वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्ष–इतिमन्त्रेण

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पञ्च सप्त वा घृतधाराः पातयेत् । एतमुत्यमिति साम्ना वा । अस्य साम्नः ककुभ ऋषिरुष्णिक्छन्दोऽग्निर्देवता वसोर्धाराकरणे विनियोगः । एतमुत्यं मदच्युतꣳसहस्रधारं वृषभंदिवोदुहम् । विश्वावसूनि बिभ्रतम् ॥ ततः प्रदक्षिणनमस्कारस्तोत्राणि विधाय सम्प्रार्थ्योद्वासयेत् । तत्र प्रार्थनामन्त्रः । कुर्वन्तु मातरस्सर्वा गौर्याद्या मम मङ्गलम् । लक्ष्मीं तन्वन्तु मङ्गल्ये शुभकार्याणि सर्वदा ॥ ॐ भूर्भुवः स्वः गौरीमुद्वासयामि । एवमन्या मातॄः पृथक्पृथगुद्वासयेत् । इति मातृकापूजाप्रयोगः ॥

अथायुश्शान्तिजपः । ओम् । अबोधिया । ग्नायिस्समिधाजना२नाम् । प्रतायिधे३नुम् । इवायतीमुषासम् । यह्वाइ३वा । प्रवा२यामुज्जिहानाः । प्रभाना२३वाः । सस्रतेनाकमच्छ । इडा२३भा३४३ । ओ२३४५ इ । डा ॥ १ ॥ महायिन्द्रा२३४यिणाम् । अवा२रस्तु । द्युम्नमा२३४इत्रा । स्या२यम्मणाः । दुराधा२३४र्षाम् । वरौहो२३४ । वा । णा२स्योर्ईहायि ॥ २ ॥ महिचीणामवरस्तूईण । द्युम्नम्मित्रस्यार्यम्णाः । दुराधा२३षाम् । वरौहो२ । हुम्मा२ । ण । स्यो२या२३४औहोवा । हाओवा । ओवा२३४५ ॥ ३ ॥ त्वावतो३ । हौ३हो३१यि । पुरूवसो३ । हौ३हो३१यि । वयमिन्द्रा३ । हौ३हो३१यि । प्रणेताऽ३ः । हौ३हो३१यि । स्मसिस्स्थाताऽ३ः । हौ३हो३१यि ।



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



हरीणा३म् । हौ३हो३१२३४५इ । डा ॥ ४ ॥ इद्रन्ना२३४रो ।
नेमाधा२३४यिता । हवन्ता२३यि । यत्पारा२३४याः ।
यूनाजा२३४तायि । धियास्ता२३ः । शूरोना२३४षा ।
तास्रावा२३४साः । चकामा२३यि । आगोमा२३४ती ।
व्रजायिभा२३४जा । त्वन्ना३ऊवा३ । ए३ । आयू२३४५ः ॥ ५ ॥
त्यमूषु । वाजि । ना२३४५म् । देवजूता२३४म् । सहोवानन्ता ।
रुता३ । र२रथानाम् । अरिष्टना२३४यिमीम् । पृतना३४३-
जमाशुम् । स्वस्त । यायि । ताक्ष्यमिहा३४३ । हुवापूयि-
मा६५६ ॥ ६ ॥ इयइया३हायि । त्यमूषुवाजिना३न्द३वजूतं ।
इ४यइया । हा२३४यि । सहोवानन्ता । रुता३ । र२-रथानाम् ।
इयइया३हायि । अरिष्टा३ । नायि । मी३म्पृत । नाजमाशुम् ।
इ४यइया । हा२३४५यि । स्वस्त । यायि । ताक्ष्यमिहा३४३ ।
हुवापूयिमा ६५६ ॥ ७ ॥ त्रातारमिन्द्रमविता । रमी२३-
न्द्राम् । हवेहवेसुहव२शू । रमी२३न्द्राम् । हुवायिनुशक्रम्पुरुहू ।
तमी२३न्द्राम् । इद२स्वस्तिनोमघवा । वा३४३यि । तु३वापू-
यिन्द्राई६५६ः ॥ ८ ॥ सोमःपुना । हो । नऊर्म्मिणाई९ ।
अव्यंवारंविधा१वा३ती । अग्रेवा२३४५ । चा २३४५ः ।
पवमा२३ नाइ । का२ना२३४औहोवा । क्रदे२३४५ ॥ ९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



४ ५ १२ २ २ऽ १ –१ – २२ १ २
सासू । न्वेयोवसू२३नाम् । योरा२यामा२ । नेतायद्दुडा२३नाम् ।
१ २ १ २१ ५ ५ २ऽ
सो२३मा: । यः सुच्चिता२३४यिनोईद्दायि ॥ १० ॥ हाउ-
ऽ ऽ १ २२ २ १ २ २ १२ २ २ऽ ऽ
हाउहाउवा । विश्वस्वतोदावन्विश्वस्वतोनआभर । हाउहाउ-
ऽ १ २ २ १२ २२ २ऽ ऽ ऽ १२
हाउवा । यन्त्वाशविष्ठमीमहे । हाउहाउहाउवा । आयुः ।
२ २ऽ ऽ १ २ऽ ऽ ऽ १२
हाउ हाउ हउवा । सुवः । हाउ हाउ हाउवा । ज्योतिः ।
२ऽ ऽ ऽ ३ १ १ १ १ २२ २ऽ २
हाउ हाउ हाउवा३ । ई२३४५ ॥ ११ ॥ हाउ हाउ हाउ ।
१२ २ २२ १ २ १ २ १ २ २ १
आयुश्चक्षुर्ज्योतिः । औहोवा । ईया । उदुत्तमंवरुणपाशमा२३-
२ १२ २ १ २ १ २ २ २ १
स्मात् । अवाधमंविमध्यमꣳश्रथा२३या । अथादित्यव्रतेवय-
२ २ २ १ २ २ २ १ २ २२ २
न्ता२३वा । अनागसोअदितयेसिया२३मा३ । हाउ हाउ
२ १२ २ २२ १ २ १ ३
हाऊ । आयुश्चक्षुर्ज्योतिः । औहोवा । ई२ । या२३४ ।
५२ २ ३ १ १ १ १
औहोवा । ई२३४५ ॥ १२ ॥ इत्यायुष्यशान्तिजपः ॥

अथ नान्दीश्राद्धप्रयोगः । ततो मध्यान्हात्पूर्वं शुभकर्म्मारम्भपूर्वदिवसे नान्दीश्राद्धं कुर्यात् । तत्प्रयोगो गोभिलसूत्रे चतुर्थप्रपाठके, "वृद्धिपूर्त्तेषु युग्मानाशयेत्प्रदक्षिणमुपचारा यवैस्तिलार्थं" इति सूत्रेण सङ्गृहेणोक्तः । अस्यायमर्थः । वृद्धिर्ज्जातकर्म्मादिका, पूर्त्तानि शान्तिपौष्टिकदेवतास्थापनादीनि । तेषु कर्म्मस्वादौ प्रकृतत्वात्पित्राद्यर्थं युग्मान् ब्राह्मणान्भोजयेदासनाद्युपचाराः प्रादक्षिण्येन कर्त्तव्याः, तिलार्थे यवैरिति । अन्यत्सर्वं "मासश्राद्ध"वत्कार्यम् । नाच प्राचीनावीती ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तृप्तिप्रश्ने सम्पन्नमिति ब्रूयात्। अस्तु सम्पन्नमिति प्रतिवचनम्। नात्र पितृतीर्थं। उदगग्रा युग्मा ऋजवः कुशाः। पातितदक्षिणजानुरेवमादयो धर्माः कर्मप्रदीपोक्ता ग्राह्याः। गोभिलीयश्राद्धकल्पेऽपि। "अथाभ्युदयिके श्राद्धे युग्मानाशयेत्प्रदक्षिणमुपचारा, ऋजवो दर्भा, यवैस्तिलार्थं, सम्पन्नमिति तृप्तिप्रश्ने, दधिबदराक्षतमिश्राः पिण्डाः, नान्दीमुखाः पितरः प्रीयन्तामित्यक्षय्यस्थाने, नान्दीमुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यः, मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च, स्वाहेत्युच्यतां। न स्वधां प्रयुञ्जीत। श्रद्धान्वितः श्राद्धं कुर्वीत शाकेनापि। तत्र पित्रादित्रयं मातामहादित्रयञ्च देवताः" ॥ अतः परं प्रयोगोऽपि लिख्यते। तत्राभ्युदयश्राद्धपूर्वदिने रात्रौ सायमौपासनानन्तरं ब्राह्मणानामन्त्रयेत्। तद्यथा। अमुकगोत्राणां नान्दीमुखानां पितृपितामहप्रपितामहानाममुकामुकशर्म्मणाममुककर्माङ्गमाभ्युदयिकश्राद्धं श्वो भविष्यति तत्र सत्यवसुसञ्ज्ञकेभ्यो विश्वेभ्यो देवेभ्यो भवता क्षणः कर्त्तव्यः। ॐ तथेति प्रतिवचनम्। प्राप्नोतु भवानिति कर्त्ता। प्राप्नवानीतीतरः। अथवा दक्षक्रतुसञ्ज्ञकेभ्यो विश्वेभ्यो देवेभ्य इति स्मृत्यन्तरम्। अथ पित्रादीनां षण्णां प्रत्येकमेकं, द्वौ, चतुरो वा वृणुयात्। अथवा पित्राद्यर्थमेकं, द्वौ वा, मातामहाद्यर्थमेकं, द्वौ वा, वृणुयात्। अत्र तु देवार्थे एकः पित्राद्यर्थं मातामहाद्यर्थं चैक इतीमं जघन्यं पक्षमाश्रित्य प्रयोगः। स यथा। अमुकगोत्राणामित्यारभ्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



आभ्युदयिकं श्राद्धं श्वो भविष्यतीत्यन्तमुक्त्वा, तत्र नान्दीमुखेभ्यः पितृपितामहप्रपितामहेभ्यो भवता क्षणः कर्त्तव्यः । अमुकगोत्राणामित्यारभ्याभ्युदयिकश्राद्धं श्वो भविष्यतीत्यन्तमुक्त्वा, तत्र नान्दीमुखेभ्यो मातुः पितृपितामहप्रपितामहेभ्यो भवता क्षणः कर्त्तव्यः । ततः कर्त्ता भोक्ता च ग्राम्यधर्मादीन् वर्ज्जयेत् । श्राद्धदिने प्रातर्वा निमन्त्रणम् । ततः श्राद्धाङ्गस्नानं कृत्वा, स्नातान् पूर्वं निमन्त्रितान् ब्राह्मणान् समाहूय, प्रक्षालितपाणिपादान् कृताचमनान् प्राङ्मुखानुदक्संस्थानुदगग्रकुशासनेषूपवेश्य, कर्त्ता दर्भेष्वासीनः कुशपवित्रपाणिर्यवानादाय, देवताभ्यः पितृभ्यश्चेति त्रिरुक्त्वा, सत्यवसुसञ्ज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नम इत्यभ्यर्च्चयेत् । मन्त्रस्तु । देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वाहायै स्वधायै नित्यमेव नमोनमः ॥ सत्यवसुसञ्ज्ञकेभ्यो विश्वेभ्यो देवेभ्य इदमासनमित्यासनदक्षिणभागे कुशान् दद्यात् । ततः पातितदक्षिणजानुरुदङ्मुखोऽमुकगोत्राणां नान्दीमुखानां पितृपितामहप्रपितामहानाममुकामुकशर्म्मणाममुकगोत्राणां नान्दीमुखानां मातुः पितृपितामहप्रपितामहानाममुकामुकशर्म्मणां प्रीत्यर्थममुकशर्म्मणः पुत्रस्यामुककर्म्माङ्गमाभ्युदयिकश्राद्धमद्य भवति तत्र सत्यवसुसञ्ज्ञकेभ्यो विश्वेभ्यो देवेभ्यो भवता क्षणः कर्त्तव्यः । एवं पित्रादीनां मातुः पित्रादीनामप्यासनं दत्वा वरणं कुर्य्यात् । ततो ब्राह्मणानां दक्षिणत उदङ्मुखो युग्मपवित्रपाणिर्दर्भेष्वासीनो दर्भान्धारयमाणः सङ्कल्पं करोति । स च यथा । देशकालौ

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सङ्कीर्त्त्यामुकगोत्राणां नान्दीमुखानां पितृपितामहप्रपितामहानाममुकामुकशर्म्मणाममुकगोत्राणां नान्दीमुखानां मातुः पितृपितामहप्रपितामहानाममुकामुकशर्म्मणां प्रीत्यर्थममुककर्म्माङ्गमाभ्युदयिकश्राद्धं सम्भवता नियमेन, सम्भवदुपचारैः, सम्भवत्या दक्षिणया, यथा सम्भवं पार्वणविधानेन करिष्ये इति सङ्कल्पः। ततो यवानादयोङ्कारं कृत्वा विश्वान्देवानावाहयिष्ये इति पृच्छति। ओमावाहयेत्यनुज्ञातः विप्रस्य दक्षिणजानु स्पृष्ट्वा विश्वेदेवास आगत इत्यावाहयेत्। विश्वेदेवास आगत शृणुताम इमᳯ हवम्। एदं बर्हिर्निषीदत॥ विश्वेदेवाः शृणुतेमᳯ हवं मे ये अन्तरिक्षे य उपद्यविष्ठ। ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम्॥ ओषधयः संवदन्ते सोमेन सह राज्ञा। यस्मै कृणोति ब्राह्मणस्तᳯ राजन् पारयामसि॥ सत्यवसुसञ्ज्ञकान् विश्वान्देवान् भवत्स्वावाहयामीति यवान् ब्राह्मणस्य पुरतः प्रक्षिपेत्। ततो यवानादाय नान्दीमुखान् पितॄनावाहयिष्य इति पृष्ट्वा, ओमावाहयेत्यनुज्ञातो विप्रस्य दक्षिणजानु स्पृष्ट्वा, उशन्तस्त्वा निधीमह्युशन्तस्समिधीमहि। उशन्नुशत आवह पितॄन् हविषे अत्तवे॥ एत पितरस्सोम्यासो गम्भीरेभिः पथिभिः पूर्विणेभिः। दत्तास्मभ्यं द्रविणेह भद्रᳯ रयिञ्च नः सर्ववीरं नियच्छत॥ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः। अस्मिन्यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान्॥ अमुकगोत्रान् पितृपितामहप्रपितामहानमुका-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मुकशर्मण आवाहयिष्य इति पृष्ट्वा, पितृब्राह्मणस्य पुरतो यवान् प्रक्षिपेत् । पूर्ववन्मन्त्रान्तेऽमुकगोत्रान् नान्दीमुखान् पितृपितामहप्रपितामहानमुकामुकशर्मणो भवत्यावाहयामीत्युक्त्वोन्मुच्य दक्षिणजानु पुरतो यवान् प्रक्षिपेदपहता इतिमन्त्रेण । ततः पुनर्यवानादायामुकगोत्रान्नान्दीमुखान्मातुः पितृपितामहप्रपितामहानमुकामुकशर्मण आवाहयिष्य इति पृष्ट्वा, आवाहयेत्यनुज्ञातः पूर्ववत्कुर्यात् । मन्त्रः । अपहता असुरा रक्षांसि वेदिषदः ॥ ततो यज्ञीयवृक्षचमसेषु वा सौवर्णराजतौदुम्बरमणिमयपात्रान्यतमेषु वा पत्रपुटेषु वा ऽर्घ्यं गृह्णाति । तद्यथा । देवानां पात्रद्वयं पृथक्पङ्क्तौ उदगग्रकुशेषु संस्थाप्य, ततः पूर्वपङ्क्तावुदगग्रकुशेषु पित्रादीनामुदक्संस्थानि त्रीणि पात्राणि संस्थाप्य, तत्पूर्वतो मातामहादीनां त्रीणि पात्राणि पूर्ववदासादयेत् । प्रतिपात्रं द्वे द्वे पवित्रे निधाय, तेषु पवित्रान्तर्हितेषु सकुशा अप आसिञ्चति शन्नोदेवीरितिमन्त्रेण। अस्य प्रजापतिर्ऋषिर्गायत्रीछन्द आपो देवता अपामासेचने विनियोगः । ॐ शन्नो देवीरभिष्टये शन्नो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥ यवोऽसीतिमन्त्रेण यवान् प्रक्षिपेत् । ॐ यवोऽसि यवयास्मद्द्वेषो यवयारातीः ॥ कुशैः प्रच्छादयेत् । ततः शन्नोदेवीरितिमन्त्रेण पितृपात्रं जलेन पूरयित्वा, यवोसीति मन्त्रेण यवान् प्रक्षिपेत् । मन्त्रश्च । यवोसि वरुणदैवत्यो गोसवो देव निर्मितः । प्रत्नमद्भिः प्रत्तः स्वाहया नान्दीमुखान् पितृनिमाल्लोकान् प्रीणयाहि नः स्वाहा ॥ प्रतिपात्रं मन्त्रा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वृत्तिः। कुशैः प्रच्छादयेत्। प्रत्यर्घ्यपात्रं चन्दनादिभिरर्चयेत्। ततो देवकरे शुद्धोदकं निनीयार्घ्यपात्रस्थितपवित्रे प्रागग्रे तद्धस्ते निधाय, हस्तद्वयेनार्घ्यमादाय, या दिव्या आप इतिमन्त्रान्ते गोत्रादिकमुक्त्वा देवकरे दद्यात्। मन्त्रो यथा। या दिव्या आपः पयसा सम्बभूवुर्या अन्तरिक्ष उत पार्थिवीर्याः। हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः शंस्योनाः सुहवा भवन्तु॥ अमुकगोत्राणां नान्दीमुखानां पितृपितामहप्रपितामहानाममुकामुकशर्मणाममुकगोत्राणां नान्दीमुखानां मातुः पितृपितामहप्रपितामहानाममुकामुकशर्मणाममुककर्माङ्गमाभ्युदयिकश्राद्धे सत्यवसुसञ्ज्ञका विश्वेदेवा एतद्वोऽर्घ्यमिति देवहस्तेऽर्घ्यं दद्यात्। अस्त्वर्घ्यमिति भोक्ता प्रतिदेवत्। पुनः शुद्धोदकं दत्वा, पवित्रमादायार्घ्यपात्रे स्थापयेत्। पितृहस्ते शुद्धोदकं दत्वा,पित्रर्घ्यपात्रस्थपवित्रमादाय, पितृहस्ते प्रागग्रं तत्पवित्रं निधाय, हस्तद्वयेन तदर्घ्यपात्रं गृहीत्वा, या दिव्या आप इतिमन्त्रान्ते.मुकगोत्राणामित्यारभ्यामुककर्माङ्गमाभ्युदयिकश्राद्धे इत्यन्तमुक्त्वाऽमुकगोत्र नान्दीमुख पितरमुकशर्मन्नेतत्तेऽर्घ्यं ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वाहेत्यर्घ्यं दद्यात्। अस्त्वर्घ्यमिति भोक्तुः प्रतिवचनम्। पूर्ववच्छुद्धोदकदानाद्यर्घ्यपात्रपवित्रस्थापनान्तं कर्म कुर्यात्। अप उपस्पृश्य, एवं पितामहप्रपितामहयोरपि तत्तदर्घ्यपात्रमुद्धृत्यार्घ्यं दद्यात्। ततो मातुः पितृपितामहप्रपितामहानां तत्तदर्घ्यपात्रमुद्धृत्य तत्तन्नामोच्चारणपूर्वकमर्घ्यं दद्यात्। ये चात्र त्वामन्वि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



निमन्त्रं पूर्ववज्जपेत् । प्रत्यर्घ्यदानेऽप उपस्पृशेत् । ततः पितामहप्रपितामहार्घ्यपात्रस्थितपवित्रकुशानादाय, पितृपात्रे संस्थाप्य, तत्पात्रद्वयस्थसंस्रवान् पितृपात्रे समवनीय, मातामहवर्गपात्रस्थपवित्रकुशान् तत्प्रथमपात्रे संस्थाप्य, तत्पात्रद्वयमुत्तरदिशि पृथक् प्रागग्रदर्भोपरि शुन्धन्तां लोका इति-मन्त्रान्ते सकुशपवित्रं प्रागग्रं न्युब्जीकरोति । शुन्धन्तां लोकाः पितृषदनाः पितृषदनमसि नान्दीमुखेभ्यः पितृभ्यः स्थानमसि ॥ ततो न्युब्जीकृतपात्रपूजनम् । ततो ब्राह्मणेभ्यो गन्धपुष्पधूपदीपवाससां प्रदानं, तदलाभे यज्ञोपवीतं हिरण्यञ्च दद्यात् । तत्प्रकारो यथा—सम्बोधनान्तं तत्तन्नामोक्त्वा, एष ते गन्धः । एवमेतत्ते पुष्पम् । एष ते धूपः । एष ते दीपः । एतत्ते वासः । एतत्ते हिरण्यम् । ततो ब्राह्मणानां पुरतो नीवारचूर्णेन पाषाणचूर्णेन वा पितृपूर्वकं मण्डलानि कृत्वा तत्र प्रक्षालितानि पात्राणि स्थापयेत् । तत उपवीती, घृताक्त-मन्नमुद्धृत्याग्नौ करणं करिष्यामीति पितृननुज्ञातः साग्नि-कश्चेत् कर्त्ता गृह्याग्निसमीपमागत्योपविश्योपवीती क्षिप्रहो-मविधिना तदग्नौ जुहुयात् । अनयोः प्रजापतिर्ऋषिर्यजुः पितरो देवतोपघातहोमे विनियोगः । स्वाहा सोमाय पितृमते । इति हुत्वा, स्वाहाऽग्नये कव्यवाहनायेति द्वितीयाहुतिं हुत्वा-क्षिप्रहोमविधिनोपरिष्टात्तन्त्रं समापयेत् । निरग्निकश्चेद्भव-त्स्वेवाग्नौ करणं करिष्ये इति पृष्ट्वा, पितृपङ्क्तिमुख्यब्राह्मणहस्ते भोजनपात्रे कृत्वा, हस्ते शुद्धोदकं दत्वा, पूर्वोक्ताहुतिद्वयं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



कुर्यात् । ब्राह्मणाभावे जले उक्ताहुतिद्वयं कुर्यात् । हुतशेषं ब्राह्मणभोजनपात्रे दत्वा किञ्चित्पिण्डार्थमवशेषयेत् ततो भोजनपात्रमाज्येनाभिघार्य्य, कर्त्ता पत्न्या वा देवपूर्वं यथा-परिवेषणं कार्य्यम् । अथ भोजनपात्रं वामहस्तेन स्पृष्ट्वा दक्षिणहस्तेनोदकमादाय, सत्यं त्वर्त्तेन परिषिञ्चामीत्यन्नमभ्युक्ष्याग्रे प्रदक्षिणं यवान्विकीर्य, न्युब्जीकृताभ्यां दक्षिणोत्तराभ्यां पाणिभ्यां पृथिवी ते पात्रमिति भोजनपात्रमालभ्य जपेत् । मन्त्रस्तु–पृथिवी ते पात्रं द्यौरभिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा ॥ मन्त्रादावालम्भः । तत इदं विष्णुर्विचक्रम इति, विष्णो हव्यꣳरक्षस्वेति यजुषा वा, भोक्तुरङ्गुष्ठमन्नेऽवस्थापयेत् । इदं विष्णुरितिकाण्वो मेधातिथिर्ऋषिर्गायत्री छन्दो विष्णुर्देवता जपे विनियोगः । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं । समूढमस्य पाꣳसुले ॥ ततो वामहस्तेनान्नपात्रमविमुञ्चन्दक्षिणहस्तेन कुशोदकमादायेदमन्नादिकमातृप्तेर्दत्तं दास्यमानञ्च सत्यवसुसञ्ज्ञकेभ्यो विश्वेभ्यो देवेभ्यः स्वाहा । न ममेति ब्राह्मणपुरतो जलमुत्सृजेत् । एवं पित्रादिष्वपि । तत्र विशेषः । दास्यमानमित्यन्तमुक्त्वा, गोत्रेभ्यो नान्दीमुखेभ्यः पितृपितामहप्रपितामहेभ्योऽमुकामुकशर्मभ्यः स्वाहा । एवं मातामहादिष्वपि । ततः पितृपूर्वं पूर्वापोशनार्थं जलं दत्वा, सव्याहृतिकां गायत्रीं हस्तच्युतेभिरित्यृचं जपित्वा मधुमधुमध्विति त्रिर्जपित्वा यथासुखं जुषध्व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मिति वदेत् । मन्त्रप्रकाशः । ॐ भूर्भुवः स्वः तत्सवितुर्व्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ हस्तच्युतेभिरद्रिभिस्सुतꣳसोमं पुनीतन । मधावाधावता मधु ॥ एवममृतोपस्तरणमसीति प्रतिब्राह्मणं वदेत् । ततो ब्राह्मणाः पञ्च प्राणाहुतीः कुर्युः । प्राणाय स्वाहा । व्यानाय स्वाहा । अपानाय स्वाहा । समानाय स्वाहा । उदानाय स्वाहा । ततो भोजनकाले व्याहृतिपूर्वां सावित्रीं, तस्यां च गायत्रं साम, यस्तेमदोवरेण्यमिति त्रीणि सोमसामानि, अबोध्यग्निरित्याद्यरिष्टवर्गं माशुश्शिशान इति नव सामानि पठेत् । ॐ तत्सवितुर्वरेणियोम् । भार्गोदेवस्यधीमाहि२ । धियोयोनः प्रचो१२१२ । हुम् । आ२ । दायो । आ३४५ । यस्ते मदोवरेण्य इति त्रीणिसोमसाम्नां सोमो गायत्री सोमो जपे विनियोगः । यस्तेमदाः । वरायिणियाः । ताइनापावा३स्वा३ । अन्धसा । दाधिवावाइरा३४ । हाउ । घशा५ꣳसहा । होऽ५इ । डा ॥ यस्तायिमा २३ देवरेणियाः । ताइनाअव । स्वआंधा १ सा २ । दाइवा २ वाइरा २३ । घशो २३४ वा । सा५होई हायि । यस्तेमदोवरेणियाई५ । तेनापवस्वान्धसा । देवावीरा२३ । हायि । घाशाउवा । साहाउवा३ । ऊ३२३४पा ॥ अबोध्यग्निरित्याद्यरिष्टवर्गः । आशुः शिशानो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनां । सङ्क्रन्दनो
निमिष एकवीरः शतꣳसेना अजयत्साकमिन्द्रः ॥ १ ॥
सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥ २ ॥
स इषुहस्तैः स निषङ्गिभिर्वशी सꣳस्रष्टा स युध इन्द्रो गणेन ।
सꣳसृष्टजित्सोमपा बाहुशर्ध्यू३ग्रधन्वा प्रतिहिताभिर-
स्ता ॥ ३ ॥ १ ॥ बृहस्पते परिदीया रथेन रक्षोहा मित्राꣳ-
अपबाधमानः । प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्य-
विता रथानां ॥ १ ॥ बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी
सहमान उग्रः । अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र र-
थमातिष्ठ गोवित् ॥ २ ॥ गोत्रभिदं गोविदं वज्रबाहुं
जयन्तमज्म प्रमृणन्तमोजसा । इमꣳ सजाता अनुवीरयध्वमिन्द्रꣳ
सखायो अनु सꣳरभध्वं ॥ ३ ॥ २ ॥ अभिगोत्राणि सहसा
गाहमानो दयो वीरः शतमन्युरिन्द्रः । दुश्च्यवनः पृतनाषा-
डयुध्यो३ऽस्माकꣳसेना अवतु प्रयुत्सु ॥ १ ॥ इन्द्र आसां नेता
बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः । देवसेनानामभिभञ्जतीनां
जयन्तीनां मरुतो यन्त्वग्रं ॥ २ ॥ इन्द्रस्य वृष्णो वरुणस्य राज्ञ
आदित्यानां मरुताꣳशर्ध उग्रं । महामनसां भुवनच्यवानां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



घोषो देवानां जयतामुदस्थात् ॥ ३ ॥ ३ ॥ उद्धर्षय मघवन्ना-
युधान्युत्सत्वनां मामकानां मनांसि । उद्वृत्रहन्वाजिनां
वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥ १ ॥ अस्माकमिन्द्रः
समृतेषु ध्वजेष्वस्माकं या इषवस्ताजयन्तु । अस्माकं वीरा
उत्तरे भवन्त्वस्मांउ देवा अवताहवेषु ॥ २ ॥ असौ या सेना
मरुतः परेषामभ्येति न ओजसा स्पर्द्धमाना । तां गूहत
तमसापव्रतेन यथैतेषामन्यो अन्यं न जानात् ॥ ३ ॥ ४ ॥
अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि । अभिप्रेहि
निर्दह हृत्सु शोकैरंधेनामित्रास्तमसा सचन्तां ॥ १ ॥ प्रेता
जयता नर इन्द्रो वः शर्म यच्छतु । उग्रा वः सन्तु बाहवोऽनाधृष्या
यथासथ ॥ २ ॥ अवसृष्टा परापत शरव्ये ब्रह्मसंशिते ।
गच्छामित्रान्प्रपद्यस्व मामीषां कंचनोच्छिषः ॥ ३ ॥ ५ ॥
कंकाः सुपर्णा अनुयन्त्वेनान् गृध्राणामं नमसा वस्तुसेना ।
मैषां मोच्यघहारश्च नेन्द्र वयांस्येनाननुसंयन्तु सर्वान् ॥ १ ॥
अमित्रसेनां मघवन्नस्माञ्छत्रुयतीमभि । उभौ तामिन्द्र वृत्रह
न्नग्निश्च दहतं प्रति ॥ २ ॥ यत्र बाणाः संपतन्ति कुमारा
विशिखा इव । तत्र नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु
विश्वाहा शर्म यच्छतु ॥ ३ ॥ ६ ॥ विरक्षो विमृधो जहि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



विवृत्रस्य हनू रुज । विमन्युमिन्द्र वृत्रहन्नमित्रस्याभिदास-
तः ॥ १ ॥ विन इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः । यो
अस्मा२ँ अभिदासत्यधरं गमया तमः । इन्द्रस्य बाहू स्थविरौ
युवानावनाधृष्यौ सुप्रतीकावसह्यौ । तौ युञ्जीत प्रथमौ योग
आगते याभ्यां जितमसुराणा२ँसहो महत् ॥ ३ ॥ ७ ॥ मर्माणि
ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानुवस्तां । उरोर्वरीयो
वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥ १ ॥ अन्धा अमित्रा
भवता शीर्षाणोहय इव । तेषां वो अग्निनुन्नानामिन्द्रो हन्तु
वरंवरं ॥ २ ॥ यो नः स्वोरणो यश्च निष्ट्यो जिघा२ँसति ।
देवास्तं२ँसर्वे धूर्वन्तु ब्रह्मवर्म ममान्तर२ँशर्म वर्म ममान्तरं ॥३॥८॥
मृगो न भीमः कुचरो गिरिष्ठाः परावत आजगंथा परस्याः ।
सृक२ँसं२ँशाय पविमिन्द्र तिग्मं विशत्रून्ताढि विमृधो नुदस्व ॥ १ ॥
भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरंगैस्तुष्टुवा२ँसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ २ ॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ ३ ॥
ॐ स्वस्ति नो बृहस्पतिर्दधातु ॥ ९ ॥ ततस्तृप्तेः पूर्वं
ब्राह्मणानामुच्छिष्टसमीपे ऋजून् दर्भानास्तीर्य, तेषु दर्भेषु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



असोमपाश्चेत्यन्नं विकिरेत् । असोमपाश्च ये देवा यज्ञभागबहिष्कृताः । तेषामन्नं प्रदास्यामि विकिरं वैश्वदेविकम् ॥ ततः पूर्वधृतकुशत्यागो हस्तप्रक्षालनम् । आचमनं । अन्यकुशधारणम् । ततो ब्राह्मणेभ्यः पितृपूर्वकमुत्तरापोशनार्थमुदकं दत्वा, पूर्ववद्ब्राह्मत्यादिकं पठित्वा, मधुमधुमध्विति चिर्जपेत् । ततो ब्राह्मणैरुत्तरापोशने कृते सर्वान् सम्पन्नमिति पृच्छेत् । सुसम्पन्नमिति सर्वे ब्रूयुः । ततोऽन्नशेषैः किं ? क्रियतामिति पृच्छेत् । इष्टैस्सहोपभुज्यतामिति प्रत्युक्तिः । तत उच्छिष्टसन्निधौ पिण्डदानम् । उच्छिष्टपात्रस्य बाहुमात्रप्रदेशे चतुरस्रमण्डलं विधाय, गोमयेनोपलिप्य, प्राचीनप्रवणां सैकतेन वेदिकां कृत्वा ऽभ्युक्ष्य, पित्राद्यर्थं प्रागग्रान् कुशानास्तीर्य्य, तदुत्तरभागे मातामहाद्यर्थं तथाग्रान् कुशानास्तीर्य्य, दक्षिणेन पिञ्जूलीं गृहीत्वा, पिञ्जूल्यग्रेणास्तृतकुशोपरि प्रागग्रां रेखामुल्लिखेन्मन्त्रेण । अपहता असुरा रक्षांऽसि वेदिषदः ॥ एवं मातामहादिदर्भेष्वपि । ततः पिञ्जूलीं त्यक्त्वा, अप उपस्पृशेत् । तत एतपितरस्सोम्यास इति पितॄनावाहयेत् । तत ऋजुकुशोदकं गृहीत्वा, पातितदक्षिणजानुर्देवतीर्थेन पूर्वाभिमुखो मूलमध्याग्रभागेष्वास्तृतकुशेषु क्रमेणावनेजनं कुर्य्यात् । अमुकगोत्रामुकशर्मन्नान्दीमुख पितरवनेनिंक्ष्व ये चात्र त्वामनु यांऽश्च त्वमनु तस्मै ते स्वाहा । अप उपस्पृश्य पितामहप्रपितामहयोरप्यवनेजनं कुर्यात् । एवं मातामहादीनामपि । ततः सर्वपाकशेषाल्पेन हुतशेषं मिश्रीकृत्य, दधिमधुक्षीरैरु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पसिच्य, बदरीफलैश्च मिश्रीकृत्य, यवान् संयोज्य, बिल्वफलमात्रान् पिण्डान् कृत्वा, दक्षिणहस्तेन गृहीत्वा, देवतीर्थेनावनेजनक्रमेण पितुर्नामयुक्तमन्त्रेण पिण्डान्निदध्यात्। अमुकगोत्रामुकशर्मन्नान्दीमुखपितरेष ते पिण्डः। ये चात्र त्वामनु याꣳश्च त्वमिति पूर्ववत्। अप उपस्पृश्य पितामहप्रपितामहयोः पिण्डौ क्रमेण स्थापयेत्। एवं मातामहादीनामपि। एवं षट्पिण्डान्निधाय पिण्डपात्रक्षालनजलेन पूर्ववत्प्रत्यवनेजनं कृत्वा, पिण्डपात्रमुत्तानं स्थापयेत्। ततोऽत्र पितरो मादयध्वमिति जपति। अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्॥ प्रादक्षिण्येन पर्य्यावृत्योदङ्मुखोऽनुच्छ्वसन्नमीमदन्त पितर इति जपन् प्राङ्मुखो भवेत्। अमीमदन्त पितरो यथाभागमावृषायिषत॥ ततः कृताञ्जलिर्नमोवः पितरः पितर इति जपति। अस्य प्रजापतिर्ऋषिरुष्णिक्छन्दः पितरो देवता जपे विनियोगः। नमो वः पितरः पितरो नमो वः॥ ततः पत्नीमवेक्षते। अस्य प्रजापतिर्ऋषिर्यजुः पितरो देवता पत्न्यवेक्षणे विनियोगः। गृहान्नः पितरो दत्त–इति॥ ततः पिण्डानवेक्षते। अस्य प्रजापतिर्ऋषिर्यजुः पितरो देवता पिण्डावेक्षणे विनियोगः। सदो वः पितरो देष्म इति॥ ततः पिण्डोपरि सूत्रं दद्यात्। अमुकगोत्रामुकशर्मन्नान्दीमुख पितरेतत्ते वासः। अप उपस्पृशेत्। एवं पितामहादीनाम्। ततो यथाचारं गन्धपुष्पधूपदीपनैवेद्यादिभिः पिण्डपूजनम्। ततो भोक्तृभ्यो मुखहस्तप्रक्षालनाद्यर्थमुदकं दत्वा स्वयं हस्तौ प्रक्षाल्याचामेत्। अथा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



चान्तेषु भोक्तृषु सुसम्प्रोक्षितमस्तु । इति द्विजाग्रभूमिं जले-नासिञ्चेत् । अस्त्विति प्रतिवचनम् । शिवा आपस्सन्तु । इति द्विजहस्तेषु जलं प्रयच्छेत् । सौमनस्यमस्त्विति भोक्तृह-स्तेषु कुसुमानि प्रयच्छेत् । अक्षतञ्चारिष्टञ्चास्त्वित्यक्षतान्द-द्यात् । दक्षिणं जान्वाच्य, कुशोदकं गृहीत्वा, नान्दीमुखाः पितरः प्रीयन्तां । प्रीयन्तामिति प्रत्युक्तिः । ततः सौम्या नान्दीमुखाः पितरः सन्तु । सन्तु सौम्या नान्दीमुखाः पितर इति प्रत्युक्तिः । गोत्रं नो वर्द्धतां । वर्द्धतामिति प्रत्युक्तिः । ततो न्युब्जीकृतपित्रर्घ्यपात्र-मातामहार्घ्यपात्रोपरिस्थापितान् सप-वित्रकुशानादाय, पित्रादिपिण्डोपरि मातामहादिपिण्डो-परि च क्रमेणास्तीर्य्य, स्वाहां वाचयिष्य इति पृष्ट्वा, वाच्य-तामिति प्रत्युक्ते, अमुकगोत्रेभ्यो नान्दीमुखेभ्यः पितृपितामह-प्रपितामहेभ्यो ऽमुकामुकशर्मभ्यः स्वाहोच्यताम् । अस्तु-स्वाहेति प्रत्युक्तिः । मातामहप्रमातामहवृद्धप्रमातामहेभ्यश्चैवं वाचयेत् । ततो न्युब्जीकृतपित्रर्घ्यपात्रमुत्तानं कृत्वा, तेनोदक-मादाय पित्रादिपिण्डत्रयोपरि जलधारां दद्यादूर्ज्जंवहन्तीरि-त्यनेन । ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतश्स्व-धास्थ तर्पयत मे पितॄन् ॥ एवं मातामहार्घ्यपात्रेण तद्वर्ग-पिण्डोपरि धारां दद्यात् । ततो विश्वेदेवहस्तेजलं दत्वा, सत्यवसुसञ्ज्ञका विश्वेदेवाः प्रीयन्तामिति वाचयेत् । प्रीयन्तां विश्वेदेवा इति प्रतिवचनम् । ततः पिण्डान् भोजनपात्राणि च स्वस्थानाच्चालयेत् । ततो देवपूर्वं यथाशक्ति दक्षिणादानम् ।



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



विश्वेदेवा इयं वो दक्षिणा । नान्दीमुखाः पितृपितामहप्रपितामहा इयं वो दक्षिणा। एवं मातामहादीनाम् । ततः कर्त्ता ब्राह्मणान् प्रति वदेत् । दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च। श्रद्धा च नो माव्यगमद्बहुदेयं च नोऽस्तु ॥ ततो भोक्तारः । दातारो वोऽभिवर्द्धन्तां वेदाः सन्ततिरेव वः। श्रद्धा च वो माव्यगमद्बहुदेयञ्च वो ऽस्तु ॥ इति प्रतिवदेयुः । ततः कर्त्ता–अन्नञ्च नो बहु भवेदतिथींश्च लभेमहि । याचितारश्च नः सन्तु मा चयाचिष्म कञ्चन ॥ ततो भोक्तारः । अन्नं च वो बहुभवेदतिथींश्च लभध्वं । याचितारश्च वः सन्तु माचयाचिढ्वं कञ्चन । एता एवाशिषः सन्त्विति कर्त्ता । एताः सन्त्वाशिष इति भोक्तारः । ततः कर्त्ता स्वस्ति भवन्तो ब्रुवन्तु। ॐ स्वस्तीति भोक्तारः । ततः कर्त्ता आशिषः प्रतिगृह्य पितृपूर्वं वाजेवाज इति विसर्जयेत् । तद्यथा । पितृपङ्क्तिमुख्यस्य ब्राह्मणस्याङ्गुष्ठं दक्षिणहस्तेन गृहीत्वा वाजेवाजेवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥ इत्येनया पितृपूर्वं विसर्ज्जनम् । मातामहादीनप्येवं विसृज्य दक्षिणहस्तेन विश्वान् देवान् विसृज्य सर्वानुत्थापयेत् । ततः पादप्रक्षालनदेशे प्राङ्मुखा देवाः पित्रादयश्च तिष्ठेयुः । कर्त्ता जलपात्रं गृहीत्वा ब्राह्मणानां परितो जलधारां प्रादक्षिण्येन दद्यात् आमावाजस्येति । आमावाजस्य प्रसवो जगम्या देवे द्यावापृथिवी विश्वरूपे। आमागन्तां पितरा मातरा चामासोमो अमृतत्वेन गम्यात् । ततः सीमान्तमनुव्रज्य प्रदक्षि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



णानमस्कारान् विधाय, गृहं प्रविश्य, वामदेव्यं गीत्वा, ब्रह्मार्पणं कुर्यात् । जलहोमविधानमन्यत्राग्निप्रतिनिधित्वात् । तच्च "तैत्तिरीयब्राह्मणे"ऽग्निहोत्रप्रकरणे समाम्नातम् । ब्राह्मणाभावे कुशचटुपक्षे कुशानां ब्राह्मणप्रतिनिधित्वं प्रसिद्धमेव । इति नान्दीश्राद्धप्रयोगः ॥

अथ हिरण्यश्राद्धम् ॥ उक्तरीत्या ब्राह्मणभोजनात्मकस्य चटुश्राद्धस्य वाऽनुष्ठानाऽसम्भवे हिरण्यरूपेण श्राद्धमवश्यं कुर्यात् । तच्च विवाहादिदिने सङ्कल्पात्प्रागेवानुष्ठेयम् । तत्प्रयोगो यथा । अमुकगोत्राणां नान्दीमुखानां पितृपितामहप्रपितामहानाममुकामुकशर्म्मणाममुकगोत्राणां नान्दीमुखानां मातुः पितृपितामहप्रपितामहानाममुकामुकशर्म्मणां तृप्त्यर्थममुककर्म्माङ्गमाभ्युदयिकश्राद्धं हिरण्यरूपेण करिष्ये । एवं वरणेऽपि गोत्रादिकमुक्ता हिरण्यरूपामुककर्म्माङ्गमाभ्युदयिकश्राद्धे भवता क्षणः कर्त्तव्य इति विशेषः । ततः पादप्रक्षालनाद्युपचारांश्च कृत्वा हिरण्यं दद्यात् । यावता भोजनं तच्चतुर्गुणं हिरण्यं देयमिति शक्तौ । यत्किञ्चिदशक्तौ दद्यात् । दानमन्त्रो यथा । हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ गोत्रादिकमुक्त्वाऽमुककर्म्माङ्गाभ्युदयिकश्राद्धे सत्यवसुसञ्ज्ञकानां विश्वेषां देवानां प्रीतिं कामयमानः तृप्तिभोजनमूल्यचतुर्गुणमिदमाग्नेयं हिरण्यं तुभ्यमहं सम्प्रददे । ततः पूर्ववत्सर्वमुक्त्वाऽमुकगोत्राणां नान्दीमुखानां पितृपितामहप्रपितामहानाम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मुकामुकशर्म्मणाममुकगोत्राणां नान्दीमुखानाम्मातृः पितृपितामहप्रपितामहानाममुकामुकशर्म्मणां प्रीतिं कामयमानः तृप्तिभोजनमूल्यचतुर्गुणमिदमाग्नेयं हिरण्यं तुभ्यमहं सम्प्रददे इति दद्यात् । इति हिरण्यश्राद्धप्रयोगः ॥

अथ पुण्याहवाचनप्रयोगः ॥ तस्य सर्वकर्म्माङ्गत्वं क्वचिद्व्याख्यातम् । आभ्युदयिकश्राद्धाभावेऽपि शरीरशालादिशुद्ध्यर्थं प्रधानत्वमप्यस्ति । अतो गोभिलेन तत्प्रयोगस्यानुक्तत्वेऽप्यावश्यकत्वा"च्छौनकाश्वलायनगृह्यपरिशिष्टा"द्यनुसारेण तत्प्रयोग उच्यते । यजमानः सपत्नीकः सुस्नातो मङ्गलसम्भारं सम्भृत्य, स्वलङ्कृते गेहे गोमयोपलिप्तायां भूमौ भद्रासने प्राङ्मुख उदङ्मुखो वा उपविश्य, शुद्धे स्थण्डिले धान्यपुञ्जोपरि दक्षिणोत्तरयोः सौवर्ण-राजत-ताम्र-मृन्मयान्यतमं नूतनं कलशद्वयं संस्थाप्य, पूजयित्वा, प्रशस्तान् प्रतिवचनसमर्थांश्शुचीन्दर्भपवित्रपाणीन्युग्मान्ब्राह्मणानासनेषूपवेश्य, गन्धपुष्पादिभिरभ्यर्च्य, उत्तरकलशे देवता आवाह्य, पुण्याहं वाचयेत् । तद्यथा देशकालौ सङ्कीर्त्य, अमुककर्म कर्त्तुममुककर्म्माङ्गं वा स्वस्तिपुण्याहवाचनं करिष्ये । तत्रादौ निर्विघ्नतासिध्यर्थं महागणपतिपूजनं करिष्ये इति सङ्कल्प्य पूर्वोक्तप्रकारेण महागणपतिं सम्पूज्य, कलशस्थापनादि कुर्यात् । स्वपुरतः इदम्भूमेरिति भूमिं स्पृष्ट्वा पठेत् । इदम्भूमेर्भजामह इदम्भद्रᳪसुमङ्गलम् । परा सपत्नान्बाधस्व अन्येषां विन्दते
३ १ २ ३ १ २ ३ १ २ ३ १ २ १ २ ३ १ २
धनम् । धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्रातर्जुषस्व

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नः ॥ इतिमन्त्रेण यवादिधान्यं प्रक्षिप्य, । आविशन्कलशꣳसुतो विश्वा अर्षन्नभिश्रियः । इन्दुरिन्द्राय धीयते ॥ इति कलशद्वयं धान्यपुञ्जोपरि निधाय, इमं मे वरुण श्रुधीहवमद्या च मृडय । त्वामवस्युराचके ॥ इति जलेन पूरयित्वा, काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि । एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥ इति दूर्वाः प्रक्षिप्य । अयमूर्जावतो वृक्ष ऊर्जीव फलिनी भव । पर्णं वनस्पतेऽनुत्वाऽनुत्वा सूयताꣳरयिः ॥ इति फलानि । अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारꣳरत्नधातमम् ॥ इति पञ्चरत्नानि । स्योना पृथिवि नो भवान्तृक्षरा निवेशनी । यच्छा नः शर्म्म सप्रथो देवान्माभयादिति ॥ इति सप्तमृत्तिकाः । ओषधे त्रायस्वैनम् । इति सर्वौषधीः । वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः । गोभिः सन्नद्धो असि वीडयस्व आस्थाता ते जयतु जेत्वानि॥ इति पञ्चपल्लवान् । अभिवस्त्रा सुवसनान्यर्षाभिधेनूः सुदुघाः पूयमानाः । अभिचन्द्रा भर्त्तवे नोहिरण्याभ्यश्वान् रथिनो देव सोम ॥ इति वस्त्रेण रक्तसूत्रेण वा वेष्टयेत् । सघातं वृषणꣳरथमधितिष्ठाति गोविदम् । यः पात्रꣳहारियोजनं पूर्णमिन्द्राचिकेतति योजान्विन्द्रते हरी ॥ इति कलशयोरुपरि तण्डुलपूरितकांस्यपात्रादि निधाय, सर्वत्र प्रतिकलशं मन्त्रा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वृत्तिः, उत्तरसंस्थता च। तत इमं मे वरुणेति प्रस्कण्वऋषिर्गा-
यत्रीछन्दो वरुणो देवता वरुणावाहने विनियोगः। इमं मे
वरुण श्रुधीहवमद्या च मृडय। त्वामवस्युराचके॥ इत्युत्तरकलशे
वरुणमावाहयेत्। वरुणाय नमो वरुणमावाहयामीति प्रतिमादि-
ष्वावाह्य षोडशोपचारैः सम्पूज्योत्तरकलशे देवता आवाहये-
देवम्। कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः। मूले तत्र
स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः। कुक्षौ तु सागराः
सर्वे सप्तद्वीपा वसुन्धरा॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदो
ह्यथर्वणः। अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः॥
अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा। आयान्तु
मम शान्त्यर्थं दुरितक्षयकारकाः॥ गङ्गे च यमुने चैव गोदावरि
सरस्वति। नर्मदे सिन्धुकावेरि जलेऽस्मिन्सन्निधिं कुरु॥
ततस्तत्कलशेऽक्षतान्क्षिपेत्। मातृदेवो भव। पितृदेवो भव।
आचार्य्यदेवो भव। अतिथिदेवो भव। सर्वेभ्यो ब्राह्मणेभ्यो
नमोनमः। तत आशिषः प्रार्थयन्ते। प्रार्थनामाह। एताः
सत्या आशिषः सन्तु। अवनिकृतजानुमण्डलः कमलमुकुल-
सदृशमञ्जलिं शिरस्याधाय, दक्षिणेन पाणिना सुवर्णपूर्णकलशं
धारयित्वा, दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि
च तेनायुः प्रमाणेन पुण्याहं दीर्घमायुरस्तु इति भवन्तो
ब्रुवन्तु। तेनायुः प्रमाणेन पुण्याहं दीर्घमायुरस्तु। इति ब्राह्मण-
वचनम्। एवं सर्वत्र। शिवा आपः सन्त्विति भवन्तो ब्रुवन्तु।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सौमनस्यमस्त्विति भवन्तो ब्रुवन्तु । अक्षतञ्चारिष्टं चास्त्विति भवन्तो ब्रुवन्तु । गन्धाः पान्तु सुमङ्गल्यञ्चास्त्विति भवन्तो ब्रुवन्तु । अक्षताः पान्तु आयुष्यमस्त्विति भवन्तो ब्रुवन्तु । पुष्पाणि पान्तु सौश्रेयसमस्त्विति भवन्तो ब्रुवन्तु । ताम्बूलानि पान्तु ऐश्वर्य्यमस्त्विति भवन्तो ब्रुवन्तु । दक्षिणाः पान्तु बहुदेयञ्चास्त्विति भवन्तो ब्रुवन्तु । दीर्घमायुः श्रेयः शान्तिः पुष्टिस्तुष्टिश्चास्त्विति भवन्तो ब्रुवन्तु । ब्राह्मणैः प्रतिवचनं सर्वचास्त्विति देयम् । श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु । यं कृत्वा सर्ववेददेवयज्ञक्रियाकरणकर्मारम्भाः शुभाः शोभनाः प्रवर्त्तन्ते । तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं बहुऋषिमतं संविज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये । विप्राः वाच्यतामिति वदेयुः । एवं उत्तरत्रापि यथायोग्यं देयम् । देवो३वो३द्रविणोदाः । पूर्णां विवष्ट्वासिचं । उद्वा१ सिंचा२ । ध्वमुपवापृणध्वम् । आदिद्वोदे२ । वओहते । इडा२३भा३४३ । ओ२३४५इ । डा ॥ १ ॥ अद्यनोदेवसवितः । औहोवा । इहश्रुधाई । प्रजावा२३त्सा । वीःसौभगां । पराढू२३षा३ । होवा३हा । प्रियऽसू२३४५वा३६५६ । हा३या२३४५ ॥ २ ॥ चन्द्रमाआउवा । प्स्वंतराउवा । सुपर्णाधाउवा । वतेदिवि । नवोहिराउवा । ण्यनाईमायाउवा । पदंविन्दाउवा । तिविद्युताः । वित्तंमाआउवा । स्यरोदा२३

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



२ १ ५ र २ ४र ५
सा३४३यि। औ२३४५इ। डा ॥ ३ ॥ उच्चाता३इजातमन्धसा:।
२ १ २ — १ २ २ १ २ १ १
दिवाइसा१ह्रू२। मिया२३ददाई। उग्राङ्शर्मा। मह्वा२३इश्र-
२ २^ २र ३ १ १ १ १ १ ४ ३ र ४ २ ४र
वाउ। वा३। स्तौषे२३४५ ॥ ४ ॥ उपा५स्मै। गा३या३ता-
र ५ २ १ २ २ १ २ १ २
नारा:। पा३वामा३ना। या२३श्रा। हुंमाई। दा३
२ १ र र ^ ३ २ १ १ १ १ १
वाई। श्राभिदेवा२इया२ह्नताउ। वा२३४५ ॥ ५ ॥ इत्येतानि सामानि पुण्याहे ब्रूयात्। व्रत-नियम-तप:-स्वाध्याय-क्रतु-दम-दान-विशिष्टानां ब्राह्मणानां मन: समाधीयतां। समाहित-मनस: स्म:। प्रसीदन्तु भवन्त:। प्रसन्नास्स्म:। यजमान:। शान्तिरस्तु। पुष्टिरस्तु। तुष्टिरस्तु। वृद्धिरस्तु। अविघ्नमस्तु। आयुष्यमस्तु। आरोग्यमस्तु। स्वस्तिशिवं कर्मास्तु। कर्मसमृद्धिरस्तु। धर्मसमृद्धिरस्तु। वेदसमृद्धिरस्तु। शास्त्रसमृद्धिरस्तु। पुत्रसमृद्धिरस्तु। धनधान्यसमृद्धिरस्तु। इष्टसम्पदस्तु। बहिर्देशे। अरिष्टनिरसनमस्तु। यत्पापं तत्प्रतिहतमस्तु। अन्त:। यच्छ्रेयस्तदस्तु। उत्तरे कर्मण्यविघ्नमस्तु। उत्तरोत्तरमहरहरभिवृद्धिरस्तु। उत्तरोत्तरा: क्रिया: शुभा: शोभना: सम्पद्यन्ताम्। तिथि-करण-मुहूर्त्त-नक्षत्र ग्रह-लग्न-सम्पदस्तु। तिथि-करण-मुहूर्त्त-नक्षत्र-ग्रह-लग्नाधिदेवता: प्रीयन्ताम्। तिथिकरणे मुहूर्त्तनक्षत्रे सग्रहे सदैवते प्रीयेताम्। दुर्गापाञ्चाल्यौ प्रीयेताम्। अग्निपुरोगा विश्वेदेवा: प्रीयन्ताम्। इन्द्रपुरोगा मरुद्गणा: प्रीयन्ताम्। शचीपुरोगा देवपत्न्य: प्रीयन्ताम्। ब्रह्मपुरोगा: सर्वे वेदा: प्रीयन्ताम्। विष्णुपुरोगा:

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सर्वदेवाः प्रीयन्ताम्। माहेश्वरीपुरोगा उमामातरः प्रीयन्ताम्। वसिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम्। अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम्। ऋषयश्छन्दांस्याचार्या वेदा देवा यज्ञाश्च प्रीयन्ताम्। ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम्। श्रीसरस्वत्यौ प्रीयेताम्। श्रद्धामेधे प्रीयेताम्। भगवती कात्यायनी प्रीयताम्। भगवती माहेश्वरी प्रीयताम्। भगवती वृद्धकरी प्रीयताम्। भगवती ऋद्धिकरी प्रीयताम्। भगवती पुष्टिकरी प्रीयताम्। भगवती तुष्टिकरी प्रीयताम्। भगवन्तौ विघ्नविनायकौ प्रीयेताम्। भगवान्स्वामी महासेनः सपत्नीकः ससुतः सपार्षदः सर्वस्थानगतः प्रीयताम्। हरिहरहिरण्यगर्भाः प्रीयन्ताम्। सर्वा ग्रामदेवताः प्रीयन्ताम्। सर्वाः कुलदेवताः प्रीयन्ताम्। बहिः। हता ब्रह्मद्विषः। हताः परिपन्थिनः। हता अस्य कर्मणो विघ्नकर्त्तारः। शत्रवः पराभवं यान्तु। शाम्यन्तु घोराणि। शाम्यन्तु पापानि। शाम्यन्त्वीतयः। अन्तः। शुभानि वर्द्धन्ताम्। शिवा आपः सन्तु। शिवा ऋतवः सन्तु। शिवा अग्नयः सन्तु। शिवा आहुतयः सन्तु। शिवा अतिथयः सन्तु। शिवा ओषधयः सन्तु। शिवा वनस्पतयस्सन्तु। अहोरात्रे शिवे स्यातां। निकामेनिकामे नः पर्ज्जन्यो वर्षतु। फलिन्यो न ओषधयः पच्यन्ताम्। योगक्षेमो नः कल्पताम्। शुक्रा-ङ्गारक-बुध-बृहस्पति-शनैश्चर-राहु-केतु-सोमसहितादित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम्। भगवान्नारायणः प्रीयताम्। भगवान्पर्ज्जन्यः प्रीयताम्।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



भगवान्स्वामी महासेनः प्रीयताम् । पुण्याहकालान् वाचयिष्ये ।
वाच्यताम् । त्वष्टा३४ । नोदैवियं । वचाः । पर्जन्यो ब्रह्मणस्पा२३-
तीः । पुत्रैर्भ्रातृभिरदितिर्नुपातू२३नाः । दुष्टारा२३चा ।
मणंवा२३चा३४३ः । ओ२३४५ई । डा ॥ ६ ॥ मह्यं सहकुटुम्बिने
महाजनान्नमस्कुर्वाणायाशीर्वचनमपेक्षमाणायामुककर्मणः पु-
ण्याहं भवन्तो ब्रुवन्तु । ॐ पुण्याहम् । इति । चः । पुनानः
सोमा३धारा२३४या । आपोवसानो अर्षस्यारत्नधायोनिमृतस्य
सा२इदसाई । ओहा३उवा । उत्सोदेवोहिरा२३हाई ।
ओहा३उवा । ण्यया । औ३होवा । हो५ई । डा ॥ ७ ॥
पुण्यसमृद्धिरस्तु । मह्यं सहकुटुम्बिने महाजनान्नमस्कुर्वाणाय०
अमुककर्मणः कल्याणं भवन्तो ब्रुवन्तु । अस्तु कल्याणम् ।
काऽ५या । नश्चा३यिचा३आभूवात् । ऊ । तीसदावृधः स ।
खा । औ३होहायि । कया२३शचायि । ष्ठयौहो३ । हुम्मा२ ।
वा२र्त्ता३५हायि ॥ ८ ॥ कल्याणसमृद्धिरस्तु । मह्यं सहकुटुम्बिने०
अमुककर्मण ऋद्धिं भवन्तो ब्रुवन्तु । कर्म ऋध्यताम् । ३ । ऋद्धिः
समृद्धिः । औहोवा औहोवा औहो३वा । अगन्मज्योतिः । २ ।
अगन्मज्योतिः । अमृता अभूम । २ । अमृता अभूमा । तरिक्षं-
पृथिव्या अध्यारुहामा । २ । तरिक्षं पृथिव्या अध्यारुहाम ।

For Private And Personal

दिवमन्तरिक्षादध्यारुहाम । ३ । अविदामदेवान् । ३ ।
समुदैवैरगन्महि । ३ । औऽहोवा औऽहोवा औऽहो३वा ।
सुवर्ज्योऽती२३४५ः ॥ ९ ॥ ऋद्धिः समृद्धिः । मह्यं सकुटुम्बिने०
अमुककर्मणे स्वस्ति भवन्तो ब्रुवन्तु । आयुष्मते स्वस्ति । ३ ॥
त्रातारमिन्द्रमविता । रमी२३न्द्राम् । हवेहवेसुहवꣳशूरं ।
रमी२३न्द्राम् । हुवामिनुशक्रंपुरुहू । तमी२३न्द्राम् ।
इदꣳस्वस्तिनोमघवा । धा३४३यि । तू३वा२यिन्द्रा३४५३ः ॥ १० ॥
स्वस्तिसमृद्धिरस्तु । हाउ । ३ । यशोहाउ । ३ । वर्चोहाउ । ३ ।
आस्मिन् हायि । २ । आस्मिन् हा३१उ । वा२ ।
तत्वेदिन्द्रावमंवसु । त्वंपुष्यसिमध्यमं । सत्राविश्वस्यपरमस्यरा-
जसि । नकिष्ट्वागोषुवृण्वते । हाउ । ३ । यशोहाउ । ३ ।
वर्चोहाउ । ३ । आस्मिन् हायि । २ । आस्मिन् हा३१उ ।
वा२ । आयुर्विश्वायुर्विश्वं विश्वमायुरशीमहि प्रजांत्वष्टरधिनि-
धेह्यस्मेशतं जीवेमशरदोवयन्ते२३४५ ॥ ११ ॥ मह्यं
सकुटुम्बिने० कर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्तु । अस्तु श्रीः ।
श्रायन्तइवसू४र्यां । विश्वा२इदिन्द्रा२ । स्यभा२क्षता ।
वसूनीजातेजनिमा । नियोजा१सा२ । प्रतिभागंनदी२धिमः ।
प्रा२३ती । भागांना३दा । हुं । धीमा३ः । ओ२३४वा ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



श्रिये ॥ १२ ॥ हाउ । ३ । इमाः । ३ । प्रजाः । ३ । प्रजापते होइ । २ । प्रजापते हाइ१उ । वा२ । ए । हृदयम् । २ । ए । हृदयाइ१उ । वा२ । प्रजारूपमजीजने ३ । इडाइडा२३४५ ॥ १३ ॥ अस्तु श्रीरिति चिः ॥ ईयइ३हायि । त्यमूषुवाजिना३न्दे३वजूतं । ईऽ४यइया । हा२३४यि । सहोवानन्ता । रुता३ । रंरथानां । ईयइया३हाई । अरिष्टा३ । नायि । मि३म्पृत । नाजमाशुम् । ई४यइया । हा२३४५यि । स्वस्त । यायि । तार्क्ष्यमिहा३४३ । हुइवा५-यिमा६५६ ॥ १४ ॥ मङ्गलानि भवन्तु । वर्षशतं पूर्णमस्तु । गोत्राभिवृद्धिरस्तु । कर्माङ्गदेवताः प्रीयन्ताम् । तत उत्तरकलशं दक्षिणहस्ते दक्षिणकलशं वामहस्ते गृहीत्वा ताभ्यां धाराद्वयं पात्रे सन्ततं निषिञ्चेदेभिर्मन्त्रैः ॥ वास्तोष्पताइ । ध्रुवा । स्थूणाओ२३४वा । अंसत्रंसोम्याना२म् । द्रप्सः पुराम्भेत्ता शश्वता२३इनाम् । आ२३४इन्द्राः । मुनी२ । ना३१उवा२३ । सा२३४खा । वास्तोष्पतेध्रुवा । स्थूणा३ । आ२३४ । सत्रंसो । म्यानाम् । द्रप्सः पुराम्भेत्ताशश्वता२३इनाम् । आ२३इन्द्राः । मुनी२ । नो२३४वा । सा२३४खा ॥ वास्तोष्पते ध्रुवा स्थूणांसत्रंसोम्यानाम् । द्रप्सः पुराम्भेत्ता शश्वतीनामिन्द्रो मुनीनांसखा ॥ शिवंशिवम् । अभिषेके पत्नी वामत उपविशेत् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ततो ब्राह्मणाः पात्रानीतजलेन पल्लवदूर्वादिभिरुदङ्मुखास्तिष्ठ-
न्तो यजमानमभिषिञ्चेयुः । यः पावमानीरध्येत्यृषिभिः संभृतꣳ-
रसम् । सर्वꣳस पूतमश्नाति स्वदितम्मातरिश्वना ॥ पावमानीर्यो
अध्येत्यृषिभिः संभृतꣳरसम् । तस्मै सरस्वती दुघे क्षीरꣳसर्पि-
र्मधूदकम् ॥ पावमानीस्स्वस्त्ययनीः । सुदुघा हि घृतश्चुतः ।
ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतꣳहितम् ॥ पावमानीर्दधन्तु
न इमं लोकमथो अमुम् । कामान्त्समर्द्धयन्तु नो देवीर्देवैः
समाहृताः ॥ येन देवाः पवित्रेणात्मानं पुनते सदा । तेन
सहस्रधारेण पावमान्यः पुनन्तु नः ॥ पावमानीस्स्वस्त्ययनी-
स्ताभिर्गच्छति नान्दनम् । पुण्याꣳश्च भक्षान् भक्षयत्यमृतत्वं च
गच्छति ॥ ॐ यो रोचनस्तमिह गृह्णामि तेनाहं मामभिषि-
ञ्चामि । यशसे तेजसे ब्रह्मवर्चसाय बलायेन्द्रियाय वीर्याया-
न्नाद्याय रायस्पोषाय त्विष्या अपचित्यै ॥ येन स्त्रियमकृणुतं
येनापामृशतꣳसुरा । येनाक्षानभ्यषिञ्चतं येनेमां पृथिवीम्महीम् ।
यद्वां तदश्विनायशस्तेन मामभिषिञ्चतं ॥ शन्नो देवीरभिष्टये
शन्नो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः ॥ अमृताभिषेको-
ऽस्त्विति विप्रा वदेयुः । ततः पत्नी स्वस्थान उपविशेत् ।
यजमान आचम्याभिषेककर्तृभ्यो ब्राह्मणेभ्यो दक्षिणां दत्वा
पुण्याहवाचनफलसमृद्धिरस्त्विति भवन्तो ब्रुवन्तु इति ब्राह्मणा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



न्प्रार्थयेत् । पुण्याहवाचनफलसमृद्धिरस्त्विति प्रतिवचनम् । इत्याश्वलायनगृह्यपरिशिष्टाद्युक्तं शिष्टाचारप्राप्तञ्चैकीकृत्य पुण्याहवाचमुक्तम् ॥ इति पुण्याहवाचनप्रयोगः ॥

इत्थमनुष्ठितसमण्डपपूजनाद्यङ्गजाताभ्युदयिकश्राद्धपुण्याहवाचनकृतनित्यक्रियः सुप्रसन्नो ब्राह्मणैरनुज्ञातो वेदिकायां दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य प्रधानसङ्कल्पं कुर्य्यात् । सङ्कल्पो यथा । ॐ तत्सत् श्रीमन्महाभगवत आद्यब्रह्मणो द्वितीयपरार्द्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे आर्य्यावर्त्ते पुण्यक्षेत्रे मेरोर्दक्षिणपार्श्वे विन्ध्यस्योत्तरे विक्रमशके बार्हस्पत्यमानेन प्रभवादिषष्ठिसंवत्सराणां मध्येऽमुकनामसंवत्सरेऽमुकायनेऽमुकर्त्तावमुकमासेऽमुकपक्षेऽमुकतिथावमुकवारेऽमुकनक्षत्रेऽमुकराशिस्थे चन्द्रेऽमुकराशिस्थे सूर्य्येऽमुकराशिस्थे देवगुरौ शेषेषु ग्रहेषु यथायथं राशिस्थानस्थितेषु सत्सु एवं गुणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रोऽमुकवेदान्तर्गतामुकशाखाध्यायी अमुकशर्माऽहममुककर्म करिष्ये इति सङ्कल्प्याचार्य्यादिवरणं कुर्यात् । तद्यथा–अमुकगोत्रोत्पन्नोऽमुकशर्म्माहममुकगोत्रममुकवेदान्तर्गतामुकशाखाध्यायिनममुकशर्म्माणममुककर्मण्याचार्य्यं त्वां वृणे । ततोऽस्मिन्कर्मणि ब्रह्माणं त्वां वृणे इति पूर्ववद्वृणुयात् । बहुब्राह्मणसाध्येषु नवग्रहादिषु यज्ञेषु ऋत्विजं त्वां वृणे इत्यपेक्षितान् ऋत्विजो वृणुयात् । वरणसमये आचार्य्यादयः प्राङ्मुखाः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir




यजमानस्तूदङ्मुखः वृणे इति फलमक्षतान् कुशान्वा दद्यात् ॥ इतो ऽस्मि कर्म करिष्यामीति फलादिकं गृह्णीयात् । ततो गोभिलसूत्रे चतुर्थप्रपाठके मधुपर्कखण्डे आचार्य्यर्त्विग्भ्यो मधुपर्कदानस्योक्तत्वान्मधुपर्कं दद्यात् । अथवा वस्त्राभरणालङ्कारपात्रदक्षिणादिकं दद्यात् । तत्र गर्भाधान-पुंसवन-सीमन्तोन्नयनादिषु नैमित्तिकेषु कर्मसु यजमान एव कर्त्ता । एक एव ब्रह्मा ऋत्विक् । नाचार्य्यवरणम् । सप्तसु पाकयज्ञेष्वप्येवम् । ऋचसूत्रम् "ब्रह्मैव ऋत्विक् पाकयज्ञेषु स्वयंहोता भवतीति" ॥

अथ गोभिलगृह्यवतां विवाहादिकर्मसु प्रधानाज्याहुतेः प्रायशः सत्वाद्दर्शपौर्णमासस्थालीपाकतन्त्रस्य साकल्येन तत्रातिदेशासम्भवाच्च मन्दधियां सुबोधाय चरुतन्त्रं विहायाज्यतन्त्रप्रयोग उच्यते । अथ यजमानः प्रातः कृतनित्यक्रिय उद्दिष्टगृह्याकर्मादि करिष्यन् तत्तत्र कर्मणि पात्रासादनकालोक्तान्यदार्थानुपकल्प्य, प्राङ्मुखः पत्न्यासह कुशेष्वासीनः कुशपवित्रपाणिः प्राणानायम्यामुककर्म कर्तुमग्निस्थापनं करिष्ये इति सङ्कल्प्य प्राचीनप्रवणमुदीचीनप्रवणं समं वा देशमुपलिप्य, तत्र समं चतुरस्रमरत्निमात्रं स्थण्डिलं यथोक्तलक्षणं कुण्डं वा निर्माय वैश्यगृहाद्वा, ऽम्बरीषगृहाद्वा, बहुसोमयाजिनो ब्राह्मणस्य गृहाद्वा, राजन्यस्य गृहाद्वा, ऽभिन्नपात्रकपालापक्वगोमयशुष्कादिभिन्ने शुभे नवीने कांस्यपात्रेऽशक्तौ नवे शरावे वाऽग्निमाहृत्याथवा मथिताग्निं निधाय पञ्चभूसंस्कारान् कुर्य्यात् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir






तद्यथा । त्रिभिः कुशैः प्राञ्चमुदञ्चं वा स्थण्डिलस्थपांस्वादिकं परिसमूह्य त्रिर्गोमयजलेन प्रागपवर्गमुपलिप्य सव्यहस्तं भूमौ निधायाग्निस्थापनपर्य्यंतमनुत्थापयन् फलपुष्पपर्णकुशान्यतमेन स्थण्डिलस्य दक्षिणतो मध्यात्प्रागायतां द्वादशाङ्गुलां पार्थिवीं शुक्लवर्णां पीतवर्णां वा ध्यात्वा रेखामुल्लिखेत् । अथ तत्पश्चिमसंलग्नामुदगायतामेकविंशत्यङ्गुलामाग्नेयीं लोहितवर्णां ध्यात्वा रेखामुल्लिखेत्। प्रागायतरेखाया उत्तरतः प्रागायते प्रादेशमात्रे उदगायतरेखासंलग्ने सप्ताङ्गुलान्तरिते उत्तरोत्तरे क्रमेण प्रजापतीन्द्रदेवताके कृष्णनीलवर्णे द्वे रेखे उल्लिखेत् । पुनः सप्ताङ्गुलान्तरितामाग्नेयीसंलग्नां प्रागायतां द्वादशाङ्गुलां सोमदेवताकां पीतवर्णां शुक्लवर्णां वा ध्यात्वा रेखामुल्लिखेत् । ततो रेखाभ्यो मृदमुद्धृत्य स्थण्डिलस्यैशानदेशेऽरत्निमात्रे प्रक्षिप्यावाचीनहस्तेनानुगुप्ताभिरद्भिरभ्युक्षेत् । एवं भूते स्थ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ण्डिले पात्रस्थमग्निं भूर्भुवस्स्वरमुकनामानं प्रतिष्ठापयामीत्याभिमुख्येन प्रतिष्ठापयति। अथाग्निनामानि । गर्भाधाने मारुतः, पुंसवने चान्द्रमसः, शुङ्गाकर्मणि शोभनः, सीमन्ते मङ्गलः, जातकर्मणि प्रगल्भः, नामकर्मणि पार्थिवः, अन्नप्राशने शुचिः, चौलकर्मणि सभ्यः, व्रातिकादिज्यैष्ठसामान्तेषु व्रतेषु समुद्भवः, गोदाने सूर्यनामा, केशान्तेऽग्निनामा, समावर्त्तने वैश्वानरः, विवाहे योजकः, चतुर्थीकर्मणि शिखी, धृतिहोमे धृतिनामा, आवसथ्ये भवः, वैश्वदेवे पावकः, लक्षहोमे वन्हिः, कोटिहोमे हुताशनः, प्रायश्चित्ते विधिः, पाकयज्ञे साहसः, पूर्णाहुत्यां मृडः, शान्तिके वरदः, पौष्टिके बलदः, आभिचारिके क्रोधः, वश्यार्थे कामदः,—एतान्यग्निनामानि तत्तत्कर्मसु ज्ञेयानि। ततस्तूष्णीं समिधमाधाय पश्चादग्नेर्भूमौ न्यञ्चौ पाणी प्रतिष्ठाप्येदम्भूमेर्भजामह इति मन्त्रञ्जपति वस्वन्तं रात्रौ, धनमित्यन्तं दिवा । न्यञ्चकरणप्रकारश्छन्दोगपरिशिष्टे । "दक्षिणं वामतो बाह्यमात्माभिमुखमेव च । करं करस्य कुर्वीत करणे न्यञ्चकर्मणः ॥ अस्यैव भूमिजप इति सञ्ज्ञा। अस्य मन्त्रस्य प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता भूमिजपे विनियोगः। इदम्भूमेर्भजामह इदं भद्रᳲसुमङ्गलम् । परासपत्नान् बाधस्वान्येषां विन्दते वसु ॥ अन्येषां विन्दते धनम्॥ तत इमᳲस्तोममिति त्र्यृचेन हस्ताभ्यां त्रिभिः कुशैरग्निपरिसमूहनं कुर्यात् । तत्प्रकारस्तु कर्मप्रदीपे । कृत्वाऽग्न्याभिमुखौ पाणी स्वस्थानस्थौ सुसंहितौ । प्रदक्षिणं



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तथासीनः कुर्य्यात्परिसमूहनम् ॥ तिसृणां प्रजापतिर्ऋषिर्जगती छन्दोऽग्निर्देवता परिसमूहने विनियोगः । इमꣳस्तोममर्हते जातवेदसे रथमिव संमहेमा मनीषया । भद्रा हि नः प्रमतिरस्य सꣳसद्यग्ने सख्ये मारिषामा वयं तव ॥ भरामेध्मं कृणवामा हवीꣳषि ते चितयन्तः पर्वणा पर्वणा वयम् । जीवातवे प्रतराꣳसाधया धियोऽग्ने सख्ये मारिषामा वयं तव ॥ शकेम त्वा समिधꣳसाधया धियस्त्वे देवा हविरदन्त्याहुतं । त्वमादित्याꣳआवह तान् ह्युश्मस्यग्ने सख्ये मारिषामा वयं तव ॥ ततोऽस्मिन् कर्मणि ब्रह्माणं त्वा वृणे इति वृत्वा यथोपचारं यथाविभवं सम्पूज्याग्रेणाग्निं गत्वाऽग्नेर्दक्षिणतो ब्रह्मासनेऽग्निस्थण्डिलमारभ्य दक्षिणाग्रामविच्छिन्नामुदकधारां दत्वा प्रागग्रान् दर्भान् ब्रह्मासनार्थमास्तीर्य्याप्रादक्षिण्येनाग्निं प्रत्यागत्य पाचाण्यासादयति । ततो ब्रह्माऽग्नेरुत्तरतो यज्ञोपवीत्याऽऽचम्याग्रेणाग्निं गत्वा, दक्षिणत आस्तीर्णदर्भाणां पुरस्तात्प्रत्यङ्मुखस्तिष्ठन्वामहस्ताङ्गुष्ठानामिकाभ्यामास्तीर्णदर्भाणामेकं दर्भं गृहीत्वा मन्त्रेण निरस्यति। अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः परावसुर्देवता तृणनिरसने विनियोगः । निरस्तः परावसुः । इति नैर्ऋते देशे निरस्याप उपस्पृशेत् । अस्य प्रजापतिर्ऋषिर्यजुः परावसुर्देवतोपवेशने विनियोगः । आवसोः सदने सीदामि। इत्यासन उपविशति । अग्निमभिमुखीकृत्य कर्मसमाप्तिपर्य्यन्तं प्राञ्जलिर्मौनी भूत्वा प्रयोगं पश्येत् । यदि होमकर्त्ता प्रयोगमन्यथा करोति तं देववाण्या बोधयेत् । एवं कुर्वंं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



माकुर्व्वेति । यदि देववाणीं न जानाति देशभाषया प्रयोगं वदेत् । देशभाषोच्चारणप्रायश्चित्तार्थमिदं विष्णुर्वि चक्रम इत्यृचं, विष्णोरराटमसीति यजुर्वा, नमो विष्णवे इति सौत्रमन्त्रं वा जपेत् । इदं विष्णुरिति काण्वो मेधातिथिर्ऋषिर्गायत्रीछन्दो

३ २उ ३ १२ ३ १
विष्णुर्देवता जपे विनियोगः । इदं विष्णुर्विचक्रमे त्रेधा
२र ३ २ १ २ ३ २
निदधे पदं । समूढमस्य पांसुरे ॥ उपविष्टे ब्रह्मणि यजमानोऽग्नेरुत्तरतः प्रागग्रानुदगग्रान्वा कुशानास्तीर्य्य, तेषु चोक्तपात्राणि प्राक्संस्थान्युदगग्राण्यधोमुखानि यथाविनियोगमासाद्य तत्तत्कर्मोपयुक्तद्रव्याण्यासादयेत् । वचनादन्यत्रापि । शुद्धजलपूर्णपात्रं बर्हिर्मुष्टिं विंशतीध्मान्याज्यमाज्यस्थालीं स्रुवं संमार्गकुशान् जलपूर्णचमसं समिद्द्वयं तत्तत्रोक्तदक्षिणाद्रव्यञ्चासादयेत् । तान्युत्तानानि कृत्वा चमसोदकेनाभ्युक्षणम् वीक्षणं कुर्य्यात् । ततोऽग्निमुपसमाधाय पूर्वासादितबर्हिर्मुष्टिमादाय समन्तं परिस्तृणाति । पवित्राद्यर्थं किञ्चिदवशेषयेत् । पुरस्ताद्दक्षिणत उत्तरतः पश्चात् सर्वतस्त्रिवृतं पञ्चवृतं वा प्रागग्रैर्बहुदर्भैः परिस्तरेत् । पश्चादास्तृतदर्भाग्रैः पूर्वपरिस्तृतदर्भाणां मूलान्याच्छादयेत् । अवान्तरदिक्षु परिस्तृतदर्भाणां संयोगः । ततः पूर्वासादितविंशतीध्मकाष्ठान्यादाय प्रजापतिं मनसा ध्यात्वा, तूष्णीमग्नौ प्रक्षिपेत् । तत आस्तृतबर्हिश्शेषात्कुशौ समावप्रच्छिन्नाग्रावनन्तर्गर्भौ समादाय प्रादेशमात्रे पवित्रे कुरुते । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः पवित्रे देवते पवित्रच्छेदने विनियोगः । पवित्रे स्थो वैष्णव्यौ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



इतिमन्त्रेणौषधिश्रीह्यादिकमन्तर्द्धाय छिनत्ति न नखेन । अप उपस्पृश्य वामहस्तेन पवित्रमूलं धृत्वा, प्रजापतिऋर्षिर्यजुः पवित्रे देवतेऽनुमार्ज्जने विनियोगः । विष्णोर्मनसा पूते स्थः । इतिमन्त्रेण दक्षिणहस्तेनाद्भिः प्रक्षालयति । ततः स्वपुरत आज्यस्थाल्यामुदगग्रे पवित्रेऽन्तर्द्धाय, तत्राज्यमवनीय, हस्तयोरङ्गुष्ठानामिकाभ्यां धृताभ्यामुदगग्राभ्यां पवित्राभ्यामाज्यं प्राक्संस्थिरुत्पुनाति सकृन्मन्त्रेण द्विस्तूष्णीम् । प्रजापतिऋर्षिर्यजुराज्यं देवताऽऽज्योत्पवने विनियोगः । देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः ॥ अविमुञ्चन्पवित्रेऽद्भिरभ्युक्ष्याग्नौ प्रहरेत् । उत्पूतमाज्यमग्नौ संस्थाप्याग्नेरुत्तरत उद्वासयेत् । ततः स्रुवमादाय प्रक्षाल्य प्राक्संस्थं संमार्गकुशैर्मूलादारभ्य तदग्रदेशाभिमुखं सम्मृज्याग्नौ प्रताप्य, जलेनाभ्युक्ष्य पुनः प्रतितप्याज्यस्थाल्या उत्तरतो निदध्यात् । तत अग्नेः पश्चादास्तृतबर्हिष्याज्यं तदुत्तरतः स्रुवं चासादयेत् । अग्निमुपसमाधाय तूष्णीं परिसमूह्य दक्षिणजानु भूमौ संस्थाप्य, चमसोदकमादायाग्नेर्दक्षिणतो निर्ऋतिमारभ्याग्निदिक्पर्य्यन्तं सन्ततामुदकधारामञ्जलिना कुर्याददितेऽनुमन्यस्वेतिमन्त्रेण । एवमग्नेः पश्चान्निर्ऋतिमारभ्य वायुदिक्पर्य्यन्तमञ्जलिना सिञ्चे ःनुमतेऽनुमन्यस्वेतिमन्त्रेण । अग्नेरुत्तरतो वायुदिशमारभ्यैशानीपर्य्यन्तमञ्जलिनोदकधारां कुर्य्यात्सरस्वत्यनुमन्यस्वेतिमन्त्रेण । एषां त्रयाणां मन्त्राणां प्रजापतिर्ऋषिरेकपदा गायत्रीछन्दोऽदित्यनुमतिसरस्वत्यो देवता उदकाञ्जलिसेचने विनियोगः । अदितेऽनुमन्यस्व ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अनुमतेऽनुमन्यस्व । सरस्वत्यनुमन्यस्व ॥ ततोऽञ्जलिनोदक-मादाय देवसवितरित्यनेन मन्त्रेण सकृत्त्रिर्वाऽग्निं परिषिञ्चति । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्यजुः सविता देवताऽनुपर्य्युक्षणे विनियोगः । देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्वः । केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥ अथ पर्य्युक्षणप्रकारः । पर्य्युक्षणारम्भकोटिमभ्यन्तरत अवसानकोटिञ्च बहिः कुर्वन् होमीयद्रव्यं पर्य्युक्षणधारायाः अभ्यन्तरतः कुर्वन् परिषिञ्चेत् । ततः समित्पुष्पाक्षतानादाय प्रपद्ये विरूपाक्षञ्जपेत् । तद्यथा, तपश्चेत्यारभ्य प्रपद्य इत्यन्तम-नुच्छ्वसन्नर्थमनस्को जपित्वा, विरूपाक्षोसीत्यारभ्योच्छ्वसन्नि-गदशेषञ्जपित्वाऽक्षतपुष्पाणि प्रादक्षिण्येन समाचाराद्ब्रह्मणे दत्वा, तथैव हस्तं पर्य्यावृत्याग्नौ समिधं क्षिपेत् । अस्य मन्त्रस्य प्रजापतिर्ऋषिर्निगदो रुद्ररूपोऽग्निर्देवता जपे विनियोगः। तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यञ्चाक्रोधश्च त्यागश्च-धृतिश्च धर्म्मश्च सत्वञ्च वाक् च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु भूर्भुवः स्वरों महान्तमात्मानं प्रपद्ये । विरूपाक्षोसि दन्तांजिस्तस्य ते शय्यापर्णे गृहा अन्तरिक्षे विमितर्ंहिरण्ययं तद्देवानांहृदयान्ययस्मये कुम्भे अन्तः सन्निहितानि तानि बलभृच्च बलसाच्च रक्षतो प्रमनी अनिमिषतः सत्यं यत्ते द्वादशपुत्रास्ते त्वा संवत्सरेसंवत्सरे कामप्रेण यज्ञेन याजयित्वा पुनर्ब्रह्मचर्य्यमुपयन्ति त्वं देवेषु ब्राह्मणोस्यहं मनुष्येषु ब्राह्मणो वै ब्राह्मणमुपधावत्युप त्वा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



धावामि जपन्तं मा माप्रतिजापीर्जुह्वन्तं मा माप्रतिहौषीः कुर्वन्तं मा माप्रतिकार्षीस्त्वां प्रपद्ये त्वया प्रसूत इदं कर्म करिष्यामि तन्मे राध्यतां तन्मे समृध्यतां तन्म उपपद्यताऽसमुद्रो मा विश्वव्यचा ब्रह्माऽनुजानातु तुथो मा विश्ववेदा ब्रह्मणः पुत्रोऽनुजानातु श्वात्रो मा प्रचेता मैत्रावरुणोऽनुजानातु तस्मै विरूपाक्षाय दन्ताञ्जये समुद्राय विश्वव्यचसे तुथाय विश्ववेदसे श्वात्राय प्रचेतसे सहस्राक्षाय ब्रह्मणः पुत्राय नमः ॥ ततः स्रुवेणाज्यमादाय व्याहृतिभिर्जुहुयात् । व्याहृतीनां विश्वामित्र-जमदग्निभरद्वाजा ऋषयो, गायत्र्युष्णिगनुष्टुप्छन्दांसि, अग्निवायुसूर्य्या देवता, आज्यहोमे विनियोगः । भूः स्वाहा । अग्नय इदं न मम । भुवः स्वाहा । वायव इदं न मम । स्वः स्वाहा । सूर्य्यायेदं न मम । एवमाज्येन व्याहृतित्रयं हुत्वा, तत्रतत्रोपदिष्टप्रधानाज्याहुतीः कुर्यात् । येषु पुंसवना दिषु प्रधानाज्याहुतयो नोपदिष्टास्तानि कर्म्माणि व्याहृतित्र-यहोमान्ते कर्त्तव्यानि । एवं प्रधानाज्याहुतीः प्रधानकर्म्माणि वा कृत्वा, व्याहृतित्रयमाज्येन हुत्वा, तूष्णीं समिधमाधाय, प्रायश्चित्तार्थं पुनर्व्याहृतिचतुष्टयं हुत्वा, देवसवितरिति पूर्वव-त्पर्य्युक्ष्योदकाञ्जलिसेचनं कुर्य्यात् । तत्र विशेषः । अदिते ऽन्वमᳲस्थाः । अनुमतेऽन्वमᳲस्थाः । सरस्वत्यन्वमᳲस्थाः । ऋ-ष्यादयः पूर्ववत् । तत आस्तृतबर्हिरादायाज्येऽग्राणि मध्यानि-मूलानि त्रिरवदध्यात् । प्रजापतिर्ऋषिर्यजुर्विश्वेदेवा देवता बर्हिरभ्यञ्जने विनियोगः । अक्तुᳲरिहाणा व्यन्तु वयः । इति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



स्थानभेदान्मन्त्रावृत्तिः । अथाक्तं बर्हिरद्भिरभ्युक्ष्य, प्रजापतिर्ऋषिरनुष्टुप्छन्दो रुद्रो देवता बर्हिर्होमे विनियोगः । यः पशूनामधिपती रुद्रस्तन्तिचरो वृषा । पशूनस्माकं मा हिंसीरेतदस्तु हुतं तव स्वाहा ॥ पशूनामधिपतये रुद्राय तन्तिचरायेदं न मम । अप उपस्पृश्य ततः स्रुवेण वसुभ्यः स्वाहेत्याज्यं जुहुयात् । प्रजापतिर्ऋषिर्यजुर्वसवो देवता होमे विनियोगः । वसुभ्यः स्वाहा । वसुभ्य इदं न मम । ततो हविः शेषमुत्तरत उद्वास्य ब्रह्मणे तच्चोक्तद.चिणां दद्यात् । ओमद्यकृतैतदमुककर्मणः साङ्गतासिद्ध्यर्थमिमां यथाशक्ति दक्षिणां ब्रह्मणे सम्प्रददे न मम । ततोऽग्निं परिक्रम्य नमस्कृत्य चमसं निनीय पूरयित्वा, प्रतिष्ठाप्याग्निं प्रार्थयेत् । आरोग्यमायुरैश्वर्य्यं धीधृतिः शं बलं यशः । ओजो वर्चः पशून्वीर्य्यम्ब्रह्म ब्राह्मण्यमेव च ॥ सौभाग्यं कर्मसिद्धिञ्च कुलज्यैष्ठ्यं सुकर्त्तृताम् । सर्वमेतत्सर्वसाक्षिन्द्रविणोद रिरीहि नः ॥ ततस्सर्वत्र कर्मान्तेऽनुष्ठितामुककर्मणोऽङ्गवैकल्यदोषपरिहाराय साद्गुण्यसिद्धये च यथाशक्ति हिरण्यदानं करिष्ये इति सङ्कल्प्य हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ अनुष्ठितस्यामुककर्मणो वैगुण्यपरिहारं साद्गुण्यसिद्धिं कामयमानः इदमाग्नेयं हिरण्यं ब्राह्मणेभ्यस्सम्प्रददे । ततो ब्राह्मणभोजनसङ्कल्पः । अनुष्ठितामुककर्माङ्गं यथाशक्ति यथासम्भवं ब्राह्मणभोजनं करिष्ये । ततो वामदेव्यगानम् । वामदेव्यस्य वामदेवऋषिर्गायत्री छन्द इन्द्रो देवता शान्तिकर्मणि जपे विनि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



३ र ४ २ ४र ५ १ र२१र २
योगः । काऽ५ूया । नश्चाऽ३इचा३आभुवात् । ऊ । तीसदावृधः
१ २ र २ १ २^ ३ र २
स । खा । औ३होहाइ । कया२३शचाइ । ष्ठयौहो३ ।
१ — १ २ ३ र ५ २
हुम्मा२ । वा२र्त्ता३ऽ५चाइ ॥ १ ॥ काऽ५स्त्वा । सत्या३मा३-
४ ५ १ २र १ २ १ १ २ र २
दानाम् । मा । हिष्ठोमात्सादन्ध । सा । औ३होहाइ ।
१ २^ ३ र २ १ — १ २
दृढा२३चिदा । रुजौहो३ । हुम्मा२ । वाऽ२सो३ऽ५हायि ॥ २ ॥
३ र ४ २ ४ ५ १ २र १ २र १
आऽ५भी । षुणा३:सा३खीनाम् । आ । विताजरायितॄ । णाम् ।
र २ १ २^ ३ र २ १ —
औ२३होहायि । शता२३म्भवा । सियौहो३ । हुम्मा२ ।
१ २
ताऽ२यो३ऽ५हायि ॥ ३ ॥ ततो भगवत्स्मरणम् । तद्यथा ।

अस्मिन्कर्मणि मध्ये सम्भावितमन्त्रलोपतन्त्रलोपक्रियालोपन्यूनातिरिक्तविपर्य्यासविस्मृताङ्गविध्यपराधप्रायश्चित्तार्थं विष्णोः स्मरणं करिष्ये इति सङ्कल्प्य, विष्णो विष्णोविष्णाविति बहुवारं वदेत् । प्रमादात्कुर्वतां कर्म प्रच्यवत्यध्वरेषु यत् । स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ ततः कृतं कर्म ब्रह्मार्पणं कुर्यात् । ब्रह्मार्प्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ ब्रह्मण्याधाय कर्माणि सङ्गन्त्यक्त्वा करोति यः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ इति पठित्वा मयाऽनुष्ठितं कर्म ॐ तत्सद्ब्रह्मार्प्पणमस्तु ।

ततो यजमान आचार्य्यो वा प्रार्थयेत् । तद्यथा—स्वस्तिमन्त्रार्थास्सफलास्सन्त्विति भवन्तो महान्तोऽनुगृह्णन्तु । तथास्त्विति प्रतिवचनम् । अस्य सकुटुम्बस्य यजमानस्य वेदोक्तं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दीर्घमायुर्भूयादिति भवन्तो महान्तोऽनुगृह्णन्तु । तथास्तु । अनेनानुष्ठितमिदं कर्म यथोक्तं यथाशास्त्रमच्छिद्रमविकलं साङ्गं सुगुणं भूयादिति भवन्तो महान्तोऽनुगृह्णन्तु । तथास्तु । अनुष्ठितेऽस्मिन्कर्मणि मन्त्र-तन्त्र-द्रव्य-क्रियालोप-श्रद्धाजाड्यादयस्सर्वे दोषाश्शान्ता भूयासुरिति भवन्तो महान्तोऽनुगृह्णन्तु । तथास्तु । अनेन कर्मणा परमेश्वरस्सुतृप्तस्सुप्रसन्नो भूत्वाऽस्य यजमानस्य तथास्तु झटित्येव वाञ्छितार्थसिद्धिप्रदो भूयादिति भवन्तो महान्तोऽनुगृह्णन्तु । तथास्तु । अस्य यजमानस्य गृहे द्विपदाञ्चतुष्पदाश्चारोग्यं दीर्घमायुश्च भूयादिति भवन्तो महान्तोऽनुगृह्णन्तु । तथास्तु । इति सम्प्रार्थयेत् ॥

इतिश्रीमद्राजाधिराजश्रौतस्मार्त्तानुष्ठानतत्परोदयप्रतापाद्यादत्तदेववर्मसोमयाजिनो निदेशेन सुब्रह्मण्यविदुषा विरचितोऽयं मण्डपपूजादिप्रयोगः समाप्तः ॥

॥ शुभमस्तु ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

# मण्डपपूजादिप्रयोगशुद्धिपत्रम् ।

| अशुद्धम् | शुद्धम् | पृष्ठे | पं० |
|---|---|---|---|
| मवाह्नयामि | मावाह्नयामि | ७ | ४ |
| ऐशानकेणे | ऐशानकोणे | ० | ६ |
| १<br>त्वचा | १ २<br>त्वचा | १८ | ५ |
| र रर<br>देवजू | २र र<br>देवजू | ० | ६ |
| २<br>कता३ | २<br>कता३ | ० | १० |
| —<br>आर। | २ —<br>आर। | २७ | ११ |
| ३ २ ३ १ २<br>प्रमणंतमोजसा<br>१— १ | ३ २ ३ १ २<br>प्रमणंतमोजसा<br>१— २र | २८ | १२ |
| यदायुः | यदायुः | ३० | १४ |
| ३ ३ २<br>नःपूषा | २ ३ २<br>नःपूषा | ० | १५ |
| ३<br>स्ताद्या | ३<br>स्तार्द्यो | ० | १६ |
| तद्यथा | यथा | ४८ | १ |
| सल्लग्ना | संलग्ना | ० | ६ |
| | (एवमग्रेपि) | | |

इति शुद्धिपत्रम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal